॥ श्री ॥

हरिदास संस्कृत ग्रन्थमाला
१९१

महाकविभवभूतिविरचितम्—

उत्तररामचरितम्

चन्द्रकला-विद्योतिनी-व्याख्याद्वयोपेतम्

व्याख्याकार —
धर्मशास्त्राचार्य काव्यतीर्थ साहित्यसुधाकरो महोपाध्याय
श्रीशेषराजशर्मा रेग्मीः
प्राध्यापक त्रिभुवनविश्वविद्यालय नेपाल।

टिप्पणी (नोटस) लेखक —
श्रीकान्तानाथशास्त्री तेलङ्गः, एम. ए.
काशीहिन्दूविश्वविद्यालयसंस्कृतविभागाध्यापक।

चौखम्बा संस्कृत सीरीज आफिस वाराणसी-१
१९६६

THE
HARIDAS SANSKRIT SERIES
191
*****

UTTARARĀMACHARITAM

OF

MAHĀKAVI BHAVABHŪTI

Edited with

The Chandrakalā And Vidyotinī Sanskrit And
Hindī Commentaries.

By

S'rī S'eṣaraja Sharma Regmī
(Professor, Tribhuvan University, Nepal.)

And

With Notes By
S'rī Kantānātha Shastrī Telanga M. A.
(Professor, B. H. U. Varanasi.)

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
P. O. Chowkhamba, Post Box 8,
VARANASI-1 (India)

उदाहारः

सुरभारतीपरिचरणप्रयताऽन्तःकरणानां सदाचारशरणानां भारतीयसंस्कृति-संरक्षणतत्पराणां श्रीमतां तत्रभवतां भवतामतिरोहित एषोऽर्थो यद्विश्वसाहित्ये नाटकस्य कीदृशं स्थानमिति।

यद्यपि कविकर्मनिर्वहणप्रवणानां समेष्वपि साहित्याङ्गेषु परममहदुत्तरदायित्वं, परं नाटकाऽभिधानेन समुपनिबद्धे प्रबन्धे ग्रन्थकारस्य यादृशः कार्यभारस्तथा नेतराङ्गेषु। इममेवार्थं लक्ष्यीकृत्य व्यलेखि भरतेन महामुनिना—

'न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म नाटके यन्न दृश्यते॥' इति।

तादृशस्य नाटकस्योत्पत्तिविषये विदुषां सुमहान्मतभेदः परिलक्ष्यते। 'नाटकस्य पूर्वप्रादुर्भावो यवन (ग्रीस) देशात्तत एव भारतीया आर्यास्तस्य निर्माणमभिनयं च शिक्षितवन्त' इति बहूनां प्रतीच्यविदुषां तदनुसारिणां चाऽभिमतम्। अत्रार्थे ते भारतीयनाटके प्रयुज्यमानं यवनिकाशब्दमुदाहरन्ति।

परं वेदसंहितायां, ब्राह्मणभागे, प्राचीनमहाकाव्ये, पाणिनीयायामष्टाध्याय्यां पातञ्जले महाभाष्ये च पुरातननाटकानां बहूनि निदर्शनानि समुपलभ्यन्ते। एवं च रामायणे 'व्यामिश्रक' शब्दः संस्कृतप्राकृतनाटकाऽर्थे प्रयुक्तः। अष्टाध्याय्यां 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४।३।११०) 'कर्मन्दकृशाश्वादिनिः' (४।३।१११) इति सूत्रद्वये महामुनिना पाणिनिना शिलालिकृशाश्वयोर्नटसूत्रयोरुल्लेखो व्यधायि। महाभाष्ये च 'शौभिक-शौभिका-शोभनिका-' प्रभृतिशब्दैः सुकृतिना मुनिवरपतञ्जलिना भारते नाट्यरङ्गस्य विद्यमानता स्फुटीकृता। तत्रैव च 'बालिवध-कंसवध' प्रभृतिशब्दानां च प्रयोगोऽवलोक्यते। किं बहुना? मगधराजो बिम्बसारो नागराजसंमाननाय नाटकाऽभिनयमकारयत्। बुद्धदेवश्च नाट्याभिनयस्याऽकर्तव्यतामुपादिशत्तदनुशासने। इत्थं चाऽतिपुरातनाद्-निर्दिष्टसमयादारभ्य वेदशास्त्रलोकमय्यां प्रयोगस्थानत्रितय्यामपि भारते वर्षे नाटक-प्रचारपर्यालोचनया 'भारतीया नाटकं यवनदेशाज्जगृहुरि' ति मतं सर्वतोभावेन दुर्विदग्धानामज्ञानविजृम्भितम्।

अथाऽवशिष्टो यवनिकाशब्दविचारः। शुद्धः शब्दो जवनिका यमनिका वा वर्तते। ततो यवनिकापदं यमनिकाया अपभ्रंशरूपेणैव सर्वसाधारणप्रयोगेषु लब्धाऽऽस्पदम्। अतस्तदाधारेणाऽपि नाटकेषु भारतीयान्प्रति यवनानां नोत्तमर्णत्वं संभवतीति सर्वं सुस्थम्।

सन्ति यद्यपि संस्कृतसाहित्ये नाटकनिर्मातारो बहवः प्रमातारः परं तत्राऽपि लोकाऽतिशायियशोराशिसमुद्भासितौ कविवरौ द्वावेव-विश्वविदितमहानुभूतिर्भवभूतिरेको द्वितीयश्चाऽद्वितीयो भारतीविलासः कविकुलगुरुः कालिदासः।

तत्राऽस्मदीयप्रकृतकृतिसम्बद्धस्य भवभूतेः परिचयाऽर्थं कतिपयाः शब्दाः समुपह्रियन्ते तावत्। अस्य कृतिवरस्य कृतित्वेन समासादितानि त्रीणि रूपकाणि वर्तन्ते। अत्राऽपि 'महावीरचरितमुत्तररामचरितं' चेति भगवच्छ्रीरामचरितप्रतिपादकं नाटकद्वितयं, तृतीयं रूपकं 'मालतीमाधवा'ऽभिधानमनितरसाधारणं प्रकरणम्।

यशःप्रकाशेन कालिदासेन स्वकीयसंस्तवसंसूचने यथा सर्वथा विहितोपेक्षा, न तथा साहित्यसुधासूतिना भवभूतिनेति तदीयपरिचयवितरणार्थं तत्कृतित एव कश्चिदंशः समुद्ध्रियते। रावणवधं यावच्चित्रितरामचरिते महावीरचरिते सूत्रधारो नाटककारं निर्दिशति—'अस्ति दक्षिणापथे पद्मपुरं नाम नगरम्। तत्र केचित्तैत्तिरीयाः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिन उदुम्बरा ब्रह्मवादिनः प्रतिवसन्ति। तदामुष्यायणस्य तत्रभवतो वाजपेययाजिनो महाकवेः पञ्चमः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्तेर्नीलकण्ठस्यात्मसंभवः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम जातुकर्णीपुत्रः कविर्निसर्गसौहृदेन भरतेषु वर्तमानः स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान्' इत्यादि। मालतीमाधवेऽपि कविर्विषयेऽस्माकमित्यत्र भवन्तो विदाङ्कुर्वन्तु।

> 'श्रेष्ठः परमहंसानां महर्षीणामिवाऽङ्गिराः।
> यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥' इति।

एतस्मात्सन्दर्भादित्थं प्रतीयते यदयं महाकविर्महाकव्यभिख्याद्वाजपेययाजिनः स्वपूर्वपुरुषात्पञ्चमो विदर्भ-(बरार)देशस्थपद्मपुरनगरवास्तव्यो गोत्रेण काश्यपः कृष्णयजुर्वेदीयतैत्तिरीयशाखाऽध्यायी नाम्ना श्रीकण्ठ आसीत्। अस्य जननी जातुकर्णी, जनको नीलकण्ठः, पितामहो भट्टगोपालो, गुरुश्च ज्ञाननिधिर्नाम।

मालतीमाधवेऽपि सदाशयस्याऽस्य प्राय एतादृश एव परिचयः, परं तत्रोत्तररामचरिते च 'पदवाक्यप्रमाणज्ञ' इत्येतदपि महाकविना स्वीयं विशेषणं समुप-

वर्णितम् । महाकविरयमभिधानेन श्रीकण्ठ उपाधितश्च भवभूतिरासीदित्ययं विषयो निर्विशयमस्माभिः प्रकृतनाटकव्याख्योपक्रमे समाहितः । परं रूपकत्रितयेऽपि कथिताऽयं भवभूतिरिति विश्रुतित एव सहृदयश्रुतिपदवीं प्रापितः । मालतीमाधवस्यैकस्मिन्पुराणे हस्तलिखितपुस्तके 'प्रकरणमिदं कुमारिलशिष्यस्योम्बेकाचार्यस्ये'—ति निर्दिष्टम् । उम्बेकाचार्यश्च निखिलविद्वत्कुलललामकुमारिलभट्टकृतस्य श्लोकवार्तिकस्य टीकाकारत्वेन प्रसिद्धः । एवं च चित्सुखाचार्यप्रणीततत्त्वप्रदीपिकाऽऽख्यस्य विख्यातवेदान्तग्रन्थस्य व्याख्याकारेण ग्रन्थकृत्कृत उम्बेकनामचर्चाप्रसङ्गे भवभूतेरुम्बेकस्य च तादात्म्यप्रतिपादनेनाऽप्यस्याऽर्थस्य समर्थनं भवति ।

परमत्रार्थेऽयं विमर्शः—भवभूतिना स्वगुरुर्ज्ञाननिधिरिति वर्णितो न कुमारिलभट्टस्तत एतल्लेखनं न प्रमाणपदवीमारोढुमीष्ट इति केचित् । अस्मन्मते तु कुमारिलभट्टस्यैव नामान्तरमुपाधिर्वा ज्ञाननिधिरिति संभवेत् । 'परमहंसानां श्रेष्ठ' इति ज्ञाननिधेर्विशेषणदर्शनात्तस्योत्तरमीमांसाचार्यत्वमेव सिध्येत्, कुमारिलभट्टस्तु पूर्वमीमांसायामेव निष्णात आसीदतः कथं नाम ज्ञाननिधिकुमारिलयोरैक्यं प्रतीयत इति विप्रतिपत्तौ—यस्मिन् विषये विदुषां कृतिः समासाद्यते तदितरविषये तेषामाचार्यत्वं न संभवतीत्येषा किमीश्वरस्यादेश उताहो राज्ञः ? कुमारिलभट्टो वेदान्तेऽपि कृतभूरिपरिश्रम आसीदित्ययं विचारः—

> 'इत्याह नास्तिक्यनिराकरिष्णुरात्माऽस्तितां भाष्यकृदत्र युक्त्या ।
> दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेन ॥'

श्लोकवार्तिकस्थितयैतया तदुक्त्या परिपोषमाप्नोति । अपरं च तदानीन्तना आचार्याः प्रगाढाऽध्ययनाऽनन्तरमेव तत्तन्मतानां खण्डनमण्डनादिव्यापारेषु प्रसिता अभूवन्न त्विदानीन्तनमनीषिण इव स्वोत्प्रेक्षितवचनबलादेव तादृशव्यवसायमकार्षुः ।

यद्वा किमेकस्य शिष्यस्य गुरुबाहुल्यं न संभवति ? 'नैकः सर्वं विजानाती'ति नयेन तत्तच्छास्त्रेषु तत्तद्विशिष्टगुरुगवेषणमनीषयैकस्यापि शिष्यस्य बहवो गुरवः स्युः । इत्थं च भट्टोम्बेकाऽपरपर्यायस्य भवभूतेः पूर्वमीमांसायां कुमारिलभट्ट उत्तरमीमांसायां च ज्ञाननिधिर्नाम गुरुरासीदित्यपि संभावनापदवीमारोहति । अपरं चोत्तररामचरिते चतुर्थेऽङ्के 'दाण्डायन-सौधातकि-' संलापे 'समांसो मधुपर्क' इत्याकारकशब्दकदम्बकं मीमांसकवदस्य भवभूतेः श्रौतकर्मसमर्थकं दृश्यते । इत्थमेव 'पदवाक्यप्रमाणज्ञ' इत्येतद्विशेषणमस्य धीरधुर्यस्य मीमांसकत्वमपि स्फुटं

प्रतिपादयति । एवं श्लोकवार्तिके तात्पर्यटीकाया रचयिता नाम्नोम्बेकः, परं तत्र भट्टपदस्य पूर्वसन्नियोगेन भट्टोम्बेक इति यादृक् समुपदर्शितस्तादृगेव भवभूतेः पितामहोऽपि भट्टगोपालः । अयमप्यभिधानेन गोपालो भट्टपदस्य पूर्वसन्निवेशेन भट्टगोपाल इति स्यात् , यतो भट्टपदं नाम्नो रूपेण तदेकदेशत्वेन वा न कुत्राऽप्युपयुज्यते; विशेषणरूपेणैव प्रयुज्यमानत्वात् । शास्त्रचतुष्टयवेत्ता भट्टपदोपाधिको भवति । इत्थं च भट्टगोपालनामसादृश्यादपि भवभूतिभट्टोम्बेकयोरेकभूयत्वं संगच्छते ।

अपरमिदमपि प्रमाणं तथ्यकोटिमाटीकते—तात्पर्यटीकायाः प्रक्रमे भट्टोम्बेकेन 'ये नाम केचिदिह नः' इति श्लोकोऽवतारितः । स्फुटमेवैष श्लोको भवभूतिकर्तृको मालतीमाधवप्रकरणे सूत्रधारमुखतो वर्णितः । अतो निःसङ्कोचं शक्यते वक्तुमेतद्यथा कालिदासेन केचिच्छ्लोका रघुवंशकुमारसंभवयोः समानरूपेणाऽवतारितास्तथैव भवभूतिना स्वप्रणीतकृतिद्वितयेऽपि श्लोक एषोऽविशेषरूपेण विचक्षणानां लोचनगोचरीकृतः ।

ननु ग्रन्थ उद्धरणादेव यस्य कस्याऽपि श्लोकस्य ग्रन्थकर्तृकर्तृकत्वं स्यात्तदा सुगृहीतनामधेयेन कुमारिलभट्टेन निजग्रन्थे 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तय' इत्युद्धृतस्य कालिदासीयश्लोकार्द्धस्यापि तदीयत्वं स्यादत इयं युक्तिर्विचारसहा नेति चेन्न । लौकिकोक्तेरपि शास्त्रार्थे क्वचिदुपादेयत्वाद्भट्टपादेन प्रामाणिकरूपेणोद्धृतमिदं श्लोकार्द्धम् , परं भट्टोम्बेकेन स्वनिर्मितग्रन्थान्तरश्लोक उपोद्घातत्वेनाऽवतारितः । ग्रन्थारम्भ एव परकर्तृकश्लोकं न कोऽपि मतिमान्विन्यस्येत् ।

यद्येवं तर्हि कुमारिलभट्टेन श्लोकवार्तिकप्रारम्भे—

> 'विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
> श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे ॥'

इति सप्तशत्यङ्गभूतस्य कीलकस्तोत्रस्याऽऽद्यः श्लोकः कथमुद्धृत इति चेन्न । अस्य परकर्तृकत्वेऽपि शङ्करनमस्कारात्मकेन यज्ञप्रणिपाताकारेण वा मङ्गलरूपेण कुमारिलभट्टकृतं प्रदर्शनं नाऽस्मदीयमतप्रतिकूलम् । एतत्प्रातिलोम्येन 'ये नाम'-त्यादि पद्यं तु न मङ्गलप्रयोजनकं, प्रत्युत स्वकृतिषु परोद्भावितदोषकषायितचेतसा सुमेधसा भवभूतिना स्ववैशिष्ट्यप्रकटीकरणायैव विन्यस्तमिति भवभूतिभट्टोम्बेकयोः सत्ता नाऽन्योन्याभावगर्भेति सर्वं निरवद्यम् ।

भवभूतिग्रन्थतस्तस्य समयचरितादिविषयः पूर्वोल्लिखिताऽतिरिक्तो न प्राप्यते। अस्य महाकवे रूपकत्रयमपि कालप्रियानाथोत्सवेऽभिनीतमासीदिति तत्रैव व्यक्तं विभाव्यते। अयं कालप्रियानाथ उज्जयिनीस्थो महाकालेश्वर इत्यवसीयते।

भारतीयकविविलक्षणेन विचक्षणपुङ्गवेन कविवरकह्लणेन स्वकृतेतिहासमय्यां राजतरङ्गिण्याम्—

'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्॥'

श्लोकोऽयं काश्मीराऽधीश्वरस्य मुक्तापीडललितादित्यस्योत्कर्षवर्णनेऽभिहितः। ललितादित्येनाऽऽयत्तीकृतस्याऽस्यैव कान्यकुब्जाऽधीशस्य यशोवर्मणः सभायां भवभूतिः सभास्तार आसीत्। यशोवर्मसमयश्च प्रायः सप्तपञ्चाशदधिकसप्तमशतकं विक्रमीयमित्यैतिहासिकैरङ्गीकृतमतोऽयमेव कालो भवभूतेरपीति मन्तव्यः।

अयं महाकविरुज्जयिन्यां, कान्यकुब्जे, काश्मीरे चैवमन्यत्राऽपि सततं पर्यटनशील आसीत्, कालिदास-बाणभट्टादिवज्जीविताऽवस्थायां न तादृशीं प्रतिष्ठामापेति विषयोऽस्यैव जातपूर्वचर्चमालतीमाधवस्थादेतस्मात्पद्यादनुमातुं शक्यते—

'ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥' इति

अस्य निरीक्षणेन महाकवेः खिद्यमानमानसत्वं साधारणमानवानामप्यतिरोहितं भवति। स्वाश्रयदातुर्यशोवर्मदेवस्य पराजयेनाऽपि तस्य हृदये प्रकाशरूपेण निर्वेदातिशयो लब्धाऽवकाशः स्यादित्ययमप्यर्थ ऊहितुं शक्यते। 'उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी'त्येतत्कथनेन तादृशेऽपि काले कविवरे स्वभावोचितस्याऽऽत्माऽभिमानस्य सत्त्वं कस्य सचेतसश्चेतसि स्वकीयं महत्त्वं न स्थापयति। यथाऽयं कविवरोऽलौकिक्या काव्यशक्त्या परमाऽनुपमस्तथैव शास्त्रीये पाण्डित्ये चाऽत्युद्भट एवाऽऽसीदितीयं वार्ताऽदसीयाभिन्नस्थान्मालतीमाधवीयपद्यादवसीयते—

'यद्वेदाऽध्ययनं तथोपनिषदां सांख्यस्य योगस्य च
ज्ञानं तत्कथनेन किं ? न हि ततः कश्चिद् गुणो नाटके।
यत्प्रौढत्वमुदारता च वचसां यच्चार्थतो गौरवं
तच्चेदस्ति, ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः॥' इति।

अस्मादिव हेतोः कविवरेण स्वीया समस्ताऽपि कृतिः प्रायो गौडीरीत्या महताऽऽडम्बरेण प्रकाशिता, परं यत्र कुत्राऽपि वैदर्भी रीतिरभ्युपगता तत्राऽप्यधिगता प्रकर्षाधिक्यात्पूरिता सफलता। किं बहुना स्वविषय एतदीयकथनमेतत्तथ्यपूर्णं वर्वर्ति—

'यं ब्रह्माणमियं देवी वाग्वश्यैवाऽन्ववर्तत।' इति। (२।२)

अस्य शास्त्रीयपाण्डित्यव्यञ्जकानि कानिचिदुदाहरणानि प्रदर्श्यन्ते—महावीरचरिते कविवरेण पुरोधःप्रशंसायां 'राष्ट्रगोपः पुरोहित' इत्याकारक ऐतरेयब्राह्मणस्य कश्चिन्मन्त्र उद्धृतः।
उत्तररामचरितस्य चतुर्थाङ्के जनकाऽऽननादेव 'असूर्या नाम ते लोका' इत्यादिवाक्यानि निर्गमय्य भवभूतिनेशावास्योपनिषद्विज्ञता विज्ञप्ता। तत्रैव—

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वापि प्रविलयः कृतः॥' इति (६।६)।

अनेन श्लोकेन कृतिवरेणाऽद्वैतवेदान्तसिद्धान्त उद्भासितः। मालतीमाधवे च महाकविना योगे तन्त्रे च स्वस्यापरतन्त्रत्वं विशदीकृतम्। इत्थमापातत आलोकनेनाऽप्यस्य लोकोत्तरं वैदुष्यमवसीयते।

साम्प्रतं भवभूतिकालिदासयोर्थाऽऽशिकतुलनोपकल्प्यते। बाह्यजगच्चित्रणे यथा कालिदासः सफलप्रयासस्तथैवाऽन्तर्जगदालेख्यलेखने श्लाघनीयाऽनुभूतिर्भवभूतिरिति। स्वविषयसाफल्ये द्वावपि कविमूर्धन्यौ परमधन्यौ चेति समसम्मत्या निश्चप्रचं शक्यते वक्तुम्।

'एक एव भवेदङ्गी शृङ्गारो वीर एव वा' इत्याकारकाऽऽलङ्कारिकनयपरिसरणपुरःसरं कालिदासेनाऽवश्यमेव स्वीयं पुरातनसिद्धान्तपारवश्यं प्रकाशितं, परं कविकुलकुमुदसुधासूतिना भवभूतिनाऽत्र विषये नैजं प्रत्ननियमाऽनिघ्नत्वं निर्विघ्नमेव प्रसाधितम्। सहृदयहृदयद्रावकः करुणविप्रलम्भ एनेनैव महाकविना शृङ्गारवीररसकक्षायामवतारित इतीयमेव का कथा? सर्वथा स्वयुक्तिशक्त्येतरेषां समेषामपि रसानां विप्रलम्भकरुणस्यैव शेषत्वेन प्रवेशो विनिवेशितः। अमुमेवाऽर्थं प्रतिपादितवान् महाधीमान् कविवरोऽनया वाचोभङ्ग्या—

'एको रसः करुण एव निमित्तभेदाद्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान्विकारानम्भो यथा सलिलमेव तु तत्समग्रम्॥'
इति (३।४७)।

अतः पार्यते वक्तुं विषयेऽत्र भवभूतिर्मतिवैशिष्टयेन कालिदासमतिशेते ।

श्लाघनीयप्रतिभाविकासयोर्भवभूतिकालिदासयोर्द्वयोरपि कृतिषु विपुलहृदयै-कवेद्यो गभीरध्वनिः प्रचुरपरिमाणे निभाल्यते । कालिदासः प्रकृतिदेव्या मनोरमां मूर्तिमनावृतभावेनाऽद्राक्षीत्, परं भवभूतिस्तस्या भीषणां प्रशान्तगम्भीरां च मूर्तिं समीचीनया विधया लोचनगोचरीचकार । अत एव दण्डकारण्ये दृश्यपदार्थानां वर्णने तादृशी प्रशान्तगम्भीरा भीषणा च प्रकृतिप्रतिकृतिः पुरतः प्रादुर्भवति ।

सम्प्रति भवभूतिकृतप्रकृतकृतिवैशिष्ट्यं प्रतिपाद्यते । उत्तररामचरिताभिधानं नाटकमिदं वाल्मीकिरामायणस्योत्तरकाण्डस्थकथाभागात्संगृहीतं विद्यते । अस्य नाटकस्योत्तरकाण्डस्थकथानकत्वाद्वा महावीरचरितपरिशिष्टांऽशरूपेण स्थितत्वादेता-दृशं नामधेयं समजनि, आहोस्विदुत्तरमुत्कृष्टं रामचरितं यस्मिंस्तदुत्तररामचरितम् । अन्नत्यरामचरितस्योत्कृष्टत्वं चेत्थम्—युद्धकाण्डं यावत्स्थितस्य रामचरितस्य रामे मातापित्रादिगुरुजनभक्तिः, पत्न्यनुजप्रजाजनाऽनुरक्तिश्चेत्यादयो गुणा वर्तन्ते, परं तेऽप्युत्तरकाण्डस्थरामचरिते प्रजाजनाऽनुरञ्जनाऽर्थमादर्शस्थापनार्थं च मर्यादापुरुषो-त्तमस्य भगवतः श्रीरामस्य सीतानिर्वासनं सर्वविधसामर्थ्योद्भासिते परमोद्दामयौ-वनेऽपि विवेकवशीकृतस्य चेतसो निर्वासनत्वं, सर्वथैवाऽनुपमानं धीरधूर्वहत्वं, वर्णाश्रमधर्मसंरक्षणचणत्वं, सपत्नीकत्वेन सम्पादनीयेऽश्वमेधेऽपि सीतायाः प्रतिकृत्यैव मखकार्यनिर्वाहकत्वं चैवमादिगणनाऽतीतगुणगणाऽपेक्षया सुतरां न चकासतीति निश्चप्रचम्, अत एवैतादृशभास्वरचरित्रचित्रणात्मकत्वादस्य नाटकस्य कविकृत-मुत्तररामचरितमिति नामधेयं मतिमुकुरे हृदयङ्गमरूपेण प्रतिफलति ।

अत्र नाटके बहवोंऽशाः कविकल्पनाप्रसाधिताः समुपलभ्यन्ते । दिग्दर्शनं यथा-आलेख्यदर्शनम् । आत्रेय्या वनदेवतया वासन्त्या समं तमसायाश्च मुरलया सह संलापः निस्तमसः सीतायास्तमसया सरिता सत्रा निर्दिष्टपूर्वस्थाननिध्यानम् । प्राचेतसाश्रमपदे कौसल्याजनकादीनां सम्मेलनम् । भरतमुनिकर्तृको रामायण-नाटकाभिनयः । चरमेऽङ्के च सीतारामयोर्विस्मयहर्षोत्कर्षाधायकः समागमश्चेत्यादयो बहवो भागाः कवेरजल्पकल्पनाविलासप्रसूताः । भवभूतिरत्र द्वादशसंवत्सरघटना-संघटनं चकार । आलङ्कारिकसमयपरिरक्षणार्थं बहुषु स्थलेषु कविवरेण्येन विष्कम्भ-कादिद्वारा संवाददाराऽनेकघटनाः संघटिताः ।

अत्रस्य आलेख्यदर्शनाऽङ्कः संस्कृतसाहित्येऽनुपमः सर्वथैवाऽपूर्वश्च । चित्रदर्श-

नप्रयोजनविषये विदुषामनेका विप्रतिपत्तयः प्रतिपत्तिपथे प्रादुर्भवन्ति। दिग्दर्शनं यथा—रामस्य राज्याऽभिषेकाऽनन्तरं नैरन्तर्येण सुखाऽनुभूतिसमये सीताकर्तृकं पूर्वाऽनुभूतवनवासादिवियोगदुःखप्रत्यभिज्ञायकमालेख्यदर्शनं नाऽभविष्यच्चेत्तर्हि कियत्क्षणाऽनन्तरमेव भविष्यतस्तत्क्षणं निरवधिरूपेण प्रतीयमानस्य विरहदुःखस्य मर्षणक्षमत्वं सीताया नाऽभविष्यत्। उक्तं चाऽत्रैव—

'पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति।' इति।

अतश्चित्रदर्शनं सीतानिर्वासनव्यापारस्याऽसाधारणमुपकारकारणमिति केचित्। अपरेषां मते तु कालिदासाऽपेक्षया स्ववैलक्षण्यं लक्षयितुं भवभूतिना चित्रदर्शनं निजकृतावक्तारितम्। यथा वा महाकविना कालिदासेन—

'तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु।
प्राप्तानि दुःखान्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखान्यभूवन्' ॥ (१४।२५)

इति रघुवंशश्लोके सीतारामयोश्चित्रदर्शनोदन्त एवं प्रदर्शितः। परं भवभूतिना तदेव चित्रमात्माऽनल्पकल्पनाकूर्चिकया परिवर्द्ध्य कुशलवयोर्जृम्भकाऽस्त्रायासादन-संसाधनकार्यजातं विधाय स्वस्योत्कर्षः संरक्षितः। महाकवेरेवमादिकल्पनाऽवलोकनेनैव केनाऽप्युक्तम्—

'उत्तरे रामचरिते भवभूतिर्विशिष्यते।' इति।

महर्षिवाल्मीकिकृतं सीताविसर्जनवर्णनं पठित्वा कोऽपि हृदयालुर्नयनजलसंवरणं कर्तुं न पारयति। भवभूतिस्तस्यैव करुणस्य विश्लेषणे स्वनिष्ठां सकलामपि शक्तिमुपयुयोज। पुञ्जीभूतमुपलं विदार्य रामस्याऽगाधः सहधर्मिणीप्रणयाऽम्बुधिस्तलस्पर्शरहितो दुःखप्रवाहश्चाऽपरीवाहं भवभूतिकृतौ सञ्चरते। विमृश्यतां तावद् दुरपनेयविरहदुःखस्यैतस्मादधिकमालेख्यं कथं नाम विधातुं पार्यते—

'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।' इति। (१।२८)

अत एव गोवर्द्धनाचार्य आर्यासप्तशत्यामित्थं भवभूतिनुतिं प्रत्यपादयत्—

'भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥' इति।

नाटक आवश्यकत्वेनाऽभिमतस्य विदूषकस्याऽभावेऽत्र बहवः सूरिवरा भूरितरविचारं प्रदर्शयन्ति। परमस्मन्मतेऽत्र करुणविप्रलम्भरसस्य शोचित्वाद्धास्यरसपोष-

कस्य विदूषकस्य न तादृश उपयोगः । तथाऽप्येकत्र स्थले मुनिकुमारमुखतो हयवर्णन-व्यपदेशेन मधुरया गिरा गुम्फितो हास्यपोषक एकः श्लोकः समुपलभ्यते । स यथा–

'पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं वाऽऽख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥' इति । (४।२६)

इत्थं चेहोत्तररामचरित आलङ्कारिकाणां कथाया वर्णनस्य च दृष्टया रमणीयसरणिप्रचलिता स्वातन्त्र्यविभूषिता प्रतिभा परिलक्षिता भवति । कवेरेतादृश एव कृतिस्वातन्त्र्ये केनाऽपि विदुषाऽभिहितम्—

'अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथाऽस्मै रोचते विश्वं तथेदं परिवर्तते ॥
शृङ्गारी चेत्कविः काव्यं सर्वं रसमयं भवेत् ।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत् ॥' इति ।

परमत्राऽपरोऽयं द्वापरः पुरत आविर्भवति । कवेरेतादृशे स्वातन्त्र्ये सत्यपि तत् प्रकृतघटनाऽन्यथाकारे किमप्युचितं बीजमुपादायैव प्रसरति । परिमितमेव तत्स्वातन्त्र्यमिति वक्तव्यम् । अत्राऽर्थे यथा निगदितं विश्वनाथकविराजेन—

'यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यमन्यथा वा प्रकल्पयेत् ॥' इति ।

अनुचितमितिवृत्तं—रामकृतच्छद्मना वालिवधः । तच्चोदात्तराघवे नोक्तमेव । वीरचरिते तु वाली रामवधाऽर्थमागतो रामेण हत इत्यन्यथाकृतः ।' इति ।

यन्नाम महाकविना चरमेऽङ्के सीतारामयोः समागमोत्पादनेन प्रकृतनाटकं संयोगान्तं विहितं तदैतिहासिकनयाऽनुगुणं कथङ्कारं संगच्छते ? तथा च रामकर्तृकस्य सीतापरित्यागस्य रागद्वेषमूलकत्वाऽभावात्तस्य नाऽनुचितेतिवृत्तता, यथाऽन्यथाकारः संभवेत् । संयोगात्मककृत्या कृतिना माङ्गलिकी भारतीयरीतिपरम्परा पुरातनसंस्थापरा कारितेति सत्यम् । परमिहैतिहासिकानामुताहो पुरातनभारतीयानां परम्परा संरक्षणीयेति कतरः पक्षो वरतर इत्यालोचनीयम् ।

अथेयमुपन्यस्यत एतादृश्या विचिकित्साऽऽकाङ्क्षायाः समाधानरूपा चिकित्सा । पद्मपुराणीयां पातालखण्डस्थां रामाऽश्वमेधीयां कथामनुसृत्य महाकविना समारचित एव

व्यतिकरः । अतो निरङ्कुशदोषलेशेनाऽप्यपरामृष्टत्वात् प्रत्युत पुरातनोभयविधनियमाऽनुसरणतः कृतिवरस्यैतत्कृत्यं भूषणमेव न तु सहदूषणमिति सर्वं रमणीयम् ।

यद्येवं तर्हि रामायणेन पद्मपुराणस्य विसंवादः साऽपवाद एवेति चेन्न । 'यः कल्पः स कल्पपूर्वं' इति न्यायेन 'कल्पभेदाच्चरित्रभेदः' इति व्यवस्थितत्वादितिहासेन पञ्चलक्षणस्य सुसंवाद इत्युच्चैर्वादः ।

सम्प्रति समासेनोत्तररामचरितस्थवर्णनीयांऽशानामुल्लेखः क्रियते । निभाल्यतां तावत्कीदृशोऽयमृष्युत्कर्षाऽऽधायकः श्लोकः—

'लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' ॥ (१।१०) इति
'युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः' (१।११)

इत्याकारकं महर्षिश्रेष्ठस्य वशिष्ठस्यादिष्टमाकर्ण्य भगवता श्रीरामचन्द्रेण यन्नाम प्रतिवाक्यं प्रयुक्तं तत्साम्प्रतिकेऽनभीप्सितराजतन्त्रे स्वतन्त्रभारते भारतीयैः 'पुरा धर्मनियन्त्रितराजतन्त्रे राज्ये कीदृशो वाचामगोचरः प्रकर्ष आसीदि' त्यालोचनीयोऽयं विषयः । तद्यथा—

'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नाऽस्ति मे व्यथा ॥' इति । (१।१२)

पुरा संयोगदशायामनुभूतस्य सुखस्य कीदृशं निदर्शनमेतत्—

'जीवत्सु तातपादेषु नूतने दारसंग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥' इति (१।१९)

प्रणयस्य कीदृशोऽयमसाधारणः परिचयः—

'अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्-
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥' इति (१।३९)

लोकोत्तराणां चेतसः कविकृतोऽयमभिनवः संस्तवः कीदृशः सहृदयहृदयावर्जक इति विवेचयन्तु तावत्—

'वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥' इति (२।७)

दण्डकारण्ये वासन्तीविहितमिदं मध्याह्नवर्णनमतीव स्वाभाविकम्—

'कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन सम्पातिभि-
र्घर्मस्रंसितबन्धनैः स्वकुसुमैरर्चन्ति गोदावरीम्।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः॥' इति (२।९)

पतिनिर्वासितायाः सीताया एतद्वर्णनं कस्य हृदये करुणां नोत्पादयेत्—

'परिपाण्डु दुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी॥' इति (३।४)

द्वादशसंवत्सरपर्यन्तं पतिवियोगव्यथामनुभूय सीतायाः शम्बूकवधाऽर्थं दण्ड-काऽरण्यसमायातस्य रामस्य वाक्यमाकर्ण्य यादृशी हृदयदशाऽभूत्तस्याः कीदृशमन्त-स्तत्त्वोद्घाटकं वर्णनमिदम्—

'तटस्थं नैराश्यादपि च कलुषं विप्रियवशा-
द्वियोगे दीर्घेऽस्मिञ्झटिति घटनोत्तम्भितमिव।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन्क्षण इव॥' इति। (३।१३)

एवं च स्ववयस्यया वासन्त्या राम उपालब्धेऽपि राममयजीवितायाः सीताया-स्तत्र स्वाऽनभिमतिप्रदर्शनं सतीधर्मस्य परां काष्ठामवगमयति। सीताप्रशंसाप्रसङ्गे व्यक्तिविशेषनैरपेक्ष्येण गुणानां प्रतीक्ष्यत्वं कथं प्रसाधितमिति चिन्त्यताम्—

'शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रवयति।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्याऽसि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः॥' इति। (४।११)

रणाऽवसरेऽपि लवचन्द्रकेत्वो रक्तसम्बन्धनिबन्धनस्य मिथोऽनुरागस्य द्योति-केक्तिरियं स्वाभाविकत्वोपेता—

'यदृच्छासंवादः किमु गुणगणानामतिशयः
पुराणो वा जन्मान्तरनिबिडबद्धः परिचयः।
निजो वा सम्बन्धः किमु विधिवशात्कोऽप्यविदितो
ममैतस्मिन्दृष्टे हृदयमवधानं रचयति॥' इति। (५।१६)

प्रणयस्य कारणाऽनपेक्षत्वं कीदृश्या विच्छित्त्या प्रदर्शितम्—

'व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥' इति (६।१२)

सीतापरित्यागे रामस्य निर्दोषता महता कौशलेन प्रतिपादिता कविवरेण—

'घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु।
इक्ष्वाकूणां कुलधनमिदं यत्समाराधनीयः
कृत्स्नो लोकस्तदिह विषमे किं स वत्सः करोतु॥' इति (७।६)

अतिशयसंक्षेपेणानायासरूपेण मतिपथागतानि कानिचिद्वैशिष्ट्यानि प्रदर्शितानि, तानि नैतावत्त्वेन परिज्ञेयानि।

कुत्रचिच्च समस्तपदबाहुल्येन प्रसङ्गाऽननुगुणानि दीर्घवाक्यानि हृदयोद्वेजकत्वेन सदूषणान्यपि वर्तन्त इत्यपि समालोचकधर्मं निर्वहन्नावेदयामि। परं गुणभूयस्त्वेन तादृशदोषनिमीलनमेव सर्वैरपि स्वीक्रियते।

विस्तृतवर्णनाऽर्थं सर्वविधाऽवकाशस्याऽऽवश्यकता विद्यते। भगवत्कृपाऽभिव्यच्चेत्तर्हि संस्कृतसाहित्येतिहासे भवभूतिवैशिष्ट्यवर्णनं विशदरूपेणाऽकरिष्यम्। अतः सम्प्रत्येतावतैव विरम्यते।

भवभूतिकृतित्वेन प्रथितिमाप्तं गदाधरभट्टसंकलिते रसिकजीवने पद्यद्वितयं वृहच्छार्ङ्गधरपद्धतौ च एकं, संहृत्य पद्यत्रयं समुपलभ्यते। तद्यथा—

'अलिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्तीम्।
मृगमदपरिमललहरीं समीर! किं पामरेषु रे किरसि॥' इति।

एवं च—

किं चन्द्रमाः प्रत्युपकारलिप्सया करोति गोभिः कुमुदावबोधनम्।
स्वभाव एवोन्नतचेतसां सतां परोपकारव्यसनं हि जीवितम्॥' इति।

पद्यद्वितयमिदं रसिकजीवनस्थं, तथा च—

'निरवद्यानि पद्यानि यदि नाट्यस्य का क्षतिः?।
भिक्षुकक्षाविनिक्षिप्तः किमिक्षुर्नीरसो भवेत्?॥'

इदं पद्यं बृहच्छार्ङ्गधरपद्धतिस्थितं वर्तते। अतो भवभूतिकृत्यन्तरमप्यनुमा-विषयीक्रियते, सम्प्रति तदनुपलब्धेस्तूष्णीकत्वमेव कक्षीक्रियते।

इदानीं विद्वल्लोककृतभवभूतिश्लोकाऽऽलोकार्थं किञ्चित्प्रयत्यते। सहृदयहृदया-ऽऽनन्दवर्द्धनेन गोवर्द्धनेन कृता भवभूतिप्रशंसा पूर्वमेव गता।

कान्यकुब्जाऽधिपतियशोवर्मसभास्तारो वाक्पतिराजः प्राकृतभाषामये स्वनि-र्मिते 'गउडवहो' इत्यभिख्ये काव्ये निम्नस्थयाऽनया गाथया भवभूतिकृतिं सम-वर्णयत्—

'भवभूइजलहिनिग्गयकव्वामयरसकणा इव फुरन्ति।
जस्स विसेसा अज्जवि वियडेसु कहाणिवेसेसु॥' इति।

संस्कृतच्छाया यथा—

'भवभूतिजलधिनिर्गतकाव्याऽमृतरसकणा इव स्फुरन्ति।
यस्य विशेषा अद्याऽपि विकटेषु कथानिवेशेषु॥' इति।

कवीन्द्रः क्षेमेन्द्रो भवभूतेः शिखरिणीमित्थं वर्णितवान्—

'भवभूतेः शिखरिणी निरर्गलतरङ्गिणी।
रुचिरा घनसन्दर्भे या मयूरीव नृत्यति॥' इति।

तिलकमञ्जरीकारो महाकविर्धनपालो भवभूतिमित्थं प्राशंसत्—

'स्पष्टभावरसा चित्रैः पदन्यासैः प्रवर्तिता।
नाटकेषु नटस्त्रीव भारती भवभूतिना॥' इति।

कविविभूतेर्भवभूतेर्विषये कस्यचिद्विदुषोऽभिमतमिदम्—

'सुकविद्वितयं मन्ये निखिलेऽपि महीतले।
भवभूतिः शुकश्चाऽथ वाल्मीकिस्तु तृतीयकः॥' इति।

भवभूतिविषये कस्यचित्कृतिन आकूतमिदम्—

'रत्नावलीपूर्वकमन्यदास्तामसीमभोगस्य वचोमयस्य।
पयोधरस्येव हिमाऽद्रिजायाः परं विभूषा भवभूतिरेव॥' इति।

काऽसौ गता क्व भवभूतिवचोविभूतिर्मञ्जुलताऽतिकलुषा सहजा च कुत्र?
श्रीकृष्णदासकृतिवर्यवचोऽनुनीतटीकाऽनुवादकृतिनाऽऽस्पदमस्मि नीतः॥११॥
छायाऽर्थमेव विवृतोऽस्ति मम प्रयासः, संप्राप्स्यतेऽत्र न विस्तृतवचोविकासः।
भ्रान्त्यादिदोषनिकरं समुपेक्ष्य तावद् गृह्णन्त्विमं गुणगणग्रहणप्रवीणाः॥१२॥

ज्ञापनमेतदपि सम्प्रति प्राप्तकालं मन्ये तावदुत्तररामचरितस्य त्रिचतुरास्वपि प्राचीनाऽर्वाचीनासु व्याख्यासु कृतनयनपथाऽतिथित्वास्वपि घाघूलवीरराघवविरचिता पुरातनी नवभूतिभावतलस्पर्शिनीसमाख्या व्याख्या चन्द्रकलाऽभिख्यायामस्मदीयकृतौ विशेषरूपेण साहाय्यग्रहणाऽर्थं समवलम्बिता ।

जातौ यदीयवचसा मम बोधलेशस्तद्द्वारतस्त्वथ तु शास्त्रपथप्रवेशः ।
तांस्तातपादाम्बुजनामसकृत्प्रणम्य वन्दे च तानपि, यतोऽत्र कृतौ कृतित्वम् ॥

सोत्साहप्रदान प्रणिधानपुरःसरं चानुवादादिकार्यजाते मदुपकारमाचरते कल्याणभाजनाय कविवराय सुहृद्वर्यश्रीकेदारनाथशास्त्रिमहाभागाय विलसन्त्वनेके धन्यवादाः ।

एवमेव मुद्रायन्त्रतो मद्विप्रकृष्टस्थितावपि प्रकृष्टमतिविभवेन सम्पादनादिकृत्यव्यूहं निष्प्रत्यूहं समापयद्भ्यो व्याकरणसाहित्याचार्येभ्य श्रीहरगोविन्दमिश्रमहोदयेभ्योऽमन्दप्रणयप्रकाशनपूर्वकं समुपह्रियन्ते धन्यवादसन्दोहाः । इति शम् ।

पाशुपतक्षेत्रम् ।
(नक्साल, नेपाल)
संवत् २००६ वृषसंक्रान्ति

विद्वदाश्रव —
शेषराजशर्म्मा

उपोद्घात

(तृतीय संस्करण)

'णट नृत्तौ' इस धातुसे 'नटन्तीति नाटकाः' ऐसी व्युत्पत्ति कर 'ण्वुल्तृचौ' इस सूत्र से ण्वुल् प्रत्यय होकर नटवाचक नाटक पदकी सिद्धि होती है। 'नाटका अभिनेतारः सन्ति यस्मिन्नस्तन् नाटकम्' अर्थात् नाटक (अभिनय करनेवाले) व्यक्ति जिसमें रहते हैं, उस काव्यविशेषको नाटक कहते हैं। इस व्युत्पत्तिमें नाटक पदसे 'अर्श आदिभ्योऽच्' इस सूत्र से अच् प्रत्यय होकर नाटक पद निष्पन्न होता है।

पाणिनिके धातुपाठ में 'णट नृत्तौ' इस धातुका दो बार प्रयोग किया गया है। प्रथम धातुका अर्थ है वाक्यार्थका अभिनयरूप नाट्य, जो कि नट-से सम्पादित होता है, वैसे नट जिसमें अभिनय करते हैं उसे 'नाटक' कहते हैं।

द्वितीय बार पठित धातुका अर्थ है पदार्थका अभिनयरूप नृत्य, जो कि नर्तकसे सम्पादित होता है।

वस्तुतः नाटकमें नटके द्वारा वाक्यार्थ और पदार्थ दोनोंका अभिनय होता है। नाटकमें वाक्यार्थके अभिनयके साथ-साथ नटके द्वारा यथास्थान नृत्य, गीत और वाद्य इन तीनों का प्रदर्शन किया जाता है।

नाटककी उत्पत्ति कैसे और किस समयमें हुई इस विषयमें पाश्चात्य विद्वानोंने बहुत गवेषणाएँ कीं, परन्तु वे अभी तक किसी स्थिर सिद्धान्तमें आरूढ नहीं हो सके हैं। आदिकालसे ही अनुकरणकी प्रवृत्ति मानव-हृदयमें विद्यमान थी, उसका क्रमसे विकास होकर नाटकके रूपमें परिणति हुई–ऐसा अनुमान किया जाता है।

ऋग्वेदमें यम और यमीके (१०।१०), पुरूरवा और उर्वशी के (१०।९५), अगस्त्य और लोपामुद्राके (४।१७९), विश्वामित्र और नन्दीगणके (३।३३) तथा वशिष्ठ और भरतगणके बीच जो उक्ति-प्रत्युक्तियाँ हुई वे ही नाटकके बीजके रूपमें परिलक्षित होती हैं। काल-क्रमसे उनके साथ अभिनय, नृत्य, गीत और वाद्य आदि संयुक्त होकर नाटकके रूपमें परिणति हो गई।

सिल्वन लेवीका मत है कि कालिदासकी दीप्तिसे उनके पूर्ववर्ती ज्योतिर्गण विलुप्त हो गये हैं, परन्तु वेदकी संहिता तथा ब्राह्मण भाग, पाणिनिकी अष्टाध्यायी, पतञ्जलिके महाभाष्य और प्राचीन महाकाव्यमें भी पुरातन नाटकोंके अस्तित्वका बहुत कुछ निदर्शन मिलता है।

महाकवि कालिदासने ही अपने मालविकाग्निमित्र नाटकमें नाटककारके रूपमें भास, सौमिल्लक और कविपुत्रका नामोल्लेख किया है, उनमे सौभाग्यसे अनन्तशयन-ग्रन्थमालासे म० म० गणपति शास्त्रीने भासके तेरह नाटकोंका प्रकाशन किया है। महामति अमरसिंहने नाटकके अभिनेताओंके—

'शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः।
भरता इत्यपि नटाः'

अर्थात् शैलाली, शैलूष, जायाजीव, कृशाश्वी, भरत और नट ये छः नाम लिखे हैं।

महामुनि पाणिनिके 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' (४-३-११०) इस सूत्रसे 'शिलालिना प्रोक्तं नटसूत्रमधीयते' ऐसा विग्रह कर णिनि प्रत्यय होकर 'शिलालि' पदसे 'शैलालिन्' पद निष्पन्न होता है। अर्थात् शिलाली मुनिसे प्रोक्त नटसूत्रका जो अध्ययन करते है उन्हें 'शैलाली' कहते हैं।

इसी प्रकार 'कर्मन्दकृशाश्वादिनिः' (४-३-१११) इस पाणिनीय सूत्रसे 'कृशाश्वेन प्रोक्तं नटसूत्रमधीयत इति कृशाश्विनो नटाः' ऐसा विग्रह करके कृशाश्व पदसे इनि प्रत्यय होकर 'कृशाश्विन्' पद निष्पन्न होता है। एतावता पूर्वकालमें नटसूत्रोंके प्रणेता शिलाली और कृशाश्व नामक दो आचार्य थे यह बात प्रमाणित होती है।

इसी प्रकार 'शिलूषस्येमे' ऐसा विग्रह कर 'तस्येदम्' इस सूत्र से अण् प्रत्यय होकर 'शैलूष' पद निष्पन्न होता है। शिलूष नामके आचार्यके अनुयायीको शैलूष कहते है। यद्यपि ये शिलूष आचार्य नटसूत्रके प्रवचनकर्ताके रूपमें प्रसिद्ध नहीं हैं, तथाऽपि ये भी बहुत प्राचीन हैं, क्योंकि वाजसनेय-संहिता और रामायणमें 'शैलूष' शब्दका प्रयोग पाया जाता है। महाभारतमें भी कहींपर द्रौपदीको शैलूषी पदसे अभिहित किया गया है।

'भरतस्य गोत्राऽपत्यानि' ऐसा विग्रह कर भरत पदसे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' / 'अनृष्यानन्तर्ये

विदादिभ्योऽञ्' (४-१-१०४) इस सूत्रसे अञ् प्रत्यय होकर बहुत्व विवक्षामें 'यञञोश्च' इस सूत्रसे अञ् प्रत्ययका लोप होकर 'भरताः' ऐसा पद निष्पन्न हो गया है। अर्थात् भरत ऋषिके अपत्योंको 'भरत' कहते हैं। यहांपर यह बात विशेष विचारणीय है कि नाट्यविद्याके शिलाली, कृशाश्व और भरत ये तीन आचार्य प्रसिद्ध हैं। इनमें पहलेके दो नटसूत्रोंके रचयिता हैं परन्तु इनका ऋषित्व उपपन्न नहीं है। इसी प्रकार अष्टाध्यायीके अनुसार भरतके नटसूत्रोंके कर्तृत्वकी उपलब्धि न होनेपर भी उनका ऋषित्व संगत होता है, और ये ही तीनों आचार्योंमें सबसे प्राचीनतम प्रतीत होते हैं। त्रेतायुगमें समुद्भूत भरत महर्षिने ही कुश और लवके द्वारा मर्यादापुरुषोत्तम भगवान् रामकी सभामें रामायणका गान कराया था।

नाटक, संगीत आदिके विषयमें महर्षि भरतका ही सर्वप्राचीन लक्षण-ग्रन्थ 'भारतीय नाट्यशास्त्र' उपलब्ध है, जिसपर अभिनवगुप्तपादाचार्यने टीका लिखी है।

नाट्यशास्त्रके प्रथम अध्यायमें नाटककी उत्पत्तिके विषयमें लिखा है कि—सत्ययुगमें नाटककी आवश्यकता नहीं थी परन्तु पीछेसे मनुष्योंकी प्रीतिके लिए—

'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥'

अर्थात् ऋग्वेदसे पाठ्य, सामवेदसे गान, यजुर्वेदसे अभिनय और अथर्ववेदसे रसोंका ग्रहण किया गया।

इसी तरह शिवजीने 'ताण्डव', पार्वतीजीने लास्य, नृत्य और विष्णु भगवान्ने नाट्यरीति प्रदान की एवम् महर्षि भरतने नाट्यशास्त्रका प्रणयन कर नरलोक में नाटकका प्रचार किया। इस प्रकारसे इस नाटकको 'पञ्चम वेद' भी कहते हैं। नाटककी उत्पत्तिके विषयमें शुभङ्करकृत सङ्गीतदामोदरमें लिखा है:—

इहाऽनुभूयते ब्रह्मा शक्रेणाऽभ्यर्थितः पुरा।
चकाराऽऽकृष्य वेदेभ्यो नाट्यवेदं तु पञ्चमम्॥
उपवेदोऽथ वेदाश्च चत्वारः कथिताः स्मृतौ।
तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयम्भुवे॥

तेनाऽपि भरतायोक्तस्तेन मर्त्ये प्रचारितः ।
शिवाऽब्जयोनिभरतास्तस्मादस्य प्रयोजकाः ॥'

अर्थात् पूर्वकालमें इन्द्रकी प्रार्थनासे ब्रह्माजीने वेदोंसे आकर्षण कर पञ्चम नाट्यवेदको बनाया ऐसा सुना जाता है। स्मृतिमें चार वेद और एक उपवेद कहे गये हैं। उनमें शिवजीने ब्रह्माजीको गान्धर्ववेद (नाट्यवेद) उपवेद बताया। ब्रह्माजीने भी भरत ऋषिको नाट्यवेद बतलाया, भरतने उसका मनुष्य-लोकमें प्रचार किया। इस कारण नाट्यवेदके प्रयोजक शिवजी, ब्रह्माजी और भरत ऋषि माने गये हैं।

महाभाष्यकार पतञ्जलिने भी 'शौभिक', 'शौभिका', और 'शौभनिका' आदि शब्दोंसे भारतमें नाट्यरङ्गकी सत्ताको व्यक्त कर दिया है। महाभाष्यमें ही 'बलिबन्ध' और 'कंसवध' आदि नाटकग्रन्थोंका नामोल्लेख भी देखा जाता है।

हरिवंशमें भी रामायणकी कथाके अभिनयका उल्लेख देखा जाता है।

इतिहाससे ज्ञात होता है कि मगधराज बिम्बसारने नागराजका सम्मान करनेके लिए नाटकका अभिनय कराया था। बुद्धदेवने भी अपने अनुशासनमें 'नाट्याऽभिनय नहीं करना चाहिए' ऐसा उपदेश दिया है।

विक्रमके प्रथम शतक वा मतभेदसे पञ्चम शतकमें वर्तमान महाकवि कालिदासने भी अपने कुमारसम्भव महाकाव्यमें लिखा है कि—

तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम् ॥ ७-९१ ॥

अर्थात् विवाहके अनन्तर पार्वती और महादेवने सर्वप्रथम मुख, प्रतिमुख आदि सन्धियोंमें कैशिकी आदि वृत्तियोंसे सम्पन्न, शृङ्गार आदि रसोंमें वसन्त आदि रागोंसे समन्वित तथा सुन्दर अभिनयसे युक्त अप्सराओंसे नाटकको कुछ समय तक देखा।

भारतके वाराणसी आदि अनेक स्थानोंपर 'भरतमिलाप' का अभिनय प्राचीन समय से आरब्धसे होकर अभी तक चल रहा है। इसी प्रकार 'इन्द्र-सभा'के नामपर अनेकाऽनेक अभिनय पहले हुआ करते थे।

आज भी मथुरामें रास तथा बङ्गालमें यात्रा बराबर होती रहती है।

अति पुरातन कालसे आर्य-संस्कृतिके पालक नेपालमें श्रावणी पूर्णिमाकी

अनन्तरवर्तिनी प्रतिपत्में 'गोयात्रा'के नामपर अनेक छोटे-छोटे नाटकीय अंशोंका तथा भाद्रकृष्णाष्टमी को 'लाखे यात्रा'के नामपर कंसवधका अभिनय होता है।

नाटकमें संगीतके तीनों अङ्गों—गीत, नृत्य और वाद्य का यथास्थान संनिवेश होनेसे गुजरातमें आजकल भी गानेवालेको 'भरत' कहा करते हैं।

इस प्रकार इयत्तारहित अत्यन्त प्राचीन समयसे लेकर भारतवर्षके वेद, शास्त्र और लोकव्यवहार इन तीनों स्थानोंसे नाटककी स्वतन्त्र रूपसे उत्पत्ति प्रमाणित होती है। इस स्थितिमें नाटकका सर्वप्रथम प्रादुर्भाव यवन देश (ग्रीस या यूनान) से हुआ। भारतीय बैक्ट्रिया (Bactria) में ग्रीक नाटकोंके अभिनयोंको देखने जाते थे, वहींसे उन्होंने नाटककी रचना एवम् अभिनयका प्रकार सीख लिया—यह यूरोपके विद्वानोंका मत निःसार प्रतीत होता है।

यवन देशसे भारतमे नाटकका निर्गम होनेसे उसमें प्रयोग किया जाने वाला 'यवनिका' शब्द चल पड़ा है—यूरोपीय विद्वानोंका यह मत भी आश्रयासिद्धिसे ग्रस्त होनेके कारण अग्राह्य है। किसी भी संस्कृत नाटकमें परदेके अर्थमें यवनिका शब्द प्रयुक्त नहीं देखा जाता है, उस अर्थमें प्रयोज्य शुद्ध शब्द जवनिका वा यमनिका है, यवनिका नहीं। संस्कृत व्याकरणके अनुसार यवनिका पदका अर्थ यवनकी होता है, परदा नहीं।

इस मतकी अप्रामाणता-निदर्शक एक और बात है जो कि इनकी नींवको ही हिला देती है, वह है यवन देशके नाटकमे परदेका अभाव। जब यवन देशके नाटकमे जवनिका ही नहीं तो संस्कृत नाटकमे जवनिकाका प्रसार यवन नाटकसे कैसे हुआ? तब इसी आधारपर स्थित 'यवनोंसे भारतीयोंने नाटककी रचना और अभिनयका प्रकार सीख लिया' यह बात भी आमूलचूड मिथ्या ही प्रतीत होती है।

संस्कृत नाटकमें बहुत-सी विशेषताऍ दृष्टिगोचर होती हैं। उसमें ग्रीक नाटकके समान देश और कालकी एकता आवश्यक नहीं है, अर्थात् संस्कृत नाटककी घटना बहुतकालव्यापिनी तथा अनेक स्थानोंमें संघटित भी हो सकती है। दीर्घ समयमें सभी घटनाओंका अभिनय न होकर खास खास

घटनाओंका एक मात्र अभिनय प्रदर्शित होता है। सामान्य घटनाएँ नाटकमें उल्लिखित व्यक्तियोंके मुखसे आवश्यकताके अनुसार प्रकाशित की जाती हैं। महाकवि भवभूतिके महावीरचरित और उत्तररामचरित नाटक इसके मुख्य दृष्टान्त हैं। बारह वर्षोंसे अधिक कालकी घटनावली इसमें सन्निवेशित है।

दूसरी विशेषता यह है कि नाटकमें उल्लिखित व्यक्तिगण अपने पद तथा मर्यादाके अनुसार भाषा का व्यवहार करते हैं। राजा, ब्राह्मण, शिक्षित और पदस्थ व्यक्ति-वर्ग संस्कृत भाषाका एवम् स्त्री, भृत्य और चाण्डाल आदि व्यक्तिगण प्राकृत भाषाका व्यवहार करते हैं। प्राकृत बोलनेवालोंमे भी तारतम्यके अनुसार उसके अनेक भेदोंका प्रयोग किया जाता है। नाटकके वास्तविक जीवनका अनुकारक होनेसे ऐसा नियम रहा होगा, ऐसा अनुमान किया जाता है।

विदूषककी सत्ता संस्कृत नाटककी तीसरी विशेषता है। नाटकमें विदूषक साधारणतः नायकका प्रिय वयस्य, मिष्टाऽन्नलोलुप एवम् परिहासप्रिय ब्राह्मण होता है। विदूषक अपनी चेष्टा, रहस्यपूर्ण वाक्य और निर्बुद्धिताकी प्रतीति कराकर केवल हास्य रसकी ही पुष्टि कर नाटककी सजीवताकी रक्षा और दर्शकका मनोरञ्जन करता है। इतना ही नहीं, वह कभी-कभी नायकका नर्मसुहृद् बनकर अभीष्ट-साधनमें सहायता एवम् नायकके मनोभावोंको अभिव्यक्त करता है।

सुखान्त (Comedy) ही होना संस्कृत नाटककी चौथी विशेषता है, इसके विपरीत ग्रीक नाटक सुखान्त और दुःखान्त (Tragedy) भी होते हैं।

परिमाणमें अधिकता संस्कृत नाटककी पांचवीं विशेषता है। ग्रीक नाटकोंमें प्रायः तीन अङ्क होते हैं। इसके विपरीत संस्कृत नाटकमें पाँचसे लेकर दश अङ्क तक होते हैं। इस प्रकार हमलोग संस्कृत नाटकमें ग्रीक नाटकोंसे बहुत कुछ विभिन्नता पाते हैं।

हाँ अलबत्ता संस्कृतके बहुत नाटकोंकी समानता इङ्गलैण्डके नाटककार शेक्सपियर (Shakespeare) के नाटकोंके साथ है, परन्तु शेक्सपियरके समयको देखकर संस्कृत नाटकोंपर यूरोपीय नाटकोंका प्रभाव पड़नेकी बात स्वीकृत नहीं हो सकती; भले ही यूरोपने इस विषयमें भारतका अनुकरण कर लिया हो।

अभिज्ञानशाकुन्तलकी प्रस्तावनाका अनुकरण जर्मन महाकवि तथा दार्शनिक गोथे (Goethe) ने अपने फाउष्ट नामके नाटकमें किया है।

साहित्यमें नाटकका स्थान बहुत ही मनोरञ्जक है, अत एव कहा भी गया है कि—'काव्येषु नाटकं रम्यम्' तथा 'नाटकान्तं कवित्वम्'। अर्थात् काव्योंमें नाटक मनोहर होता है और कवित्वका पर्यवसान नाटकमें है। यद्यपि कुशल कलाकार साहित्यके किसी भी क्षेत्रमें असाधारण जौहर दिखा सकता है, जिससे कि उसकी कृति युगान्तस्थायिनी होकर अमर रूपमें रहती है, तथाऽपि इतर काव्य केवल श्रव्य होनेसे उतने हृदयाकर्षक नहीं होते और न उनका प्रभाव ही उतना स्थायी रह सकता है। इसके विपरीत नाटकके दृश्य और श्रव्य होनेसे वह अतिशय रमणीय होता है और उसका प्रभाव भी चिरस्थायी रहता है। इस प्रकार कवि अपने उद्देश्य की पूर्तिमें सफल होता है। इसी कारण महाकवि कालिदासने अपने अभिज्ञानशाकुन्तलसे और महाकवि भवभूतिने अपने उत्तररामचरित नाटकसे भारतवर्षमें ही नहीं, देशान्तरमें भी निरतिशय ख्यातिलाभ किया।

नाटकका प्रयोजन बहुत ही महत्त्वपूर्ण है। वेदमें स्त्री और शूद्रोंका अधिकार नहीं है परन्तु नाटकमें सबका अधिकार है, इसलिए उसको आचार्य भरतने 'सार्ववर्णिक वेद' कहा है।

नाटकमें अनेक विषयों का समावेश होनेसे उसका क्षेत्र बहुत ही व्यापक है। कवि कालिदासने उसे भिन्न रुचिवाले मनुष्योंके मनोरञ्जनका साधन कहा है।

आचार्य भरत निम्नलिखित शब्दोंमें नाटकका उद्देश्य बतलाते हैं—

'उत्तमाऽधममध्यानां नराणां कर्मसंश्रयम्।
हितोपदेशजननं धृतिक्रीडासुखादिकृत् ॥ ११४ ॥
दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतन्मया कृतम् ॥ ११५ ॥

(नाट्यशास्त्र, अध्याय १)

अर्थात् उत्तम, मध्यम और अधम मनुष्योंके कर्मका प्रदर्शन कर हितोपदेश करना, धैर्य, क्रीडा और सुख आदिको उत्पन्न करना, दुःखसे

पीडित, समर्थ शोकपीडित और तपस्वी, इनको उचित अवसरपर विश्राम देने (मनोरञ्जन करने) के लिए मैंने नाट्यवेदकी रचना की है।

इस प्रकार साहित्यमें नाटकका स्थान अतिशय महत्त्वपूर्ण है।

संस्कृत साहित्यमें यद्यपि बहुतसे नाट्यकार हैं, परन्तु उनमें महाकवि कालिदास और भवभूति ही श्रेष्ठ हैं।

इन दोनोंमें कौन श्रेयान् हैं यह कहना बहुत मुश्किल है। कालिदास शृङ्गारमें अपनी सानी नही रखते हैं, तो भवभूति भी करुण विप्रलम्भ रसमें अनुपम हैं। दोनों महाकवियोंकी कवित्वशक्ति उत्कृष्ट है। दोनोंके नाटकोंमें ध्वनिकी गम्भीरता है, परन्तु कालिदासके नाटक साधारणतः व्यञ्जनाप्रधान हैं, तो भवभूति भी अभिधा शक्तिके द्वारा अन्तर्जगत् और बहिर्जगतका जैसा चित्रण करते हैं उसका कोई भी मुकाबला नहीं कर सकता। कालिदास जिस समय और जिस अवस्थामें जीवन यात्रा करते थे उन्होंने उसके केवल उज्ज्वल अंशका ही चित्रण किया है। उनकी कृतिसे जो अनिर्वचनीय आनन्द और शान्तिकी धारा अविराम गतिसे प्रवाहित होती है उससे स्वतः यह बात प्रतीत होती है कि आमोद और प्रमोद ही उनके अन्तःकरणका आधारस्थान था। उनके हृदयमें दुःख अपने गम्भीर चिह्नको स्थापित करनेके लिए कामयाब नहीं हो सका था। कालगतिसे दुःख वा करुणाकी भी उन्हे कभी-कभी अनुभूति होती थी परन्तु चिरस्थायी रूपसे वे उनके मर्मस्थलको क्षुण्ण नहीं कर सके थे। इसीलिए वे दुःखके भार-को फेंककर विदूषकके साथ हास परिहास कर सकते हैं अतएव उनके सभी नाटकोंमें विदूषक विद्यमान है और वह मनोरञ्जनके द्वारा हमारे हृदयको आकृष्ट करता है।

इसके विपरीत भवभूतिकी जीवन-भित्ति दुःखके ऊपर प्रतिष्ठित है। वे कभी भी दुःखके भारको नहीं हटा सके। दुःख छायाके समान उनका अनुसरण करता रहा। भवभूतिने जिस युगमें जन्म लिया था वह था भारतका अवनतियुग। राष्ट्रगगन दुर्दैवमेघसे आच्छन्न था। बौद्ध धर्मके अवसाद-युगमें नाना प्रकारके भीषण और अलौकिक क्रियाकलापकी प्रधानता थी। अनुमान किया जाता है कि भवभूति अपने जीवनकालमें अपनी विद्वत्ता और कवित्वके अनुरूप प्रतिष्ठा-लाभ नहीं कर पाते थे। वे

कभी उज्जयिनीमें रहते थे तो कभी कान्यकुब्ज (कन्नौज) में, परन्तु महानुभूति भवभूतिको कभी भी अविराम गतिसे सुखाऽनुभूति नहीं हुई, ऐसा प्रतीत होता है। उनका 'जीवनकुसुम' सम्भवतः बहुत समय तक 'म्लान' ही रहा। इसी कारण वे प्रधान रूपसे करुण रसके मुख्य कवि हो गये हैं। उनसे अङ्कित तृप्ति, सुख और आनन्दके बीचमें भी विषादका चिह्न दृष्टिगोचर होता है। कष्टपूर्ण सुदीर्घ वनवासके अनन्तर राज्यपदमें प्रतिष्ठित होकर सीताके साथ विश्राम-सुखके अनुभवमें भी हम कविनिबद्ध वक्ता रामके मुखसे—

'विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा'। (१–३५)
'जीवत्सु तातपादेषु नूतने दारसंग्रहे' (१–१९)

इत्यादि मर्मस्पर्शी वाक्य सुनते हैं।

उत्तररामचरितका प्रथम चित्रदर्शनाङ्क साहित्यमें अनुपम और लोकोत्तर सृष्टि है। सुखकी अनुभूतिके समयपर व्यतीत दुःखपूर्ण घटनावली चित्रपटके रूपपर कमनीय कथोपकथनके द्वारा सजीव रूपसे प्रदर्शित की जा रही है। भवभूतिका स्नेह, प्रेम और बन्धुत्व अत्यन्त गम्भीर है।

वाल्मीकिरामायणमें सीता-परित्यागको पढ़कर कोई भी व्यक्ति आंसुओंको नहीं रोक सकता। भवभूति ने करुण रस की पराकाष्ठा का प्रदर्शन करनेके लिए अपनी सम्पूर्ण कवित्व-शक्तिको केन्द्रित कर दिया है। पुञ्जीभूत पाषाणको विदीर्ण कर रामचन्द्रजीका अगाध पत्नीप्रेम और अतल दुःख-प्रवाह फूट पड़ा है। वासन्तीके तिरस्कारमें और कुश–लवके साथ कथोपकथनमें रामचन्द्रजीका दुःखसागर उमड़ पड़ा है।

कालिदासके रघुवंशमें इस कारुण्य-गङ्गाने अपने प्रवाहसे दोनों तटोंको जलमय मात्र करदिया है परन्तु भवभूतिका रस अतलस्पर्शी समुद्रके समान बनकर निरतिशय दुःखको गम्भीरताको प्रकाशित कर रहा है।

कालिदासने नगर, राजसभा, स्वयंवर, समुद्र, विमानयात्रा, छः ऋतु और शकुन्तला-प्रेषण आदि विषयोंका जो वर्णन किया है वह अतिशय मनोहर है। उन्होंने प्रकृति देवीकी अनावृत मनोरम मूर्तिका साक्षात्कार कर लिया था, परन्तु महाकवि भवभूतिको प्रकृतिकी भीषण और प्रशान्त गम्भीर मूर्ति भी हृदयङ्गम हुई थी। दण्डकारण्यके दृश्योंका वर्णन इसका प्रमाण है।

कालिदासके काव्य और नाटकमें वैदर्भी रीतिका अवलम्बन किया गया है, परन्तु भवभूतिने इसके विपरीत गौडी रीतिका ही अधिकतर आश्रय लिया है। इसके साथ-साथ जहाँ कहीं भी इन्होंने वैदर्भी रीतिका प्रदर्शन किया है वह अतिशय मनोरम है।

इसी प्रकार कालिदासने जहाँ बहिर्जगनके अति मनोरम दृश्यको कल्पना-कूर्चिकासे अङ्कित किया है वहाँ भवभूतिने उसके साथ-साथ बहिर्जगतके भयानक और बीभत्स दृश्य एवम् मानव-मनोवृत्तिके भिन्न-भिन्न रूपोंको असाधारण कौशलसे प्रकाशित किया है।

कालिदासने जहाँ आदिरस शृङ्गारको प्रस्तुत करनेमें अपनी कल्पना-की अनुपम निपुणता दिखलाई है वहाँ भवभूतिने भी करुण और वीर रसको प्रदर्शित करनेमें अपनी सानी नहीं रक्खी है। जहाँ कालिदास नारीके चित्रण-में उनके सौन्दर्यवर्णनमें ही मस्त हैं वहाँ भवभूति उनकी हृदय-पवित्रताको उपस्थित करनेमें ही व्यस्त हैं। अतएव कालिदास नारीको 'तुङ्गस्तनी' 'बिम्बा-धरा' 'श्रोणीभारादलसगमना' कहकर अपनी प्रसुप्त वासनाको व्यक्त कर रहे हैं वहाँ भवभूति उन्हें 'गेहे लक्ष्मीः' और उनके वचनको 'कर्णामृतानि', स्पर्श-को 'सञ्जीवनौषधिरसः' 'स्नेहार्द्रशीतलः' और उनके आलिङ्गनको 'सुखमिति वा दुःखमिति वा' कहकर अपनी हृदयकी पवित्रताको व्यक्त करते हैं। इसी तरह नारी जहाँ कालिदासकी दृष्टिमें 'भोग्या' प्रतीत होती है वहाँ भवभूति उन्हें 'पूजायोग्या' मानते हैं। सूक्ष्म दृष्टिसे निरीक्षण करनेपर दोनों महा-कवियोंमें बहुत अन्तर उपलब्ध होता है।

महाकवि भवभूतिकी तीन रचनाएँ उपलब्ध हैं। ये तीनों ही रूपकके रूपमें वर्तमान हैं। इनमें महावीरचरित और उत्तररामचरित ये दो नाटक हैं जो मर्यादापुरुषोत्तम भगवान् श्री रामचन्द्रके यथाक्रम पूर्वचरित और उत्तरचरित-का प्रदर्शन करते हैं। तीसरा मालतीमाधव प्रकरणके रूपमें विद्यमान है।

महाकवि भवभूति

महाकवि कालिदासने अपना परिचय देनेमें जैसी उपेक्षा दिखाई है, नाटककार भवभूतिने वैसी उपेक्षा नहीं दिखाई। इनकी उक्तिके अनुसार इनका परिचय दिया जाता है। दक्षिणमें विदर्भ (बरार) के अन्तर्गत पद्मपुर

नगरमे कृष्णयजुर्वेदी तैत्तिरीयशाखावाले काश्यपगोत्रीय पङ्क्तिपावन पञ्चाऽग्नि-पूजक उदुम्बर उपाधिवाले ब्रह्मवादी ब्राह्मण लोग रहते थे। इनके कुलमें उत्पन्न भट्ट गोपालके पौत्र और नीलकण्ठके पुत्र श्रीकण्ठ ही हमारे उत्तररामचरित नाटकके रचयिता है। इनकी माताका नाम जातुकर्णी था। विशिष्ट काव्य-रचनासे इन्हें 'भवभूति' उपाधि प्राप्त हुई थी, जिसने कि अतिशय ख्यातिके कारण कालान्तरमें नामका स्थान प्राप्त कर लिया।

भवभूतिने अपनेको 'पदवाक्यप्रमाणज्ञ' लिखा है, इससे प्रतीत होता कि ये व्याकरण, मीमांसा और न्यायशास्त्रके विद्वान् थे। इन्होंने अपने गुरुका नाम ज्ञाननिधि लिखा है।

मालतीमाधवकी एक प्राचीन हस्तलिखित प्रतिसे ज्ञात होता है कि ये मीमांसाशास्त्रके धुरन्धर विद्वान् कुमारिल भट्टके भी शिष्य थे और इनका दूसरा नाम उम्वेकाचार्य भी था। विशेष बात संस्कृतके उदाहारमें देखें।

भवभूतिके समय और चरित्र आदिके विषयमें इनके ग्रन्थसे इससे अधिक ज्ञात नहीं होता।

महाकवि कल्हणकी राजतरङ्गिणीके अनुसार भवभूतिके आश्रयदाता कान्यकुब्जेश्वर यशोवर्मा काश्मीरनरेश मुक्तापीडललितादित्यके अधीन थे ऐसा मालूम होता है। यशोवर्माका समय विक्रम संवत् ७५७ प्रमाणित होता है, फलतः भवभूतिका भी वही समय मानना सगत है।

अब उत्तररामचरित और उसके कर्ता महाकवि भवभूतिकी कुछ विशेषताओं-का उल्लेख किया जाता है।

भवभूतिने प्रस्तावनामें अपने परिचयके प्रसङ्गमें सूत्रधारके द्वारा 'पद-वाक्यप्रमाणज्ञ' विशेषणके साथ—

'यं ब्रह्माणमियं देवी वाग्वश्येवाऽनुवर्तते'।

इस वाक्यका प्रतिपादन किया है। संस्कृत भाषापर इनका पूर्ण अधिकार देखकर इस उक्तिको सत्य मानना पड़ता है। इसमें लेशमात्र भी अतिशयोक्ति नहीं है।

कर्तव्यपालनमें महाकविको पूर्ण आस्था थी। लोक भले ही दोषारोपण करे पर कुछ भी परवाह न करते हुए अपने कर्तव्यको करना चाहिए, इसी बात-को उन्होंने सूत्रधारसे प्रस्तुत कराया है—

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥ (१—५)

ऋषियोंकी सर्वशक्तिमत्तापर नाटककारको अतिशय विश्वास था। कितने जोरदार शब्दोंमें ये रामचन्द्रजीके मुखसे इस बातको उपस्थापित कराते हैं—

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ (१—१०)

महाकवि लोकके आराधनके लिए रामके लोकोत्तर त्यागको उन्हींकी उक्तिके रूपमें कैसे असाधारण रूपमें प्रस्तुत करते हैं—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ (१—१२)

माता-पिताके जीवन-कालमें दारपरिग्रहके अनन्तर होनेवाले सुखकी अनिर्वचनीयताको भवभूति रामचन्द्रजीकी ही उक्तिमें किस तरह प्रदर्शित कर रहे हैं—

जीवत्सु तातपादेषु नूतने दारसंग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ (१—१९)

कर्मकाण्डप्रवीण ख्यातनामा मीमांसक होकर भी महाकवि स्त्री-शिक्षाके पक्षपाती थे। उन्होंने इस बातको आत्रेयीके द्वारा इस प्रकार प्रदर्शित किया है—

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि ॥ (२—३)

महापुरुषोंकी मनोवृत्तिकी असाधारणता महाकविने वासन्तीके द्वारा किस तरह प्रभावजनक शब्दोंमे प्रस्तुत की है—

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ (२—७)

भवभूतिके नाटकमें निबद्ध शम्बूकनामक शूद्र भी—

सत्सङ्गजानि निधनान्यपि तारयन्ति। (२—११)

ऐसा कहता हुआ किस प्रकार विनम्र रूपसे सत्सङ्गतिकी प्रशंसा करता है।

प्रियजनकी विशेषताको महाकवि रामके द्वारा कैसे आकर्षक शब्दोंमें प्रस्तुत करते हैं—

न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ (२—१९)

भवभूति पतिपरित्यक्ता सतीशिरोमणि सीताकी दयनीय अवस्थाको तमसाके द्वारा कैसे मर्मस्पर्शी शब्दोंमें प्रतिपादित कर रहे हैं—

परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ॥ (३—४)

महाकविने तमसाके द्वारा अपत्यका कितना मनोहर चित्रण किया है—

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ॥ (३—१७)

वासन्ती सीताके निर्वासनपर रामचन्द्रको कैसे मार्मिक शब्दोंसे आक्षेप अलङ्कारके द्वारा आक्षेप कर रही है—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण ॥ (३—२६)

महाकविने राजर्षि जनकके द्वारा महारानी कौशल्याकी दीनताका कैसे कारुणिक शब्दोंमें प्रदर्शन किया है—

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं बताऽन्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो ! विकारः ॥ (४—६)

महाकविने बटुओंके अश्ववर्णनसे किस प्रकार स्वभावोक्तिपूर्वक हास्यरस-की अवतारणा की है—

पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति, प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥ (४—२६)

रक्तसम्बन्धके कारण होनेवाले स्वाभाविक स्नेहको महाकविने स्वनिबद्ध बच्चा लव और चन्द्रकेतुके द्वारा कितने मनोरम शब्दोंमें उपस्थित किया है—

यदृच्छासंवादः किमु गुणगणानामतिशयः
पुराणो वा जन्मान्तरनिबिडबद्धः परिचयः।
निजो वा सम्बन्धः किमु विधिवशात्कोऽप्यविदितो
ममैतस्मिन्दृष्टे हृदयमवधानं रचयति ॥ (५-१६)।

महाकवि भवभूतिने विद्याधरके द्वारा विवर्तवादका प्रदर्शन कितने सुन्दर ढङ्गसे किया है—

विद्याकल्पेन मरुता मेघानां भूयसामपि।
ब्रह्मणीव विवर्तानां क्वाऽपि प्रविलयः कृतः ॥ (६-६)

महाकविने लवके द्वारा भगवान् रामके लोकोत्तर प्रभावका कैसे आकर्षक शब्दोंमें वर्णन किया है—

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वाऽपि व्रजति, विनयः प्रह्वयति माम्।
झटित्यस्मिन्दृष्टे किमिति परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥ (६-११)

पृथिवी कैसे मर्मस्पर्शी शब्दोंमें रामकी अयुक्तकारिताका प्रदर्शन करती है—

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः।
नाऽहं न जनको नाऽग्निर्नं तु वृत्तिर्न सन्ततिः ॥ (७-५)

इस प्रकार इस नाटकरत्नकी आपातरूपसे प्रतीयमान कुछ ही विशेषताओं-का उल्लेख किया गया। पूरे ग्रन्थपर प्रकाश डालनेके लिए तो स्वतन्त्र निबन्ध अपेक्षित है, इसलिए यहींपर अवसान करता हूँ।

दुर्गाघाट, वाराणसी
दीपावली, सं० २०१६

विद्वद्विधेय—
शेषराजशर्मा

नाटकनायकादिलक्षणम्

तत्र नाटकलक्षणं यथा साहित्यदर्पणे—

'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूति नानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राऽङ्काः परिकीर्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्यं निर्वहणेऽद्भुतम् ॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्तितम् ॥' इत्यादि ।

उत्तररामचरितस्य नायकः श्रीरामचन्द्रो दिव्याऽदिव्यो (दिव्योऽप्यात्मनि नराऽभिमानी) धीरोदात्तस्तल्लक्षणं यथा—

'अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥' इति ।

नायिका च सीतादेवी स्वीया मुग्धा च । तल्लक्षणे यथा—

'विनयाऽऽर्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।' इति ।
'प्रथमाऽवतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥' इति ।

एतौ चाऽलम्बनविभावौ—

'आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात् ।'

पञ्चवटीवृक्षादिदर्शनादीन्युद्दीपनविभावाः—

'उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।' इति ।

विलापमोहादयोऽनुभावाः—

'उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥' इति ।

विषादादयो व्यभिचारिणः। रतिश्च स्थायी भावः । करुणविप्रलम्भाख्यः शृङ्गाररसोऽङ्गी । तल्लक्षणं यथा—

'यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनर्लभ्ये।
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्यः॥' इति।

वीराऽद्भुतरौद्रादयोऽङ्गरसाः।

रीतिश्च प्रायेण गौडी । अन्तराऽन्तरा वैदर्भ्यादयोऽपि परिलक्ष्यन्ते।

गौडीलक्षणं यथा—

'ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।
समासबहुला गौडी' इति।

गुणश्च प्रायो माधुर्याख्यस्तल्लक्षणं यथा—

'चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्॥' इति।

उत्तररामचरित-सुभाषितगद्यपद्यसंग्रहः

प्रथमोऽङ्कः

'सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥' १।६
'सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता' । १।८
'सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति' ।
लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥' १।५०
'तीर्थोदकं च वह्निश्च नाऽन्यतः शुद्धिमर्हतः । १।१६
'नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि ।' १।१४

द्वितीयोऽङ्कः

'सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।' २।१
'प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः, प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥' २।२

तृतीयोऽङ्कः

'पुरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया । शोकक्षोभे च हृदयं प्रलापैरवधार्यते ॥' ३।२९
'अन्धतामिस्रा ह्यसुर्या नाम ते लोकाः प्रेत्य तेभ्यः प्रतिविधीयन्ते य आत्मघातिनः' ।

चतुर्थोऽङ्कः

'सन्तानवाहीन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्ते ॥' ४।८
'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' । ४।११
'पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति ।' ४।१२
'सुहृदिव प्रकटय्य सुखप्रदां प्रथममेकरसामनुकूलताम् ।

पुनरकाण्डविवर्तनदारुणो विधिरहो विशिनष्टि मनोरुजम् ॥' ४।१५
'आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारास्तेषु मा संशयो भूत् ।
भद्रा ह्येषा वाचि लक्ष्मीर्निषक्ता नैते वाच विप्लुतार्थां वदन्ति ॥' ४।१८

पञ्चमोऽङ्कः

'तेजस्तेजसि शाम्यतु । ५।७ 'तारामैत्रक चक्षूराग' ।
अहेतु पक्षपातो यस्तस्य नाऽस्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥' ५।१७
'वीराणा समयो हि दारुणरस स्नेहक्रम बाधते' ।
'लताया पूर्वलूनाया प्रसवस्योद्भव कुत' । ५।२०
'न रथिन पादचारमभियुञ्जन्ति' ।
ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयो ।
सा योनि सर्ववैराणा सा हि लोकस्य निष्कृति ॥ ५।९
'कामान्दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्ति सूते दुर्हृदो निष्प्रणाति ।
शुद्धां शान्ता मातर मङ्गलाना धेनु धीरा सूनृता वाचमाहु ॥' ५।३०
'सिद्ध ह्येतद्वाचि वीर्यं द्विजानां बाह्वोर्वीर्यं यत्तु तत्क्षत्रियाणाम् ।' ५।३३
'वृद्धास्ते न विचारणीयचरिता ।५।३५

षष्ठोऽङ्कः

'न किञ्चिदपि कुर्वाण सौख्यैर्दु खान्यपोहति ।
तत्तस्य किमपि द्रव्य यो हि यस्य प्रियो जन ॥' ६।५
'सर्वमतिमात्र दोषाय' ।
'महार्घस्तीर्थानामिव हि महता कोऽप्यतिशय' । ६।११
'स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्' ।
'व्यतिषजति पदार्थानान्तर कोपि हेतुर्न खलु बहिरुपाधीन् प्रीतय संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीक द्रवति च हिमरश्मावुद्गते चन्द्रकान्त ॥' ६।१२
'न तेजस्तेजस्वी प्रसृतमपरेषा विषहते स तस्य स्वो भाव प्रकृतिनियतत्वादकृतक ।
मयूखैरश्रान्त तपति यदि देवो दिनकर किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ॥'
'प्रियानाशे कृत्स्न किल जगदरण्य हि भवति' ।६।३० ६।१४

'चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः।
जगज्जीर्णारण्यं भवति च कलत्रेऽप्युपरते
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥' ६।३८

सप्तमोऽङ्कः

'साक्षात्कृतधर्माणो महर्षयः।
'को नाम पाकाऽभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे'। ७।४
'अव्याहताऽन्तःप्रकाशा हि देवताः सत्त्वेषु'। 'साऽनुषङ्गाणि कल्याणानि'।

संस्कृत कथासारः

प्रथमाऽङ्कः

नान्यन्ते सूत्रधारो नाटककारस्य भवभूतेः परिचयमुपन्यस्यति। तेन राम राज्याऽभिषेकोत्सवप्रसङ्गेन प्रवृत्ता गीतवाद्यादिमङ्गलचर्चा किमर्थं विरतेति पृष्टे नटो रामेण निमन्त्रिता सर्वेऽपि ब्रह्मर्ष्यादयः स्वस्वावासस्थानं प्रहिता, एवं च महाराजरोमपादस्याऽपत्यकृतिकाया कौशल्यासुताया शान्तायाः पत्युर्ब्रह्मर्षिश्रेष्ठस्य ऋष्यशृङ्गस्य द्वादशवार्षिकसत्रे वसिष्ठाऽधिष्ठिता पुरस्कृताऽरुन्धतीका राममातरो गतास्ततो गीतवाद्यादिमाङ्गलिककृतिर्निवृत्तेति समादधाति। तत्प्रसङ्ग एव जनकृतं सीताऽपवादं च सूचयति। सूत्रधारकर्तृके रामाऽवस्थितिविषयकेऽनुयोगे स्वजन कस्य जनकस्य राजर्षेर्विदेहदेशप्रयाणेन विमनसः सीतायाः परिसान्त्वनार्थं रामो धर्मासनाद्वासगृहं प्रविशतीति नटः प्रत्युत्तरयति।

(इति प्रस्तावना)

जनकवियोगपरिदूनाया सीतायाः खेदविरामार्थं रामः पर्यसान्त्वयत्। ऋष्यशृङ्गाश्रमादष्टावक्र आगच्छत्। अष्टावक्रः सीता प्रति वसिष्ठस्य वीरपुत्रप्राप्तिरूपामाशिषं रामं प्रति चाऽरुन्धत्यादाना सीतादोहदपूरणं कर्तव्यमिति सन्देशं चाऽसूसुचत्। सीता प्रति च ऋष्यशृङ्गस्य 'सपुत्रां त्वा द्रक्ष्यामी'ति सन्देशं च कथितवान्। तथैवाऽष्टावक्रो रामं प्रति 'प्रजाजनाऽनुरञ्जने युक्तः स्याः' इति वसिष्ठसन्देशं च जगाद। रामश्च प्रतिज्ञातवान्। अष्टावक्रे निष्क्रान्ते कुमारलक्ष्मण आजगाम। स च दुर्मनसः सीतायाः मनोविनोदनार्थं वीथिकायामभिलिखितं रामचरितमयं चित्रपटमानिनाय। चित्रपटे चरितस्य कियान्भागोऽस्तीति रामप्रश्ने 'यावदार्याया हुताशनशुद्धिरि'ति लक्ष्मणवचनं श्रुत्वा रामः सीता सान्त्वितवान्। सीतया चित्रदर्शनोत्तरं 'क एते उपरिस्थिता आर्यपुत्रमुपस्तुवन्ती वे'ति पृष्टे लक्ष्मणः 'आर्यस्य कौशिकेन मुनिना ताडकावधे प्रसादीकृतान्येतानि जृम्भकाऽस्त्राणी'ति प्रत्यब्रवीत्। रामश्च गर्भिणीं सहधर्मिणीं 'सर्वथेदानीमेतानि त्वत्प्रसूतिमुपस्थास्यन्ती'ति जगाद। तदनु सर्वेऽपि विवाहादिवृत्ताऽवबोधकाश्चित्रपटाऽवयवानपश्यन्। रामश्चित्रे गङ्गां दृष्ट्वा 'हे देवि! त्वं सीतायाः शिवाऽनुध्यानपरा भवे'ति प्रार्थितवान्। अथ ते वनवाससमये पुरावलोकितान्पर्वतवृक्षादिपदार्थानवालोकयन्। ततः सीताहरणानन्तरं रामस्य

काकणिकीमवस्थां लक्ष्मणः प्रत्यपादयत्। जटायुविक्रमप्रदर्शनाऽनन्तरं लक्ष्मणो माल्यवन्तं पर्वतं वर्णितवान्। ततो रामः पुराऽनुभूतसीताविप्रयोगस्मृत्या तं न्यवारयत्। सीता च भूयो वनविहरणे भागीरथ्यवगाहने च स्वदोहदमभिव्यञ्जितवती। रामश्च तदिच्छापूरणाय लक्ष्मणमादिशत्। तदादेशाऽनुष्ठानाय रथं सज्जीकर्तुं लक्ष्मणे गते गर्भभराऽऽयासिता सीताऽशेत। अत्राऽन्तरे जनवृत्तान्तज्ञानाय प्रहितो दुर्मुखाऽभिधानोऽपसर्पो रामोपकण्ठमसर्पत्। रामेण निर्बन्धपृष्टः सोऽपि साऽतिशयविषादं सीताविषयकं लोकापवादं प्राकाशयत्। रामोऽमूर्च्छत्, प्राप्तसंज्ञः पर्यदेवयच्च बहुधा। ततो लवणत्रासित ऋषिसङ्घोऽब्रह्मण्यपदसमुच्चारणपूर्वकं समुपस्थित इत्युदन्तं राम आकर्णितवान्, लवणोन्मूलनाय शत्रुघ्नप्रेषणं भावयामास। तदनु 'हे देवि! श्लाघ्यां स्वदुहितरं जानकीमवेक्षस्व'ेति पृथिवीं प्रार्थयामास रामो निरगमच्च ततः। सीता च प्रबोधाऽनन्तरं राममन्विष्टवती। दुर्मुखश्च 'वनप्रयाणाऽर्थं सज्जो रथ' इति लक्ष्मणवचनं सीतायै कथयामास। सीता रघुकुलदेवादिप्रणिपातपुरःसरं गमनोद्यमं व्यधात्। ततः सर्वे निष्क्रान्ताः।

द्वितीयाऽङ्के

वाल्मीकेराश्रमादध्ययनार्थं पञ्चवटीं समायाताऽऽत्रेयी वनदेवतां सीतासखीं वासन्तीमुपागच्छन्। वासन्ती चाऽर्घ्यादिना तां सत्कृतवती। 'सति वाल्मीकिमहर्षौ दूरेऽत्राऽगस्त्यादिमहर्षिभ्यो विद्यामधिगन्तुं कीदृशोऽयं प्रयास' इति वासन्तीप्रश्ने— वाल्मीकेराश्रमे केनाऽपि देवताविशेषेण स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम्। 'कुशो लवश्च'ेति तयोरभिधाने। तयोराजन्मसिद्धानि जृम्भकाऽस्त्राणि। तयोश्च वाल्मीकिना क्रमत उपनयनान्ताः संस्कारा आचरिताः तौ चाऽतीव मेधाविनावतस्ताभ्यां सहाऽस्मदादेर्नाऽध्ययनयोगः। एवं च जातुचित्तमसां स्नानागतस्य महर्षेर्वाल्मीकेर्व्याधनिहतक्रौञ्चशोकेन 'मा निषादे'त्याकारको लोकेऽनागतपूर्वश्लोकः प्रकाशितः। तदनु तं पद्मयोनी रामचरितं निर्मातुमादिदेश, तदर्थं कुत्राऽप्यप्रतिहतं प्रातिभं चक्षुश्च तस्मै व्यतरत्। अथ च वाल्मीकी रामायणं प्रणीतवानिति विघ्नद्वयाऽऽपत्त्या तत्राऽऽध्ययनमसम्भवम्' इत्यात्रेयी प्रतिवाक्यं प्रत्यपादयत्। तत आत्रेयी सीतास्मृत्या दुःखमनुबभूव। वासन्तीप्रश्ने सीतानिर्वासनं रामश्च हिरण्मय्याः सीताप्रतिकृत्याः सहधर्मचारिणीत्वेन राजसूयमश्वमेधं प्राक्रान्तवान्। एवं च तेन यज्ञियहयरक्षकश्च लक्ष्मणात्मजश्चन्द्रकेतुः प्रहितः।

अत्रान्तरे मृतब्राह्मणकुमारजीवनार्थं तपस्यन्तं शम्बूकाऽभिधानं शूद्रं हन्तुं रामः पुष्पकमारुह्य संचरितुमारब्धवानित्यात्रेयी कथयामास । तदनन्तरमात्रेयी प्रायात् ।

(इति शुद्धविष्कम्भकः ।)

ततः पुष्पकविहारिणा रामेण जनस्थाने हतः शम्बूको दिव्यं रूपं समधिगम्य तं तुष्टाव तदनु शम्बूकेन सह रामस्य संलापोऽभूत् । तत्र रामो बहुशः सीताया अस्मरत् । रामाऽनुज्ञाप्राप्त्या शम्बूके गते सीतास्मरणेन बाष्पकण्ठो रामो व्यलपत् । शम्बूकः पुनरागत्याऽगस्त्यस्य 'मदीयमाश्रमं समागच्छतु भवान्, लोपामुद्रा च प्रतीक्षते, ततः पुष्पकयानेनाऽश्वमेधाय सज्जो भविष्यसी'ति सन्देशं निवेदितवान् । रामश्च तमभ्युपागमत् । तदनु द्वावपि निष्क्रान्तौ ।

तृतीयाऽङ्के

मुरलाऽभिधाना नदी लोपामुद्राया गोदावरीं प्रति 'रामस्य स्थितिर्निरतिशय-करुणपरिपूर्णाऽस्ति । प्रतिनिवर्तमानो रामभद्रः पञ्चवटीं प्राप्तः सीतया समं पूर्वाऽनु-भूतान्प्रदेशान्नियतं पश्येत् । तत्र तस्य शोकाधिक्येनाऽनिष्टमाशङ्कनीयम् । तद्भगवति गोदावरि ! त्वया रामस्य भव्यसाधनार्थं सावधानया भाव्यम् ।' इत्याकारकं सन्देशं प्रापयितुं गच्छामी'ति मार्गमिलितामात्मसखीं तमसाख्यां सरितमब्रवीत् ।

तमसा च मुरलां कथितवती—वाल्मीकितपोवनाऽन्तिके लक्ष्मणेन परि-त्यक्ता सीता पराभवजया प्रसवजन्यया च वेदनाया युगपदभिभूताऽऽत्मानं गङ्गाप्रवाहे निचिक्षेप, तत्रैव सुतद्वितयं प्रसूना पृथिवीभागीरथीभ्यामभ्युपपन्ना पातालं प्रा-पिता । स्तन्यत्यागाऽनन्तरं तस्यास्तनयद्वितयमपि गङ्गादेवी वाल्मीकये स्वयम-र्पितवती । साम्प्रतं तु पञ्चवट्यागतं रामचन्द्रं सरयूमुखाच्छ्रुत्वा भगवती भागीरथी लोपामुद्रावदाशङ्कय सीतया समं केनचित्कृत्यव्यपदेशेन गोदावरीं द्रष्टुमागता । भागीरथ्या प्रबोधिता सीता—'वत्से ! अद्य कुशलवयोर्द्वादशवर्षप्रवेशोत्सवोऽस्ति । तदात्मनः पुराणश्वशुरं सवितारं स्वकरलूनैः पुष्पैरुपतिष्ठस्व । भूतलवर्तिनी त्वां देवा अपि न द्रक्ष्यन्ति' इति । अहमपि सीतासंरक्षणार्थं गङ्गादेव्याऽऽदिष्टाऽस्मी'ति । इत्थं संलप्योभे अपि निष्क्रान्ते ।

(इति शुद्धविष्कम्भकः ।)

ततः पुष्पाऽवचयनतत्परा सीता प्रविशति सा च वासन्तीमुखात्पुराऽऽत्म-वर्द्धितं गजकलभं परगजाक्रान्तं श्रुत्वा ससम्भ्रमं पूर्ववदार्यपुत्रमाह्वयत् ।

अत्राऽन्तर एव रामः पुष्पकमारुह्याऽऽगच्छत् । रामवचनाऽऽकर्णनेन सीतो-

त्स्कृतां सूचितवती। रामस्य कृशशरीरं शोचनीयाञ्च दशां दृष्ट्वा सीता मुमूर्च्छ। रामश्च मुहुर्मुहुः पर्यदेवयत, मूर्च्छितवांश्च। सीता च तमसावचसा संज्ञाऽऽधानार्थं रामं करकिसलयेनाऽस्पृशत। ततः प्राप्तसंज्ञो रामश्च तदामर्शनं स्तुतवान्। रामदर्शनमाशङ्क्य सीता भीता सम्पपमरणं प्रार्थयत्। तमसा च गङ्गाप्रभावं वर्णयित्वा तां न्यरुणत्। रामश्च स्पर्शाऽनुभूत्यनन्तरमपि सीतादर्शनाऽनुपलब्धेरात्मनो भ्रमं न्यरूपयत्। अत्रान्तरे पुनरपि सीतापोषितगजकलभकवृत्तान्त आकर्णितः। रामश्चैवं श्रुत्वोत्थितः। ततो वनदेवता वासन्ती राममुपजगाम। वासन्ती च सीतापोषितहस्तिशावकविजयं निवेदयामास। ततो वासन्तीरामसंलापः। अन्तराऽन्तरा तमसासीतासंलापश्च। वासन्ती रामं सीतावर्द्धितं ससहचरीकं मयूरमदर्शयत्। वासन्ती सीतानिर्वासने रामोपालम्भमकार्षीत्। सीतायै च वासन्तीकृतः स पत्युपालम्भो नाऽरोचत।

ततो वासन्ती सीतादुःखचिन्तनेन मूर्च्छितवती। तया निर्वासितसीतावृत्तान्ते पृष्टे रामः 'तादृशे श्वापदाऽऽकीर्णेऽरण्ये सीता नियतं विलुप्ताऽवयवा भवेदि'त्युत्तरं व्यतरत्। तदनु रामविलपनमाकर्ण्य वासन्ती तस्मै धैर्यमुपादिशत्। रामः पुनरमुह्यत्। सीता च पुनस्तमसोपदेशात्करकिसलयाऽऽमर्शनेन रामं प्राबोधयत्। प्रबोधप्राप्त्यनन्तरं रामो वासन्त्यै सीतासमासादनमसूचत्। वासन्ती च सीतासाक्षात्काराऽभावेन तद्वचनं न प्रत्येति स्म। निरतिशयमन्युभारेण रामो मुहुर्मुहुर्व्यलपत्। वासन्त्यै रामः स्वेनाऽनुष्ठीयमानेऽश्वमेधे सहधर्मचारिणीं हिरण्मयीं सीताप्रतिकृतिं वर्णितवान्। रामोऽयोध्यागमनार्थं वासन्तीमपृच्छत्। सीता च रामाऽदर्शने कातरताऽतिशयं प्रादर्शयत्। वासन्ती च रामगमनमन्वजानात्। सरिद्वरा तमसा करुणरसस्य सर्वरसेषु प्राधान्यं साधितवती। अवसाने च तमसावासन्त्यौ सीतारामौ प्रत्याशिषं प्रत्यपादयताम्। ततः सर्वे निष्क्रान्ताः।

चतुर्थोऽङ्कः

भगवतो वाल्मीकेराश्रमपदे द्वौ तापसबालकौ समलपताम्। तत्र दाण्डायनः सौधातकिं प्रति वाल्मीकेराश्रमपदं प्राशंसत्। सौधातकिराश्रमस्थितस्य स्त्रीसार्थेन समयातस्याऽतिथेः परिचयं दाण्डायनमपृच्छत्। दाण्डायनश्च 'ऋष्यश्रृङ्गाश्रमात्साऽरुन्धतीकाभिर्दशरथपत्नीभिः सममायातोऽयं वसिष्ठ' इति प्रतिवाक्यं व्याजहार। सौधातकिश्च वसिष्ठस्य मधुपर्कप्रसङ्गे कपिलायां गोरालम्भनेन तं व्याघ्रत्वेनोत्प्रेक्षितवान्। दाण्डायनश्च श्रौतवाक्यात्तत्कर्मणः (मधुपर्के पशुवधात्मकस्य) समर्थनं कृत-

वान् । सौधातकिश्च पुनरुपालब्धवान्—'यद्यव तर्ह्यैव पर्यागतस्य राजर्षेर्जनकस्य कृते दधिमधुत एव सम्पन्नो मधुपर्को न पुनर्वत्सतरी विशसिता । मधुपर्के समासत्व यद्यनिवर्तनीय स्यात्कथमिद वैषम्यमि'ति । दाण्डायनश्चानिवृत्तमासानामर्घ्याणां कृत एव मधुपर्कस्य समासत्व, निवृत्तमासस्य कृते तु न जनकस्य निवृत्तमासत्वे हेतुस्तादृश सीतादुष्परिणामाकर्णनम् । अत एव स वैखानस सवृत्त, 'चन्द्रद्वीपतपोवने कतिपयान्सवत्सरान् यावत्तपश्चचारे'ति प्रत्यपीपदत् । सौधातकिना 'जनकस्य सम्बन्धिन्या दर्शन वृत्त नो वे'ति पृष्ट भगवता वसिष्ठेन 'स्वयमुपेत्य जनको द्रष्टव्य' इत्यरुन्धतीमुखेन कौसल्या सूचिते'ति दाण्डायन प्रतिवाक्य प्रायुङ्क्त । तत सौधातकि क्रीडनप्रस्तावमकरोत् दाण्डायनश्च- जनक आश्रमस्य बहिर्वृक्षमूलमधितिष्ठता'ति निजगाद ।

(इति मिश्रविष्कम्भक ।)

ततो जनक प्रवेशानन्तर सीताया कृते निरतिशय शोक प्राकाशयत् । तदनु अरुन्धतीकौसल्याकञ्चुकिन प्राविशन । कौसल्या लज्जया सीताविरहजेन दु खाऽतिशयन च जनकदर्शन परिहर्तुमैच्छन । अरुन्धतीकञ्चुकिनौ च कौसल्या प्राबोधयताम् । अनन्तर जनक उपसरणपूर्वक प्रणतिपुर सर चाऽरुन्धतीं स्तुतवान । सा चाशिष तस्मै व्यतरत् । ततस्ते सर्वेऽपि सीतारामविषया चर्चामकुर्वन् । जनकश्च दशरथप्रशसा कौसल्याया शोचनीयता च प्रतिपाद्य सीता प्रति रामव्यवहारे क्षोभाऽतिशय रामे कोप च प्राकाशयन् ।

विप्रबटुभि सम लव आगमत्तत्र कौसल्यादय सो कण्ठातिशय त व्यलोकय स्तत्र च सीतारामयोराकृति गुणाश्च व्यतर्कयन् । जनकश्च कञ्चुकिद्वारा वाल्मीकिं लवपरिचयमपृच्छत् । वाल्मीकिश्च तत एव उचितसमय ज्ञान भविष्यती'ति सूचितवान् । लवश्च विनयपूर्वक जनकादीनामन्तिकमाजगाम । तेन साक कौसल्यादीना सलाप, आत्मपरिचय पृष्ट लव सभ्रातृकस्य (कुशसहितस्य) स्वस्य वाल्मीकेरन्तेवासितामचकथत् । अत्राऽन्तरे यज्ञियहयसरक्षणप्रसङ्गेन लक्ष्मणकुमारस्य चन्द्रकेतोरागमनमाकर्ण्याऽरुन्धतीजनकौ तद्दर्शनोत्कण्ठा प्रादर्शयताम् । लवश्च चन्द्रकेतुपरिचयमपृच्छत् । सद्यस्तत्प्राप्त्यनन्तर लव स्वीय रामायणकथाप्रावीण्यमसूसुचत् । तस्मिन्नन्तरे हयदर्शनाऽनन्तर विस्मयाऽऽविष्टा बटवो लवमाकारयन्, लवश्चाऽश्वमधाऽश्वाऽवलोकनाय बटुभि सह तत सविनय निरगमत् । अश्वरक्षकाणा दर्पपूर्णाक्षिप्तवचन क्षत्रमात्राऽभिभवकुपितो लवो हयमहरत् । ततश्चन्द्रकेतुपुरुषा लवमत-

र्जयन्। स च निर्भीकरूपेण संग्रामसंनद्धोऽवर्तत। ततः सर्वे निष्क्रान्ताः।

पञ्चमाऽङ्के

ततश्चन्द्रकेतुर्बहुभिरश्वरक्षकैः सैनिकैः सममेकाकित्वेन विग्रहमाचरतः संग्रहस्य लवस्य विक्रमं सुमन्त्रं सारथिं प्रति प्राशंसत्। चन्द्रकेतुः स्वसैन्यपलायनेन क्षोभमनुबभूव, द्वन्द्वयुद्धाऽर्थं च लवमाह्वयत्। लवे चन्द्रकेतुना सार्धं युद्धार्थं प्रसितेऽन्तरमासाद्य सैनिकास्तमाक्रामन्। लवश्च तेषां निवारणार्थं जृम्भकाऽस्त्रं मुमोच। सुमन्त्रश्च सैन्यघोषप्रशमनेन लवेन जृम्भकाऽस्त्रं प्रयुक्तमित्यतर्कयत्, गुरुसम्प्रदायप्राप्तव्यानां जृम्भकास्त्राणां प्राप्तिर्लवस्य कथमजायतेति सातिशयं व्यस्मयत च। ततो लवचन्द्रकेत्वो रणाऽङ्गणे प्रणयसम्भाषणम्। सुमन्त्रश्च लवस्य सीतासुतत्वमाशास्त। अनन्तरं स नैराश्यं चाऽन्वभवत्। चन्द्रकेतुः 'संग्रामाऽर्थं रथमारोहतु भवान्, नो चेदहं रथादवतरामी'ति लवं कथयामास। सुमन्त्रश्चन्द्रकेतुं समभ्यनन्दत्। अनभ्यस्तरथचर्यत्वव्यपदेशपूर्वकं लवश्च रथारोहणे स्वाऽनिच्छां प्रादर्शयत्। चन्द्रकेतुश्च रथादवतीर्य सुमन्त्रमभिवादयामास। सुमन्त्रश्च तमाशिषा समयुङ्क्त। ततो लवचन्द्रकेत्वोः संवादः। लवोऽश्वरक्षकाणां परुषतरवचनानि निनिन्द। तस्मिन्नेवाऽवसरे वाल्यादिवधे रामचरित्रेऽपि किमप्याक्षेपवाक्यं प्रायुङ्क्त। ततो द्वावपि युद्धसन्नद्धौ सञ्जातौ? अनन्तरं सर्वे निष्क्रान्ताः।

षष्ठाऽङ्के

ततो विमानमारुह्य विद्याधरी विद्याधरश्चोभावपि लवचन्द्रकेत्वोर्युद्धं द्रष्टुं प्राविशताम्, तत्प्रयुक्ताग्नेयवारुणवायव्याऽस्त्राणि च प्राशंसताम्।

'शम्बूकवधाऽनन्तरं तत्रैव युद्धस्थले भगवान् रामचन्द्रः समागतस्तं दृष्ट्वा चन्द्रकेतुः प्रणतो लवश्च शान्तोऽभूदि'ति विद्याधरोऽवर्णयत्।

(इति मिश्रविष्कम्भकः।)

गुणगणाऽभिरामो भगवान् रामश्च पुष्पकाऽवतरणाऽनन्तरं प्रणतं चन्द्रकेतुं परिष्वज्य कुशलमप्राक्षीत्। चन्द्रकेतुश्च प्रत्युत्तरवितरणपूर्वकं 'मामिव मित्रं लवं पश्यतु भवानि'त्यावेदयत्। ततो रामः शुभलक्षणगुणगणभूषितं लवं प्रशंसितवान्, तत्राऽऽत्मीयं निष्कारणं प्रणयं च प्रकाशितवान्। लवश्च राममहिमाऽतिशयेन विस्मितोऽभूच्चन्द्रकेतुं रामचन्द्रपरिचयमपृच्छच्च। चन्द्रकेतुश्च परिचयनिर्देशमकार्षीत्। लवकृताऽभिवादनानन्तरं रामस्तमालिङ्गितवान् लवश्च तं स्वधृष्टतायां क्षमामयाचत। रामश्च 'क्षत्रियस्यैतद्भूषणमि'ति प्रशंसितवान्।

लवेन जृम्भकास्त्रेषु संहृतेषु रामस्तस्मिंस्तदस्त्रासादनेन विस्मयमन्वभवत्। अत्राऽन्तरे संग्रामवार्तां निशम्य साटोपं कुशस्तत्रागतः। लवश्च 'रामसन्निधौ शान्तिर्मार्ग्य'ति कथयित्वा रामपरिचयं च कुशं प्रति प्रत्यपादयत्। कुशश्च रामं प्रणतः रामश्च तमाश्लिष्यत्, कुशलवयो राजलक्षणानि च ददर्श; एवं च तयोः सीतासादृश्योपलब्ध्या सीताऽपत्यत्वमपि समभावयत्। रामाऽनुरोधेन कुशलवौ रामायणीयश्लोकान् कथयामासतुः। रामश्च शोकाक्रान्तचेताः समजायत।

अत्रान्तरे शिशुकलहाकर्णनेनाऽरुन्धतीवसिष्ठवाल्मीकिकौसल्याजनकादयः अत्रागच्छन्तीति श्रुत्वा रामः शोकभयाऽभिभूतत्वेन तद्दर्शनं प्रति सङ्कुचितोऽभवत्। ततः सर्वे निष्क्रान्ताः।

सप्तमाऽङ्के

शुभलक्षणो लक्ष्मणो महर्षिवाल्मीकेरनुरोधाद्रामायणनाटकमभिनेतुं रामादेशेन गङ्गातीरे सर्वेषामपि दर्शकानां कृते समुचितस्थानसंनिवेशमकार्षीत्। रामश्चागत्य 'कुशलवयोरत्र चन्द्रकेतुसदृशी प्रतिष्ठा कर्तव्ये'त्यादिशेत्। ततः सूत्रधारो नाटकं प्रारभत।

अथ लक्ष्मणेन श्वापदगणाकीर्णेऽरण्ये परित्यक्ताया आसन्नप्रसूतिवेदनायाः सीताया 'भागीरथ्यामात्मानं पातयिष्यामी'ति वचनं नेपथ्येऽश्रूयत।

(इति प्रस्तावना)

रामश्च नाटकाऽभिनीतमप्येवमर्थं तथ्यं मत्वाऽऽवेगं प्रकाशितवान्। लक्ष्मणश्च तं समसान्त्वयत। ततश्चैकैकं शिशुमुत्सङ्गे नीत्वा सीतामवलम्ब्य पृथिवीभागीरथ्यौ प्राविशताम्। ते च देव्यौ सीतायै यमलपुत्रोत्पत्तिमसूचयताम्। सीता च यमलप्रसवेन हर्षमनुभूय मूर्च्छिता। प्राश्निकजनस्थो लक्ष्मणश्च सीताकर्तृके पुत्रप्रसवे हर्षं व्यञ्जितवान्। अत्राऽन्तरे रामश्च मूर्च्छितः। गङ्गापृथिव्यौ च सीतां समाश्वासयताम्, तत्प्रश्ने स्वकीयपरिचयं च व्यतरताम्। ततस्तनयां प्रत्यनयाचरणेन क्षुभिता पृथिवी रामं प्रत्युपालम्भं व्यञ्जितवती। भागीरथी च तामन्वनयत् सीता च जननीमात्माऽङ्गविलयमयाचत। पृथिवी च 'वत्से! अवेक्षणीयौ ते पुत्रकौ' इति तां प्राबोधयत। ततो देव्यावस्मत्तोऽपि सीता पवित्रतरेत्युद्घोषयताम्। अत्राऽन्तरे प्रदीप्तानि जृम्भकाऽस्त्राणि 'चित्रदर्शनक्षणे रघुनन्दनवचनमनुसृत्य वयं त्वत्पुत्रावाश्रयामः' इति सीतायै न्यवेदयन्। ततः सीता 'मत्पुत्रयोः क्षात्रसंस्कारं क आचरिष्यती'ति जगाद। भागीरथी च तत्कर्मणि वाल्मीकिमचिकीर्तत्। लक्ष्मणश्च रामसविधे कुशलवौ सीतापुत्रत्वेन समभावयत्।

ततः सीता भूयः स्वजननीं स्वस्यास्तदङ्कविलयं ययाचे। तदनु पृथिवी 'स्तन्यत्यागं यावत्त्वया पुत्रयोर्निरीक्षणं कर्तव्यं, पश्चाद्यथा ते रोचिष्यते' इत्यादिदेश। ततः सीता देवीभ्यां समं निष्क्रान्ता। अनन्तरं वैदेहीदेहविलयं सम्भाव्य रामः पुनरमूर्च्छत्। लक्ष्मणो रामपरित्राणार्थं वाल्मीकिमयाचत। ततो नेपथ्ये— 'आतोद्यमपनीयताम्। सर्वे जना महर्षिणा वाल्मीकिनाऽभ्यनुज्ञातमाश्चर्यं पश्यन्तु' इति वाक्यमश्रूयत। ततो 'भागीरथीवसुन्धराभ्यां सार्धं सीतादेवी जलादुत्तिष्ठती' त्येतद्वाक्यं लक्ष्मणोऽब्रवीत्। नेपथ्ये च 'देव्यरुन्धति ! आवाभ्यां गङ्गापृथिवीभ्यां पतिव्रता वधूः सीता तवार्पिता' इति वाक्यं न्यशाम्यत।

रामस्य मूर्च्छाऽपगमाऽभावेन सर्वेऽपि खिन्नाः समजायन्त। अरुन्धती च 'पाणिस्पर्शेन रामं जीवये'ति सीतामादिदेश। सीतया तथाऽऽचरिते प्राप्तसंज्ञो रामः सीतां दृष्ट्वाऽहृष्यत्, सविध एवाऽरुन्धतीं शान्तामृष्यशृङ्गादीन्गुरुजनांश्च विलोक्य लज्जां चाऽनुभूतवान्।

नेपथ्ये 'रामभद्र ! आलेख्यदर्शने 'सीतायां शिवानुध्यानपरा भवे'ति त्वया यथा कथितं तथैव मयाऽऽचरितमि'ति गङ्गाया उक्तिरश्रूयत। पुनरपि नेपथ्ये 'आयुष्मता सीतायाः परित्यागे 'भगवति वसुन्धरे ; श्लाघ्यां दुहितरं जानकीमवेक्षस्वे'ति यथा प्रार्थितं तथैव कार्यं साधितं चे'ति पृथिव्या उक्तिर्न्यशाम्यत।

ततो भगवती वसिष्ठजायाऽरुन्धती बहुशः सीतासतीत्वं प्रशस्य 'रामकर्तृके सीतापरिग्रहे वः कीदृशमभिमतमि'ति सर्वानपि पप्रच्छ।

लक्ष्मणश्च 'सर्वे पौरा जानपदाश्च प्रजावतीं सतीशिरोमणिं सीतां प्रणमन्ति, लोकपालाः सप्तर्षयश्च पुष्पवृष्टिभिरुपतिष्ठन्त' इत्यकथयत्। ततोऽरुन्धती सीतापरिग्रहाय राममाज्ञापयामास। रामश्चाऽभ्युपागमत्। लक्ष्मणः कृतार्थो भूत्वा सीतां ननाम, सीता च तमाशिषा संयुयोज। ततोऽरुन्धत्या उक्तया वाल्मीकिः कुशलवौ चाऽऽनयत्। पुत्रयोर्मातापितृसमागमेन हर्षप्रकर्षः समभूत्। सीतावाल्मीकिमभिवादयामास, ततश्चाशिषं चाऽधिजगाम। अत्रैवाऽन्तरे लवणमुन्मूल्य शत्रुघ्नः समाययौ। वाल्मीकिना 'किं ते भूयः प्रियमाचरामी'त्युक्ते रामः 'भवत्कर्तृका पापनाशिनी कल्याणवर्द्धिकेयं कथा वर्तते, शब्दब्रह्मविदः कवेर्नाटकरूपेण परिणतां तामिमां वाणीं बुधाः परिभावयन्त्वि'ति प्रार्थयामास। ततः सर्वे निष्क्रान्ताः।

हिन्दी कथासार

पहला अङ्क

नान्दीके अन्तमें सूत्रधार नाटककार भवभूतिका परिचय देता है। 'रामके राज्याऽभिषेकोत्सवमें प्रवृत्त गीतवाद्यादि क्यों बन्द हुआ ?' ऐसा उसके पूछनेपर 'रामने निमन्त्रित ब्रह्मर्षि आदि सब लोगोंको अपने-अपने स्थान में भेज दिया; इसी तरह—महाराज रोमपादकी दत्तक पुत्री कौसल्याकी पुत्री शान्ताके पति ऋष्यशृङ्गके बारह वर्षमें समाप्त होनेवाले सत्रमें वसिष्ठ ऋषिकी निगरानीमें रामकी मातायें अरुन्धतीको भी साथमें लेकर चली गई हैं, इस लिए गीत-वाद्यादि उत्सव बन्द हो गया है' नट ऐसा जवाब देता है। उसी अवसरमें प्रजाकृत सीता के अपवादकी भी सूचना करता है। सूत्रधारके 'राम इस समय कहाँ हैं ?' ऐसा पूछनेपर 'अपने पिता जनकके मिथिला जानेसे खिन्न सीताको दिलासा देनेके लिये राम न्यायालयसे अन्तःपुरमें प्रवेश करते हैं' नट ऐसा उत्तर देता है। (इति प्रस्तावना।)

पिताके वियोगसे खिन्न सीताका दुःख हटानेके लिये राम दिलासा देते हैं। ऋष्यशृङ्गके आश्रमसे अष्टावक्र ऋषि आये। अष्टावक्रने सीताको 'वीर पुत्रको जननेवाली हो' इस तरहका वसिष्ठका आशीर्वाद और रामको अरुन्धती आदिके 'सीताका दोहद पूर्ण करना चाहिये' ऐसे सन्देशकी सूचना दी और सीताको ऋष्यशृङ्गका 'पुत्रके उत्पन्न होनेपर तुम्हें देखूँगा' ऐसा सन्देश भी कहा। फिर अष्टावक्रने रामको वसिष्ठका 'आप प्रजाओंके अनुरञ्जनमें तत्पर हों' ऐसा सन्देश भी सुनाया। रामने भी ऐसा करनेके लिए प्रतिज्ञा की। अष्टावक्रके जानेपर कुमार लक्ष्मण आये। वे अपने साथ खेदग्रस्त सीताके मनोविनोदके लिए रामचरित्रज्ञापक चित्रपट भी ले आये। 'चित्रपटमें चरित्रका कितना भाग लिखा गया है ?' रामके ऐसा पूछनेपर 'भाभीकी अग्निशुद्धि तक (लिखा गया है)।' ऐसा लक्ष्मणका वचन सुनकर रामने सीताको सान्त्वना दी। सीताके चित्र देख-कर 'ये कौन ऊपर रहकर जैसे आर्यपुत्रकी स्तुति कर रहे हैं ?' ऐसा पूछने पर लक्ष्मणने 'ताडकाको मारनेके बाद विश्वामित्र ऋषिसे आर्यको उपहार दिये गये ये जृम्भकास्त्र हैं' ऐसा जवाब दिया। रामने भी गर्भिणी सीताको 'ये अस्त्र तुम्हारे पुत्रके पास रहेंगे' ऐसा कहा। उसके बाद सबने चित्रपटमें विवाह आदि

चरित्रको देखा। रामने चित्रमें गङ्गाजीको देखकर 'हे देवि! आप सीताकी कल्याणचिन्तामें तत्पर हों' ऐसी प्रार्थना की। तब उन लोगोंने वनवासके समयमें पहले देखे गये पहाड़ और पेड़ आदि पदार्थोंको देखा। तब सीताहरणके अनन्तर रामकी करुणापूर्ण अवस्थाका लक्ष्मणने प्रतिपादन किया। जटायुका पराक्रम देखकर लक्ष्मणने माल्यवान् पर्वतका वर्णन किया। तब रामने पूर्वानुभूत सीताविरह की याद होनेसे उनको रोका। सीताने भी फिर वनविहारमें और गङ्गास्नानमें अपनी इच्छाको जताया। रामने उनकी दोहदेच्छाको पूर्ण करनेके लिए लक्ष्मणको आज्ञा दी। उनको आज्ञा पूर्ण करने के लिए रथ तैयार करने के निमित्त लक्ष्मणके जानेपर गर्भभारसे परिश्रान्त सीता सो गई। इस बीचमें लोकवृत्तान्त जाननेके लिए भेजा गया दुर्मुख नामका गुप्तचर रामके पास आया। रामके आग्रहके साथ पूछनेपर उसने अत्यन्त विषादके साथ सीताके विषयमें लोकाऽपवादको कहा। यह सुन राम बेहोश हो गये, फिर होशमें आकर अनेक प्रकारसे विलाप करने लगे। तब 'लवणसे त्रासित ऋषिसमुदाय शरणके लिए उपस्थित है' ऐसी खबर रामने सुनी और उन्होंने लवणको मारनेके लिए शत्रुघ्नको भेजनेका विचार किया। तदनन्तर 'हे देवि! अपनी पुत्री सीताकी देखरेख कीजिए' पृथ्वीसे ऐसी प्रार्थना कर राम वहांसे बाहर निकले। जागकर सीताने रामको ढूंढ़ा। दुर्मुखने-'वनयात्राके लिए रथ तैयार है' ऐसा लक्ष्मणका वाक्य सीताको कहा। सीताने रघुकुलके देवताओंको नमस्कार कर जानेका उद्यम किया। तब सब निकले।

दूसरा अङ्क

वाल्मीकिके आश्रमसे अध्ययनके लिए आई हुई आत्रेयी सीताकी सखी वनदेवता वासन्तीके समीप गई। वासन्तीने भी अर्घ्य आदिसे उनका सत्कार किया। 'वाल्मीकि महर्षिकी मौजूदगीमें भी यहां इतनी दूर अगस्त्य आदि महर्षियोंसे पढ़नेके लिए आपका यह कैसा प्रयास है!' ऐसी वासन्तीके पूछनेपर 'वाल्मीकिके आश्रममें किसी देवतासे दूध छूटनेके अनन्तरकी अवस्थामें वर्तमान दो बालक लाये गये। कुश और लव यह उनका नाम है। उन दोनोंमें जृम्भक अस्त्र जन्मसिद्ध हैं। वाल्मीकि ऋषिने उन दोनोंका क्रमके साथ उपनयन तक सब संस्कार किया। वे दोनों बालक अतिशय मेधावी हैं, इस लिए उनके साथ हम लोगोंका पढ़ना नहीं हो सकता। इसी तरह किसी समय महर्षि तमसा नदीमें गये हुए थे, उसी समय एक व्याधने एक क्रौञ्च पक्षीको मारा; उस शोकसे

महर्षिको लोकमें पहले कभी नहीं आया हुआ 'मा निषाद' ऐसा श्लोक प्रकाशित हुआ। तदनन्तर ब्रह्माजीने उनको रामायण बनानेके लिए आज्ञा दी और उसके लिए सर्वत्र प्रतिबन्धशून्य प्रतिभारूप नेत्र भी उनको दिया। तब वाल्मीकि महर्षिने रामायणकी रचना की। इस तरह दो विघ्नोंके आ पड़नेसे वहांपर (वाल्मीकिके आश्रममें) पढ़ना असम्भव हुआ है।' आत्रेयीने ऐसा उत्तर दिया। तब आत्रेयी सीताकी स्मृतिसे दुःखित हुई, वासन्तीके पूछनेपर 'सीताका निर्वासन कर रामने सोने की सीता-मूर्तिको धर्मपत्नी बनाकर अश्वमेध यज्ञका आरम्भ किया है और यज्ञके घोड़ेकी रक्षाके लिए लक्ष्मणके पुत्र चन्द्रकेतुको भेजा है। इस बीचमें मृत ब्राह्मणकुमारको जिलानेके लिए तपस्या करते हुए शम्बूकनामक शूद्रको मारनेके निमित्त राम पुष्पक विमानपर चढ़कर घूम रहे हैं' आत्रेयीने ऐसा कहा। इसके बाद आत्रेयी चली गई। (इति शुद्ध विष्कम्भक।)

तब पुष्पकविहारी रामने जनस्थानमें शम्बूकको मारा और उसने दिव्यरूप पाकर रामकी स्तुति की। तब शम्बूकके साथ रामकी बातचीत हुई। वहांपर रामको अनेक बार सीताका स्मरण हुआ। अपनी आज्ञासे शम्बूकके जानेपर सीताके स्मरणसे रुद्धकण्ठ होकर राम विलाप करने लगे। शम्बूकने फिर आकर 'मेरे आश्रममें आप पधारें, लोपामुद्रा आपकी बाट जोह रही हैं, पीछे आप पुष्पक विमानसे अश्वमेधके लिए तैयार होंगे' अगस्त्यका ऐसा सन्देश रामको सुनाया। रामने स्वीकार किया। तब दोनों निकले।

तीसरा अङ्क

मुरला नामकी नदीने 'गोदावरीको लोपामुद्राका' रामकी स्थिति बहुत ही शोकसे परिपूर्ण है। लौटते हुए रामभद्र पञ्चवटीमें आकर सीताके साथ पहलेके अनुभूत स्थानोंको निश्चय देखेंगे। वहां शोककी अधिकतासे उनके अनिष्टकी आशङ्का है। इस कारणसे हे भगवति गोदावरि ! रामके कल्याणके लिए आपको सावधान होना चाहिए।' ऐसा सन्देश पहुँचानेके लिए आ रही हूँ।' यह बात रास्तेमें मिली हुई अपनी सखी तमसा नदीको कही।

तमसाने भी मुरलाको कहा—लक्ष्मणसे वाल्मीकिके तपोवनके निकट छोड़ी गई सीता तिरस्कार और प्रसवकी वेदनासे एक ही बार आक्रान्त होकर गङ्गाप्रवाहमें कूद पड़ीं और वहींपर उन्होंने दो पुत्रोंको पैदा किया तथा उन्हें पृथिवी और गङ्गाने अनुग्रह कर पातालमें पहुँचाया। दूध छूटनेके अनन्तर उनके दोनों पुत्रोंको गङ्गादेवीने

स्वयम् वाल्मीकिको सौंपा। इस समय सरयूके मुखसे पञ्चवटीमें आये हुए राम-भद्रको जानकर भगवती भागीरथी लोपामुद्राकी तरह आशङ्का कर किसी कामके बहानेसे सीताके साथ गोदावरीको देखनेके लिए आई। और उन्होंने सीताको समझाया—'वत्से! आज चिरञ्जीव कुश और लवकी बारहवीं वर्षगांठ है। इस लिए अपने प्राचीन श्वशुर सूर्यकी अपने हाथसे तोड़े गये फूलोंसे पूजा करो। पृथिवीमें विद्यमान तुम्हें देवता भी नहीं देखेंगे' और मुझे भी सीताकी रक्षाके लिए गङ्गादेवीने आज्ञा दी है"। ऐसी बातचीतके बाद दोनों निकलीं (इति शुद्ध विष्कम्भक)

तब फूलोंको तोड़नेमें तत्पर सीताका प्रवेश होता है। उन्होंने पहले अपनेसे बढ़ाये गये हाथीके बच्चेको वासन्तीके मुखसे दूसरे हाथीसे आक्रान्त सुनकर जल्दबाजीके साथ पहलेकी तरह आर्यपुत्र (राम) को बुलाया। इसी बीचमें राम पुष्पकपर चढ़कर आये। रामका वचन सुनकर सीताने उत्कण्ठा दिखलाई। रामका कृश शरीर और शोचनीय अवस्थाको देखकर सीता मूर्च्छित हुई। राम भी बार बार विलाप करने लगे और मूर्च्छित (बेहोश) भी हो गये। सीताने तमसाके वचनसे, होशमें लानेके लिए रामको हाथसे स्पर्श किया। तब होशमें आकर राम उस स्पर्शकी तारीफ करने लगे। रामके देखनेकी आशङ्का कर सीता डरकर वहांसे भागनेकी प्रार्थना करने लगीं। तमसाने गङ्गाके प्रभावका वर्णन कर उनको रोका। राम स्पर्शका अनुभव होनेपर भी सीताको न देखनेसे अपने भ्रमका विचार करने लगे। इस बीचमें फिर भी सीतासे पोसे गये हाथीके बच्चेका वृत्तान्त सुनाई पड़ा। राम ऐसा सुनकर उठ पड़े। तब वनदेवता वासन्ती रामके समीप आ गई। वासन्तीने सीतासे पालित हाथीके बच्चेके विजयलाभका वर्णन किया। तब वासन्ती और रामकी बातचीत हुई। बीच-बीचमें तमसा और सीताकी बातचीत भी हो गई। वासन्तीने रामको सीतासे बढ़ाये गये मोरनीसे युक्त मोरको दिखलाया। वासन्तीने सीताके निर्वासनमें रामको उलाहना दिया। सीताको वह उलाहना अच्छा न लगा। वासन्तीके निर्वासित सीताका वृत्तान्त पूछनेपर रामने 'वैसे हिंस्र जन्तुओंसे व्याप्त जङ्गलमें निश्चय सीता नष्ट अवयववाली हो गई होंगी' ऐसा उत्तर दिया। तब रामका विलाप सुनकर वासन्तीने उन्हें धैर्यका उपदेश दिया। राम फिर मूर्च्छित हो गये। सीता फिर तमसाके उपदेशसे हाथसे छूकर रामको होशमें लाई। होशमें आकर रामने वासन्तीको सीताप्राप्तिकी सूचना दी। वासन्तीने सीताका प्रत्यक्ष न होनेसे विश्वास नहीं किया। अतिशय शोकके कारण राम बारंबार विलाप

करने लगे। रामने वासन्तीसे अश्वमेध यज्ञमें सोनेकी सीतामूर्तिको सहधर्मचारिणी बनानेकी बात कही और अयोध्या जानेके लिए वासन्तीको पूछा। सीताने रामके वियोगमें अतिशय कातरता दिखलाई। वासन्तीने रामको जानेकी आज्ञा दे दी। तमसाने सब रसोंमें करुणरसकी प्रधानताका सिद्ध किया। अन्तमें तमसा और वासन्तीने सीता और रामको आशीर्वाद दिया। तब सब चले गये।

चौथा अङ्क

भगवान् वाल्मीकिके आश्रममें दो तपस्विबालकोंकी बातचीत हुई। उनमें दाण्डायनने सौधातकिसे वाल्मीकिके आश्रमकी प्रशंसा की। सौधातकिने दाण्डायनसे ऋषियोंको साथमें लेकर वाल्मीकिके आश्रममें आये हुए अतिथिका परिचय पूछा। दाण्डायनने 'ऋष्यशृङ्गके आश्रमसे अरुन्धती और दशरथकी पत्नियोंके साथ ये वसिष्ठ ऋषि आये हुए हैं' ऐसा उत्तर दिया। सौधातकिने वसिष्ठके मधुपर्कप्रसङ्गमें कपिला गायके आलम्भनसे उनपर व्याघ्र (बाघ) होनेकी सम्भावना की। दाण्डायनने श्रौतवाक्यसे उस कर्म (मधुपर्कमें पशुसंस्कार) का समर्थन किया। सौधातकिने फिर उपालम्भ किया—यदि ऐसा हो तो आज ही आये हुए राजर्षि जनकके लिए दही और मधु (शहद) से ही मधुपर्क सम्पन्न हुआ, वत्सियाकी हत्या नहीं हुई। 'मधुपर्कमें मांस होना ही चाहिए, तो यह विषमता कैसे?' दाण्डायनने 'मांसपरित्याग नहीं किये हुए पूज्य जनोंके लिए ही मधुपर्कमें मांस होना चाहिये, मांसपरित्याग किये हुए पूज्य जनके लिये नहीं; जनकके मांस छोड़नेमें हेतु—सीताका उस तरहका दुष्परिणाम होना ही है, इसीलिए वे वानप्रस्थ हो गये हैं, चन्द्रद्वीप तपोवनमें कई वर्षों तक उन्होंने तपस्या भी की है' ऐसा प्रतिपादन किया। सौधातकिके 'समधिनके साथ जनककी भेंट हुई या नहीं?' ऐसा पूछनेपर दाण्डायनने 'भगवान् वसिष्ठने 'स्वयं जाकर जनकसे मिलना चाहिए' अरुन्धतीके द्वारा कौसल्याको ऐसी सूचना दी' ऐसा उत्तर दे दिया। तब सौधातकिने खेलनेका प्रस्ताव किया। दाण्डायनने—'जनक आश्रमके बाहर वृक्षोंके नीचे बैठे हैं' ऐसा कहा। (इति मिश्र विष्कम्भक)।

तब जनकने प्रवेश कर सीताके लिये अतिशय शोकको प्रकाशित किया। अनन्तर अरुन्धती, कौसल्या और कञ्चुकीने प्रवेश किया। कौसल्याने लज्जासे और सीताके विरहसे उत्पन्न अतिशय शोकसे भी जनकसे मिलनेकी इच्छा नहीं

की। अरुन्धती और कञ्चुकीने कौसल्याको समझाया। तब जनकने समीप आकर नमस्कारपूर्वक अरुन्धतीकी स्तुति की। अरुन्धतीने उन्हें आशीर्वाद दिया। तब सबलोग सीता और रामके विषयकी चर्चा करने लगे। जनकने दशरथकी प्रशंसा और कौसल्याकी शोचनीयताका प्रतिपादन कर सीताके प्रति रामके व्यवहारमें अतिशय क्षोभ और रामके विषयमें क्रोध दिखलाया। ब्राह्मणबटुओंके साथ वहांपर लव आ गये, कौसल्या और जनक आदिने बहुत ही उत्कण्ठाके साथ उन्हें देखा और उनमें सीता और रामके आकार और गुणोंकी तर्कणा की। जनकने कञ्चुकीके द्वारा वाल्मीकिसे लवका परिचय पूछा। वाल्मीकिने इसी तरह 'उपयुक्त समयमें पता लगेगा' ऐसी सूचना दी। लव नियमपूर्वक जनक आदिके समीपमें आ गये। उनके साथ कौसल्या आदिकी बातचीत हुई। अपना परिचय पूछे जानेपर लवने 'भाई (कुश) के साथ मैं महर्षि वाल्मीकिका शिष्य हूँ' ऐसा कहा। इस बीचमें यज्ञके घोड़ेकी रक्षाके प्रसङ्गसे लक्ष्मणकुमार चन्द्रकेतुका आगमन सुनकर अरुन्धती और जनकने उनको देखनेकी उत्कण्ठा जताई। लवने चन्द्रकेतुका परिचय पूछा। परिचय पानेके बाद लवने रामायणकी कथामें अपनी प्रवीणता दिखलाई। इस बीचमें घोड़ेको देखकर बटुओंने आश्चर्ययुक्त होकर लवको बुलाया। लव भी अश्वमेधके अश्वको देखनेके लिये बटुओं के साथ वहांसे नम्रतापूर्वक निकले।

अश्वरक्षकोंकी दर्पपूर्ण उक्ति सुनकर सम्पूर्ण क्षत्रियोंके तिरस्कारसे क्रुद्ध होकर लवने अश्वका हरण किया। चन्द्रकेतुके पुरुषोंने लवको धमकाया। वे भी निर्भीक रूपसे लड़नेके लिये तत्पर हुए। तब सब निकल पड़े।

पाँचवाँ अङ्क

तब चन्द्रकेतुने बहुतेरे अश्वरक्षक सैनिकोंके साथ अकेले लड़ते हुये लवके पराक्रमकी सारथि सुमन्त्रसे प्रशंसा की। चन्द्रकेतु अपने सैनिकोंके भागनेसे क्षुब्ध हो गये और उन्होंने द्वन्द्वयुद्धके लिये लवको ललकारा। लवके चन्द्रकेतुके साथ लड़नेमें तत्पर होनेपर छिद्र पाकर चन्द्रकेतुके सैनिकोंने लवपर आक्रमण कर दिया। लवने भी उनको हटानेके लिये जृम्भक अस्त्रका प्रयोग किया। सुमन्त्रने सैनिकोंका कोलाहल बन्द होनेसे 'लवने जृम्भक अस्त्र छोड़ा' ऐसा विचार किया। कुशाश्वप्रदानसे पाये जानेवाले जृम्भक अस्त्रोंकी प्राप्ति लवको कैसे हुई ! ऐसा विचारकर सुमन्त्र बहुत ही विस्मित हुये। तब लड़ाईके व्याजमें लव और

चन्द्रकेतुका प्रेमसम्भाषण हुआ। सुमन्त्रने भी लवके सीतापुत्र होनेकी आशा की। पीछे वे निराश भी हो गये। चन्द्रकेतुने 'लड़नेके लिये आप दूसरे रथपर चढ़ें, नहीं तो मैं रथसे उतरता हूँ' लवको ऐसा कहा। सुमन्त्रने चन्द्रकेतुका अभिनन्दन किया। रथपर चढ़नेका अभ्यास न होनेका बहाना कर लवने अपनी अनिच्छा दिखलाई। चन्द्रकेतुने रथसे उतरकर सुमन्त्रको अभिवादन किया। सुमन्त्रने उनको आशीर्वाद दिया। तब लव और चन्द्रकेतुका संवाद हुआ। लवने घोड़ेके रखवारोंके कठोर वचनोंकी निन्दा की, इसी अवसरमें बाळो आदिके वधमें रामके चरित्रमें भी कुछ आक्षेपयुक्त वाक्य कहा। तब दोनों ही युद्धके लिये तैयार हो गये। अनन्तर सबलोग चले गये।

छठा अङ्क

तब विमानपर चढ़कर विद्याधरी और विद्याधरने लव और चन्द्रकेतुको युद्ध देखनेके लिये प्रवेश किया और उनसे छोड़े गये आग्नेय, वारुण और वायव्य अस्त्रोंकी प्रशंसा भी की। 'शम्बूकको मारकर उसी युद्धस्थलमें भगवान् रामचन्द्र आ गये, उन्हें देखकर चन्द्रकेतुने प्रणाम किया और लव भी शान्त हो गये।' विद्याधरने विद्याधरीसे ऐसा कहा। (इति विष्कम्भक)।

भगवान् रामने पुष्पकसे उतरकर, प्रणाम करनेवाले चन्द्रकेतुकी आलिङ्गनकर कुशल पूछा। चन्द्रकेतुने भी जवाब देकर 'मेरी तरह मेरे मित्र लवको भी आप देखें' ऐसा निवेदन किया। तब रामने शुभलक्षणसे भूषित लवकी प्रशंसा की और उनमें अपने निष्कारण प्रेमका प्रकाशन किया। लव भी रामके अतिशय महत्त्वसे विस्मित हो गये और उन्होंने चन्द्रकेतुसे रामका परिचय भी पूछा। चन्द्रकेतुने परिचयका निर्देश किया। लवके अभिवादन करनेपर रामने उन्हें आलिङ्गन किया। लवने अपनी ढिठाईपर उनसे क्षमा मांगी। रामने भी 'क्षत्रियका यह (ढिठाई) भूषण है' ऐसा कहकर प्रशंसा की। लवके जृम्भकास्त्रका संहार करनेपर उनमें अस्त्रप्राप्ति होनेसे राम विस्मित हो गये। इसी बीचमें लड़ाईकी खबर सुनकर क्रोधपूर्वक वहांपर कुश आये। लवने भी 'रामके समीपमें शान्तिधारण करना चाहिए' ऐसा कहकर उन्हें रामका भी परिचय दे दिया। कुशने रामको प्रणाम किया। रामने उनको आलिङ्गन किया और कुश और लवमें राजचिह्नोंको देखा। इसी तरह उन दोनोंमें सीताका सादृश्य देखनेसे उनके सीतापुत्र होनेकी सम्भावना भी की। रामके अनुरोधसे कुश और लवने रामायणके श्लोकोंको

कहा। राम भी शोकसे आक्रान्त चित्तवाले हो गये। इसी बीचमें 'बालकोंकी संग्रामवार्ता सुननेसे अरुन्धती, वसिष्ठ, वाल्मीकि, कौसल्या और जनक यहाँ आ रहे हैं' ऐसा सुनकर राम शोक और भय से अभिभूत होनेसे उनसे मिलनेके लिए सङ्कुचित हो गये। तब सब निकल गये।

सातवाँ अङ्क

लक्ष्मणने वाल्मीकिके अनुरोधसे रामायण नाटकका अभिनय करनेके लिए रामकी आज्ञासे गङ्गाके तीरमें सब दर्शकोंके लिए उचित स्थानका प्रबन्ध किया। आकर रामने भी 'यहाँ पर कुश और लवकी प्रतिष्ठा चन्द्रकेतुकी तरह करनी चाहिए' ऐसी आज्ञा दी।

तब हिंस्र जन्तुओंसे व्याप्त जङ्गलमें छोड़ी गई और प्रसववेदना से पीड़ित सीताका 'गङ्गाजीमें शरीरपात करूँगी' ऐसा वचन नेपथ्यमें सुनाई पड़ा।

(इति प्रस्तावना)

रामने नाटकमें अभिनय किये गये इस विषयको सत्य जानकर आवेग-प्रकाशन किया। लक्ष्मणने उनको सान्त्वना दी। तब एक-एक बालकको गोदमें लेकर सीताको सहारा देकर पृथिवी और गङ्गाने प्रवेश किया। इन दोनोंने सीताको यमल पुत्रोंकी उत्पत्तिकी सूचना दी। सीताभी यमल पुत्रोंकी उत्पत्तिसे प्रसन्न होकर मूर्च्छित हो गई। लक्ष्मणने भी सीताकी पुत्रोत्पत्तिमें हर्ष प्रकाशित किया। इस बीचमें राम मूर्च्छित हो गये। गङ्गा और पृथिवीने सीताको दिलासा दिया और उनके पूछने पर अपना परिचय भी दिया। तब पुत्रीके प्रति अनीतिके आचरणसे क्षुभित होकर पृथिवीने रामको उलाहना दिया। गङ्गाजीने उनसे अनुनय किया। सीताने मातासे अपने अङ्कमें लीन करनेकी याचना की। पृथिवीने 'पुत्री! तुम्हें अपने दोनों पुत्रोंकी देखरेख करनी चाहिए' ऐसा कहकर उन्हें समझाया। तब दोनों देवियोंने 'सीता हमलोगोंसे अधिक पवित्र हैं' ऐसी घोषणा की। इस बीचमें प्रदीप्त जृम्भकास्त्रोंने 'चित्रदर्शनके अवसरमें रामके वचनका अनुसरण करके हमलोग आपके दोनों पुत्रोंका आश्रय लेते हैं।' सीतासे ऐसा निवेदन किया। तब सीताने 'मेरे पुत्रोंका क्षत्रियसंस्कार कौन करेगा' ऐसा कहा। गङ्गाने उस काममें वाल्मीकिका नाम लिया। लक्ष्मणने रामके समीपमें कुश और लवके सीतापुत्र होनेकी सम्भावना की। तब सीताने फिर अपनी मातासे अपने अङ्कमें लीन करनेकी याचनाकी। तब पृथिवीने 'दूध न छूटने

तक तुम्हें दोनों पुत्रोंकी देखरेख करनी चाहिए। पीछे जैसा तुम चाहो' ऐसी आज्ञा दी। तब सीता गङ्गा और पृथिवीके साथ निकलीं। अनन्तर सीताकी लोकान्तरप्राप्तिकी संभावना कर राम फिर मूर्च्छित हो गये। लक्ष्मणने रामकी रक्षाके लिए वाल्मीकिसे प्रार्थना की। तब नेपथ्यमें 'वाद्य हटाये जायँ। सब लोग वाल्मीकिसे आदिष्ट आश्चर्यको देखें।' ऐसा वाक्य सुना गया। तब लक्ष्मणने 'पृथ्वी और गङ्गाके साथ सीता देवी जलसे निकल रही हैं' ऐसा कहा। नेपथ्यमें भी 'देवि अरुन्धती! हम दोनों गङ्गा और पृथिवी, पतिव्रता वधू सीताको तुम्हें अर्पण करती हैं।' ऐसा वाक्य सुनाई पड़ा। रामके होशमें न आनेसे सब खिन्न हो गये। अरुन्धतीने 'हाथसे छूकर रामको जिलाओ' सीताको ऐसी आज्ञा दी। सीताके वैसा ही करनेपर होशमें आकर राम सीताको देखकर प्रसन्न हुए और निकटमें ही अरुन्धती, शान्ता और ऋष्यशृङ्ग आदि गुरुजनोंको देखकर लज्जित भी हो गये। नेपथ्यमें 'रामभद्र! चित्र देखनेपर 'सीताकी कल्याण-चिन्तामें तत्पर हो' यह आपने जो कहा था वैसा ही मैंने किया' गङ्गाकी ऐसी उक्ति सुनी गई। फिर भी नेपथ्यमें 'आयुष्मान्‌ने सीताके परित्यागके अवसरमें 'भगवति पृथ्वी! पुत्र जानकीकी देखरेख कीजिए' ऐसी जो प्रार्थना की थी वैसा ही कार्य किया गया।' ऐसा पृथ्वीका वचन सुनाई पड़ा। तब भगवती अरुन्धतीने अनेक प्रकारोंसे सीताके पातिव्रत्यकी प्रशंसा कर रामके सीताग्रहण करनेमें आपलोगोंका क्या मत है?' सबसे ऐसा पूछा तो लक्ष्मणने 'सब नागरिक और देशवासीलोग सतीशिरोमणि सीता देवीको प्रणाम कर रहे हैं, लोकपाल और सप्तर्षि पुष्पवृष्टियोंसे पूजा कर रहे हैं।' ऐसा कहा। तब अरुन्धतीने सीता-को स्वीकार करनेके लिए रामको आज्ञा दी और रामने भी स्वीकार किया। लक्ष्मणने कृतार्थ होकर सीताको प्रणाम किया और उन्होंने लक्ष्मणको आशीर्वाद दिया। तब अरुन्धतीके कहनेसे वाल्मीकि कुश और लवको ले आये। दोनों पुत्रोंको माता और पिताके समागमसे बहुत ही हर्ष हुआ। सीताने वाल्मीकिको प्रणाम कर उनसे आशीर्वाद पाया। इसी बीचमें लवको मारने वाले शत्रुघ्न आ गये। वाल्मीकिके 'आपका फिर कौन सा प्रिय कार्य करूँ' ऐसा कहने पर रामने— 'आपसे रचित यह कथा पापनाशन करनेवाली और कल्याण बढ़ानेवाली है, शब्द ब्रह्मको जाननेवाले कविकी नाटकरूपसे परिणत इस वाणीका विद्वान् लोग विचार करें।' ऐसी प्रार्थना की। तब सब चले गये।

नाटकीयपात्र-परिचयः

पुरुषाः—

सूत्रधारः—प्रधाननटः ।
नटः—सूत्रधारसहकारी ।
रामचन्द्रः—अयोध्याऽधिपः सूर्यवंशीयो राजा ।
लक्ष्मणः—सुमित्रासुतो रामानुजः ।
शत्रुघ्नः—सुमित्रायाः कनीयान्पुत्रो लक्ष्मणानुजः ।
जनकः—मिथिलाऽधीश्वरो रामश्वशुरः ।
अष्टावक्रः—मुनिविशेषः ।
वाल्मीकिः—रामायणनिर्माता महर्षिः ।
सौधातकिः—वाल्मीकिशिष्यः ।
दाण्डायनः— „ „
कुशलवौ—रामपुत्रौ ।
चन्द्रकेतुः—लक्ष्मणपुत्रः ।
सुमन्त्रः—सारथिः ।
विद्याधरः—देवयोनिविशेषः ।
कञ्चुकी—अन्तःपुरचरो वृद्धब्राह्मणः ।
दुर्मुखः—गुप्तचरः ।
शम्बूकः—शूद्रतापसः ।
मुनिकुमाराः, सैनिकादयश्च ।

स्त्रियः—

सीतादेवी—जनकतनया, रामस्य पत्नी।
वासन्ती—वनदेवता, सीतायाः सखी।
आत्रेयी—काचिद् ब्राह्मणजातीया ब्रह्मचारिणी।
तमसा—काचिन्नदीविशेषाधिष्ठात्री देवी।
मुरला— ,, ,, ,, ,,
गोदावरी—,, ,, ,, ,,
भागीरथी—गङ्गादेवी।
कौशल्या—रामजननी।
पृथिवी—सीताजननी।
अरुन्धती—वसिष्ठस्य पत्नी।
विद्याधरी—विद्याधरपत्नी।
प्रतीहारी—अन्तःपुरद्वारस्य रक्षित्री।

॥ श्री ॥

उत्तररामचरितम्

'चन्द्रकला'-'विद्योतिनी' टीकाद्वयोपेतम्

प्रथमोऽङ्कः

इदं कविभ्यः *पूर्वेभ्यो नमोवाकं प्रशास्महे ।

द्वैमातुरोऽप्यस्त्यगजात्मजो यो विघ्नप्रहर्ताऽपि च विघ्नराज ।
विनायकोऽपि त्रिदशेश्वरो यः स सर्वकृत्ये सतत क्रियाच्छम् ॥ १ ॥
सतां दुर्गताना खले पीडिताना समुद्धारकार्ये कृतानेककल्प ।
तथैवार्यधर्मस्य संरक्षकोऽसौ मुकुन्द कृतौ मां कृतार्थं करोतु ॥ २ ॥
औदार्यादिसमन्विता सुकृतिनी साध्वी कुलालङ्कृति
विद्याधर्मदयाऽनुरागसहिता मान्या प्रसूसन्निभा ।
स्वर्याताऽप्यगणयसद्गुणगणैरस्मन्मनःसंस्थिता
सा मद्भ्रातृवधू' प्रतीक्ष्यचरणा पद्मप्रिया' प्रीयताम् ॥ ३ ॥
क्व मतिर्मम दूषणान्विता, भवभूते क्व च सारवद्वच' ।
तदपि प्रकृति सुदुस्त्यजा सुतरां मा चपल करोत्यपि ॥ ४ ॥

अथ तत्रभवान् महाविद्वान् पदवाक्यप्रमाणविचक्षणः सत्काव्यनिर्माणप्रा-पितयशः श्रीमदुदुम्बरो भवभूतिनामा कविवरो मर्यादापुरुषोत्तमस्य भगवतो रामस्य उत्तरचरितमवलम्ब्य उत्तररामचरिताभिधानं नाटकं कर्तुकामो निर्विघ्न-पूर्वकं प्रारिप्सितसमाप्तिकामः [illegible] [illegible] नान्दीपाठात्मकं मङ्गल-माचरति—इदमित्यादि । पूर्वेभ्यः कविभ्यः नमोवाकम्, [illegible] [illegible]

पूर्ववर्ती वाल्मीकि आदि कवियोंको नमस्कार कर 'ब्रह्माकी सनातन अमृतमयी दैवी वाणी

---

* 'पूर्वस्य' इति पाठान्तरम् ।

***विन्देम देवतां वाचममृतामात्मनः कलाम् ॥ १ ॥**

(नान्द्यन्ते)

देवतां वाचं विन्देम, इदं प्रशास्महे इत्यन्वयः। पूर्वेभ्यः = प्राचीनेभ्यः, कविभ्यः = काव्यकर्तृभ्यः, व्यासवाल्मीकिभासकालिदासादिभ्य इत्यर्थः। नमोवाकं = नमस्कारोच्चारणपूर्वकमित्यर्थः। वचनं वाकः, 'वच परिभाषणे' इति धातोर्भावे घञ् कुत्वं च, नमो वाको यस्मिन् (कर्मणि) तद्यथा तथा इति क्रियाविशेषणम्। आत्मनः = ब्रह्मणः, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।' इत्यमरः। अमृतां = सनातनीममृतवन्मधुररसां वेत्यर्थः। अविद्यमानं मृतं (मरणम्) यस्याः सा अमृता ताम्, 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोप' इति नञ्बहुव्रीहिः। कलाम् = अंशभूतां, देवतां = देवरूपिणीं, वाचं = वाणीं, विन्देम = प्राप्नुयाम, तौदादिकस्य 'विद्लृ लाभे' इति धातोर्लिङि उत्तमपुरुषबहुवचनम्। 'वन्देमहि च तां वाणीम्' इति पाठान्तरे—तां = प्रसिद्धां, वाणीं = सरस्वतीं वन्देमहि = अभिवादनं स्तुतिं वा करवामेत्यर्थः। इदम् = इत्याकारकमाशंसनम्, प्रशास्महे = प्रार्थयामहे, प्रोपसर्गपूर्वकस्यादादिकस्य 'आङःशासु इच्छायाम्' इति धातोर्लटि बहुवचनम्। आङ्पूर्वत्वमत्र प्रायिकम्, क्रियाग्रहणादिह चतुर्थी। अत्र 'अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम् ॥' इति स्मरणाद् मधुररमवद्वाणीसिद्धिमूलकस्य यशसः प्राप्त्यर्थं प्राचीनकवीनां नमस्करणमवगन्तव्यम्। अनुष्टुब्वृत्तम्।

श्लोकोयं 'तथाऽप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये।' इति वचनात् नान्दीरूपः। नान्दीलक्षणं यथा—'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी। पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥' इति। तत्र च द्वादशपदेयं नान्दी। उपसर्गतिङन्तयोः समासाभावेन प्रोपसर्गस्य भिन्नपदत्वात् द्वादशपदत्वमवसेयम् ॥१॥

नान्द्यन्ते—इति। नान्द्याः = पूर्वोक्तायाः स्तुतेः, अन्ते = समाप्तौ। सूत्रधारः = सूत्रं (कथासूत्रम्) धारयतीति, नटाध्यक्षः, स च आगत्य वदतीति शेषः। सूत्रोपपदपूर्वकात् णिजन्तात् 'धृञ् धारणे' इति धातोः 'कर्मण्यण्' इत्यण्।

को हमलोग पावें' ऐसी प्रार्थना करते हैं ॥ १ ॥

(नान्दीके बाद)

---

* 'वन्देमहि च तां वाणीम्' इति पुस्तकान्तरस्थः पाठः।

सूत्रधारः—अलमतिविस्तरेण । अद्य खलु भगवतः कालप्रिया-नाथस्य यात्रायामार्यमिश्रान्विज्ञापयामि—एवमत्रभवन्तो विदांकुर्वन्तु । अस्ति खलु तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो

अलमिति । अत्यन्तं विस्तरोऽतिविस्तरस्तेन अलम्, 'गम्यमानाऽपि क्रिया, कारकविभक्तौ प्रयोजिका' इति वचनात् इह साधनक्रियां प्रति अतिविस्तरः करणम् । अतिविस्तरेण साध्यं नास्तीत्यर्थः ।

अद्येति—अद्य = अस्मिन्दिने, खलु = निश्चयेन वाक्यालङ्कारो वा भगवतः = ज्ञानशक्त्यादिगुणसंपन्नस्य, कालप्रियानाथस्य = कालप्रिया नाम दुर्गा तस्या नाथः शिवस्तस्य, केषांचिन्मते कालप्रियानाथ उज्जयिन्या महाकालेश्वर इत्यवसेयम् । इयं च कथा पौराणिकी वेदितव्येति तलस्पर्शिन्यां वीरराघवः । 'कालप्रियानाथस्य' इति पाठे विदर्भदेशे भवभूतिनिवासे पद्मपुरे स्थापितस्य शिवस्येत्यर्थः । एतन्मालतीमाधवाध्येतृणामतिरोहितम् । यात्रायाम् = वार्षिकोत्सवे, आर्यमिश्रान् = आर्याश्च ते मिश्रा आर्यमिश्रास्तान् गौरवितानित्यर्थः । 'गौरवितास्त्वार्यमिश्रा' इति त्रिकाण्डशेषः । यद्वा आर्येषु = कुलीनेषु, आहोस्वित् 'कर्तव्यमाचरन्कर्म ह्यकर्त्तव्यमनाचरन् । तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः ॥' इति स्मृत्युक्तलक्षणलक्षितेषु, मिश्राः = श्रेष्ठाः, तान् । विज्ञापयामि = आवेदयामि । किमित्यपेक्षायामाह—एवमिति । अत्रभवन्तः = पूज्याः, एवम् = इत्थं, विदाङ्कुर्वन्तु = जानन्तु 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति 'विद ज्ञाने' इति धातोर्लोट्याम्, गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । तत्रभवान् = पूज्यः, काश्यपः = कश्यपगोत्रोत्पन्नः, 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण्, 'तद्धितेष्वचामादेः' इत्यादिवृद्धिश्च । श्रीकण्ठपदलाञ्छनः = श्रीकण्ठश्च तत् पदं श्रीकण्ठपदं, तत् लाञ्छनं (चिह्नम्) यस्य सः श्रीकण्ठनामधेय इत्यर्थः । श्रीः (सरस्वती) कण्ठे यस्य स श्रीकण्ठः, 'सप्तम

सूत्रधार—विस्तृत नान्दीपाठकी आवश्यकता नहीं । आज भगवान् कालप्रियानाथी-(महादेव) की यात्रा में महाशयोंको निवेदन करता हूँ—'आप लोग यह जानिए कि—कश्यप गोत्रमें उत्पन्न, व्याकरण, मीमांसा और न्यायशास्त्र जाननेवाले, जतुकर्णीके पुत्र और 'भवभूति' ऐसी उपाधिसे युक्त श्रीकण्ठ नामके विद्वान् हैं ।

भवभूतिर्नाम जतुकर्णीपुत्रः ।
यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते ।

विशेषणे बहुव्रीहौ, इत्यत्र सप्तमीतिपदज्ञापितो व्यधिकरणबहुव्रीहिः, इति केचित् । पदवाक्यप्रमाणज्ञः = पदं च वाक्यं च प्रमाणं च पदवाक्यप्रमाणानि, 'चार्थे द्वन्द्वः' इति द्वन्द्वसमासः । पदवाक्यप्रमाणानि जानातीति पदवाक्यप्रमाणज्ञः, 'आतोऽनुपसर्गे कः' इति कप्रत्ययः, 'उपपदमतिङ्' इत्युपपदसमासः । शुद्धयशुद्धिनिरूपणेन पदसंस्कारकत्वात्पदशास्त्रं = व्याकरणशास्त्रं पाणिन्यादिनिर्मितम् । विधिनिषेधार्थवादात्मकवाक्यप्रपञ्चविवेचकत्वात् वाक्यशास्त्रं = मीमांसाशास्त्रं जैमिन्यादिनिर्मितम् । प्रत्यक्षानुमानोपमानशब्दात्मकानां प्रमाणानामुपपादकत्वात् प्रमाणशास्त्रं = न्यायशास्त्रं गौतमादिप्रणीतम् । पदवाक्यप्रमाणज्ञः = व्याकरणमीमांसान्यायशास्त्राभिज्ञ इत्यर्थः । भवभूतिः = भवस्येव भूतिः (ज्ञानसम्पत्तिः) यस्य स इति केचित् , ईश्वर एव भिक्षुरूपः सन्नागत्य कवये भूतिम् (ऐश्वर्यम् , ज्ञानसम्पत्तिमित्यर्थः) दत्तवानतो भवाद् भूतिर्यस्य स इत्यपरे । **प्राचीनास्तु**—'साऽम्बा पुनातु भवभूतिपवित्रमूर्त्तिः' इति श्लोकश्रवणसन्तुष्टो राजा भवभूतिरित्येनं ख्यापयामासेति कथाऽत्रानुसन्धेया इति । अन्ये तु 'तपस्वी कां गतोऽवस्थामिति स्मेराननाविव । गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ ॥' इत्याकारकस्य कविप्रणीतस्य श्लोकस्य वैचित्र्येण सन्तुष्टा जनाः कवये 'भवभूति' रित्युपाधिं वितेरुः । कालिदासस्य दीपशिखेव, भारवेरातपत्रमिव, माघस्य घण्टेव, उत्तररामचरितप्रणेतुश्च भवभूतिरित्युपाधिश्चैवमेव संगच्छते, 'न ह्यमूला जनश्रुतिः' इति न्यायात् । एवं च 'श्रीकण्ठपदलाञ्छन' ईदृशप्रयोगदर्शनात् 'श्रीकण्ठः' इति पदं कविनामधेयं, 'भवभूतिः' इत्युपाधिरिति अर्थद्वयं समर्थितं भवति । भवभूतिपदोत्तरमव्ययसंज्ञकं नामपदमपि भवभूतिपदस्यातिप्रसिद्धिं निगमयति । दृश्यते च लोके नामापेक्षयोपाधेरतिप्रसिद्ध्या नाम निर्वाहकत्वम् । एवं स्थिते सति भवभूतिपदस्य उपाधित्वं निराकुर्वन्तः एवं तस्यैव नामधेयत्वं श्रीकण्ठपदस्य च उपाधित्वं समर्थयन्तोऽश्रद्धेयाः । जतुकर्णीपुत्रः = जतुकर्ण्याः पुत्रः ।

यमिति । यं ब्रह्माणम् इयं देवी वाक् वश्या इव अनुवर्तते । तत्प्रणीतम्

जिन भवभूतिको देवी सरस्वती वशवर्तिनीकी तरह होकर अनुसरण करती हैं, उन्हीं

उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते ॥ २ ॥

एषोऽस्मि कार्य*वशादायोध्यकस्तदानींतनश्च संवृत्तः। (समन्तादवलोक्य) भो भोः, यदा तावदत्रभवतः पौलस्त्यकुलधूमकेतोर्महाराजरामस्यायं पट्टा-

उत्तरं रामचरितं प्रयोक्ष्यते इत्यन्वयः। यं, ब्रह्माणं = ब्राह्मणम्, अध्ययनादिषट्कोपेतमित्यर्थः 'अध्यापनमध्ययनं याजनं यजनं तथा। दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ॥' इति स्मृतेः। 'ब्रह्मा विप्रः प्रजापतिः' इत्यमरः। इयं = सन्निहिता, देवी = भगवती, वाक् = वाणी, सरस्वतीत्यर्थः, वश्या इव = अधीना इव, अनुवर्तते=अनुसरति, स्वामिनश्चेटीव यस्येच्छानुरोधेन आविर्भवति तिरोभवति चेति भावः। तत्प्रणीतं = तेन (ब्राह्मणेन) प्रणीतं (कृतम्), भवभूतिकृतमित्यर्थः। उत्तरं = राज्याभिषेकानन्तरभवमुत्कृष्टं च, रामचरितं = रामचरित्रं, प्रयोक्ष्यते = अभिनेष्यते, राज्याभिषेकात्पूर्वकालिकस्य रामचरित्रस्य महावीरचरिते प्रयुक्तत्वादिति भावः। अत्र 'वश्येवे'त्यत्रोत्प्रेक्षा, तथा च ब्रह्मपदसूचित उपमाऽलङ्कारो व्यङ्ग्यः, शब्दशक्तिमूलो ध्वनिः ॥ २ ॥

एष—इति। एषः = अहं (सूत्रधार इत्यर्थः), कार्यवशात् = अभिनयानुसारात्, आयोध्यकः = अयोध्यायां भव आयोध्यकः, अयोध्यावासीत्यर्थः 'धन्वयोपधाद् वुञ्' इति वुञ् 'युवोरनाकौ' इति तस्य अकादेशश्च। तदानीन्तनः = तात्कालिकः, रामाभिषेकसमयस्थ इत्यर्थः। तदानीं भवस्तदानीन्तनः, 'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च' इति ट्युप्रत्ययस्तुडागमः। 'युवोरनाकौ' इत्यनादेशश्च। संवृत्तः = सञ्जातः, अस्मीति शेषः।

समन्तात् = सर्वत्र, अवलोक्य = दृष्ट्वा, भो भोः = हे नट! इति भावः। 'अथ सम्बोधनार्थकाः। स्युः पाट् प्याडङ्ग है हे भोः' इत्यमरः। यदा, तावत् = यतः, अत्रभवतः = पूज्यस्य, पौलस्त्यकुलधूमकेतोः = रावणवंशाग्नेः। पुलस्त्यस्यापत्यं पुमान् पौलस्त्यो रावणः, 'तस्यापत्यम्' इत्यण्, 'तद्धितेष्वचामादेः' इत्यादिवृद्धिश्च। पौलस्त्यस्य कुलं, तस्य धूमकेतुरिव धूमकेतुरिति। लाक्षणिकोऽयं शब्दः।

भवभूतिसे निर्मित उत्तररामचरितका अभिनय किया जाता है ॥ २ ॥

यह मैं कार्यवश अयोध्यावासी और उस कालका रहनेवाला हो गया हूँ। (चारों तरफ देखकर) हे नट! जब कि रावणवंशके अग्नितुल्य दाहक महाराज रामचन्द्रजीका रात दिन

* 'कवी–'ति पुस्त०।

भिषेकसमयो रात्रिन्दिवमसंहृतनान्दीकः, तत्किमिदानीं विश्रान्तचारणानि चत्वरस्थानानि ?

(प्रविश्य)

नटः—भाव ! प्रेषिता हि स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गमराक्षसाः सभाजनोपस्थायिनश्च नानादिगन्तपावना*ब्रह्म-

धूमः केतुः (लिङ्गं, चिह्नमित्यर्थः) यस्य सः, यथा वह्निर्वंशकुलदाहकस्तथा श्रीरामोऽपि रावणवंशदाहक इत्यर्थः। महाराजरामस्य = राजेन्द्ररामचन्द्रस्य, अयम्= एषः, पट्टाभिषेकसमयः = राज्याभिषेककालः, रात्रिन्दिवम् = अहर्निशमित्यर्थः, रात्रौ च दिवा चेति विग्रहे द्वन्द्वः 'अचतुरे' त्यादिना रात्रेर्मान्तत्वनिपातः। असंहृतनान्दीकः=अविच्छिन्नमङ्गल इत्यर्थः, अस्तीति शेषः। असंहृता नान्दी यस्मिन् सः, 'नद्यृतश्चे'ति कप्। तत् = तस्मात् कारणात्, किं = किमर्थम्, इदानीम् = अधुना, चत्वरस्थानानि = प्राङ्गणभागाः, 'अङ्गणं चत्वराजिरे' इत्यमरः। विश्रान्तचारणानि=चारणशून्यानि, वर्तन्त इति शेषः। विश्रान्ताश्चारणा येषु तानि, 'अनेकमन्यपदार्थे इति बहुव्रीहिः। 'भारता इति नटाश्चारणाश्च कुशीलवाः' इत्यमरः।

प्रविश्येति । नेपथ्यात् रङ्गशालायां प्रवेशं कृत्वेत्यर्थः।

नटः—कश्चन सूत्रधारसहकारी, भाव = हे विद्वन् ! महाराजेन = रामचन्द्रेण, लङ्कासमरसुहृदः = लङ्कायां समरं तस्मिन् सुहृदः, लङ्कायुद्धसहकारिण इत्यर्थः। महात्मानः = महान् आत्मा (प्रयत्नः) येषां ते महाप्रयत्ना इत्यर्थः, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चे'त्यमरः। प्लवङ्गमराक्षसाः = वानरराक्षसि, प्लवेन गच्छन्तीति प्लवङ्गमाः, 'गमश्च' इति खच्, खित्त्वाद् 'अरुर्द्विषदजन्तस्य मुम्' इति मुम्, 'खच्च डिद्वा' इति डित्त्वे 'प्लवग' इत्यपि। प्लवङ्गमपदं भल्लूकानामप्युपलक्षणम्, 'कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः' इत्यमरः। रक्षांसः

अविच्छिन्न मङ्गलवाला यह राज्याभिषेकका समय है, तब क्यों अभी अङ्गणस्थानमें चारण-लोग नहीं दिखाई पड़ रहे हैं'।

(प्रवेश कर)

नट—महाराजने लङ्कायुद्धके सहायक महात्मा सुग्रीव आदि वानर और विभीषण आदि राक्षसोंको एवम् अभिनन्दनके लिए उपस्थित, अनेक दिशाओंको पवित्र करनेवाले वसिष्ठ आदि ब्रह्मर्षियोंको और जनक आदि राजर्षियोंको भी अपने-अपने घरमें भेज दिया, जिनके

* 'न्तागता' इति पा०।

र्षयो राजर्षयश्च, यत्समाराधनायैतावतो दिवसान्प्रमोद आसीत् ।

सूत्रधारः—आ, अस्त्येतन्निमित्तम् ।

नटः—अन्यच्च—

वसिष्ठाधिष्ठिता देव्यो गता रामस्य मातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥ ३ ॥

एव राक्षसाः 'प्रज्ञादिभ्यश्च' इति स्वार्थे (प्रकृत्यर्थे) अण् । 'क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति परिभाषया पुंस्त्वम् । प्लवङ्गमाश्च राक्षसाश्चेतरेतरयोगद्वन्द्वः । समाजनोपस्थायिनश्च=अभिनन्दनार्थमुपस्थिताः, समाजनायोपतिष्ठन्तीति विग्रहे णिनिः । नानादिगन्तपावनाः=पवित्रीकृतबहुदिश इत्यर्थः । नाना दिगन्ता नानादिगन्ताः 'सुप्सुपे'ति समासः । नानादिगन्तान् पावयन्तीति नानादिगन्तपावनाः, ण्यन्तात् पूङ्-धातोः बाहुलकात् कर्तरि ल्युट् । ब्रह्मर्षयः = गौतमादयः, राजर्षयश्च=जनकादयश्च, यत्समाराधनाय=येषां सत्काराय, तादर्थ्ये चतुर्थी । एतावतः=इयतः, दिवसान् = दिनानि व्याप्य, अत्यन्तसंयोगे द्वितीया । प्रमोदः = हर्ष उत्सवो वा, आसीत् = अभूत् ।

सूत्रेति । आ = एवम्, स्मरणद्योतकोऽयं निपातः । अत एव 'निपात एकाजनाङ्' इति प्रगृह्यत्वात्, 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावः, ततः 'अकः सवर्णे दीर्घः' इति दीर्घो न । एतत् = इदं, निमित्तं = कारणम्, अस्ति = वर्तते, कारणमेतन्मया प्राग्विस्मृतमभूत्, साम्प्रतं त्वत्कथनेन पुनः स्मृतमिति भावः ।

नट इति । अन्यच्च=अपरं च ।

वसिष्ठेति । वसिष्ठाधिष्ठिता देव्यो रामस्य मातरः अरुन्धतीं पुरस्कृत्य यज्ञे जामातुः आश्रमम् गताः इत्यन्वयः । वसिष्ठाधिष्ठिताः = वसिष्ठेन (कुलगुरुणा) अधिष्ठिताः (संरक्षितत्वेन नीताः), देव्यः = कृताभिषेकाः, रामस्य = रामचन्द्रस्य, मातरः = कौसल्याकैकेयीसुमित्राः, अरुन्धतीं = वसिष्ठपत्नीं, पुरस्कृत्य = अग्रतः कृत्वा, पुरः कृत्वेति पुरस्कृत्य, 'पुरोऽव्ययम्' इति गतिसंज्ञा 'कुगति-

सत्कारके लिए इतने दिनोंतक उत्सव था ।

सूत्रधार—ओः, यह कारण है ।

नट—और भी कारण है ।

वसिष्ठकी संरक्षतामें रामचन्द्रकी माताएँ महारानी कौसल्या आदि अरुन्धती को आगे

सूत्रधारः—वैदेशिकोऽस्मीति पृच्छामि । कः पुनर्जामाता ?

नटः—कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे रोमपादाय तां ददौ ॥ ४ ॥

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे । तेन द्वादशवार्षिकं सत्रमारब्धम् ।

प्रादयः' इति गतिसमासः 'नमस्पुरसोर्गत्योः' इति सत्वं 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति क्त्वास्थाने ल्यबादेशः । यज्ञे = यज्ञनिमित्तम्, 'निमित्तात्कर्मयोगे' इति सप्तमी । जामातुः=कन्यापतेः, ऋष्यशृङ्गस्येत्यर्थः । आश्रमं, गताः=याताः इत्यर्थः । राजधान्या निमन्त्रितैः पूज्यजनैश्च रहितत्वात्कथमुत्सवो भवेदिति भावः॥३॥

सूत्रेति । वैदेशिकः=विदेशवासी, विभिन्नः (अयोध्याया इति शेषः) देशः विदेशः, 'कुगतिप्रादय' इति समासः । विदेशे भवो वैदेशिकः, 'तत्र भव' इति ठञ् 'ठस्येक' इति तस्य इकादेश आदिवृद्धिश्च । अस्मि = भवामि (अहमिति शेषः), इति = अनेन कारणेन, पृच्छामि = अनुयुनज्मि । जामाता = दुहितृपतिः, कः ?

कन्यामिति । राजा दशरथः शान्तां नाम कन्यां व्यजीजनत् । राज्ञे रोमपादाय अपत्यकृतिकां तां ददौ इत्यन्वयः । राजा = महाराजः, दशरथः, शान्तां नाम, कन्यां=कुमारीं, व्यजीजनत् = उत्पादयामास, व्युपसर्गपूर्वकात् 'जनी = प्रादुर्भावे' इति धातोर्णिचि लुङ् । राज्ञे = महाराजाय, रोमपादाय, अपत्यकृतिकां = कृत्रिमकन्यारूपामित्यर्थः । कृत्वा एव कृतिका, स्वार्थे कन् 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुप' इतीत्वं च । अपत्यं च सा कृतिका अपत्यकृतिका, ताम् (कर्मधारयः) 'अपत्यकृतिका या च कृत्रिमा पुत्रिका भवेत्' इति कोशः । कृत्रिमापत्यविधाने प्रमाणं—सदृशं तु प्रकुर्याद् यं गुणदोषविचक्षणम् । पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥' इति मनुः । तां = शान्तां, ददौ = दत्तवान् इत्यर्थः ॥ ४ ॥

विभाण्डकेति । विभाण्डकसुतः = विभाण्डकस्य (तन्नामकस्य कस्यचिन्मुनेः) सुतः (पुत्रः) ऋष्यशृङ्गः = तदाख्यो मुनिः, तां = शान्ताम्, उपयेमे =

कर यज्ञके लिए दामाद (ऋष्यशृङ्ग) के आश्रम गई हुई है ॥ ३ ॥

सूत्रधार—मैं परदेशी हूँ, इसलिए पूछता हूँ । दामाद कौन हैं ?

नट—महाराज दशरथने शान्ता नामकी कुमारीको उत्पन्न किया; रोमपाद नामक राजाको कृत्रिम पुत्रीके तौरपर उन्हें दे दिया ॥ ४ ॥

विभाण्डक ऋषिके पुत्र ऋष्यशृङ्गने उन (शान्ता) से विवाह किया । उन्होंने बारहवर्षमें

तदनुरोधात्कठोरगर्भामपिश्च जानकीं विमुच्य गुरुजनस्तत्र यातः ।

सूत्रधारः-तत्किमनेन ? एहि, राजद्वारमेव स्वजातिसमयेनोपतिष्ठावः।

उदवहत् 'उपायमः स्वकरणे' इत्यात्मनेपदम् । ब्राह्मणस्य क्षत्रियकन्यापरिणयने प्रमाणं—

'शूद्रैव भार्या शूद्रस्य, सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञः स्युस्ताश्च स्वा चाग्रजन्मनः ॥' मनुः ।

अत्रार्थे 'तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण' इति पारस्करगृह्यसूत्रमपि प्रमाणम् । तेन = ऋष्यशृङ्गेण, द्वादशवार्षिकं = द्वादशवर्षसमाप्यं, द्वादश वर्षाणि भावि इति द्वादशवार्षिकं, 'तमधीष्टो भृतो भूतो भावी' इति ठञ् 'अनुशतिकादीनां च' इत्युभयपदवृद्धिः । सत्रं = यज्ञविशेषः, आरब्धम् = प्रक्रान्तम् । तदनुरोधात् = तस्य (ऋष्यशृङ्गस्य) अनुरोधात् (अनुवर्तनात् , 'सीता गर्भिणी वर्तते, अतस्तस्या अत्रागमनमनुचितम्' इत्याकारिकाया ऋष्यशृङ्गेच्छाया अनुवर्तनादिति भावः), कठोरगर्भां = कठोरो गर्भो यस्याः सा कठोरगर्भा, तां पूर्णगर्भामित्यर्थः । जानकीं सीतां, विमुच्य = त्यक्त्वा, गुरुजनः = पूज्यजनः, वसिष्ठादिरित्यर्थः । तत्र=ऋष्यशृङ्गाश्रमे, यातः = गतः ।

सूत्रेति । तत् = तर्हि, अनेन = चत्वरस्थानानां विश्रान्तचारणत्वेन, किं = कोऽर्थः, अस्माकं क्रियते इति शेषः । एहि = आगच्छ, स्वजातिसमयेन = आत्मजात्याचारेण, नटानुष्ठेयकर्मणा स्तुतिरूपेणेति भावः । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । राजद्वारमेव = भूपालप्रतीहारमेव, उपतिष्ठावः = लिप्सया उपगच्छावः 'वा लिप्सायामिति वक्तव्यम्' इति आत्मनेपदस्य वैकल्पिकत्वात्पक्षे परस्मैपदम् ।

समाप्त होनेवाले यज्ञका आरम्भ किया है। उनके अनुरोधसे पूर्ण गर्भवाली सीताको भी छोड़ कर वसिष्ठ आदि गुरुजन वहां गये हुये हैं ।

सूत्रधार—तो हमको इससे क्या ? आओ, अपनी (नटकी) जातिके आचारके अनुसार हम लोग राजद्वारमें ही रहें ।

---

* 'वधूम्' इत्यधिकः पाठः ।

नटः—तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः।
सूत्रधारः—मारिष !

सर्वथा व्यवहर्तव्यं* कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥ ५ ॥

नटः—अतिदुर्जन इति वक्तव्यम्।

नट इति। तेन = कारणेन, राजद्वारे स्तुतेः पठनीयत्वेन हेतुनेति भावः। भावः = विद्वान्, भवानिति भावः। 'भावो विद्वान्' इत्यमरः। राज्ञः = भूपालस्य, रामस्येत्यर्थः। सुपरिशुद्धां = दोषरहिताम्, उपस्थानस्तोत्रपद्धतिम् = उपस्थानस्य (सेवायाः), स्तोत्रपद्धतिं = स्तुतिपरिपाटीम्, निरूपयतु = विचारयतु।

सूत्रेति। मारिष = हे आर्य ! 'आर्यस्तु मारिष' इत्यमरः।

सर्वथेति। सर्वथा, व्यवहर्तव्यम्, अवचनीयता कुतः ? हि जनो यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जन इत्यन्वयः। सर्वथा = सर्वैः प्रकारैः, व्यवहर्तव्यं = व्यवहारः कर्तव्यः, अवचनीयता = दोषरहितत्वं, वचनीयं दोषः, कुतो हि = कस्माद्धि। सर्वथा निर्दोषत्वं कथं भविष्यति ? अतो दोषाशङ्कां परिहृत्य स्तुतिकरणं कर्तव्यमिति भावः। हि = यतः, जनः = लोकः, यथा = येन प्रकारेण, स्त्रीणां = नारीणां, तथा = तेन प्रकारेण, वाचां = वाणीनां, साधुत्वे = प्रशंसनीयत्वे, दुर्जनः = दोषदर्शी, भवतीति शेषः। लोको यथा स्त्रीणां पातिव्रत्ये संदिहानस्तथैव वाचां निर्दोषत्वेऽपि भवत्यतस्तदाशङ्कया स्वकर्तव्यात् पराङ्मुखेन नैव भाव्यमिति तात्पर्यम्। 'कुतो ह्यवचनीयता' इति वाक्यं प्रति उत्तरार्द्धगतवाक्यस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। स च 'यथा स्त्रीणां तथा वाचाम्' इत्युपमया सङ्कीर्यते ॥ ५ ॥

नट इत्यादि। अतिदुर्जनः = अत्यन्तं दुर्जनोऽतिदुर्जनः सुप्सुपा समासः। अतिदोषदर्शीत्यर्थः, लोकोऽस्तीति शेषः। इति वक्तव्यम् = इति कथनीयम्।

नट—इस कारणसे आप राजाकी दोषरहित स्तुति-प्रणालीका विचार करें।
सूत्रधार—आर्य !
सब प्रकारसे व्यवहार करना चाहिए, (पर) निर्दोषता कैसे हो सकती है ? क्योंकि लोक जैसे स्त्रीके पातिव्रत्यमें, उसी तरह वचनकी निर्दोषतामें भी दुर्जन (दोषदर्शी) होता है ॥५॥
नट—ऐसे दुर्जनको तो अति दुर्जन कहना चाहिए। क्योंकि—

* 'व्यवहर्तव्ये' इति पा०।

देव्या अपि हि वैदेह्याः सापवादो यतो जनः ।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

सूत्रधारः—यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत ततः कष्टं स्यात् ।

नटः—सर्वथा ऋषयो देवाश्च श्रेयो विधास्यन्ति । (परिक्रम्य) भो भोः, क्वेदानीं महाराजः ? (आकर्ण्य) एवं जनाः कथयन्ति—

तत्र हेतुमाह—देव्य इति । यतो देव्या वैदेह्या अपि जनः सापवादः । रक्षोगृहस्थितिः मूलम् , अग्निशुद्धौ तु अनिश्चय इत्यन्वयः, यतः = यस्मात् , देव्याः = सत्याः, अयोनिजत्वादपि सर्वथा दोषास्पृष्टाया इति भावः, वैदेह्या अपि = सीताया अपि, जनः = लोकः, सापवादः = निन्दकः, हि = निश्चयेन । निन्दकत्वे किं बीजमित्यत आह—रक्षोगृहस्थितिः = राक्षसभवनवासः, रावणभवनस्थितिरिति भावः । मूलं = कारणम् , अपवादस्येति भावः । अग्निशुद्धौ तु = अनलशुद्धतायां तु, अग्निसाक्षिकत्वेन दोषाभावत्वे तु इति भावः । अनिश्चयः=अनिर्णयः दूरस्थं तद्वृत्तमिहस्थः कः प्रत्येत्विति भावः । 'अतिदुर्जन इति वक्तव्यम्' इति वाक्यं प्रति पूर्वार्द्धगतवाक्यस्य हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ६ ॥

सूत्रधार इति । पुनः = पक्षान्तरे, इयम् = एषा, किंवदन्ती = जनश्रुतिः । महाराजं प्रति = रामचन्द्रं प्रति, स्यन्देत = प्रस्रवेत् , श्रावणप्रत्यक्षविषया भवेदित्यर्थः । ततः = तदा, कष्टं स्यात् = दुःखं भवेत् ।

नट इति । सर्वथा = सर्वैः प्रकारैः, ऋषयः = वशिष्ठादयः, देवाश्च = इन्द्रादयश्च, श्रेयः = कल्याणं, विधास्यन्ति = करिष्यन्ति । परिक्रम्य=रङ्गशालां परितो गत्वा । भो भोः = महोदयाः, 'अथ सम्बोधनार्थकाः । स्युः पाट् प्याडङ्ग है हे भोः' इत्यमरः । महाराजः = रामः, इदानीम्=अस्मिन्समये, क्व=कुत्र, अस्तीति शेषः । आकर्ण्य = श्रुत्वा, प्रासादवासिजनकथितमुत्तरमिति शेषः । जनाः = लोकाः (अयोध्यावासिन इति शेषः) एवम् = इत्थं, कथयन्ति = वदन्ति ।

पतिव्रता सीताजीका भी लोक-निन्दक है । सीताजीका राक्षस (रावण) के घरमें रहना इस (निन्दा) का कारण है, उनकी अग्निशुद्धिमें तो निश्चय नहीं हुआ ॥ ६ ॥

सूत्रधार—यह जनश्रुति महाराजके पास पहुँचेगी तो उन्हें कष्ट होगा ।

नट—सब तरहसे ऋषि और देवतालोग कल्याण करेंगे । (घूमकर) महाशयो ! अभी महाराज कहाँ हैं ? (सुनकर) लोग ऐसा कहते हैं—

स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान् ।
देव्यास्ततो विमनसः परिसान्त्वनाय
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ ७ ॥
(इति निष्क्रान्तौ)
इति प्रस्तावना ।

स्नेहादिति । स्नेहाद् सभाजयितुम् एत्य अमूनि दिनानि उत्सवेन नीत्वा जनकोऽद्य विदेहान् गतः । ततः विमनसः देव्याः परिसान्त्वनाय नरेन्द्रः धर्मासनात् वासगृहं विशति इत्यन्वयः । स्नेहात् = प्रेम्णः, सभाजयितुम् = अभिनन्दितुम् , एत्य=आगत्य, अयोध्यामिति शेषः । अमूनि = व्यतीतानि, कालविप्रकृष्टानीत्यर्थः । दिनानि = दिवसान् , उत्सवेन = राज्याभिषेकोत्सवेन, नीत्वा = यापयित्वा, जनकः= विदेहेश्वरः, अद्य = अस्मिन् दिने, विदेहान् = स्वनिवासजनपदं, गतः = यातः, ततः=तस्मात् , स्वपितृगमनात् कारणादित्यर्थः । विमनसः = दुर्मनसः, देव्याः = सीतायाः, परिसान्त्वनाय = तद्दुःखापनोदनार्थमनुनयाय, 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । नरेन्द्रः = रामचन्द्रः, धर्मासनात् = धर्माधिकरणात् , वासगृहं = गर्भागारं, विशति = प्रविशति । वसन्ततिलकावृत्तम् , 'उक्ता वसन्ततिलका तभजा जगौ गः' इति लक्षणम् ॥ ७ ॥

इतीति । इति = एवमुक्त्वा, निष्क्रान्तौ = निर्गतौ· सूत्रधारनटाविति शेषः ।

प्रस्तावनेति । प्रस्तावनालक्षणं यथा साहित्यदर्पणे—'नटी विदूषको वाऽपि पारिपार्श्वक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥ चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ६—३१, ३२ ॥' इति । तत्र च पञ्चविधासु प्रस्तावनासु प्रयोगातिशयाऽऽख्या प्रस्तावनेयम् । तल्लक्षणं यथा—'यदि प्रयोग एकस्मिन्प्रयोगोऽन्यः प्रयुज्यते । तेन पात्रप्रवेशश्चेत्प्रयोगातिशयस्तदा' इति ।

स्नेहसे अभिनन्दन करनेके लिए आकार इतने दिन उत्सवसे बिताकर महाराज जनक आज मिथिलामें गये हैं, इस कारणसे दुःख मानती हुई सीताको सान्त्वना (दिलासा) देनेके लिये महाराज रामचन्द्र न्यायालयसे वासभवनमें गये हुए हैं ॥ ७ ॥

(दोनों जाते हैं)

इति प्रस्तावना ।

(ततः प्रविशत्युपविष्टो रामः सीता च)

रामः-देवि ! वैदेहि ! विश्वसिहि; ते हि गुरवो न शक्नुवन्ति* विहातुमस्मान् ।

किंत्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति ।
संकटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ८ ॥

तत इति । ततः = सूत्रधारनटयो निष्क्रमणानन्तरम् । उपविष्टः=आसनस्थः, उपविष्टपदं 'देहलीदीप' न्यायेन सीतेत्यत्र च सम्बद्ध्यते । तत्र उपविष्टेति च लिङ्गव्यत्ययः कल्प्यः ।

राम इति । विश्वसिहि = विश्वासं कुरु, 'समाश्वसिहि' इति पाठान्तरे सभाश्वस्ता भवेत्यर्थः । 'श्वस प्राणन' इति धातोर्लोटि मध्यमपुरुषैकवचने 'रुदादिभ्यः, सार्वधातुके' इतीट् । हि = यतः, ते = देशकालविप्रकृष्टाः, गुरवः = जनकादयः, अस्मान् , विहातुं = त्यक्तुं, न शक्नुवन्ति = न समर्था भवन्ति, कालान्तरे पुनरागमिष्यन्तीति भावः ।

किन्त्विति । किन्तु अनुष्ठाननित्यत्वं स्वातन्त्र्यम् अपकर्षति । हि आहिताग्नीनां गृहस्थता प्रत्यवायैः सङ्कटा इत्यन्वयः । यदि ते गुरवोऽस्मान् विहातुं न शक्नुवन्ति तर्हि कथं परित्यज्य गता इत्यत्राह—किन्तु = पक्षान्तरे, अनुष्ठाननित्यत्वम् = अनुष्ठानानाम् (अग्निहोत्रादिकार्याणाम्) नित्यत्वम् (नियतत्वम्), अकरणे प्रत्यवायस्मरणरूपत्वमिति भावः । स्वातन्त्र्यं=स्वच्छन्दतां, चिरकालप्रवासादिरूपामिति भावः । स्वतन्त्रस्य भावः कर्म वा स्वातन्त्र्यं, तत्, 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । अपकर्षति = निरुणद्धि, हि=यतः, आहिताग्नीनाम् = अग्निहोत्रिणामिति भावः । आहिताः (आधानसंस्कारेण स्थापिताः) अग्नयः' (दक्षिणाऽग्निगार्हपत्याहवनीयाख्याः) यैस्ते आहिताग्नयस्तेषाम् , 'निष्ठाः' इति निष्ठान्तस्य पूर्वप्रयोगः, 'वाऽऽहिताग्न्यादिषु' इति पक्षान्तरे अग्न्याहितानाम् इति च । गृहस्थता = गार्हस्थ्यम् , प्रत्यवायैः = विहितानुष्ठानरूपपातकैः, सङ्कटा = सङ्कटस्वरूपा, भवतीति शेषः ॥ ८ ॥

(तब बैठेहुए राम और सीताजी प्रवेश करते हैं)

राम - महारानी ! सीते ! विश्वास करो । वे गुरुजन हमलोगों को नहीं छोड़ सकते हैं । किन्तु अनुष्ठानकी नित्यता स्वतन्त्रता छीन लेती है क्योंकि अग्निहोत्रियोंको गृहस्थभाव अनेकों प्रत्यवायोंसे सङ्कटमय होता है ॥ ८ ॥

* 'चिरम्' इत्यधिकः क्वचित् पाठः ।

सीता—जाणामि अज्जउत्त ! जाणामि । किंदु संदावआरिणो बन्धुजणविप्पओआ होन्ति । (जानामि आर्यपुत्र ! जानामि, किन्तु संतापकारिणो बन्धुजनविप्रयोगा भवन्ति) ।

रामः—एवमेतत् । एते हि हृदयमर्मच्छिदः संसारभावाः* । येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः ।

सीतेति । आर्यपुत्र = आर्यः (श्रेष्ठः श्वशुर इत्यर्थः) तस्य पुत्र आर्यपुत्रस्तत्सम्बुद्धौ 'पत्नी, चार्येति संभाष्या आर्यपुत्रेति यौवने' इति भरतनयात् सीताया आर्यपुत्रकथनं संगच्छते । द्वितीयो जानामिशब्दोऽवधारणार्थकः । सन्तापकारिणः = सन्तापदायिनः, बन्धुजनविप्रयोगाः = पित्रादिविरहाः ।

राम इति । एतत्=बन्धुजनविप्रयोगस्य सन्तापकारकत्वम् , एवम् = ईदृशम् , अपरिहार्यमित्यर्थः । एते = विद्यमानाः, संसारभावाः = लोकस्वभावाः, प्रियवियोगाप्रियसंयोगादिका इत्यर्थः । 'मिथ्याज्ञानजन्या वासना संसारः' इति नैयायिकाः । मनीषिणामरण्यविश्रामहेतुश्च इष्टवियोगोऽनिष्टसंयोगश्च । संसरन्ति अस्मिन्निति संसारः, सम्‌उपसर्गपूर्वकात् 'सृ गतौ' इति धातोर्घञ् । हृदयमर्मच्छिदः = हृदयमर्मस्थलभेदकाः, अतीवदुःखप्रदा इत्यर्थः । येभ्यः संसारभावेभ्यः, 'बीभत्समाना' इति पदेन योगे 'जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्' इति पञ्चमी । बीभत्समानाः = जुगुप्समानाः 'बध बन्धने' इति स्वार्थे सनि रूपम् । मनीषिणः = मनस ईषा (गतिर्दर्शनं वा) मनीषा, 'शकन्ध्वादिषु पररूपं वाच्यम्' इति पररूपत्वम् , मनीषाऽस्ति येषां ते मनीषिणः, 'व्रीह्यादिभ्यश्च' इति इनिः, 'धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान्पण्डितः कविः' इत्यमरः । कामान् = विषयादीन् , संत्यज्य=त्यक्त्वा, अरण्ये=वने, विश्राम्यन्ति = तपस्यन्ति, 'श्रमु-तपसि खेदे च' इति धातोर्लट् , 'शमामष्टानां दीर्घः श्यनि' इति दीर्घत्वम् ।

सीता—जानती हूँ आर्यपुत्र ! मैं जानती हूँ, परन्तु बन्धुजनोंके विरह, सन्ताप करनेवाले होते हैं ।

राम—यह ठीक है । ये संसार के भाव (स्वभाव) हृदयके मर्मस्थलको भेदन करनेवाले हैं । जिनसे घृणा करते हुए विद्वान्लोग सब विषयादियोंको छोड़कर जङ्गलमें तपस्या करते हैं ।

---

* 'मागा' इति क्वचित् पाठः ।

(प्रविश्य)

कञ्चुकी—रामभद्र ! (इत्यर्धोक्ते साशङ्कम्) महाराज !—

रामः—(सस्मितम्) आर्य ! ननु रामभद्र ! इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य । तद्यथाऽभ्यस्तमभिधीयताम् ।

प्रविश्येति । सीतारामवासगृहमिति शेषः ।

कञ्चुकः परिच्छदोऽस्याऽस्तीति कञ्चुकी । कञ्चुकिलक्षणं-यथा—'अन्तःपुरचरो वृद्धो विप्रो रूपगुणान्वितः । सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥ जरावैकल्ययुक्तेन विशेद् गात्रेण कञ्चुकी ॥' इति भरतः । रामस्य बाल्याऽवस्थायां लालनशिक्षणादिषु वात्सल्यात् 'रामभद्र' इति सम्बोधयतः कञ्चुकिनः पूर्वाभ्याससंस्कारवशात् इदानीमपि तथैव सम्बोधनम् । साम्प्रतं तु जातराज्याभिषेकं रामं प्रति तथा सम्बोधनमनुचितमित्यतः साशङ्कं कञ्चुकी पुनः महाराज इति कथयति । राम इति । सस्मितं = स्मितेन सहितं सस्मितं मन्दहास्यपूर्वकं, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः, 'वोपसर्जनस्य' इति सहस्य सभावः । वयोवृद्धेन तातपरिजनेन, तत्रापि ब्राह्मणेन, अतः पितृतुल्येन कञ्चुकिना पूर्वाभ्यासवशात् 'रामभद्र' इति सम्बोधने अनौचित्यविचारणं व्यर्थमेवेत्यतो रामस्य स्मितत्वम् । ब्राह्मणस्य पितृतुल्यत्वे च—

'ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम् ।
पितापुत्रौ विजानीयाद् ब्राह्मणस्तु तयोः पिता ॥'

इति मनूक्तिः प्रमाणम् । स्मितलक्षणं च यथा—'ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम् ॥' इति साहित्यदर्पणः । आर्य = महाशय ! नन्विति अनुनये । तातपरिजनस्य = पितृभृत्यस्य, मां प्रति = रामचन्द्रं प्रति, 'अभितः-परितः-समया निकषा हा-प्रतियोगेऽपि' इति द्वितीया । रामभद्र इत्येव, उपचारः = व्यवहारः, शोभते=शोभितो भवति । तत्=तस्माद्धेतोः, यथाभ्यस्तम्=अभ्यसनमभ्यस्तम् । 'नपुंसके भावे क्त' इति क्तः, अभ्यस्तमनतिक्रम्य यथाभ्यस्तम्, पूर्वाभ्यासानुसारमित्यर्थः, 'अव्ययं विभक्ती'त्यादिना यथार्थेऽव्ययीभावः । अभिधीयताम् =

(प्रवेश कर)

कञ्चुकी—रामभद्र ! (ऐसा आधा ही कहनेपर आशङ्काके साथ) महाराज !

राम—(मुस्कुराहटके साथ) आर्य ! पिताजीके सेवक आपका मेरे लिए 'रामभद्र' इस

कञ्चुकी—देव ! ऋष्यशृङ्गाश्रमादष्टावक्रः संप्राप्तः ।
सीता—अज्ज ! तदो किं विलम्बीअदि (आर्य! ततः किं विलम्ब्यते) ।
रामः—त्वरितं प्रवेशय ।
(कञ्चुकी निष्क्रान्तः । प्रविश्य—)
अष्टावक्रः—स्वस्ति वाम् ।
रामः—भगवान् ! अभिवादये, इत आस्यताम् ।

उच्यताम् , रामभद्र' इति नाम्नैव आकार्यतामिति भावः । एतेन रामस्य क्षमावत्त्वं सूच्यते, तच्च धीरोदात्तनायकलक्षणानुगुणम् । धीरोदात्तलक्षणं यथा साहित्यदर्पणे—'अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः । स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥' इति ।

कञ्चुकीति । देव = महाराज । कञ्चुकिनः राजानं प्रति 'देव' इति सम्बोधनं 'राजा स्वामीति देवेति भृत्यैः' इति साहित्यदर्पणोक्त्यनुकूलम् । अष्टावक्रः = 'अष्टावक्रनामा ऋषिः' अष्टसु शरीरावयवेषु वक्रोऽष्टावक्रः, 'अष्टनः संज्ञायाम्' इत्यात्वम् । सम्प्राप्तः = समायातः, इहेति शेषः ।

सीतेति । ततः = तदा, किं = किमर्थं, विलम्ब्यते = विलम्बः क्रियते, प्रवेशार्थमिति शेषः ।

राम इति । त्वरितम् = अविलम्बं यथा तथा, प्रवेशय=प्रवेशं कारय ।

अष्टावक्र इति । वां = युवाभ्याम् , 'स्वस्ति' इति पदेन योगे 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च' इति चतुर्थी । युवयोः कल्याणं भूयादित्यर्थः, 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ' इति वामादेशः ।

राम इति । भगवन् = लोकैश्वर्यत्यागभिज्ञ ! भगवल्लक्षणं च—
'उत्पत्तिं च स्थितिं चैव लोकानामगतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' ॥ इति ।

शब्दसे व्यवहार ही सुहाता है; इस कारणसे अभ्यासके अनुसार ही कहिए ।

कञ्चुकी—महाराज ! ऋष्यशृङ्गके आश्रमसे अष्टावक्र ऋषि आये हैं ।
सीता—आर्य ! तब क्यों विलम्ब करते हैं ?
राम—उन्हें जल्दी प्रवेश कराइये ।
(कञ्चुकी चला गया । प्रवेश करके)
अष्टावक्र—आप दोनोंका कल्याण हो ।
राम—भगवन् ! नमस्कार करता हूँ । यहाँ बैठिए ।

सीता—भअवं, णमो दे । अवि कुसलं सजामादुअस्स गुरुअणस्स अज्जाए सन्ताए अ । (भगवन् , नमस्ते । अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च ?) ।

रामः—निर्विघ्नः सोमपीथी * आवुत्तो मे भगवानृष्यशृङ्गः, आर्या च शान्ता ?

सीता—अम्हे वि सुमरेदि ? (अस्मानपि स्मरति ।)

अभिवादये = नमस्करोमि, भवन्तमिति शेषः । इतः = अस्मिन् स्थान इत्यर्थः । आस्यताम् = उपविश्यताम् ।

सीतेति । ते = तुभ्यं, 'तेमयावेकवचनस्य' इति त आदेशः । सजामातृकस्य = जामात्रा सहितः सजामातृकस्तस्य ऋष्यशृङ्गसहितस्येत्यर्थः, बहुव्रीहिसमासत्वात् 'नद्यृतश्च' इति समासान्तः कप् । गुरुजनस्य = पूज्यजनस्य, कौशल्यादेरित्यर्थः । आर्यायाः = पूज्यायाः, शान्तायाश्च = तदाख्याया ननान्दुश्च । कुशलम् अपि = कल्याणं किम् , अपिः प्रश्नार्थकः 'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि' । इत्यमरः ।

राम इति । सोमपीथी = पीथं पानं 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' इति औणादिकस्थक् । सोमस्य पीथं सोमपीथं, तदस्याऽस्तीति, 'अत इनिठनौ' इतीनिः प्रत्ययः । 'सोमपीथी तु सोमपः' इत्यमरः । मे = मम, आवुत्तः = भगिनीपतिः 'भगिनीपतिरावुत्त' इत्यमरः । 'भावुक' इति पाठेऽपि स एवाऽर्थः, 'नाट्योक्तौ भगिनीपतिः' इति हेमचन्द्रः । निर्विघ्नः = विघ्नरहितः किं ? काकुप्रश्नाऽर्थो निष्पन्नः । आर्या = पूज्या, ज्येष्ठस्वसृत्वात् । निर्विघ्ना इति लिङ्गविपरिणामः ।

सीता—आपको नमस्कार है । दामाद (ऋष्यशृङ्ग) के साथ कौसल्या आदि गुरुजनकी और पूजनीया शान्ता देवीकी भी कुशल है ?

राम—सोमपान करनेवाले मेरे भगिनीपति (जीजाजी) भगवान् ऋष्यशृङ्ग और पूजनीया जीजी शान्ता भी सकुशल हैं ?

सीता—हमलोगोंको भी याद करते हैं ?

---

* 'भावुक' इत्यपि पाठः । 'भावुको भगिनीपतिः' ।

अष्टावक्रः—(उपविश्य) अथ किम् । देवि ! कुलगुरुर्भगवान् वसिष्ठ-स्त्वामिदमाह—

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधूस्त्वमसि नन्दिनि ! पार्थिवानां

अष्टावक्र इति । अथ किम् = एवम्, शान्ता ऋष्यशृङ्गश्चेत्युभावपि कुशलिनौ, तथा युष्माकमपि स्मरत इत्यर्थः । अथ किमिति पदं स्वीकारव्यञ्जकमव्ययमिति शब्दरत्नावली, निश्चयार्थकमिति केचित् । देवि = राजमहिषि ! 'देवी कृताऽभिषेकाया'मित्यमरः । कुलगुरुः = रघुवंशगुरुः ।

विश्वम्भरेति । हे नन्दिनि ! भगवती विश्वम्भरा भवतीमसूत, प्रजापतिसमो राजा जनकस्ते पिता । त्वं तेषां पार्थिवानां वधूरसि, येषां कुलेषु सविता गुरुः, वयं च (गुरवः) इत्यन्वयः । हे नन्दिनि = नन्दनं नन्दः (आनन्दः), सोऽस्या अस्तीति नन्दिनी, तत्सम्बुद्धौ हे नन्दिनि = हे सौभाग्यवति !, 'ऋन्नेभ्यो ङीप्' इति ङीप् । भगवती = श्रीसम्पन्ना, विश्वम्भरा = विश्वं बिभर्तीति, 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' इति खच्, 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमश्च । 'भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा' इत्यमरः । भवतीं = त्वाम्, असूत = प्रसूतवती, एतेन सीताया अयोनिजत्वं सूच्यते । प्रजापतिसमः = प्रजापतिना, प्रजापतेर्वा समः 'तुल्याऽर्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' इति तृतीया षष्ठी वा; ततः समासः, ब्रह्मज्ञानाद् ब्रह्मतुल्य इत्यर्थः । राजा = महाराजः, जनकः = जनकाऽऽख्यः क्षत्रियः, ते = तव, पिता = तातः, अस्तीति शेषः । तव मातृकुलं पितृकुलं च कुलद्वयमपि अतीव श्लाघनीयमिति भावः । त्वं, तेषां = प्रसिद्धानां रघ्वादीनामित्यर्थः । पार्थिवानां = राज्ञां, वधूः = स्नुषा, असि, येषां = राज्ञां, कुलेषु = वंशेषु, उद्भूताऽवयवभेदविवक्षया बहुत्वम् । सविता = सूर्यः, गुरुः = पिता, वंशप्रवर्तकत्वेनेत्यर्थः । वयं च = अहं च, 'अस्मदो द्वयोश्च' इति एकत्वे विवक्षिते बहुवचनम् । गुरव इति बहुवचनान्तत्वेन विभक्तिविपरिणामः, हितोपदेष्टार इत्यर्थः । अत्र 'प्रजापति-

---

अष्टावक्र—(बैठकर) और क्या ? महारानी ! कुलगुरु भगवान् वसिष्ठने आपको ऐसा कहा है—

हे सौभाग्यवति ! भगवती पृथ्वीने आपको उत्पन्न किया, प्रजापतिके तुल्य राजा जनक

येषां कुलेषु सविता च गुरुर्वयं च ॥ ९ ॥
तत्किमन्यदाशास्महे । केवलं वीरप्रसवा भूयाः ।
रामः—अनुगृहीताः स्मः ।
लौकिकानां हि साधूनामर्थं वागनुवर्तते ।

सम' इत्यत्रोपमा, 'जनकः पिता' इत्यत्र पुनरुक्तवदाभासः 'सविता च गुरुर्वयं चे'त्यत्र द्वयोः पदयोरेकगुरुत्वधर्माऽभिसम्बन्धात्तुल्ययोगिता चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । 'वसन्ततिलका' वृत्तं, तल्लक्षणं यथा—'उक्ता वसन्ततिलका तभजा जगौ गः' इति ॥९॥

तदिति । तत् = तस्मात्कारणात् , अन्यत् = अपरं, किम् , आशास्महे = इच्छामः, 'आङः शासु-इच्छायाम्' इति धातोर्लट् । पुत्रभिन्नाः सर्वेऽपि त्वत्सौभाग्यद्योतका विषया वर्तन्त एव, अतस्ते नाशास्या इति भावः । तर्हि किमाशास्यमित्याह—**केवलमिति** । वीरप्रसवा = प्रसूयते इति प्रसवः, प्रोपसर्गपूर्वकात् 'षूङ्-प्राणिप्रसवे' इति धातोः 'ऋदोरप्' इत्यप् । 'प्रसवो गर्भमोचने । उत्पादे स्यादपत्येऽपि फलेऽपि कुसुमेऽपि च' इति मेदिनी । वीरः प्रसवो यस्याः सा वीरप्रसवा, वीरमाता इत्यर्थः । केवलम् = एव, भूयाः = भवतात् , त्वमिति शेषः । 'आशिषि लिङ्लोटौ' इति आशीर्लिङ् ।

राम इति । अनुगृहीताः = कृताऽनुग्रहाः, स्मः = भवामः । द्वित्वे विवक्षिते 'अस्मदो द्वयोश्च' इति बहुवचनम् ।

लौकिकानामिति । लौकिकानां साधूनां वाक् अर्थम् अनुवर्तते हि, पुनः आद्यानाम् ऋषीणां वाचम् अर्थः अनुधावति' इत्यन्वयः । लौकिकानां = लोकभवानां, साधारणानामित्यर्थः, साधूनां = सज्जनानां, वाक् = वाणी, अर्थं = वस्तु, अनुवर्तते = अनुसरति, वृतुधातोरुपसर्गयोगेन सकर्मकत्वम् । हि = निश्चयेन । पुनः = परन्तु, आद्यानां = प्रधानानाम् , ऋषीणाम् = महामुनीनां, वशिष्ठादीनामित्यर्थः । वाचं = वाणीम् , अर्थः = वस्तु, अनुधावति = अनुसरति । लौकिकानां साधूनां वाणी वस्त्वपेक्षिणी, वसिष्ठप्रमुखानामृषीणां तु वाण्यपेक्षं वस्तु वर्तते, अतोऽस्माकं वीरः पुत्रो भविष्यत्येवेति भावः । अत्रेतरसाम्यपेक्षया वसिष्ठादीना-

आपके पिता हैं; आप उन राजाओंकी कुलवधू हैं जिनके कुलमें सूर्य और हम गुरु हैं ॥९॥
इस कारणसे और क्या आशीर्वाद दें । आप वीरपुत्रकी माता हों ।
राम—हमलोग अनुगृहीत हुए ।
लौकिक सज्जनोंकी वाणी अर्थका अनुसरण करती है, परन्तु प्रधान ऋषियोंकी वाणीका

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ १० ॥

अष्टावक्रः—इदं च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयो भूयः संदिष्टम्—'यः कश्चिद्गर्भदोहदो भवत्यस्याः सोऽवश्यमचिरान्मानयितव्य' इति।

रामः—क्रियते यद्येषा कथयति।

अष्टावक्रः—ननान्दुः पत्या च देव्याः संदिष्टम्—'वत्से, कठोरगर्भेति

ऋषीणामाधिक्यप्रतिपादनाद् व्यतिरेकाऽलंकारः। तल्लक्षणं यथा—'आधिक्यमुपमेयस्योपमानान्न्यूनताऽथ वा। व्यतिरेकः' इति। अनुष्टुप्छन्दः॥ १०॥

अष्टावक्र इति। अरुन्धत्या = वसिष्ठपत्न्या, देवीभिः = कृताऽभिषेकाभिः, कौशल्यादिभिरित्यर्थः। भूयो भूयः = वारं वारम्। सन्दिष्टं = सन्देशः कृतः। अस्याः = सीतायाः, यः कश्चित् = यः कोऽपि, दुष्पूरोऽपीत्यर्थः। गर्भदोहदः = गर्भस्य दोहदः, गर्भिण्यभिलाष इत्यर्थः। गर्भदौर्हृदमित्यस्यापि अयमेवाऽर्थः। 'गर्भदौर्हृदोदय' इति पाठे गर्भिण्यभिलाषोत्पत्तिरित्यर्थः। अचिरात् = सत्वरम्। मानयितव्यः = संभावयितव्यः।

'दोहदस्याऽप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं चापि तस्मात्कार्यं प्रियं स्त्रियाः॥' इति स्मृतेरिति भावः।

राम इति। क्रियते = विधीयते, अस्या दोहदपूरणमिति शेषः। एषा = पुरः स्थिता, सीतेत्यर्थः, कथयति यदि = सूचयति चेदित्यर्थः। अतिशालीनतया अनया स्वदोहदसूचनमेवाऽशक्यं, यदि सूचयति, अवश्यमेव करोमीति भावः।

अष्टावक्र इति। ननान्दुः = पतिस्वसुः, शान्ताया इत्यर्थः। 'ननान्दा तु स्वसा पत्युः' इत्यमरः। पत्या = भर्त्रा, ऋष्यशृङ्गेणेत्यर्थः। देव्याः = सीतायाः,

---

अर्थ अनुसरण करता है॥ १०॥

अष्टावक्र—भगवती अरुन्धतीने, कौसल्या आदि महारानियोंने एवम् शान्ताने भी बारंबार यह सन्देश कहा है कि—'गर्भिणी अवस्थामें सीताजीकी जो कुछ अभिलाषा हो आपको उसे बहुत शीघ्र पूरा करना चाहिए'।

राम—यदि यह कहती हैं तो करता हूं।

अष्टावक्र—ननदके पति (ननदोई) ऋष्यशृङ्गने महारानीको सन्देश दिया है—'वत्से!

---

* 'दौर्हृदोदयो' इति पुस्तकान्तरस्थः पाठः।

नानीतासि । वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः । 'तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामः' इति ।

रामः—(सहर्षलज्जास्मितम् ।) तथास्तु । भगवता वसिष्ठेन न किंचिदादिष्टोऽस्मि । ?

अष्टावक्रः—श्रूयताम् ।

जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम् ।

कठोरगर्भा = कठोरो गर्भो यस्याः सा, परिणतगर्भा इत्यर्थः । नाऽऽनीताऽसि = न प्रापिताऽसि, मदाश्रम इति शेषः ।

> 'गर्भिणी कुञ्जराऽश्वादिशैलहर्म्याऽधिरोहणम् ।
> व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत् ॥' इति

प्रयोगपारिजातोद्धृतकश्यपवचनस्मरणादिति भावः ।

त्वद्विनोदाऽर्थमेव=त्वन्मनोरञ्जनाऽर्थमेव, न तूपेक्षयेति भावः । पुत्रपूर्णोत्सङ्गां = पुत्रेण पूर्णः पुत्रपूर्णः, स उत्सङ्गो यस्याः सा पुत्रपूर्णोत्सङ्गा, तां तनयपूर्णाऽङ्का-मित्यर्थः । आयुष्मतीं = जैवातृकां, त्वामित्यर्थः । वात्सल्यसूचिकेयमुक्तिः । 'जैवातृकः स्यादायुष्मान्' इत्यमरः । द्रक्ष्यामः = अवलोकयिष्यामः ।

राम इति । स्वीकरोति आशीःप्रायामुक्तिं—**तथास्त्वि**त्यनेन ।

अष्टावक्र इति । श्रूयताम् = आकर्ण्यताम् ।

जामात्रिति । 'जामातृयज्ञेन वयं निरुद्धाः, त्वं बाल एव असि । राज्यं च नवम् , प्रजानाम् अनुरञ्जने युक्तः स्याः । तस्मात् यशः, यत् वः परमं धनम्' इत्यन्वयः । जामातृयज्ञेन = जामातुः (ऋष्यशृङ्गस्य) यज्ञः (मखः) जामातृयज्ञस्तेन, जामातृपदेन तद्वचनस्य आदरणीयता गम्यते । वयं निरुद्धाः = उपरुद्धाः, यज्ञसमाप्तेः प्रागत्रागन्तुमसमर्था इति भावः । त्वं = रामः, बाल एव = अप्रौढ एव, राज्यशासन इति भावः । राज्यं च, नवं = नूतनम् । अतः—

प्रसवकालके निकट होनेसे तुम्हें नहीं बुलाया है । वत्स रामचन्द्रको भी तुम्हारे दिलबहलावके लिए ही वहीं रक्खा है । इस कारणसे पुत्रसे भरी गोदवाली आयुष्मती तुमको हम पीछे देखेंगे ।

राम—(हर्ष, लज्जा और मुस्कुराहटके साथ) ऐसा ही हो । भगवान् वसिष्ठने मुझे कुछ आज्ञा नहीं दी है ?

अष्टावक्र—सुनिए ।

दामाद (ऋष्यशृङ्ग) के यज्ञसे हम लोग रुके हुए हैं, आप बालक ही हैं; और राज्य नया है ।

युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः ॥ ११ ॥

रामः—यथा समादिशति भगवान्मैत्रावरुणिः ।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।

प्रजानां = जनानाम् , अनुरञ्जने = अनुरागोत्पादने, युक्तः = संनद्धः, तत्पर इति यावत् । स्याः = भवेः । तस्मात् = प्रजाऽनुरञ्जनात् , यशः = कीर्तिः, भविष्यतीति शेषः । यत् = यशः, वः = युष्माकम् , रघुवंश्यानां राज्ञामित्यर्थः । परमं = श्रेष्ठम् , अनश्वरमिति भावः, धनमभिमतमिति शेषः । इदं नाटकाऽर्थमूतं बीजमुपन्यस्तम् । इन्द्रवज्रा वृत्तम् , तल्लक्षणं यथा—'स्यादिन्द्रवज्रा यदि तौ जगौ गः ।' इति ॥ ११ ॥

राम इति । भगवान् = ऐश्वर्यसम्पन्नः, मैत्रावरुणिः = वसिष्ठः, मित्रश्च वरुणश्च मित्रावरुणौ 'चाऽर्थे द्वन्द्वः' इति इतरेतरयोगद्वन्द्वः, मित्रावरुणयोर्नियतसाहचर्यात् 'देवताद्वन्द्वे च' इत्यानङ् । मित्रावरुणयोरपत्यं पुमान् मैत्रावरुणिः 'अत इञ्' इति इञ् प्रत्ययः । 'तद्धितेष्वचामादेः' इत्यादिवृद्धिश्च । यथा = येन प्रकारेण, समादिशति = आज्ञापयति, तथा करोमीति शेषः । अथात्रेयं **पौराणिकी कथाऽनुसन्धेया**—'उर्वशीदर्शनेन मित्रावरुणयोर्द्वतयो रेतः कुम्भाद्बहिरभ्यन्तरे च पतितम् । ततो बहिर्वसिष्ठः, अभ्यन्तरे अगस्त्यश्च समुत्पन्न' इति ।

स्नेहमिति । 'लोकस्य आराधनाय स्नेहं दयां सौख्यं च—यदि वा जानकीमपि मुञ्चतो मे व्यथा न अस्ति' इत्यन्वयः ।

लोकस्य = जनस्य, प्रजानामित्यर्थः । आराधनाय = अनुरञ्जनाय, 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः, इति चतुर्थी । स्नेहं = प्रेमाणम् , पत्न्यादिविषयमिति भावः, दयां = करुणां, गर्भिण्यादिविषयामिति भावः । सौख्यं च = सुखं च, पुत्रलालनादिजन्यमिति भावः, यदि वा = अथवा, जानकीमपि = सीतामपि

अतः आप प्रजाओं को प्रसन्न करनेमें तत्पर होवें, उससे यश होता है; जो कि आप लोगोंका श्रेष्ठ धन है ॥ ११ ॥

राम—भगवान् वसिष्ठ जैसी आज्ञा करते हैं ।

प्रजाओंके अनुरञ्जनके लिए प्रेम, दया सुख और सीताको भी छोड़ते हुए मुझको दुःख नहीं होता है ॥ १२ ॥

आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता—अदो जेव्व राहवधुरन्धरो अज्जउत्तो । (अत एव राघवधुरन्धर आर्यपुत्रः ।)

रामः—कः कोऽत्र भोः । विश्राम्यताम्*अष्टावक्रः ।

अष्टावक्रः—(उत्थाय परिक्रम्य च ।) अये, कुमारलक्ष्मणः प्राप्तः । इति निष्क्रान्तः ।)

(प्रविश्य)

लक्ष्मणः—जयति जयत्यार्यः । आर्य ! अर्जुनेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामभिलिखितम् । तत्पश्यत्वार्यः ।

'प्राणेभ्योऽपि गरीयसी' इत्युक्तरीत्या प्राणाधिकामपीति भावः, मुञ्चतः = त्यजतः, मे = मम, व्यथा=दुःखं, न अस्ति=न वर्तते । वर्तमानकालनिर्देशेन सीतापरित्यागस्य आसन्नता व्यज्यते, अत्र 'जानकीमपी'त्यत्र वस्त्वनन्तरं किमुतेत्यन्यथाऽर्थागमादर्थापत्तिः तथा 'मुञ्चत'इत्येकया क्रियया स्नेहादीनां पदार्थाना सम्बन्धात्तुल्ययोगिता चेत्यनयोः सङ्करः ॥ १२ ॥

सीतेति । अत एव = प्रजानुरञ्जनाऽतिशयादेव, राघवधुरन्धरः = रघुवंशराजश्रेष्ठः ।

राम इति । विश्राम्यताद् = विश्रामं प्राप्नोतु, आशिषि परस्मैपदलोटस्तातङ् ।

अष्टावक्र इति । 'नाऽसूचितं विशेत्पात्रम्' इति भरतोक्त्या अष्टावक्रमुखेन लक्ष्मणागमनं सूच्यते 'अये' इत्यादिना ।

लक्ष्मण इति । आर्यः = पूज्यः, भवानित्यर्थः । जयति = सर्वोत्कर्षेण वर्तते, द्विरुक्तिर्दार्ढ्यसूचनाय । अस्मदुपदिष्टम् = अस्माभिः उपदिष्टम् (उपवर्णितम्) । वीथ्यां = भित्तौ, चित्रमयश्रेण्यामित्यर्थः । अभिलिखितं = चित्रितम् ।

सीता—इसीसे आर्यपुत्र रघुवशके राजाओंमें धुरन्धर है ।

राम—यहाँ कौन है जी ! अष्टावक्र ऋषि विश्राम करें ।

अष्टावक्र—(उठ और घूमकर) अये ! कुमार लक्ष्मण आ गये हैं (ऐसा कहकर जाते है)

(प्रवेश कर)

लक्ष्मण—जय हो, आर्यकी जय हो । आर्य ! अर्जुन नामक चित्रकारने हमसे कहे गये आपको चरित्रको इस दीवारपर चित्रित किया है । आप उसे देखिए ।

* 'भगवान्' इत्यधिकः पाठः ।

राम'—जानासि वत्स ! दुर्मनायमानां देवीं विनोदयितुम् । तत्किय-न्तमवधिं यावत् ।

लक्ष्मण'—यावदार्याया हुताशनशुद्धिः ।

राम'—शान्तम् (ससान्त्ववचनम् ।)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ १३ ॥

राम इति । दुर्मनायमाना = दुःखितचित्ता जनकस्य स्वदेशगमनादिति भावः । दुःस्थितं मनो यस्याः सा दुर्मनाः, अदुर्मना दुर्मना इव भवति दुर्मना-यमाना ताम्, भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः' इति क्यङ् सलोपश्च । ङित्वात् अनुदात्तङित आत्मनेपदम्' इत्यात्मनेपदम्, ततः शानच् । विनोदयितुं = सन्तो-षमुत्पादयितुम् । तत् किं च कियन्तं = किं परिमाणमस्य कियान्, तं किंपरि-माणमित्यर्थः । अवधिं यावत् = सीमां व्याप्य अस्तीति शेषः इति प्रश्नः । ततोऽन्यत्रापि दृश्यते' इति द्वितीया इति 'अन्यारादितरर्तेदिक्' यादि सूत्रे प्रौढ-मनोरमायां वर्तते ।

लक्ष्मण इति । आर्यायाः = पूज्यायाः प्रजावत्या इत्यर्थः । हुताशनशुद्धिः = हुताशनेन (अग्निना) शुद्धिः । यावच्छब्दोऽवधारणार्थकः । हुताशन-शुद्धिरेवाऽवधिरित्यर्थः ।

राम इति । शान्तम् = 'हुताशनशुद्धिः' इति नो ब्रूहीत्यर्थः । 'शान्त-मिति वारणार्थम्' इति मेदिनी । ससान्त्ववचनम् = अतिशयमधुरवाक्यसहितं यथा तथा ।

उत्पत्तीत्यादि । 'उत्पत्तिपरिपूतायाः अस्याः पावनान्तरैः किम् ? तीर्थो-दकं वह्निश्च अन्यतः शुद्धिं न अर्हतः' इत्यन्वयः । उत्पत्त्या = जन्मना एव, परिपूतायाः = पवित्रायाः, अयोनिजत्वेनेति भावः । अस्याः = सीतायाः, पावना-न्तरैः = अन्यानि पावनानि पावनान्तराणि तैः, 'मयूरव्यंसकादयश्च' इति

राम—वत्स ! दुःखित चित्तवाली सीताका दिल बहलाना जानते हो। चित्र कहाँतक लिखा गया है ?

लक्ष्मण—भौजाईकी अग्निशुद्धितक ।

राम—ऐसा मत कहो। (अति मधुर वचनोंके साथ)

जन्मसे ही पवित्र सीताजीका पवित्रताके लिए अग्नि आदि पदार्थोंकी क्या जरूरत है ?

देवि देवयजनसम्भवे ! प्रसीद । एष ते जीवितावधिः प्रवादः ।
क्लिष्टो *जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते ।

समासः । अग्न्यादिभिरन्यैः पवित्रताजनकैः पदार्थैरिति भावः । किं = किं क्रियते, स्वतः शुद्धाया अन्यतः शुद्धिसम्पादनं पुनरुक्तिवन्निरर्थकमिति भावः । पूर्वोक्तिं द्रढयति—तीर्थोदकमिति । तीर्थोदकं = तीर्थजलं, वह्निश्च = अग्निश्च, अन्यतः = अन्यस्मात्, वस्त्वन्तरादित्यर्थः । शुद्धिं=पवित्रतां, न अर्हतः=संपादयितुं न योग्यौ भवतः । शुक्रशोणितजन्यशरीराऽभावात्सीताया गङ्गादितीर्थजलस्य अग्नेश्च इव स्वतः शुद्धत्वादन्यतः शुद्धिसम्पादनं नावश्यकमिति भावः । अत्र दृष्टान्ताऽलंकारः ॥ १३ ॥

देवीति । सीताया उत्पत्तिपरिपूतत्वे हेतुं प्रदर्शयति—देवीति । देवयजनसंभवे = इज्यतेऽस्मिन्निति यजनं यज्ञक्षेत्रं, 'करणाऽधिकरणयोश्च' इत्यधिकरणे ल्युट् । देवयजने संभवः (उत्पत्तिः) यस्याः सा देवयजनसम्भवा, तत्सम्बुद्धौ, हे देवयज्ञक्षेत्रोत्पन्ने इत्यर्थः । प्रसीद = प्रसन्ना भव, खेदं मा कुरु इति भावः; अपवादस्य अपरिहार्यत्वादिति तत्त्वम् । एषः=हुताऽशनशुद्धिविषयकः, प्रवादः=लोकाऽपवादः, रावणगृहस्थितिमूल इत्यर्थः । ते = तव, जीविताऽवधिः = जीवनं जीवितं 'नपुंसके भावे क्तः' इति क्तः । जीवितमवधिर्यस्य सः, यावज्जीवनस्थायीत्यर्थः ।

क्लिष्ट इति । क्लिष्टो जनः जनैः अनुरञ्जनीयः किल, तत् ते नः, यत् अशुभम् उक्तम्, तत् न क्षमम् । सुरभिणः कुसुमस्य मूर्ध्नि स्थितिः नैसर्गिकी सिद्धा, चरणैः अवताडनानि न (नैसर्गिकाणि सिद्धानि)' इत्यन्वयः । क्लिष्टः=प्राप्तक्लेशः, दुःखित इत्यर्थः, जनः = मनुष्यः, जनैः = अन्यैर्मनुष्यैः, अनुरञ्जनीयः = आराधनीयः, क्लेशविस्मारणेन लालनीयः, न तु पूर्वानुभूतदुःखस्मारणेन क्लेशयितव्य इत्यर्थः । किल = निश्चयेन, तत्=तस्मात्, ते=तव, विषय इति शेषः । 'भार्या पुत्रः स्वका तनुः' इति मनुस्मरणात् भार्याविषयकोऽपवादः पतिविषयोऽपि, अत आह

तीर्थजल और अग्नि दूसरे पदार्थोंसे शुद्धिलाभ नहीं करते हैं ॥ १३ ॥

देवि ! यज्ञक्षेत्रसे उत्पन्न हे सीते ! प्रसन्न होओ । अग्नि-शुद्धि-विषयक यह तुम्हारा प्रवाद आजीवन रहेगा ।

दुःखितको प्रसन्न करना लोगोंका कर्तव्य है, इस कारणसे तुम्हारे विषयमें जो हम

* 'कष्टम् ! इति पु० पा० ।   † 'कुल'—इति पु० ।

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ १४ ॥

सीता—होदु* अज्जउत्त, होदु । एहि पेक्खम्ह दाव दे चरिदम् । (इत्युत्थाय परिक्रामति ।) (भवत्वार्यपुत्र, भवतु । एहि । प्रेक्षामहे तावत्ते चरितम् ।)

लक्ष्मणः—इदं तवालेख्यम् ।

सीता—(निर्वर्ण्य)के एदे उवरिणिरन्तरट्ठिदा उवत्थुवन्दि विअ अज्जउत्तम्

'न' इति । नः = अस्माकम् , आवयोरिति भावः । दम्पत्योरेकस्य निन्दायामेकहृदयत्वादितरस्यापि निन्दासद्भावादिति भावः । तत् , अशुभम् = अमङ्गलं 'हुताशनशुद्धिः' इत्याकारमित्यर्थः, उक्तं = कथितं, तत् = कथनं, न क्षमं = नोचितम् । **अयं भावः**—प्राप्तक्लेशानां जनानां क्लेशविस्मारणात्मकेन लालनादिना अनुरञ्जनीयत्वेऽपि 'यावदार्याया हुताशनशुद्धिः' इति वचनम् आवयोरुभयोरपि विषयेऽमङ्गलव्यञ्जकं, तत्राऽपि उत्पत्तिपरिपूतायास्ते विषये तु अनौचित्यव्यञ्जकमपि इति । पूर्वोक्तिं दृष्टान्तेन द्रढयति—**नैसर्गिकीति** । सुरभिणः = सुगन्धप्रधानस्य, कुसुमस्य = पुष्पस्य, मूर्ध्नि = शिरसि, स्थितिः = स्थानम् , नैसर्गिकी = निसर्गादागता 'तत आगतः' इति ठञ् , स्वाभाविकीत्यर्थः । सिद्धा = प्रसिद्धा, चरणैः = पादैः, अवताडनानि=प्रहाराः, न=न नैसर्गिकाणि सिद्धानीत्यर्थः । अत्र प्रथमचरणे 'कष्टं जनः कुलधनैरनुरञ्जनीय' इति पाठान्तरं, तत्र कुलधनैः = महाकुलैः, जनः=लोकः, कष्टं = दुःख यथा तथा अनुरञ्जनीय इत्यर्थः । अत्र **दृष्टान्तालङ्कारः** तल्लक्षणं यथा—'दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिबिम्बनम्' इति । वसन्ततिलकावृत्तम् ॥ १४ ॥

सीतेति । भवतु = अस्तु, स प्रवाद इति शेषः । स प्रवादः कमपि खेदं मे मनसि न जनयतीति भावः । प्रेक्षामहे = पश्यामः ।

लक्ष्मण इति । आलेख्यं चित्रम् ।

सीतेति । निर्वर्ण्य = 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।' इत्य-

---

लोगोंका अमङ्गल वाक्य कहा गया है, वह उचित नहीं है । सुगन्धित फूलका शिरमें रहना स्वभावसिद्ध है, परन्तु उसके चरणोंसे ताडन करना स्वभावसिद्ध नहीं ॥ १४ ॥

सीता—अपवाद हो जाय, आर्यपुत्र ! हो जाय । मुझे परवाह नहीं । आपका चरित्र देखें ।

लक्ष्मण—यह चित्र है ।

सीता—ऊपर सटकर खडे होकर ये कोन आर्यपुत्रकी स्तुति कर रहे हैं ।

---

* 'भो इति पाठः ।

(क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम् ।)

लक्ष्मणः—देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि, यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रान्तानि । तेन ताटकावधे प्रसादीकृतान्यार्यस्य ।

रामः—वन्दस्व देवि, दिव्यास्त्राणि ।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्रं शरदां तपांसि ।

मरः । उपरि = ऊर्ध्वदेशे, आकाशे इत्यर्थः । निरन्तरस्थिताः = निर्गतमन्तरं यस्मिन् कर्मणि निरन्तरं, तद्यथा तथा स्थिता निरन्तरस्थिताः । 'सह सुपा' इति समासः, निरवकाशस्थिता इत्यर्थः । परस्परसंश्लिष्टत्वेन स्थिता इति भावः । उपस्तुवन्ति = स्तोत्रं कुर्वन्ति ।

लक्ष्मण इति । सरहस्यानि = प्रयोगसंहारमन्त्रसमूहो रहस्यं तेन सहितानि 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । 'वोपसर्जनस्य' इति सहस्य वैकल्पिकः समावः । जृम्भकास्त्राणि = जृम्भकनामकानि अस्त्राणि । कृशाश्वात् = कृशाश्वनामकात् ऋषेः, 'आख्यातोपयोगे' इति पञ्चमी । कौशिकं = विश्वामित्रं, कुशिकस्यापत्यं पुमान् कौशिकस्तम् , 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यण् । तेन = विश्वामित्रेण । ताटकावधे = रामकृते ताटकावधे सति इत्यर्थः, 'यस्य च भावेन भावलक्षणम्' इति सप्तमी । प्रसादीकृतानि = प्रसादेन दत्तानीत्यर्थः ।

राम इति । दिव्यास्त्राणि = दिवि भवानि दिव्यानि, 'द्युप्रागपागुदक्प्रतीचो यत्' इति यत् प्रत्ययः । दिव्यानि च तानि अस्त्राणि दिव्यास्त्राणि, तानि 'विशेषणं विशेष्येण बहुलम्' इति समासस्ततः 'तत्पुरुषः समानाधिकरणः कर्मधारय' इति कर्मधारयसंज्ञा । वन्दस्व=नमस्कुरु, 'वदि अभिवादनस्तुत्योः' इति धातोर्लोट् ।

ब्रह्मादय इति । 'ब्रह्मादयः पुराणा गुरवो ब्रह्महिताय शरदां परःसहस्रं तपांसि

लक्ष्मण—देवि ! ये मन्त्रयुक्त वे जृम्भक अस्त्र हैं, जो भगवान् कृशाश्वसे कौशिक ऋषिके पास चले गये । उन्होंने ताटकावधके अवसरमें इन्हें अनुग्रहके साथ आर्य (श्रीरामचन्द्रजी) को दिया था ।

राम—देवि ! दिव्य अस्त्रोंको नमस्कार करो ।

ब्रह्मा आदि प्राचीन आचार्योंने वेद वा ब्राह्मणोंके हितके लिए हजार वर्षोंसे भी अधिक

---

* 'कृशाश्व' इति विश्वामित्रस्य कश्चित्पूर्वपुरुषः (प्रपितामहः) ।

† कुशिकः विश्वामित्रस्य पितामहः । गाधिर्नाम राजा तस्य पिता ।

एतान्यदर्शन्गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥१५॥

सीता—णमो एदाणम् । (नम एतेभ्यः ।)

रामः—सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति ।

तप्त्वा स्वानि एव तपोमयानि तेजांसि एतानि अदर्शन्' इत्यन्वयः । दिव्यरूपतां वन्दनकारणं च सूचयति—ब्रह्मादय इत्यादिना । ब्रह्मादयः = ब्रह्मा आदिर्येषां ते ब्रह्मप्रभृतय इत्यर्थः । पुराणाः=पुरातनाः, गुरवः = आचार्याः, ब्रह्महिताय=ब्रह्मणे-वेदाय विप्राय वा हितं = रक्षणम् ब्रह्महितं, तस्मै 'हितयोगे च' इति चतुर्थी, ततः 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति चतुर्थीतत्पुरुषसमासः । 'वेद-स्तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः' इत्यमरः । शरदां = वर्षाणां 'हायनोऽस्त्री शरत्समाः' इत्यमरः । परःसहस्रं = सहस्रात् परं परःसहस्रं सहस्राधिकं वर्ष-मित्यर्थः । तथा तथेति क्रियाविशेषणम् । 'पञ्चमी भयेन' इत्यत्र योगविभागात् समास इति कैयटादिमतम् । भाष्यकारमते तु सुप्सुपासमासः । 'राजदन्तादिषु परम्' इति परशब्दस्य पूर्वनिपातः 'पारस्करप्रभृतीनि च संज्ञायाम्' इति सुट् इति भानुजिदीक्षिताः । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । तपांसि = तपस्याः, तप्त्वा = कृत्वा, स्वानि एव = आत्मीयानि एव, तपोमयानि = तपो-रूपाणि, कार्यकारणयोरभेदोपचारादिति भावः । तेजांसि = तेजोभूतानि, एतानि = जृम्भकादीनि अस्त्राणि, अदर्शन = अपश्यन् । एतेन अस्त्राणामतीव महत्त्वम-भिव्यज्यते । प्रथमे, तृतीये, चतुर्थे च चरणे 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति लक्षणलक्षिता इन्द्रवज्रा, द्वितीये च 'उपेन्द्रवज्रा जतजास्ततो गौ' इति लक्षणलक्षिता उपेन्द्रवज्रा, तथा च उभयोः समावेशात् 'अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः' इति लक्षणलक्षिता उपजातिः ॥ १५ ॥

राम इति । सर्वथा = सर्वैः प्रकारैः, 'प्रकारवचने थाल्' इति थाल् । इदानीम् = साम्प्रतम् , प्रसवकालस्य सामीप्यात् त्वयि प्रसूतायामित्यर्थः । त्वत्प्र-सूतिं = तव सन्तानम् , उपस्थास्यन्ति = प्राप्स्यन्ति ।

कालतक तपस्या कर अपने ही तपोमय तेजःस्वरूप इन अस्त्रोंको देख लिया है ॥ १५ ॥

सीता—इन्हें नमस्कार है ।

राम—अब ये सब तरहसे तुम्हारे पुत्रको प्राप्त होंगे ।

सीता—अणुगहीदह्मि । (अनुगृहीतास्मि ।)

लक्ष्मणः—एष मिथिलावृत्तान्तः ।

सीता—अम्महे, दलन्तणवणीलुप्पलसामलसिणिद्धमसिणसोहमाणमंसलेन देहसोहग्गेण विह्मअत्थिमिदतादद्दीसन्तसोम्मसुन्दरसिरी अणादरत्थुडिदसंकरसरासणो सिहण्डमुद्धमुहमण्डलो अज्जउत्तो आलिहिदो । (अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशंकरशरासनः शिखण्ड[1] मुग्धमुखमण्डल आर्यपुत्र आलिखितः ।

सीतेति । अनुगृहीताऽस्मि = कृताऽनुग्रहाऽस्मि, प्रसूतेरपि अप्राप्तेरिति भावः ।

लक्ष्मण इति । एषः = अयं, मिथिलावृत्तान्तः = मिथिलानगरोदन्तः ।

सीतेति । अम्महे इति आश्चर्यव्यञ्जकमव्ययम् । दलदित्यादि । दलत्=विकसत् यत् नवं=नूतनम्, नीलोत्पलं=नीलकमलम्, इन्दीवरमित्यर्थः । तदिव श्यामलं= श्यामम् , स्निग्धं = चिक्कणम्, मसृणं = कोमलम् , अत एव शोभमानम् = देदीप्यमानम् , एतादृशं च तत् मांसलं = बलवत् , तेन 'बलवान्मांसलोंऽसलः' इत्यमरः । देहसौभाग्येन = शरीरसौन्दर्येण । विस्मयेन = आश्चर्येण, स्तिमितः = निश्चलः यः तातः = पिता जनक इत्यर्थः, तेन दृश्यमाना = अवलोक्यमाना सौम्या = आह्लादकरी, सुन्दरश्रीः = रुचिरशोभा यस्य सः । अनादरेण = अनायासेन, त्रुटितं=भग्न, शङ्करशरासनं = शिवचापो येन सः । शिखण्डमुग्धमुखमण्डलः = शिखण्डेन (काकपक्षेण) मुग्धं = सुन्दरं, मुखमण्डलं = वदनमण्डलं यस्य स., 'काकपक्षः शिखण्डकः' इत्यमरः । बहुव्रीह्यन्तं पदत्रयमपि 'आर्यपुत्र' इत्यस्य विशेषणम् । एतादृशः आर्यपुत्रः = रामः, आलिखितः = चित्रितः ।

सीता—मैं अनुगृहीत हूं ।

लक्ष्मण—यह मिथिलाका वृत्तान्त है ।

सीता—ओहो ! खिले हुए नीलकमलकी तरह श्याम वर्ण, चिकना, कोमल, चमकदार और पुष्ट शरीर-सौन्दर्य होनेके कारण आश्चर्यसे निश्चल पिताजी (जनक) ने जिनकी सौम्य और सुन्दर शोभा देख ली, अनायास महादेवके धनुषको तोड़नेवाले और काकपक्षसे सुन्दरमुखमण्डलवाले ऐसे आर्यपुत्र लिखे गये हैं ।

(१) 'काकपक्ष' इति क्वाचित्कः पाठः ।

लक्ष्मणः—आर्ये ! पश्य पश्य ।

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

रामः—सुश्लिष्टमेतत् ।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः ।

लक्ष्मण इति । 'पश्य पश्य' इति वीप्सया दर्शनक्रियायामाग्रहातिशयो व्यज्यते ।

सम्बन्धिन इति । एष तव तातः जनकानां पुरोहितः गौतमः शतानन्दश्च सम्बन्धिनः प्रसिष्ठादीन् अर्चति' इत्यन्वयः । एषः = अयं, तव = भवत्याः, तात = पिता, जनक इत्यर्थः, जनकानां = लक्षणया जनकवंशोद्भवानां राज्ञामित्यर्थः । पुरोहितः = पुरोधाः, 'पुरोधास्तु पुरोहित' इत्यमरः । गौतमः = गौतमपुत्रः, शतानन्दश्च = शतानन्दनामा ऋषिश्च, सम्बधिनः = वरसम्बन्धयुक्तान्, वसिष्ठादीन् = वसिष्ठ आदिर्येषा ते वसिष्ठादयस्तान् वसिष्ठदशरथप्रभृतीन् इत्यर्थः । अर्चति = पूजयति । अत्र तातशतानन्दयोरर्चनरूपैकक्रियाभिसम्बन्धात् **तुल्ययोगिताऽलङ्कारः**, तल्लक्षणं यथा—'पदार्थाना प्रस्तुतानामन्येषा वा यदा भवेत् । एकधर्माऽभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥' इति ॥ १६ ॥

राम इति । एतत् = चित्रं, जनकरघुवंशसम्बन्धप्रदर्शकमित्यर्थः । सुश्लिष्टं = सुसम्बद्धं, मणिकाञ्चनसमागमन्यायादिति भावः ।

जनकानामिति । 'जनकाना रघूणा च सम्बन्धः कस्य प्रियो न, यत्र स्वयं कुशिकनन्दनः दाता ग्रहीता च (अस्ति)' इत्यन्वयः । जनकानां=जनकवंशोद्भवानां, रघूणां च=रघुवंशोद्भवाना च राज्ञाम्, लक्षणया अयमर्थो निष्पन्नः; तद्धितप्रत्ययस्य लुगभावादिति भावः । सम्बन्ध=अपत्यसम्बन्धः, कस्य = पुरुषस्य, प्रियः=अभीष्टः,

---

लक्ष्मण—आर्ये ! देखिए देखिए ।

ये आपके पिताजी (जनक) और जनकवंशके पुरोहित गौतम-पुत्र शतानन्द जी वर-सम्बन्धसे युक्त वसिष्ठ आदिकी पूजा कर रहे हैं ॥ १६ ॥

राम—यह चित्र सुसम्बद्ध है ।

जनक और रघुवंशके राजाओंका सम्बन्ध किसे अभीष्ट नहीं ! जिस सम्बन्धसे स्वयम्

यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

सीता—पदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहदिक्खिदा तुह्मे। अह्मो ! जाणामि तस्सिं जेव्व पदेसे तस्सिं जेव्व काले वत्तामि। (एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम् । अहो ! जानामि तस्मिन्नेव काले वर्ते ।)

रामः—

समयः स वर्तत इवैष यत्र मां

ना = नाऽस्ति, सम्बन्धोऽयं सर्वस्याऽप्यभीष्टोऽस्तीत्यर्थः । यत्र = यस्मिन् सम्बन्धे, स्वयं, कुशिकनन्दनः = कौशिकः, विश्वामित्र इत्यर्थः । दाता = जनकस्य कन्यादानप्रेरकत्वेन दातेत्यर्थः । ग्रहीता च = रामस्य धनुर्भङ्गप्रेरकत्वेन ग्रहीता चेत्यर्थः । कन्यादाने कन्याग्रहणे चोभयत्राऽपि विश्वामित्रस्य प्रेरकत्वेन तस्मिन् दातृत्वं ग्रहीतृत्वं चोपचर्यत इति भावः । अत्र 'कस्य न प्रिय' इत्यत्र 'अपि तु सर्वस्यैवे'-त्यर्थस्याऽऽपतनादर्थापत्तिरलङ्कारः ॥ १७ ॥

सीतेति । तत्कालकृतगोदानमङ्गलाः = तस्मिन् काले = शिवधनुर्भङ्गाऽनन्तरसमये, कृतं=विहितम् , गोदानम्=केशान्तसंस्काराख्यं क्षौरकर्म एव मङ्गलं=कल्याणम् येषां ते । गावः = लोमानि, केशाः इति भावः 'दीयन्ते = खण्ड्यन्ते अस्मिन् (संस्कारे) इति गोदानं, गोपूर्वकात् 'दो-अवखण्डने' इति धातोः 'करणाऽधिकरणयोश्च' इत्यधिकरणे ल्युट् । 'गौर्नाऽऽदित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि । पुंस्त्रियोः स्वर्गवज्राऽम्बुरश्मिदृग्बाणलोमसु' । इति केशवः । केशान्तसंस्कारविषय उक्तं भगवता मनुना—'केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥' इति । विवाहदीक्षिताः = विवाहेन (उद्वाहेन) दीक्षिताः (संजातदीक्षाः), गृहीतविवाहदीक्षा इति भावः । जानामि = स्मरामि । तस्मिन्नेव प्रदेशे = मिथिलायां, तस्मिन्नेव काले = विवाहसमये ।

समय इति । हे सुमुखि ! एष समयो वर्तत इव, यत्र गौतमाऽर्पितः आग्र

विश्वामित्र ऋषि दान और ग्रहण करनेवाले हो गये हैं ॥ १७ ॥

सीता—उस समय केशान्तसंस्कार किए हुए विवाहदीक्षित ये आप चार भाई हैं । अहो ! उसी स्थान (मिथिला) में और उसी समयमें मैं हूँ, ऐसा लग रहा है ।

राम—हे सुमुखि ! यह वह समय ऐसा लग रहा है, जिस (समय) में शतानन्दसे

समनन्दयत्सुमुखि ! गौतमार्पितः ।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥ १८ ॥

लक्ष्मणः—इयमार्या । इयमप्यार्या माण्डवी । इयमपि वधूः श्रुतकीर्तिः ।

सीता—वच्छ, इयं वि अवरा का । (वत्स, इयमप्यपरा का ।)

लक्ष्मणः—(सलज्जास्मितम् । अपवार्य) अये, ऊर्मिलां पृच्छत्यार्या ।

हीतकमनीयकङ्कणः अयं तव करः मूर्तिमान् महोत्सव इव मां समनन्दयत्' इत्यन्वयः । हे सुमुखि = हे सुन्दरि, एषः = अयम् , सः = पूर्वोऽनुभूतः, समयः = कालः, वर्तते इव = विद्यते इव, अतीतः समयोऽपि चित्रदर्शनेन साम्प्रतिक इव आविर्भवतीत्यर्थः । यत्र = यस्मिन् काले, गौतमार्पितः = शतानन्ददत्तः, आगृहीतकमनीयकंकणः = आगृहीतं (धृतम्) कमनीयं (सुन्दरम्) कंकणं (करभूषणम्) येन सः । अयं=पुरोनिर्दिष्टः, तव=भवत्याः, करः=पाणिः, मूर्तिमान्= शरीरी, महोत्सव इव = महोद्धव इव, मां = रामं, समनन्दयन्=आनन्दितमकरोत् । अत्र 'वर्तत इवे'त्यत्र क्रियोत्प्रेक्षा, 'मूर्तिमान् महोत्सव इवे'त्यत्र गुणोत्प्रेक्षा च 'तथा च द्वयोरनपेक्षया स्थितेः संसृष्टिः । **मञ्जुभाषिणीवृत्तम्** , 'सजसा जगौ भवति मञ्जुभाषिणी' इति तल्लक्षणम् ॥ १८ ॥

लक्ष्मण इति । इयम् = अङ्गुलिनिर्दिष्टा । आर्या = भवती । लक्ष्मणाऽपेक्षया भरतस्य ज्यायस्त्वात् माण्डव्यर्थम् आर्यापदेन उक्तिः संगच्छते । श्रुतकीर्तिः = शत्रुघ्नपत्नी ।

सीतेति । लज्जया स्वपत्न्या ऊर्मिलायाश्चर्चामकुर्वन्तं लक्ष्मणं सीता परिहासार्थं पृच्छति—**वत्सेति** ।

लक्ष्मण इति । सलज्जास्मितं—लज्जा च स्मितं च लज्जास्मिते, ताभ्यां सहितं यथा तथा व्रीडेषद्धास्यपूर्वकमित्यर्थः । अपवार्य = अन्यश्रावणादृते, स्वगतमित्यर्थः । अन्यतः = विषयान्तरे । सञ्चारयामि = आकर्षामि । प्रकाशं =

अर्पित इस तुम्हारे हाथने मूर्तिवाले महोत्सवकी तरह मुझे आनन्दित किया था ॥ १८ ॥

लक्ष्मण—यह आप हैं । यह आर्या माण्डवी (भरतपत्नी) हैं और यह वधू श्रुतकीर्ति (शत्रुघ्नपत्नी) हैं ।

सीता—वत्स ! और यह दूसरी कौन है ?

लक्ष्मण—(लज्जा और मन्दहास्यके साथ । स्वगत) अरे ! आर्या ऊर्मिलाको पूछ-

भवतु । अन्यतः सञ्चारयामि । (प्रकाशम् ।) आर्ये ! दृश्यतां द्रष्टव्यमेतत् । अयं च भगवान्भार्गवः ।

सीता—(ससंभ्रमम् ।) कम्पिदह्मि । (कम्पितास्मि ।)

रामः—ऋषे ! नमस्ते ।

लक्ष्मणः—आर्ये ! पश्य । अयमार्येण—(इत्यर्धोक्ते ।)

रामः—(साक्षेपम् ।) अयि ! बहुतरं द्रष्टव्यम् । अन्यतो दर्शय ।

सीता—(सस्नेहबहुमानं निर्वर्ण्य ।) सुट्ठु सोहसि अज्जउत्त ! एदिणा विणअमाहप्पेण । (सुष्ठु शोभसे आर्यपुत्र ! एतेन विनयमाहात्म्येन ।)

लक्ष्मणः—एते वयमयोध्यां प्राप्ताः ।

सर्वश्राव्यं यथा तथा इत्यर्थः, 'सर्वश्राव्यं प्रकाशं स्यात्' इति तल्लक्षणम् । एतत्= द्रष्टव्यं = विलोकनीयम् । भार्गवः = परशुरामः ॥

सीतेति । ससंभ्रमं = संभ्रमेण (त्वरया) सहितं यथा तथा ससंभ्रमं, सत्वरमित्यर्थः । त्वरा च भयनिमित्तत्यवधेयम् , 'संभ्रमस्त्वरा' इत्यमरः ॥

लक्ष्मण इति । आर्येण = रामेण, अयं = परशुरामः, पराजित इति शेषः ॥

राम इति । साक्षेपम्—आक्षेपेण (स्वप्रशंसामात्रकलक्ष्मणवाक्यनिषेधेन, सहितं यथा तथा) ब्राह्मणस्यावमाननं तत्रापि महर्षेः परशुरामस्य, एवं स्वपराक्रमश्रवणं चैतदुभयमपि अनुचितमतो धीरोदात्तनायकस्य श्रीरामचन्द्रस्य लक्ष्मण प्रतिषेधनं बोध्यम् । अन्यतः = स्थलान्तरे ।

सीतेति । सस्नेहबहुमानं = स्नेहश्च बहुमानश्च स्नेहबहुमानौ, ताभ्यां सहितं यथा तथा इति सस्नेहबहुमानं, प्रेमसहितं सहाऽतिसम्मानं चेत्यर्थः । निर्वर्ण्य = दृष्ट्वा, 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः । सुष्ठु=अतीव ॥

रहा है, अच्छा, इनकी दृष्टि दूसरी तरफ ले जाती हूँ । (प्रकाश भावसे) इस देखने लायक दृश्यको देखिए । ये भगवान् परशुराम हैं ।

सीता—(जल्दबाजीके साथ) कम्पित हो गई हूँ ।

राम—ऋषे ! आपको नमस्कार है ।

लक्ष्मण—आर्ये ! देखिए । इनको आर्यने—(ऐसा आधा कहनेपर)

राम—(बात काटकर) अरे ! बहुत कुछ देखना है । दूसरे स्थलमें दिखलाओ ।

सीता—(प्रेम और बहुत आदरके साथ) आर्यपुत्र ! इस नम्रताके प्रभावसे आप बहुत शोभित होते हैं ।

लक्ष्मण—ये हमलोग अयोध्यामें पहुँच गये ।

रामः—(सास्रम् ।) स्मरामि ।

जीवत्सु तातपादेषु नूतने दारसंग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥

इयमपि तदा जानकी ।

प्रतनु'विरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-

राम इति । सास्रम् = अस्रैः सहित यथा तथा, अश्रून्मोचनपूर्वकमित्यर्थः । अश्रून्मोचनं च स्वर्गस्थपितृस्मरणेनाऽवधेयम् ।

जीवत्स्विति । तातपादेषु जीवत्सु, दारसंग्रहे नूतने (सति । मातृभिश्चिन्त्यमानानां नस्ते दिवसा गता हि इत्यन्वयः । तातपादेषु = पितृचरणेषु, पितरि दशरथे इत्यर्थः । पूजायां पादशब्दो बहुवचने, 'उत्तमाना स्वरूपं तु पादशब्देन भण्यते' इति वीरराघवः । पितृनामाऽग्रहणं तु पितुर्गुरुत्वात् , 'आत्मनाम गुरोर्नाम नामाऽतिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठाऽपत्यकलत्रयोः ॥' इति स्मृतिप्रतिषेधाद्बोध्यम् । जीवत्सु=प्राणधारणं कुर्वत्सु, दारसंग्रहे=विवाहे, नूतने= नवे सति, 'यस्य च भावेन भावलक्षणम्' इत्युभयत्राऽपि सप्तमी । मातृभिः— जननीभिः, कौशल्यादिभिरित्यर्थः । चिन्त्यमानाना = 'कथमस्मत्पुत्राः सुखं प्राप्नुयुः' इति क्रियमाणचिन्तानामित्यर्थः । नः = अस्माकं, ते = पूर्वाऽनुभूताः, दिवसाः = दिनानि, गताः = व्यतीता', हि = निश्चयेन, तादृशाः, सुखदिवसाः पुनर्न प्राप्स्यन्त इति भाव. । अत्र यच्छब्दं विना केवलतच्छब्दसद्भावाद्विधेयाविमर्शाऽभिधानो दोषो नाशङ्कनीय', तच्छब्दस्य अनुभूताऽर्थकत्वात् 'प्रक्रान्तप्रसिद्धाऽनुभूताऽर्थकस्तच्छब्दो यच्छब्दोपादानं नाऽपेक्षते' इत्यालङ्कारिकनयेनेत्यवधेयम् ॥ १९ ॥

इयमिति । इयं = पुरः स्थिता, जानकी = सीता, श्लोकस्थितेन 'अकृत' इति क्रियापदेन सम्बद्ध्यते ॥

प्रतन्विति । प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैः दशनकुसुमैः मुग्धालोकं मुखं दधती (इयम्) शिशुः ललितललितैः ज्योत्स्नाप्रायैः अकृत्रिमविभ्रमैः

राम—(आँसू गिराकर) स्मरण करता हू, हाय ! स्मरण करता हूँ।

जिन दिनोंमे पिताजी जीवित थे, नूतन विवाह का अवसर था और माताएँ 'हमारे पुत्र कैसे सुखी होंगे' इस चिन्तामे थीं; हमारे वे दिन चले गये ॥ १९ ॥

उस समय यह सीता भी—

सूक्ष्म और विरल (अनिविड) तथा कपोलमें फैले हुए सुन्दर केशोंसे और फूलोंकी तरह

१. 'पतन' इति पुस्तकान्तरपाठः ।

दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम् ।
ललिततललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः ॥ २० ॥

मधुरैः अङ्गकैः मे अम्बानां (च) कुतूहलम् अकृत इत्यन्वयः। प्रतनुविरलैः-प्रतनूनि च तानि विरलानि "प्रतनुविरलानि तैः, सूक्ष्माऽनिबिडैरित्यर्थः। 'पतनविरलैः' इति पाठे-पतनेन (हेतुना) अनिबिडैः इत्यर्थः, पदमेतत् 'दशनकुसुमैः' इत्यस्य विशेषणं बोध्यम्। प्रान्तोन्मीलन्मनोहरकुन्तलैः = प्रान्ते (कपोलप्रान्ते) उन्मीलन्तः (विकसन्तः), लक्षणया शोभमाना इत्यर्थः, एतादृशा ये मनोहरकुन्तलाः = सुन्दरकेशास्तैः, एवं च दशनकुसुमैः = दशनाः कुसुमानि इव दशनकुसुमानि = तैः, पुष्पसदृशदन्तैरित्यर्थः, 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः। 'दशनमुकुलैः' इति पाठे दन्तकुड्मलैरित्यर्थः, उभयत्राऽपि 'हेतौ' इति 'इत्थंभूतलक्षणे' इति 'इत्थंभूतलक्षणे' इति वा तृतीया। मुग्धालोकं = सुन्दरदर्शनमित्यर्थः, मुग्ध आलोको यस्य तत् मुग्धालोकम्, 'आलोकौ दर्शनद्योतौ' इत्यमरः। मुखम् = आननं, दधती = दधातीति दधती शतृप्रत्ययः, धारयन्तीत्यर्थः, 'उभे अभ्यस्तम्' इति अभ्यस्तसंज्ञत्वात् 'नाऽभ्यस्ताच्छतुः' इति नुम् न। इयं, शिशुः = बालिका सीतेत्यर्थः। ललितललितैः = ललितात् ललितानि ललितललितानि तैः = सुन्दरादपि सुन्दरैः, ईप्सितादपि ईप्सितैर्वा। यद्वा 'सुकुमारतयाऽङ्गानां विन्यासो ललितं भवेत्' इत्युक्तेः सौकुमार्येण अङ्गविन्यासाद्धेतोः सुन्दरैरीप्सितैर्वा। ज्योत्स्नाप्रायैः = ज्योत्स्नाभिः प्रायाणि ज्योत्स्नाप्रायाणि तैः, चन्द्रिकासदृशैः इत्यर्थः, 'प्रायश्चानशने मृत्यौ प्रायो बाहुल्यतुल्ययोः' इति विश्वः। अकृत्रिमविभ्रमैः—अकृत्रिमा विभ्रमा येषां तानि अकृत्रिमविभ्रमाणि, तैः = स्वाभाविकविलासैरित्यर्थः। मधुरैः=प्रियैः, अङ्गकैः= अनुकम्पितानि अङ्गानि = हस्तपादाद्यवयवाः, इति अङ्गकानि तैः, 'अनुकम्पायाम्' इति कन्प्रत्ययः, अतिसौकुमार्येण अनुकम्पितैरङ्गैरित्यर्थः। यद्वा अल्पार्थे 'अल्पे' इति कन्, बाल्येनाऽल्पैरङ्गैरित्यर्थः। मे = मम, अम्बानाम् = कौशल्यादीनां मातॄणां च, 'अङ्गानाम्' इति पाठे हस्तपादाद्यवयवानामित्यर्थः। कुतूहलं = कौतुकम्, अकृत = अकरोत, 'डुकृञ्—करणे' इति धातोर्लुङ्, 'ह्रस्वादङ्गात्' इति सिचो लोपः, 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति कर्त्रभिप्राये क्रियाफले बोध्ये आत्म-

दांतोंसे सुन्दर दर्शनवाले मुखको धारण करती हुई अल्प वयवाली अत्यन्त सुन्दर, चांदनीके

लक्ष्मणः—एष मन्थरावृत्तान्तः ।

रामः—(सत्वरमन्यतो दर्शयन् ।) देवि वैदेहि !

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा ।
निषादपतिना यत्र स्निग्धेनासीत्समागमः ॥ २१ ॥

लक्ष्मणः—(विहस्य । स्वगतम् ।) अये, मध्यमाम्बावृत्तान्तोऽन्तरित आर्येण ।

नेपदम् । तेन रामस्य कौशल्यादीनां च कुतूहलकरणफलं सीताया अवगम्यते । अत्र 'दशनकुसुमैः' 'ज्योत्स्नाप्रायैः' इत्यत्र द्वे लुप्तोपमे समुच्चयाऽलङ्कारश्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । हरिणी वृत्तम् 'रसयुगहयैर्न्सौं म्रौ स्लौ गौ यदा हरिणी तदा' इति तल्लक्षणात् ॥ २० ॥

लक्ष्मण इति । मन्थरावृत्तान्तः = मन्थरा नाम कैकेयीदासी, तद्वृत्तान्तः ।

राम इति । सत्वर = शीघ्रम्, **'अनुत्तरम्'** इति पाठे उत्तररहितम् इत्यर्थः । अन्यतः = मन्थरावृत्तान्तसूचकस्थलादन्यत्र ।

इङ्गुदीति । शृङ्गवेरपुरे अयं स इङ्गुदीपादपः, यत्र पुरा स्निग्धेन निषादपतिना समागम आसीत् इत्यन्वयः । शृङ्गवेरपुरे=शृङ्गवेरनामके गुहनगरे, अयम् = अंगुलीनिर्दिष्टः, सः=पूर्वदृष्टः, इंगुदीपादपः = तापसतरुः, यत्र = यस्मिन् , पुरा = पूर्वं, वनगमनकाल इत्यर्थः, स्निग्धेन = स्नेहयुक्तेन, निषादपतिना = निषादराजेन, गुहेनेत्यर्थः । समागमः=सम्मेलनम् , आसीत्=अभवत् , अस्माकमिति शेषः ॥२१॥

लक्ष्मण इति । मध्यमाऽम्बावृत्तान्तः = मध्यमाऽम्बा (कैकेयी) तस्या वृत्तान्तः (उदन्तः) मन्थरासलापन-दशरथ-मन्त्रणा-रामप्रेषणादिरूप इत्यर्थः । अन्तरितः = व्यवहितः, चित्रान्तरदर्शनेन परित्यक्त इति भावः, मातृनिन्दाप्रसङ्गस्यापतितत्वात् कैकेयीवृत्तान्तरूपश्चित्रांऽशः परिहृत इति तात्पर्यम् । **'वृत्तान्तं परिहृतम्'** इति पाठस्तु 'वार्ता प्रवृत्तिर्वृत्तान्तः' इति नामलिङ्गानुशासनविरुद्ध-

---

सदृश और स्वाभाविक विलासोंसे सम्पन्न प्रीतिजनक अङ्गोंसे मेरा और माताओंका भी कुतूहल पैदा करती थी ॥ २० ॥

लक्ष्मण—यह मन्थराका वृत्तान्त है ।

राम—(जल्दीसे दूसरी तरफ दिखाते हुए) देवि सीते !

शृङ्गवेरपुरमें यह वही इंगुदीका पेड़ है, जहाँ पहले स्नेहयुक्त निषादराज (गुह) से भेंट हुई थी ॥ २१ ॥

लक्ष्मण—(हँसकर, मन ही मन) अरे ! मझली माता (कैकेयी) का वृत्तान्त आर्यने छोड़ दिया ।

सीता—अह्मो, एसो जडासंजमणवुत्तन्तो । (अहो, एष जटासंयमनवृत्तान्तः ।)

लक्ष्मणः—

पुत्रसंक्रान्तलक्ष्मीकैर्यद् वृद्धेक्ष्वाकुभिर्धृतम् ।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥ २२ ॥

सीता—एसा पसण्णपुण्णसलिला भअवदी भाईरही । (एषा प्रसन्नपुण्यसलिला भगवती भागीरथी ।)

रामः—रघुकुलदेवते ! नमस्ते ।

त्वात बहुभिः परिहृतः, परं 'स्थितस्य गतिश्चिन्तनीया' इति न्यायेन मध्यमाऽम्बाया वृत्तस्य = चरित्रस्य, अन्तं = स्वरूपमित्यर्थः कार्यः ।

सीतेति । जटासंयमनवृत्तान्तः = जटाबन्धनोदन्तः ।

लक्ष्मण इति । पुत्रसंक्रान्तलक्ष्मीकैः वृद्धेक्ष्वाकुभिः यत् धृतं, तत् पुण्यम् आरण्यकव्रतम् आर्येण बाल्ये धृतम् इत्यन्वयः । पुत्रसंक्रान्तलक्ष्मीकैः = पुत्रेषु सक्रान्ता लक्ष्मीर्येषां ते पुत्रसंक्रान्तलक्ष्मीकास्तैः = पुत्रप्राप्तराजलक्ष्मीकैरित्यर्थः, 'उरःप्रभृतिभ्यः कप्' इति कप् 'न कपि' इति ह्रस्वप्रतिषेधः । वृद्धेक्ष्वाकुभिः = वृद्धैः इक्ष्वाकुवंशोत्पन्नैः राजभिः, यत् = आरण्यकव्रतं, धृतम् = गृहीतं, तत्, पुण्यं=पवित्रम्, आरण्यकम्=वानप्रस्थसम्बन्धि, व्रतं=नियमः, आर्येण=पूज्येन, रामेणेत्यर्थः । बाल्ये = बालस्य भावस्तस्मिन् शैशवे, धृत = गृहीतम् ॥ २२ ॥

सीतेति । प्रसन्नपुण्यसलिला=प्रसन्नं (स्वच्छम्) पुण्यं (पवित्रम्) सलिलं (जलं) यस्याः सा ।

राम इति । ते = तुभ्यं, 'नमः' इति पदेन योगे 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च' इति चतुर्थी ।

सीता—ओहो ! यह जटा बाधने का वृत्तान्त है ।

लक्ष्मण—पुत्रको राजलक्ष्मी देकर इक्ष्वाकुवंशके बूढे राजाओंने जो वनवासका व्रत किया था, उस पवित्र व्रतको आर्यने बाल्यावस्थामें ही ले लिया ॥ २२ ॥

सीता—यह निर्मल और पवित्र जलवाली भगवती भागीरथी (गङ्गा) हैं ।

राम—रघुवंशकी देवि ! आपको नमस्कार है ।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसा रोषात्प्लुष्टान् पितुश्च[1]पितामहान् ।
अगणिततनूतापस्तप्त्वा तपांसि भगीरथो
भगवति ! तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥ २३ ॥

तुरगेति । हे भगवति ! भगीरथः अगणिततनूतापः (सन्) तपांसि तप्त्वा तव अद्भिः स्पृष्टान् सगराऽध्वरे तुरगविचयव्यग्रान् उर्वीभिदः रोषात् कपिलमहसा प्लुष्टान् च पितुः पितामहान् चिरात् उदतीतरत् इत्यन्वयः । हे भगवति = हे देवि !, भगीरथः = तन्नामकोऽस्मत्पूर्वज:, अगणिततनूतापः = उपेक्षितशरीरदुःखः सन्, **'अगणिततनूपातम्'** इति पाठे—उपेक्षितशरीरनाशम् इत्यर्थः, तत्र क्रियाविशेषणमेतत्पदमिति बोध्यम् । तपांसि = तपस्याः, तप्त्वा=संतप्य, तव=भवत्याः, अद्भिः = जलेन, स्पृष्टान् = आमृष्टान्, सगराऽध्वरे = सगरयज्ञे, तुरगविचयव्यग्रान् = तुरगस्य (अश्वमेधीयाश्वस्य, इन्द्रापहृतस्येति यावत्) विचयं = अन्वेषणे व्यग्रान् = व्यासक्तान्, अश्वाऽन्वेषणाकुलानित्यर्थः । 'व्यग्रो व्यासक्त आकुले' इत्यमरः । उर्वीभिदः=भूमिविदारकान्, रोषात्=क्रोधात्, कपिलमहसा=कपिलमुनितेजसा, प्लुष्टान् – दग्धान् 'प्लुष दाहे' इति धातोः क्तप्रत्ययः, पितुः = जनकस्य, दिलीपस्येत्यर्थः, पितामहान् = सगरात्मजान्, स्वप्रपितामहस्य असमञ्जसस्य षष्टिसहस्रसंख्यकान् भ्रातॄनित्यर्थः । चिरात् = बहुकालाऽनन्तरम्, उदतीतरत्=उदतारयत्, **'उदद्धीधरत्'** इति पाठे उद्धृतवानित्यर्थः । पुरा महाराजः सगरोऽश्वमेधशताऽनुष्ठाने मतिमकरोत्, ततः समाप्ते नवनवतितमेऽश्वमेधे यदा स शततममश्वमेधं प्रारभत, तदा स्वकीयपदनाशभीतरिन्द्रस्तदीयमश्वमपहृत्य तपस्यतः कपिलमुनेरन्तिके निदधौ । अनन्तरं षष्टिसहस्रसंख्यकाः सगरात्मजा अन्वेषणक्रमेणोर्वी विदार्य इयं प्रापुः, कपिलस्यैतत्कर्मेति मत्वा च तद्धननोद्यतास्ते कपिलतेजसा भस्मीभूता इति पौराणिकमुपाख्यानमत्र द्रष्टव्यम् । **हरिणीवृत्तं**, तदुक्तं—'रसयुगहयैर्न्सौ म्रौ स्लौ गौ यदा हरिणी तदा' इति ॥ २३ ॥

हे भगवति ! सगरके यज्ञमें घोडके अन्वेषणमें आकुल, भूमिको विदारण करनेवाले और क्रोधसे कपिल मुनिके तेजसे जलेहुए पिता (दिलीप) के पितामहों (सगरपुत्रों) को भगीरथने शरीरके क्लेशकी परवाह न कर तपस्या करके बहुत कालके अनन्तर आपके जलस्पर्शसे तार लिया ॥ २३ ॥

1. 'प्र' इति पुस्तकान्तरपाठः ।

सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव ।

लक्ष्मणः—एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम ।

(रामः सस्पृहमवलोकयति ।)

सीता—सुमरेदि वा त पदेसं अज्जउत्तो ? (स्मरति वा तं प्रदेशमार्यपुत्रः ?)

रामः—अयि कथं विस्मर्यते ?

अलसललितमुग्धान्यध्वसम्पातखेदा-

सेति—सा = तादृशी, अम्ब = हे मातः !, स्नुषायां = पुत्रवध्वां, शिवाऽनुध्याना = शिवमनुध्यानं यस्याः सा, कल्याणचिन्तनतत्परेत्यर्थः ।

लक्ष्मण इति । भरद्वाजावेदितः = भरद्वाजेन (तन्नाम्ना मुनिना) आवेदितः=निवेदितः । चित्रकूटयायिनि=चित्रकूटपर्वतगामिनि, वर्त्मनि=मार्गे, कालिन्दीतटे = यमुनातीरे, 'कालिन्दी सूर्यतनया यमुना शमनस्वसा ।' इत्यमरः, श्यामो नाम = नाम्ना श्याम इति, वनस्पतिः = वृक्षः ।

राम इति । सस्पृहं = सकौतुकम् , अवलोकयति = पश्यति ।

सीतेति । वा = अथवा, स्मरति = स्मरणं करोति, आर्यपुत्रः = भगवान् , रामचन्द्रः इत्यर्थः, तं प्रदेशम् = तत् स्थानम् ।

राम इति । अयि इति कोमलामन्त्रण, प्रिये इत्यर्थः । कथं = केन प्रकारेण विस्मर्यते = विस्मरणं क्रियते ।

अलसेति । यत्र त्वम् अध्वसम्पातखेदात् अलसललितमुग्धानि अशिथिलपरिरम्भैः दत्तसंवाहनानि परिमृदितमृणालीदुर्बलानि अङ्गकानि मम उरसि कृत्वा निद्राम् अवाप्ता इत्यन्वयः । यत्र = यस्मिन् प्रदेशे, त्वम् = भवती सीता, अध्वसम्पातखेदात्—सम्पतनं सम्पातः, 'भावे' इति घञ् , अध्वनि सम्पातः, तेन खेदस्त-

---

हे माता ! ऐसी आप बहू सीतामें अरुन्धतीकी तरह कल्याणकी चिन्ता करनेवाली हो ।

लक्ष्मण—चित्रकूटको जानेवाले मार्गमें यमुनाके तारमें भरद्वाज ऋषिसे कहा गया यह श्याम नामका वटका वृक्ष है ।

(राम अभिलाषके साथ देखते हैं ।)

सीता—आर्यपुत्र ! उस जगहको याद कर रहे हैं क्या ?

राम—ओ. ! किस तरह भूला जा सकता है ?

जहाँपर तुम मार्गमें चलनेके परिश्रमसे आलस्ययुक्त, कोमल और सुन्दर, दृढ

अशिथिलपरिरम्भैर्दत्तसंवाहनानि ।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ २४ ॥

लक्ष्मणः—एष विन्ध्याटवीमुखे विराधसंवादः ।

सीता—अलंदाव एदिणा। पेक्खम्मि दाव अज्जउत्तसहत्तधरिदतालवु-

स्मात् = मार्गगमनपरिश्रमादित्यर्थः । 'विभाषा गुणेऽस्त्रियाम्' इति हेतौ पञ्चमी । **'अध्वसञ्जातखेदात्'** इति पाठे मार्गोत्पन्नपरिश्रमादित्यर्थः । अलसललितमुग्धानि = अलसानि (आलस्ययुक्तानि, कार्याऽसमर्थानीत्यर्थः) ललितानि (कोमलानि) मुग्धानि (सुन्दराणि) **'लुलितानि'** इति पाठान्तरे शिथिलानीत्यर्थः । अशिथिलपरिरम्भैः = गाढालिङ्गनैः, दत्तसंवाहनानि—दत्तं = वितीर्णम् , संवाहनम् = मर्दनं येभ्यस्तानि कृतमर्दनानीत्यर्थः । परिमृदितमृणालीदुर्बलानि = अल्पानि मृणालानि मृणाल्यः, अवयवाऽपचयविवक्षायां 'षिद्गौरादिभ्यश्च' इति ङीष् 'स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षाऽपचये यदि' इत्यमरः । परिमृदिताश्च ता मृणाल्यः परिमृदितमृणाल्यः, ता इव दुर्बलानि परिमृदितमृणालीदुर्बलानि = परिमर्दिताऽल्पमृणालकृशानीत्यर्थः । अङ्गकानि = अनुकम्पितान् शरीराऽवयवान् , 'अनुकम्पायाम्' इति कन्प्रत्ययः । मम = रामस्य, उरसि = वक्षःस्थले, कृत्वा = निधाय, निद्रां = स्वापम् , अवाप्ता = प्राप्ता, आसीरिति शेषः, स प्रदेशः कथं विस्मर्यते ? इति पूर्ववाक्येनाऽन्वयः । अत्र 'परिमृदितमृणालीदुर्बलानी'त्यत्रोपमालङ्कारः । **मालिनी वृत्तम्** , 'ननमयययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणम् ॥ २४ ॥

लक्ष्मण इति । विन्ध्याऽटवीमुखे = विन्ध्यवनप्रवेशद्वारे, विराधसंवादः = विराधराक्षसवृत्तान्तः, **'विराधसंरोध'** इति पाठे 'विराधराक्षसकर्तृकोऽस्मदीयोऽवरोध इत्यर्थः ।

सीतेति । अलं = व्यर्थम् , एतेन = विराधवृत्तान्तेन । आर्यपुत्रस्वहस्तधृत-

---

आलिङ्गनोंसे दाबे गये और परिमर्दित कमलकी डंडियोंके सदृश दुर्बल अङ्गोंको मेरी छाती-पर रखकर सो गई थीं ॥ २४ ॥

लक्ष्मण—विन्ध्य वनके प्रवेशद्वारमें यह विराधका वृत्तान्त है ।

सीता—इसको देखनेकी कोई जरूरत नहीं । अतिशयानन्द जिस दक्षिण अरण्यके

न्दावत्तं अत्तणो अच्चाहिदं दक्खिणारण्णपहिअत्तणम् । (मवनसैव तेन । पश्यामि तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रमात्मनोऽत्याहितं दक्षिणारण्यपथिकत्वम्'।)

रामः—

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि ।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥ २५ ॥

तालवृन्तातपत्रम्=आर्यपुत्रेण (पत्या रामेण) स्वहस्तेन (आत्मपाणिना) धृतं (गृहीतम्), तालवृन्तं (व्यजनम्) तदेव आतपत्रं (छत्रम्) यस्मिंस्तत, 'व्यजनं तालवृन्तकम्' इत्यमरः । आत्मनः = स्वस्य, अत्याहितं = जीवितनिरपेक्षम्, 'अत्याहितं महाभीतिः कर्म जीवाऽनपेक्षि च' इत्यमरः, दक्षिणारण्यपथिकत्वम्=अवाचीविपिनपान्थत्वम् । अतिशयमनोविनोदनादिदमेव द्रष्टव्यं किं विरोधवृत्तान्ताऽवलोकनेनेति भावः ।

राम इति । गिरिनिर्झरिणीतटेषु वैखानसाश्रिततरूणि एतानि तानि तपोवनानि, येषु आतिथेयपरमा नीवारमुष्टिपचना यमिनो गृहिणो गृहाणि भजन्ते इत्यन्वयः । गिरिनिर्झरिणीतटेषु = पर्वतनदीतीरेषु, वैखानसाश्रिततरूणि = वैखानसैः (वानप्रस्थैः) आश्रिताः (सेविताः), तरवः (वृक्षाः) येषु तानि, एतानि तानि तपोवनानि, सन्तीति शेषः । येषु = तपोवनेषु, आतिथेयपरमाः=अतिथिषु साधु आतिथेयं, 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञ् । आतिथेयं परमम् = उत्कृष्टम्, आवश्यकत्वेनेति शेषः, येषां ते = अतिथिसत्कारप्रधाना इत्यर्थः । नीवारमुष्टिपचनाः = नीवारमुष्टेः पचनं येषां ते, मुष्टिपरिमितमुन्यन्नपाचका इत्यर्थः । यमिनः = यमाः सन्ति येषां ते यमिनः, अहिंसादियमपालनतत्परा इत्यर्थः । के ते= यमा इत्यत्र यथाह—भगवान् पतञ्जलिः—'अहिंसासत्याऽस्तेयब्रह्मचर्याऽपरिग्रहा यमा' इति । 'शमिन' इति पाठे शान्तियुक्ता अन्तरिन्द्रियनिग्रहयुक्ता वा । गृहिणः=गृहस्थाः, गृहाणि=भवनानि, भजन्ते=सेवन्ते । वसन्ततिलकावृत्तम् ॥२५॥

पथिकत्वमें आर्यपुत्रने पंखेको छत्रकी तरह धारण किया था, मैं उसीको देखती हूँ ।

राम—पर्वतकी नदियोंके तीरोंमें वानप्रस्थोंसे आश्रित वृक्षोंसे युक्त ये वे तपोवन हैं, जिनमें अतिथिसत्कारमें तत्पर मुट्ठीभर मुन्यन्नका पाक करनेवाले अहिंसा आदि यमोंके पालक गृही गृहको आश्रय कर रहते हैं ॥ २५ ॥

१. 'प्रवेशारम्भम्' इति पाठान्तरम् । २. 'शम' इति पाठान्तरम् ।

लक्ष्मणः—अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखकन्दरः संततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणो नाम ।

रामः—

स्मरसि सुतनु ? तस्मिन्पर्वते लक्ष्मणेन

लक्ष्मण इति । अङ्गुलिसन्निकृष्टत्वात् आलेख्यैकदेशे 'अयम्' इति निर्देशः, अविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखकन्दरः = अविरलाः (निरन्तराः) ये अनोकहाः = वृक्षाः, 'अनोकहः कुटः साल' इत्यमरः, तेषां निवहः=समूहस्तेन निरन्तरं=निरवकाशं, घनमिति यावत्, स्निग्धं=मसृणम्, नीलं=श्यामम् च यत् परिसरारण्यं=पर्यन्तभुवनम्, तेन परिणद्धा=आलिङ्गिता, एतादृशी या गोदावरी=तन्नामिका नदी, सा मुखेषु=अग्रभागेषु येषा तानि तादृशानि कन्दराणि = दर्यो यस्य स इति प्रस्रवणगिरिविशेषणम् ; 'मुखर' इति पाठे गोदावर्या मुखराणि = शब्दयुक्तानि, कन्दराणि यस्य स इतीदृशी पदयोजना कार्या । सन्ततं=सततम्, अभिष्यन्दमानमेघमेदुरितनीलिमा = अभिष्यन्दमानाः=वर्षन्तः, ये मेघा =बलाहकाः, तैः मेदुरितः=स्निग्धीकृतः, नीलिमा=श्यामत्वं यस्य सः, 'अभिष्यन्दमाना' इत्यत्र अभिपूर्वकात् 'स्यन्दू प्रस्रवणे' इति धातोर्लटि शानच् 'अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु' इति षत्वं च, 'नीलिमा' इत्यत्र नीलस्य भाव इति विग्रहे 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्प्रत्ययः । जनस्थानमध्यगः = जनस्थानस्य=दण्डकारण्यसमीपस्थस्य नामिकाख्यक्षेत्रस्य, तत्र प्रमाणं—'त्रेतायां तु त्रिकण्टकम् । द्वापरे तु जनस्थानं कलौ नामिकमुच्यते ॥' इति वचनं, तत्कृत्रात्यमिति मूलं मृग्यम्, मध्यगः = मध्यभागस्थितः, प्रस्रवणो नाम, गिरिः = पर्वतः, अस्तीति शेषः ।

स्मरसीति । हे सुतनु ! तस्मिन् पर्वते लक्ष्मणेन प्रतिविहितसपर्यासुस्थयोः (आवयोः) तानि अहानि स्मरसि ? यत्र सरसनीरा गोदावरी वा स्मरसि ?

लक्ष्मण—यह घने पेड़ोंके समूहसे व्याप्त कोमल और नीलवर्णवाले निकटवर्ती वनसे आलिङ्गित गोदावरीसे अग्रभागोंमें शोभित गुफाओंसे युक्त और निरन्तर बरसनेवाले मेघोंसे स्निग्ध नीलिमासे सम्पन्न जनस्थानका मध्यवर्ती प्रस्रवण नामका पर्वत है ।

राम – हे सुन्दरि ! उस पर्वतमें लक्ष्मणके द्वारा की गई शुश्रूषासे स्वस्थ हम दोनोंके उन

१. 'र' इत्यधिकः पाठः ।

प्रतिविहितसपर्यासुस्थयोस्तान्यहानि ।
स्मरसि सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि ॥ २६ ॥
किं च । किमपि किमपि मन्दं मन्दमासक्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण ।

तदुपान्तेषु आवयोः वर्तनानि च स्मरसि ? इत्यन्वयः । हे सुतनु = शोभना तनूर्यस्याः सा सुतनूस्तत्सम्बुद्धौ = हे सुगात्रि ! 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः, 'यू स्त्र्याख्यौ नदी' इति नदीसंज्ञत्वेन 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वम् । तस्मिन् = पूर्वोक्ते, पर्वते = अद्रौ, प्रस्रवणाख्ये इत्यर्थः । अत्र केवलतच्छब्दोपादानेन यच्छब्दस्य साकाङ्क्षत्वात् नाऽविमृष्टविधेयांऽशो दोषः शङ्क्यः, 'प्रकान्तप्रसिद्धाऽनुभूतार्थकस्तच्छब्दो यच्छब्दोपादानं नाऽपेक्षत' इत्यालङ्कारिकसमयेनाऽत्र तच्छब्दस्य प्रक्रान्तार्थकत्वात् अनुभूतार्थकत्वाद्वा यच्छब्दाऽनपेक्षणेनेत्यवधेयम् । लक्ष्मणेन = मदनुजेन, प्रतिविहितसपर्यासुस्थयोः = प्रतिविहिता (पुनः पुनः कृता) सपर्या (पूजा) क्षुधातृषाभयाऽऽदिनिवारणरूपा सेवेत्यर्थः, तया सुस्थयोः = प्रकृतिस्थयोः, (आवयोः) तानि = सुखमनुभूतानि, अहानि, = दिनानि, स्मरसि ? काक्वा किमिति प्रश्नाऽर्थो व्यङ्ग्यः, एवमधःस्थलेऽपि । तत्र = तस्मिन् स्थाने, सरसनीरां = स्वादुजलयुक्ताम् , गोदावरीं=तन्नाम्नीं काञ्चिन्नदीम् , वा = अथ वा, स्मरसि ?, एवं तदुपान्तेषु = गोदावरीप्रान्तेषु, आवयोः वर्तनानि = जीवनानि, च = अपि, स्मरसि ? **मालिनी वृत्तम्** ॥ २६ ॥

किमपीति । आसक्तियोगात् किमपि किमपि मन्दं मन्दम् अविरलितकपोलम् अक्रमेण जल्पतोः अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः (आवयोः) अविदितगतयामा रात्रिरेव व्यरंसीत् इत्यन्वयः । आसक्तियोगात्=अनुरागसम्बन्धात् । **आसत्तियोगात्** इति पाठे सामीप्यवशादित्यर्थः, अविरलितकपोलम्=निरन्तरीकृतगण्डं, परस्परसंमिलितकपोलमित्यर्थः, इदं पदमपि क्रियाविशेषणं बोध्यम् । किमपि किमपि-

दिनोंकी याद करती हो ? अथवा वहां स्वादु जलवाली गोदावरीकी याद करती हो ? और गोदावरीके किनारोंमें हम दोनोंके रहनेकी याद करती हो ? ॥ २६ ॥

और भी—अनुरागके सम्बन्धसे गाल सटाकर कुछ-कुछ धीरे-धीरे क्रमके विना कहते-

१. 'त्ति' इति पुस्तकान्तरे पाठः ।

अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ २७ ॥

लक्ष्मणः—एष पञ्चवट्यां शूर्पणखाविवादः ।

सीता-हा अज्जउत्त! एत्तिअं दे दंसणम् ! (हा आर्यपुत्र! एतावत्ते दर्शनम्!)

अनिर्वचनीयमतिगोपनीयमित्यर्थः, यत्किञ्चिद्वा, मन्दं मन्दम् = अतिसूक्ष्मशब्दं यथा तथा, अन्यैरश्राव्यमित्यर्थः । अक्रमेण = पौर्वापर्याभावेन, जल्पतोः = वदतोः, तथा च अशिथिलपरिरम्भव्यापृतैकैकदोष्णोः = अशिथिलः=दृढः, यः परिरम्भः = आलिङ्गनम्, तस्मिन् व्यापृतः=सक्रियः, एकैको दोः बाहुः ययोस्तौ अशिथिलपरिरम्भव्यापृतैकैकदोषौ, तयोः । 'पद्न्नोमासि'ति सूत्रेण दोःशब्दस्य दोषन्नादेशः, 'भुजबाहू प्रवेष्टो दोः' इत्यमरः, एतादृशयोरावयोः, अविदितगतयामा = अविदिताः = अज्ञाताः, आनन्दानिमग्नत्वेनेति शेषः, गताः = याताः, यामाः = प्रहराः, यस्याः सा, तथाभूता रात्रिरेव = रजन्येव, व्यरंसीत् = विरता । आनन्दाऽनुभूतिपारवश्येन रात्रिरपि अल्पक्षणवत् यातेति भावः । व्यरंसीदित्यत्र विपूर्वात् 'रमु क्रीडायाम्' इति धातोर्लुङ् 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् 'यमरमनमातां सक च' इति सगिटौ । मालिनी वृत्तम् ॥ २७ ॥

लक्ष्मण इति । पञ्चवट्याम् = पञ्चानां वटानां समाहारः पञ्चवटी, तस्यां, 'तद्धितार्थोत्तरपदसमाहारे च' इति समासस्तस्य 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञा, 'द्विगोः' इति ङीप् च । यद्यपि समाहारार्थोऽयं द्विगुः, तेन शास्त्रोक्तविधिना स्थापिताऽश्वत्थादिवृक्षपञ्चकसमूहोऽस्यमर्थः संवृत्तः, परं लक्षणया पञ्चवटयुपलक्षितः स्थानविशेषो लक्ष्यते । शूर्पणखाविवादः = शूर्पाणीव नखा यस्याः सा शूर्पणखा = रावणाऽनुजा काचिद्राक्षसी, 'नखमुखात्संज्ञायाम्' इति ङीषभावः, 'पूर्वपदात्संज्ञायामगः' इति णत्वम्, तया विवादः, अस्माकमिति शेषः ।

सीतेति । एतावत् = एतत्समयपर्यन्तम्, दर्शनं = विलोकनम् । शूर्पणखाविवादस्य किञ्चित्कालानन्तरमेव सीताऽपहरणादित्यर्थः ।

हुए और एक-एक बाहुको गाढ आलिङ्गनमें लगाते हुए हम दोनोंकी, बीते हुए प्रहरोंका भी पता न लगकर रात ही बीत गई ॥ २७ ॥

लक्ष्मण—यह पञ्चवटीमें शूर्पणखासे विवाद है ।

सीता—हा आर्यपुत्र ! यहीं तक आपका दर्शन है ?

रामः—अयि वियोगत्रस्ते ! चित्रमेतत् ।

सीता—जहा तहा होदु । दुज्जणो असुहं उप्पादेइ । (यथा तथा भवतु दुर्जनोऽसुखमुत्पादयति ।)

रामः—हन्त ! वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति ।

लक्ष्मणः—

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-

राम इति । अयीति कोमलामन्त्रणे । वियोगत्रस्ते = मद्विरहभीते ! एतत् = समीपतरवर्ति, चित्रम् = आलेख्यम् । चित्रमपि साक्षादिव पश्यन्त्याः सीताया विस्मृतिनिवारणार्थमिदं रामप्रबोधनं ज्ञेयम् ।

सीतेति । यथा तथा = चित्रगता वास्तविकी वा, भवतु = अस्तु, दुर्जनः = असाधुः, असुखं = दुःखम् , उत्पादयति = जनयति ।

राम इति । हन्त = खेदसूचकमव्ययमेतत् । जनस्थानवृत्तान्तः=दण्डकारण्योदन्तः, सीताहरणरूपः, अतीतोऽपीति शेषः । वर्तमान इव प्रतिभाति = संस्काररूपेण मनस्यवस्थितोऽपि प्रत्यक्षवद्भवतीत्यर्थः ।

अथेदमिति । अथ पापैः रक्षोभिः कनकहरिणच्छद्मविधिना इदं तथा वृत्तं, यथा क्षालितमपि व्यथयति । शून्ये जनस्थाने विकलकरणैः आर्यचरितैः ग्रावा अपि रोदिति, वज्रस्य अपि हृदयं दलति इत्यन्वयः । अथ = शूर्पणखाविवादाऽनन्तरं, 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ ।' इत्यमरः, पापैः = पापाऽऽचारैः, रक्षोभि = राक्षसैः, रावणमारीचादिभिरित्यर्थः, कनकहरिणच्छद्मविधिना = कनकहरिणस्य (सुवर्णमृगस्य) छद्मविधिना (कपटाऽनुष्ठानेन), इदम्=एतत् , चित्रे दृश्यमानं वस्तु, तथा = तादृशं, वृत्तं = निष्पन्नं, यथा = यादृशं, क्षालितमपि = कृतप्रतीकारमपि, व्यथयति = तापयति, स्मरण इति शेषः । शून्ये = सीतारहिते, जनस्थाने=दण्डकारण्ये, विकलकरणैः=विकलानि (स्वस्वव्यापाराऽसमर्थानि) कर-

---

राम—विरहसे डरीहुई हे सीते ! यह चित्र है ।

सीता—जैसा कुछ भी हो । दुर्जन दुःख पैदा करता है ।

राम—हन्त ! जनस्थानका वृत्तान्त मुझे वर्तमान की तरह मालूम हो रहा है ।

लक्ष्मण—उसके बाद पापी राक्षसोंने सोनेके बने हुए मृगकी कपटविधिसे ऐसा किया,

रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ २८ ॥

सीता—(सास्रमात्मगतम् ।) अह्मो, दिणअरकुलाणन्दणो एव्वं वि मह कालणादो किलन्तो आसि (अहो, दिनकरकुलानन्दन एवमपि मम कारणात् क्लान्त आसीत् ।)

लक्ष्मणः—(रामं निर्वर्ण्य साकूतम्) आर्य ! किमेतत् ?

णानि (चक्षुरादीनि इन्द्रियाणि) येषु तानि विकलकरणानि, तैः । 'विकल-करुणै.' इति पाठे-विकलैः = वैकल्ययुर्णैः, करुणैः = शोकोद्दीपकैरित्यर्थः । आर्यचरितै =आर्यस्य (पूज्यस्य, रामस्येत्यर्थः) चरितैः (चरित्रैः) मूर्च्छाप्रभृति-व्यापारैरित्यर्थः, ग्रावा अपि = शिला अपि, 'पाषाणप्रस्तरग्रावोपलाऽश्मानः शिला दृषत् ।' इत्यमरः, रोदिति = अश्रूणि विमुञ्चति, 'रुदिर् अश्रुविमोचने' इति धातोर्लट् 'रुदादिभ्यः सार्वधातुके' इतीट् । वज्रस्य अपि = कुलिशस्यापि, हृदयं = मध्यप्रदेशः, दलति = द्विधा भिन्नं भवति । अत्र 'ग्रावाऽपि रोदिति' 'वज्रस्याऽपि हृदयं दलति' स्यत्र ग्राव्णो रोदनस्य वज्रहृदयस्य दलनस्य असम्बन्धकथनादतिशयोक्तिद्वयस्य मिथोऽनपेक्षया स्थितेः संसृष्टिः । शिखरिणी वृत्तम् , 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।' इति तल्लक्षणम् ॥ २८ ॥

सीतेति । आत्मगतं = स्वगतं, 'सर्वप्राव्यं श्रव्यं स्यादश्रव्यं स्वगतं मतम्' । इति दशरूपकम् । दिनकरकुलानन्दनः = सूर्यवंशहर्षदायकः, एवम् = इत्थम् , अपि, मम = सीतायाः हेतोः, क्लान्तः = ग्लानः, 'किलष्ट' इति पाठे प्राप्त-क्लेश इत्यर्थः, आसीत् = अभूत् ।

लक्ष्मण इति । निर्वर्ण्य = दृष्ट्वा, 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्, इत्यमरः । साकूतं = साभिप्रायम् , रामसान्त्वनाऽभिप्रायसहितमित्यर्थः । आर्य = पूज्य !, एतत् = वक्ष्यमाणम् , किम् = किमस्ति ?

जो कि बदला लेनेपर भी अभी तक दुःख देता है। निर्जन जनस्थानमें नेत्र आदि इन्द्रियोंकी क्रियामें असमर्थ आर्यके चरित्रोंमें पत्थर भी आँसू गिराता है और वज्रका भी हृदय विदीर्ण होता है ॥ २८ ॥

सीता—(आँखोंमें आसू भरकर मन ही मन) अहो ! सूर्यकुलके आनन्दजनक (रामचन्द्र) भी मेरे कारणसे इस तरह क्लान्त हो गये थे ।

लक्ष्मण—(रामचन्द्रको दिलासा देनेके अभिप्रायसे देखकर) आर्य ! यह क्या ?

अयं तावद्बाष्पस्त्रुटित इव मुक्तामणिसरो
विसर्पन्धाराभिर्लुठति धरणीं जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति चिरमाध्मातहृदयः ॥ २९ ॥

रामः—वत्स !

अयमिति । तावत् धाराभिर्विसर्पन् जर्जरकणः अयं बाष्पः त्रुटितः मुक्तामणिसरः इव धरणीं लुठति । चिरमाध्मातहृदयः आवेगः निरुद्धोऽपि स्फुरदधरनासापुटतया परेषाम् उन्नेयो भवति इत्यन्वयः । तावदिति वाक्यारम्भार्थकमव्ययम् । धाराभिः = प्रवाहैः, विसर्पन् = विशेषेण गच्छन्, जर्जरकणः = चूर्णितबिन्दुः, अयं = सन्निकृष्टस्थः, बाष्पः = अश्रु, **'बाष्पौघ'** इति पाठे अश्रुसमूह इत्यर्थः । त्रुटितः = छिन्नः, मुक्तामणिसर इव = मुक्ताहार इव, धरणीं = पृथ्वीं, लुठति = पतति, लुठधातोरकर्मकत्वेऽपि, 'अकर्मकधातुभियोंगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' इति पृथिव्याः कर्मत्वम् । चिरं = बहुकालपर्यन्तम्, आध्मानहृदयः = आपूरितहृदयः, **'भराध्मातहृदय'** इति पाठे-भरेण = अतिशयेन आपूरितहृदय इत्यर्थः । **'विरसाध्मातहृदय'** इति पाठे-विरसेन = दुःखेन आपूरितहृदय इत्यर्थः । आवेगः = दुःखातिशयः, निरुद्धोऽपि = अन्तर्गुप्तोऽपि, स्फुरदधरनासापुटतया=स्फुरच्च तत् अधरनासापुटं, तस्य भावस्तत्ता, तया = किञ्चिचलदोष्ठनासिकत्वेन, परेषाम् = अन्येषाम्, 'उन्नेय' इति पदेन योगे 'कृत्यानां कर्तरि वा' इति कर्तरि षष्ठी । उन्नेयः = अनुमेयः, भवति, वेगरोधाद् बहिर्दृश्यमानपरिदेवनाऽभावेऽपि नासिकाऽधरस्फुरणेन हृदयस्थो दुःखातिशयोऽनुमीयत इति भावः । अत्रोपमालङ्कारः । पश्चार्द्धे चानुमानालंकारस्तथा च द्वयोरङ्गाङ्गिभावेन सङ्करः । **शिखरिणी** वृत्तम् ॥ २९ ॥

प्रवाहोंसे फैलता हुआ और चूर्ण-चूर्ण बिन्दुओंसे युक्त यह आपका आँसू, टूटीहुई मोतियोंकी मालाकी तरह जमीनपर गिरता है । बहुत कालतक हृदयको पूर्ण करनेवाला अतिशयित यह दुःख रोके जानेपर भी होंठ और नाकका स्फुरण होनेसे दूसरोंसे अनुमेय होता है ॥ २९ ॥

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः ।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां तनोति ॥ २० ॥

सीता—हद्धी हद्धी ! अहं वि अदिभूमिं गदेण रणरणएण अज्जउत्त-सुण्णं विअ अत्ताण पेक्खामि । (हा धिक् हा धिक् ; अहमप्यतिभूमिं गतेन रणरणकेनार्यपुत्रशून्यमिवात्मानं पश्यामि ।)

तत्कालमिति । प्रियजनविप्रयोगजन्मा तीव्रोऽपि प्रतिकृतिवाञ्छया तत्कालं विसोढः दुःखाग्निः पुनर्मनसि विपच्यमानः (सन्) हृन्मर्मव्रण इव वेदनां तनोति इत्यन्वयः । प्रियजनविप्रयोगजन्मा=प्रियजनस्य (अभीष्टजनस्य, सीताया इति भावः) विप्रयोगः (विरहः) तस्माज्जन्म यस्य सः=सीताविरहोत्पन्न इत्यर्थः । अत्र 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद' इति काव्यालंकारसूत्राऽनुशासनात् व्यधिकरण-बहुव्रीहिः, तीव्रोऽपि = अतिदुःसहोऽपि, प्रतिकृतिवाञ्छया=सीताहरणकर्तुः रावणस्य वधेच्छयेत्यर्थः । तत्कालम्=स चाऽसौ कालस्तत्कालस्तं, 'कालाऽध्वनोरत्यन्तसंयोगे' इति द्वितीया, तस्मिन् काले इत्यर्थः । विसोढः = मर्षितः, दुःखाग्निः = शोकाऽनलः पुनः = भूयोऽपि, चित्रदर्शन इति शेषः, मनसि = चित्ते, विपच्यमानः = स्वयमेव परि-पाकमाश्रितेत्यर्थः, कर्मणः कर्तृत्वविवक्षया 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यातिदे-शिकयगात्मनेपदत्वम् । हृन्मर्मव्रण इव = वक्षोमर्मस्फोटक इव, वेदनां = यातनां, तनोति = विस्तारयति, 'करोति' इति पाठे = विदधातीत्यर्थः । उपमालङ्कारः । प्रहर्षिणी वृत्तं, 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्' इति तल्लक्षणम् ॥ २० ॥

सीतेति । हद्धी हद्धी = 'प्राकृते हा धिगित्यर्थे हद्धी वीप्सापदान्वितम्' । इति सागरः । अतिभूमिं गतेन=परां काष्ठामारूढेन, रणरणकेन=औत्सुक्येन, रण्यते=शब्द्यते अत्र रणो घञ्, द्वित्वानन्तरं संज्ञायां कन् । 'औत्सुक्ये रणरणकः स्मृतः' इति हला-युधः । आर्यपुत्रशून्यमिव=भवद्रहितमिव, आत्मानम्=स्वम्, पश्यामि=अवलोकयामि ।

प्रियजन (सीता) के विरहसे उत्पन्न, दुःसह होनेपर भी बदला लेनेकी इच्छासे उस समय सहा गया दुःखानल फिर भी मनमें परिपक्व होता हुआ हृदयके मर्मस्थलके फोड़ेकी तरह दुःख देता है ॥ २० ॥

सीता—हा ! धिक् !! हा धिक् !!! मैं भी बहुतही बढ़ी हुई उत्कण्ठासे अपनेको आर्यपुत्रसे रहित-सी देख रही हूँ ।

लक्ष्मणः—(स्वगतम् ।) भवतु, आक्षिपामि । (चित्रं विलोक्य प्रकाशम् ।) अथैतन्मन्वन्तरपुराणस्य तत्रभवतस्तातजटायुषश्चरित्रविक्रमोदाहरणम् ।

सीता—हा ताद ! णिव्वूढो दे अवच्चसिणेहो ! (हा तात ! निर्व्यूढस्तेऽपत्यस्नेहः ।)

रामः—हा तात काश्यप शकुन्तराज ! क नु खलु पुनस्त्वादृशस्य महत-

लक्ष्मण इति । स्वगतम् = आत्मगतम् , भवतु=अस्तु, आक्षिपामि=अन्यतो मनः प्रेरयामि, रावणमारीचच्छलसंस्मृत्या सीतारामयोरतीतविरहाऽनैरुद्दीपत्वादिति भावः । चित्रम्=आलेख्यम् , विलोक्य=दृष्ट्वा, प्रकाशम् = श्रव्यम् । अथ = अनन्तरम् , पदमिदं चित्रान्तरदर्शनारम्भद्योतकमव्ययम् । एतत् = समीपतरवर्ति । मन्वन्तरपुराणस्य=अन्यो मनुः मन्वन्तरं, 'मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः' इत्यमरः, 'मयूरव्यंसकादयश्च' इति समासः, मन्वन्तरादपि पुराणस्तस्य । मन्वन्तरादपि प्राचीनतरस्येत्यर्थः, 'पञ्चमी विभक्ते' इति पञ्चमी, 'पञ्चमी भयेन' इत्यत्र 'पञ्चमी'ति योगविभागात्समासः । तत्रभवतः = पूज्यस्य, पितृमित्रत्वादियमुक्तिः । गृध्रराजस्य = दाक्षाय्याऽधिपतेः, तातजटायुषः = तातसुहृत् जटायुस्तातजटायुस्तस्य = पितृमित्रस्य जटायुष इत्यर्थः, 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्' इति मध्यमपदलोपी समासः । चरित्रविक्रमोदाहरणं = वृत्तपराक्रमनिदर्शनं, तत्र चरित्रं = सच्चरित्रं, सीतारक्षणप्रयासरूपमित्यर्थः, विक्रमः = रावणरथभङ्गादिरूपः पराक्रम इत्यर्थः ।

सीतेति । ते = तव, अपत्यस्नेहः = सन्तानवात्सल्यम् । निर्व्यूढः=सम्पन्नः, मद्रक्षणार्थं प्राणव्ययादिति भावः ।

राम इति । 'हा' इति शोके, तात=पितः ! काश्यप = हे कश्यपपौत्र । अयं हि जटायुः कश्यपस्य विनतारूयायां पत्न्यामुत्पन्नस्य अरुणस्य कनीयान् पुत्रः संपातेरनुजश्चेति बोध्यम् । शकुन्तराज = पक्ष्यधीश, त्वादृशस्य = त्वत्सदृशस्य,

लक्ष्मण—(मन ही मन) अच्छा । दूसरी ओर इनका मन खींचता हूँ । (चित्र देखकर प्रकाश भावसे) अब यह मन्वन्तरसे भी प्राचीनतर, माननीय और पिताजीके मित्र जटायुके चरित्र और पराक्रमका उदाहरण है ।

सीता—हा पिताजी ! आपका सन्तानस्नेह सम्पन्न हुआ ।

राम—हा पिताजी ! कश्यपपौत्र ! पक्षिराज ! आपके सदृश महान् , सत्पात्र और परो-

स्तीर्थभूतस्य साधोः संभवः ?

लक्ष्मणः—अयमसौ जनस्थानस्य पश्चिमतः कुञ्जवान्नाम पर्वतो दनुकबन्धाधिष्ठितो दण्डकारण्यभागः । तदिदमृष्यमूक[1]परिसरे मतङ्गाश्रमपदम् । तत्र श्रमणा नाम सिद्धा शबरतापसी । तदेतत्पम्पाभिधानं पद्मसरः ।

सीता—जत्थ किल अज्जउत्तेण विच्छिड्डामरिसधीरत्तणं पमुक्ककण्ठं परुण्णं आसि । (यत्र किलार्यपुत्रेण विच्छिन्नामर्षधीरत्वं प्रमुक्तकण्ठं प्ररुदितमासीत् ।)

तीर्थभूतस्य = सत्पात्रभूतस्य, साधोः = साध्नोति परकार्याणि इति साधुस्तस्य=परोपकारशीलस्येत्यर्थः । सम्भव=उत्पत्तिः, न क्वाऽपीत्यर्थः । नाऽन्यः कोऽपि स्वप्राणव्ययेनाऽपि परार्थे प्रति यतेतेति भावः ।

लक्ष्मण इति । जनस्थानस्य = एतन्नामकदण्डकारण्यैकदेशस्य, पश्चिमतः = प्रत्यक्तः, कुञ्जवान् नाम पर्वतः = 'कुञ्जवान्' इति नाम्ना प्रसिद्धः शैलः, **'चित्रकुञ्जवान्'** इति पुस्तकान्तरस्थः पाठः । दनुकबन्धाऽधिष्ठितः = दनुकबन्धेन (दनुनामकेन शिरोरहितेन केनचिद्राक्षसेन) अधिष्ठितः (अध्युषितः), 'कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम्' इत्यमरः । दण्डकारण्यभागः = दण्डकारण्यस्य, भाग = (अंशः, एकदेश इत्यर्थः), अमुष्य = कुञ्जवतः पर्वतस्य, परिसरे = पर्यन्तभुवि, 'पर्यन्तभूः परिसरः' इत्यमरः, **'ऋष्यमूकपर्वते'** इति पाठे ऋष्यमूकाख्ये शैल इत्यर्थः । मतङ्गाश्रमपदं=मतङ्गस्य=(मतङ्गनाम्नः कस्यचिन्मुने) आश्रमपदं (तपःस्थानम्), सिद्धा = तपःसिद्धा, शबरतापसी = शबरजातीया काचन तपस्विनी, पम्पाऽभिधानं = पम्पा अभिधानं यस्य तत्, पम्पाख्यम्, पद्मसरः = पद्मप्रचुरं सरः = कासारः, अस्तीति शेषः ।

सीतेति । यत्र = पम्पासरसि, विच्छिन्नाऽमर्षधीरत्वम् = अमर्षश्च धीरत्वं च अमर्षधीरत्वे, तत्र अमर्षो रावणविषयः क्रोधः, धीरत्वं धैर्यम्, विच्छिन्ने अमर्षधीरत्वे यस्मिन्कर्मणि तद्यथा तथेति क्रियाविशेषणम्, नष्टक्रोधधैर्यं यथा तथेत्यर्थः,

---

पकारीकी फिर कहाँ उत्पत्ति सम्भव है ?

लक्ष्मण—जनस्थानके पश्चिममें दनुनामक कबन्धसे निवास कियागया दण्डकारण्यका एक भाग यह कुञ्जवान् नामका पर्वत है । इसकी पर्यन्तभूमिमें मतङ्ग ऋषिका आश्रमस्थान है । वहाँपर श्रमणा नामकी सिद्ध शबरतपस्विनी है और यह वही पम्पा नामका कमलोंसे भरा हुआ तालाब है ।

सीता—जहाँपर आर्यपुत्र क्रोध और धैर्यको छोडकर पुक्का फाड़कर रोये थे ।

---

१. 'ऋष्यमूकपर्वते' इति पुस्तकान्तरपाठः ।

रामः—देवि ! परं रमणीयमेतत्सरः ।
एतस्मिन्मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भःपरिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो मया विभागाः ॥ ३१ ॥

'विसज्जिदामरिसधीरत्तणम्' इति पाठे 'विसृष्टाऽमर्षधीरत्वम्' इति संस्कृतच्छाया, तत्र त्यक्तक्रोधधैर्यमित्यर्थः । 'विच्छड्डिदामरिसाधीणम्' इति पाठे 'विच्छर्दिताऽमर्षाऽधीनम्' इति संस्कृतच्छाया, अस्य प्रदीप्ताऽमर्षिणुताऽधीनम्' इत्यर्थः । प्रमुक्तकण्ठं = प्रमुक्तः (प्रकर्षेण त्यक्तः) कण्ठः (कण्ठस्वरः, लक्षणयाऽयमर्थः) यस्मिन् कर्मणि तद्यथा तथा ।

राम इति । एतत् = इद, परम् = अत्यन्तम् , रमणीयम् = मनोहरम् , सरः = पम्पाख्यकासार इत्यर्थः ।

एतस्मिन्निति । एतस्मिन् मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः कुवलयिनो विभागा मया बाष्पाम्भःपरिपतनोद्गमान्तराले संदृष्टा इत्यन्वयः । एतस्मिन् = पम्पासरसि, मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः=मदेन कलः = स्फुटमधुरशब्दः, येषां ते मदकलास्तादृशा ये मल्लिकाक्षाः = मलिनैश्चञ्चुचरणैर्युक्ता हंसविशेषाः, तेषां पक्षैः = पतत्रैः, व्याधूतानि = कम्पितानि, स्फुरन्ति= शोभमानानि, उरुदण्डानि = बृहन्नालानि, पुण्डरीकाणि = श्वेतकमलानि, येषु ते । तथैव कुवलयिनः = उत्पलयुक्ताः, विभागाः = पम्पासरःप्रदेशाः, मया = रामचन्द्रेण, 'भुव' इति पाठे 'भुवो विभागाः' इत्यन्वयः कार्यः । बाष्पाम्भःपरिपतनोद्गमाऽन्तराले = बाष्पाऽम्भसाम् = अश्रुजलानाम् , परिपतनं=क्षरणम् , उद्गमश्च = नेत्रयोर्मध्ये प्रादुर्भावश्च, तयोरन्तरालं = मध्यकालः, तस्मिन् । संदृष्टाः = विलोकिताः । अश्रुपाताऽऽविर्भावयोर्नेत्रपिधानाद्दर्शनाऽभाव , अतस्तन्मध्यकाले = प्रतिबन्धाऽभावात् त्वद्विरहाऽनुभूतावपि तादृशा रमणीयाः पम्पासरःप्रदेशा मया विलोकिताः, एतेन विरहदुःखवृद्धिर्गम्यते । **प्रहर्षिणी** वृत्तम् ॥ ३१ ॥

राम—देवि ! यह पम्पा सरोवर बहुत सुन्दर है ।

यहाँ पर मदसे मधुर शब्दवाले मल्लिकाक्ष नामक हंसविशेषोंके पंखोंसे कम्पित और शोभित बडे नालदण्डोंवाले श्वेतकमलोंसे युक्त पम्पासरोवरके प्रदेशोंको मैंने आँसुओंके गिरने और निकलनेके मध्य समयमें देखा ॥ ३१ ॥

१. 'भुवः' इति पाठान्तरम् ।

लक्ष्मणः—अयमार्यो हनूमान् !

सीता—एसो सो चिरणिव्वूढजीवलोअपच्चुद्धरणगुरुओवआरी महाणुभावो मारुदी। (एष स चिरनिर्व्यूढजीवलोकप्रत्युद्धरणगुरूपकारी महानुभावो मारुतिः)

रामः—

दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धनः ।
यस्य वीर्येण कृतिनो वयं च भुवनानि च ॥ ३२ ॥

लक्ष्मण इति । अयं = पुरो दृश्यमानः, आर्यः = पूज्यः, हनूमान = प्रशस्तौ हनू अस्य स्त इति प्रशंसायां मतुप्, प्राशस्त्यं च दृढत्वेन बोध्यम् । 'शरादीनां च' इति संज्ञायां दीर्घत्वम्, '**हनुमान्**' इति ह्रस्वपाठे विशेषणत्वेनाऽसंज्ञायां दीर्घाभावः ।

सीतेति । चिरनिर्व्यूढजीवलोकप्रत्युद्धरणगुरूपकारी = चिरात् निर्व्यूढं = निष्पादितम्, यत् जीवलोकस्य = मनुष्यलोकस्य, प्रत्युद्धरणं = दुःखाऽपनयनम्, तेन गुरुः = गौरवविशिष्टः श्रेष्ठो वा, स चाऽसौ उपकारी = उपकारशीलः । '**चिरणिव्विण्ण०**'इति पाठे '**चिरनिर्विण्ण०**'इति संस्कृतच्छायाः तस्य चिरनिर्विण्णस्य = बहुकालदुःखितस्य, जीवलोकस्य इति अन्वययोजना कार्या । महाऽनुभावः = महाप्रभावः ।

दिष्ट्येति । दिष्ट्या अयं स महाबाहुः अञ्जनाऽऽनन्दवर्द्धनः (अस्ति) यस्य वीर्येण भुवनानि वयं च कृतिनः इत्यन्वयः । दिष्ट्या=पदमिदमानन्दद्योतकमव्ययम्, 'दिष्ट्या समुपजोषं चेत्यानन्दे' इत्यमरः । अयं = सन्निकृष्टस्थः, सः, महाबाहुः = दीर्घभुजः, आजानुबाहुरित्यर्थः । अञ्जनानन्दवर्द्धनः = अञ्जनाऽऽख्यायाः स्वमातुर्हर्षोत्पादको हनूमदभिधः इत्यर्थः, अस्तीति शेषः । यस्य = हनूमतः, वीर्येण = पराक्रमेण, भुवनानि च = लोकाश्च, लक्षणया अन्ये जनाश्चेत्यर्थः । वयं च = रामादयश्च, कृतिनः = कृतार्थाः, स्म इति शेषः, सीतोद्धरणेन लोककण्टकरावणवधेन चेति भावः ॥ ३२ ॥

लक्ष्मण—ये पूजनीय हनुमान्जी हैं ।

सीता—ये बहुत कालसे किये गये जीवलोकके प्रत्युद्धारसे गौरवयुक्त, उपकारी और महान् प्रभाववाले वायुपुत्र हनुमान्जी हैं ।

राम—भाग्यसे ये वे महाबाहु, अञ्जनीके आनन्दको बढानेवाले हनूमान्जी हैं; जिनके पराक्रमसे लोक और हमलोग कृतार्थ हो गये हैं ॥ ३२ ॥

सीता—वच्छ ! एसो सो कुसुमिदकदम्बताण्डविअबरिहिणो किंणाम-हेओ गिरी ? जत्थ अणुभावसोहग्गमेत्तपरिसेससुन्दरसिरी मुच्छन्दो तुए परुण्णेण ओलम्बिओ तरुअले अज्जउत्तो आलिहिदो । (वत्स ! एष स कुसुमितकदम्बताण्डवितबर्हिणः किन्नामधेयो गिरिः ? यत्रानुभावसौभाग्यमात्रपरिशेषसुन्दरश्रीर्मूर्च्छंस्त्वया प्ररुदितेनावलम्बितस्तरुतल आर्यपुत्र आलिखितः ।

लक्ष्मणः—

सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम यस्मि-
न्नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।

सीतेति । कुसुमितकदम्बताण्डवितबर्हिणः = कुसुमानि सञ्जातानि येषां ते कुसुमिताः = सञ्जातपुष्पा इत्यर्थः, 'तदस्य सञ्जातं तारकादिभ्य इतच्' इतीतच् प्रत्ययः । ताण्डवानि सञ्जातानि येषां ते ताण्डविताः = ताण्डवनृत्ययुक्ता इत्यर्थः, पूर्ववत् इतच्प्रत्ययः । कुसुमिता ये कदम्बाः = तन्नामधेयास्तरवस्तेषु ताण्डविताः, बर्हिणाः = मयूराः यस्मिन् सः, 'मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक् ।' इत्यमरः । अनुभावसौभाग्यमात्रपरिशेषसुन्दरश्रीः = अनुभावस्य = प्रभावस्य, यत्सौभाग्यं = सुभगत्वं, तन्मात्रेण परिशेषा = अवशिष्टा, सुन्दरी = मनोहरा, श्रीः = शोभा, यस्य सः । 'सुन्दरश्रीः' इति स्थाने 'धूसरश्रीः' इति पुस्तकान्तरपाठस्तत्र धूसरा = ईषत्पाण्डुरेत्यर्थः । मूर्च्छन् = कञ्चित्कालं मूर्च्छां प्राप्नुवन्नित्यर्थः । प्ररुदितेन=रोदनं रुदितं, 'नपुंसके भावे क्तः' इति क्तप्रत्ययः । प्रकृष्टं रुदितं यस्य तेन=अश्रु विमुञ्चतेत्यर्थः, त्वया भवता लक्ष्मणेनेत्यन्वयः । अवलम्बितः=धृतः, आर्यपुत्रः = रामचन्द्रः, तरुतले = वृक्षस्याधोभागे, आलिखितः = चित्रितः ।

सोयऽमिति । अयं स ककुभसुरभिः माल्यवान्नाम शैलः (अस्ति) यस्मिन् नीलः स्निग्धः नूतनः तोयवाहः शिखरं श्रयति । आर्येण अस्मिन्—इत्यन्वयः । अयं = पुरो दृश्यमानः, सः=प्रसिद्धः, ककुभसुरभिः=ककुभानां विकाराः ककुमानि= अर्जुनपुष्पाणि, 'तस्य विकारः' इत्यण् 'पुष्पमूलेषु बहुलम्' इति तस्य लुप् च, 'इन्द्रद्रुः ककुभोऽर्जुनः' इत्यमरः । तैः ककुभैः, सुरभिः = घ्राणतर्पणगन्धयुक्तः,

सीता—वत्स ! खिले हुए कदम्ब वृक्षोंमें तांडव नृत्य करनेवाले मयूरोंसे युक्त इस पर्वतका क्या नाम है ? जहांपर पेड़के नीचे बहुत रोतेहुए आपसे सँभाले गये, प्रभावके सौभाग्यमात्रसे अवशिष्ट सुन्दर शोभासे युक्त और मूर्च्छित होतेहुए आर्यपुत्र चित्रित हुए हैं ।

आर्येणास्मिन् ....

रामः—

.........—विरम विरमातः परं न क्षमोऽस्मि
प्रत्यावृत्तः स पुनरिव मे जानकीविप्रयोगः ॥ ३३ ॥

लक्ष्मणः—अतः परमार्यस्य तत्रभवतां 'राक्षसानां चापरिसङ्ख्यान्यु-

नीलः = श्यामः, स्निग्धः = चिक्कणः, नूतनः = नवीनः, तोयवाहः = मेघः, शिखरं = शृङ्गं, श्रयति = आश्रयति । आर्येण=पूज्येन, अस्मिन् = पर्वते । लक्ष्मणेन इत्युक्ते रामस्तमाक्षिप्य कथयति—**विरमेति** ।

विरमेति । विरम विरम । अतः परं क्षमः न अस्मि, मे स जानकीविप्रयोगः पुनः प्रत्यावृत्त इव इत्यन्वयः । विरम विरम = विरामं कुरु विरामं कुरु, वाग्व्यापारादिति शेषः, तूष्णीं भवेत्यर्थः । **'वत्सैतस्मात्'** इति पाठे—हे वत्स= हे तात ! एतस्मात् = माल्यवच्चित्रदर्शनात् , 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति पञ्चमी, विरमेत्यन्वयः । किमर्थमित्याकाङ्क्षायामाह—**अत इति** ! अतः परम् = अस्मादधिकं, द्रष्टुमिति शेषः । क्षमः=समर्थः, न अस्मि=न भवामि, सः = पूर्वाऽनुभूतः, मे = मम, जानकीविप्रयोगः=सीतावियोगः, पुनः = भूयः, प्रत्यावृत्तः = आगत इव । इदं रामवाक्यं भाव्यर्थसूचकम् । अत्र 'प्रत्यावृत्त इव' इति कथनात् **क्रियोत्प्रेक्षालङ्कारः** । **मन्दाक्रान्ता** वृत्तम् । 'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्' इति तल्लक्षणम् ॥ ३३ ॥

लक्ष्मण इति । अतः परम् = अस्मादनन्तरम् । आर्यस्य = भवतः, तत्र = लंकादौ, भवतां = विद्यमानानाम् । अपरिसंख्यानि = अविद्यमाना परिसंख्या=परिमिता संख्या येषां तानि = अपरिमितसंख्यानीत्यर्थः, **'असंख्यातानि'** इति पाठे अगणितानीत्यर्थः । उत्तरोत्तराणि = उत्तरेभ्य उत्तराणि = उत्तरोतराणि, परंपरं

लक्ष्मण—यह वही अर्जुन-पुष्पोंसे खशबूदार माल्यवान् नामका पर्वत है, जहाँपर नीला चिकना और नया मेघ चोटीपर आश्रय लेता है । आर्यने यहाँ—

राम—चुप रहो, चुप रहो । इसके बाद देखनेको समर्थ नहीं हूँ । सीताजीका वही विरह फिर लौट गया-सा मुझे लग रहा है ॥ ३३ ॥

लक्ष्मण—इसके अनन्तर आर्यके और लङ्का में रहते हुए राक्षसोंके अनगिनत और

१. 'कपि' इत्यधिकः पाठोऽन्यपुस्तकेषु ।

त्तरोत्तराणि कर्माश्चर्याणि । परिश्रान्ता चेयमार्या । तद्विज्ञापयामि 'विश्रा-म्यतामि'ति ।

सीता—अज्जउत्त ! एदिणा चित्तदंसणेण पच्चुप्पण्णदोहलाए मए विण्णावणिज्जं अत्थि । (आर्यपुत्र ! एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया मम विज्ञापनीयमस्ति ।)

रामः—नन्वाज्ञापय ।

सीता—जाणे पुणोवि पसण्णगम्भीरासु वणराईसु विहरिअ पवित्त-णिम्मलसिसिरसलिलं भअवदिं भाईरहिं ओगाहिस्सं त्ति । (जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहृत्य पवित्रनिर्मलशिशिरसलिलां भगवतीं भागीरथी-मवगाहिष्य इति ।)

प्रकृष्टानीत्यर्थः । कर्माश्चर्याणि = कर्मभिः = क्रियाभिः, आश्चर्याणि = आश्चर्योत्पाद-कानि, वृत्तानीति विशेष्यमध्याहार्यम् । परिश्रान्ता = जातपरिश्रमा, विश्राम्यतां = विश्रामः क्रियताम् , आर्ययेति शेषः ।

सीतेति । आर्यपुत्र = प्राणनाथ !, एतेन = पुरो दृश्यमानेनानेन, चित्रदर्श-नेन = आलेख्यावलोकनेन, प्रत्युत्पन्नदोहदायाः = प्रत्युत्पन्नः = संजातः, दोहदः= गर्भिणीमनोरथः, यस्यास्तस्याः । विज्ञापनीयं = विज्ञाप्यं, निवेदनीयमित्यर्थः ।

राम इति । ननु = अनुनयार्थकमव्ययमिदम् , आज्ञापय = आदिश, सह-धर्मिण्याः सत्यास्तत्रापि गर्भवत्याः सीताया दोहदपूरणं रामस्य कर्तव्यं, तदुपरि अरुन्धत्या मातृणां शान्तायाश्च 'यः कश्चिद्गर्भदोहदोदयः (पृ० २०)' इति वा-क्याच्च साऽतिशयं सीतावाक्यस्य प्रभुसम्मितत्वेन 'आज्ञापयेति' कथनं सङ्गच्छते ।

सीतेति । जाने = विचारयामि । प्रसन्नगम्भीरासु = प्रसन्नाः—प्रसादयुक्ताः, श्वापदराहित्येनेति भावः, गम्भीराः = लतापादपादिभिर्गहनाः, अधर्षणीया इत्यर्थः, तासु एतादृशीषु वनराजिषु = अरण्यपङ्क्तिषु विहृत्य = विहारं कृत्वा,

---

अत्युत्कृष्ट कामोंसे आश्चर्योत्पादक चरित्र हैं । ये आर्या भी थक गई हैं, इसलिए निवेदन करता हूँ कि—'विश्राम करें' ।

सीता—आर्यपुत्र ! इस चित्रदर्शनसे मुझे लालसा उत्पन्न हुई है, अतः कुछ निवेदन करना है ।

राम—देवि ! आज्ञा दो ।

सीता—फिर भी प्रसन्न और गम्भीर वनपङ्क्तियोंमें विहार करके पवित्र, निर्मल और ठण्डे जलसे युक्त गङ्गाजीमें स्नान करनेका विचार करती हूं ।

रामः—वत्स लक्ष्मण !

लक्ष्मणः— एषोऽस्मि ।

रामः—वत्स ! अचिरादेव संपादनीयो दौहृद इति संप्रत्येव गुरुभिः संदिष्टम् । तदस्खलितसंपातं रथमुपस्थापय ।

सीता—अज्जउत्त ! तुह्मेहिं वि आअन्दव्वम् । (आर्यपुत्र ! युष्माभिरप्यागन्तव्यम् ।

रामः—अतिकठिनहृदये ! एतदपि वक्तव्यम् ?

'**विहरिष्यामि**' इतिपाठे विहारं करिष्यामीत्यर्थः । पवित्रनिर्मलशिशिरसलिलां = पवित्रं = पूतं, स्नानादियोग्यमित्यर्थः, निर्मलं स्वच्छम् , '**सौम्यम्**' इति पाठे प्रवेशयोग्यमित्यर्थः, शिशिरं = शीतलम् , सलिलं = जलम् , यस्यास्ताम् , '**अवगाहाम्**' इति पाठे पूर्वोक्तानि सर्वाणि विशेषणानि पुंल्लिङ्गानि, अवगाहः = स्नानं यस्यां ताम् इति विग्रहोऽर्थश्च, भागीरथीं=गङ्गाम् , अवगाहिष्ये = अवगाहनं करिष्यामि, स्नास्यामीत्यर्थः, निकटभविष्यत्काल एवेति शेषः । वाक्यमेतत्सीताया भाविनिर्वासनव्यञ्जकमित्यवधेयम् ।

लक्ष्मण इति । एषोऽस्मि = अयमस्मि, भवदाज्ञापालनाऽर्थं समीपतरमेव विद्यमानोऽस्मीति वाक्याऽर्थः ।

राम इति । वत्स = प्रिय लक्ष्मण !, अचिरादेव = शीघ्रमेव, सम्पादनीयः = पूरणीयः, दौहृदः=सीताया अभिलाषः, इति = अनेन प्रकारेण, सम्प्रत्येव = इदानीमेव, गुरुभिः = गुरुजनैः, अरुन्धतीप्रभृतिभिः पूज्यजनैरित्यर्थः । सन्दिष्टं=सन्देशः प्रहितः । तत् = तस्माद्धेतोः, अस्खलितसम्पातम् = अस्खलितः=भ्रंशरहितः अव्याहत इत्यर्थः, सम्पातः = गमनं यस्य तम् । रथं = स्यन्दनम् , उपस्थापय=आनय ।

सीतेति । युष्माभिरपि = भवद्भिरपि, आगन्तव्यम् = आयातव्यम् ।

राम इति । अतिकठिनहृदये = अति = अत्यन्तं, कठिनं = कठोरम् , हृदयं=

राम—वत्स लक्ष्मण !

लक्ष्मण—मैं उपस्थित हूं ।

राम—वत्स ! 'गर्भिणीका अभिलाष जल्दी ही पूर्ण करना चाहिए' ऐसा अभी गुरुजनोंने सन्देश दिया है । इस कारणसे विना रुकावटके चलनेवाला रथ तैयार करो ।

सीता—आर्यपुत्र ! आपको भी आना चाहिए ।

राम—हे अतिशय कठोर हृदयवाली ! यह भी कहना चाहिए ?

सीता—तेण हि पिअं मे । (तेन हि प्रियं मे ।)

लक्ष्मणः—यदाज्ञापयत्यार्यः । (निष्क्रान्तः ।)

राम—प्रिये ! वातायनोपकण्ठे संविष्टा भव ।

सीता—एव्वं होदु । ओहरिदह्मि परिस्समणिद्दाए । (एवं भवतु अपहृतास्मि परिश्रमनिद्रया)

रामः—तेन हि निरन्तरमवलम्बस्व मामत्र शयनाय ।

जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम् ।

चित्तम् , यस्यास्तत्सम्बुद्धौ । एतदपि=मम तत्र गमनमपि, वक्तव्यं = न वक्तव्यमित्यर्थः । त्वयाऽकथितेऽपि एतद्बुद्धिष्यत्येवेति भाव. ।

राम इति । वातायनोपकण्ठे = गवाक्षनिकटे, **'वातायनावर्तके'** इति पुस्तकान्तरपाठे वातायनस्य आवर्तक = अपवारक', यत्रस्थो जनोऽन्यैर्न दृश्यत इति भावः । संविष्टा = कृतसंवेशा, शयानेत्यर्थ' ।

सीतेति । एवं भवतु=वातायनसमीपे शये इति भाव. । परिश्रमनिद्रया=परिश्रमेण = बहुकालं यावत चित्रदर्शनोत्पन्नायासेन, निद्रया = स्वापेन, अपहृतास्मि = आकृष्टाऽस्मि ।

राम इति । तेन = निद्राऽपहरणेन हेतुना, अत्र=वातायनसमीपे, शयनाय = स्वापाय निरन्तरं = निरवकाश, गाढमित्यर्थ', क्रियाविशेषणमेतत् । अवलम्बस्व = धारय, मा = रामम् ।

जीवयन्निति । ससाध्वसश्रमस्वेदबिन्दुः (अत एव) ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः जीवयन्निव बाहुः अधिकण्ठम् अर्प्यताम् इत्यन्वयः । ससाध्वसश्रमस्वेदबिन्दु = साध्वसं=चित्रे परशुरामादिदर्शनजनितं भयम् , श्रमः = बहुकालपर्यन्तं चित्रदर्शनेनोत्पन्नः आयासः, ताभ्यां ये स्वेदबिन्दवः = घर्मपृषन्ति,

---

सीता—तव मुझे प्रीतिकर है ।

लक्ष्मण—आर्य की जैसी आज्ञा (यह कहकर जाते हैं) ।

राम—प्रिये ! खिड़कीके पास सो जाओ ।

सीता—ऐसा ही हो । थकावटकी नींदसे आकृष्ट हो गई हूं ।

राम—इस कारणसे यहाँ सोनेके लिए गाढभावसे मेरा सहारा ले लो ।

भय और परिश्रमके कारण पसीनेकी बूँदोंसे युक्त, चन्द्रमाकी किरणोंके स्पर्शसे पिघलने-

बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥ ३४ ॥
(तथा कारयन्सानन्दम्) प्रिये ! किमेतत् ?
विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा

तैः सहितः । अत एव ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः = इन्दोरिमा ऐन्दवाः = चन्द्रसम्बन्धिनः, ये मयूखाः = किरणाः तैश्चुम्बितः = स्पृष्टः, अत एव स्यन्दी = जलस्रावयुक्तः, चन्द्रकिरणसम्पर्केण चन्द्रकान्तमणिः स्रवतीति लोकप्रसिद्धिः, स चाऽसौ चन्द्रमणिहारः = चन्द्रकान्तमणिमाला, तस्य इव विभ्रमः = विलासः, यस्य सः । जीवयन्निव = जीवनं वितरन्निव, स्थित इति शेषः । एतादृशो बाहुः = स्वभुजः, अधिकण्ठं = कण्ठे, मदीयकण्ठ इत्यर्थः, । कण्ठे इति अधिकण्ठं, विभक्त्यर्थेऽव्ययीभावः । अर्प्यतां = निधीयताम् , त्वयेति शेषः । अत्र **लुप्तोपमायाः** 'जीवयन्निवे' त्यत्र **क्रियोत्प्रेक्षायाश्च सङ्करः । रथोद्धतावृत्तम्**—'रान्नराविह रथोद्धता लगौ' इति तल्लक्षणम् ॥ ३४ ॥

तथेति । तथा कारयन् = सीताभुजं स्वकण्ठे स्थापयन् । किमेतदिति प्रश्नेन अनिश्चयः सूच्यते ।

विनिश्चेतुमिति । (हे सीते !) तव स्पर्शे स्पर्शे परिमूढेन्द्रियगणः विकारः मम चैतन्यं भ्रमयति संमीलयति च; (अत एवायम्) सुखम् इति वा, दुःखम् इति वा, प्रमोहः, निद्रा वा, विषविसर्पः किमु, मदः किमु (इति) विनिश्चेतुं न शक्यः हि इत्यन्वयः । (हे सीते !) तव = भवत्याः, स्पर्शे स्पर्शे = प्रतिस्पर्शं, परिमूढेन्द्रियगणः = परिमूढः = परिमोहं प्राप्तः, स्वस्वव्यापाराऽसमर्थ इत्यर्थः । इन्द्रियगणः = चक्षुरादीन्द्रियसमूहः, येन सः, एतादृशो विकारः = अन्तःस्थिताऽवस्थाविशेषः, मम = रामस्य, चैतन्यं = ज्ञानं, भ्रमयति = तिरोदधाति, भ्रान्तं करोतीत्यर्थः । संमीलयति च=प्रकाशयति च, त्वत्स्पर्शजन्यो विकारः कदाचिन्मदीयं ज्ञानमपहरति कदाचित्तु प्रकाशयति इति भावः । तदेवोपपादयति—(अतः = अस्मात्कारणात्), अयं = विकारः, सुखम् इति वा = अनुकूलवेदनीयं वा, दुःखम् इति

वाली चन्द्रकान्तमणिमालाकी तरह विलासवाले और मुझे जीवित करते हुएकी तरह अपने बाहुको मेरे गलेमें डालो ॥ ३४ ॥

(ऐसा कराते हुए आनन्दके साथ) प्रिये ! यह क्या है ?

तुम्हारे प्रत्येक स्पर्शमें इन्द्रियसमूहको मूढ करनेवाला विकार मेरे ज्ञानको कभी तिरोहित

प्रमोहो निद्रा वा किनु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥ ३५ ॥

सीता—धीरप्पसादा तुह्मेत्ति एत्थ दाणि अच्चरिअम्[1] । (धीरप्रसादा यूयमित्यत्रेदानीमाश्चर्यम् ।)

रामः—

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।

वा = प्रतिकूलवेदनीयं वा, प्रमोहः = प्रकृष्टमूर्च्छा वा, **'प्रबोधः'** इति पाठे जागर इत्यर्थः । निद्रा वा = स्वापो वा, विषविमर्पः किमु=विषस्य—गरलस्य, विसर्पः = प्रसरणम् , किं ? मदः किनु = मादकद्रव्योपयोगजन्यो विकारः किम् ? (इति) विनिश्चेतुं = विनिर्णेतुं, न शक्यः = न शक्यत इत्यर्थः, **'न शक्ये'** इति पाठे अहं समर्थो नाऽस्मीत्यर्थः । हीति निश्चये । मद्विकारोऽयं त्वयापि ज्ञायत इति व्यज्यते । अत्र संशय एव पर्यवसानाद् **शुद्धसन्देहा**ऽलङ्कारः, तल्लक्षणं यथा—'सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः । शुद्धो निश्चयगर्भोऽसौ निश्चयाऽन्त इति त्रिधा ॥' इति । **शिखरिणी** वृत्तम् ॥ ३५ ॥

सीतेति । यूयमिति आदरार्थकं बहुवचनम् , धीरप्रसादाः = स्थिराऽनुग्रहाः, धीरपदस्य विद्वद्वाचकत्वेऽपि अचेतनेन प्रमादेन सह अन्वयाऽनुपपत्तेः लक्षणया स्थिराऽर्थपरकत्वम् । अत्र = एतत्कथने, आश्चर्यं काक्वा प्रश्नो व्यज्यते ? नाऽऽश्चर्यं, प्रियस्य प्रियंवदत्वे न किमप्याश्चर्यमिति भावः ।

म्लानस्येति । हे सरोरुहाक्षि ! एतानि ते सुवचनानि म्लानस्य जीवकुसुमस्य विकासनानि, संतर्पणानि सकलेन्द्रियमोहनानि, कर्णाऽमृतानि मनसश्च रसाय-

---

करता है और कभी प्रकाशित करता है । यह (विकार) सुख है वा दुःख है, मूर्च्छा है वा निद्रा है, विषका प्रसरण है वा मादकद्रव्यके सेवनसे उत्पन्न मद है ? यह निश्चय नहीं किया जा सकता है ॥ ३५ ॥

सीता—आप (मेरे ऊपर) स्थिर अनुग्रह करनेवाले हैं, इस कारण ऐसा कहनेमें क्या आश्चर्य है ।

राम—हे पद्मलोचने ! तुम्हारे ये कोमल वचन मुरझाये हुए जीवनपुष्पको विकसित

---

१. 'इदो दाणींति किमवरम्'इति पाठान्तरम् , तस्य 'इत इदानीं किमपरम्'इतिच्छाया ।

एतानि ते सुवचनानि सरोरुहाक्षि !
कर्णामृतानि मनसश्च रसायनानि ॥ ३६ ॥

सीता—पिअंवद ! एहि । संविसह्म । (प्रियंवद ! एहि । संविशावः ।)

(इति शयनाय समन्ततोऽपि निरूपयति ।)

रामः—अयि ! किमन्वेष्टव्यम् ?

नानि (सन्ति) इत्यन्वयः । हे सरोरुहाक्षि = सरोरुहे इव अक्षिणी यस्याः सा सरोरुहाक्षी, तत्सम्बुद्धौ=हे कमललोचने ! 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति समासान्ते षचि 'षिद्गौरादिभ्यश्च' इति ङीष् । एतानि = अनन्तरोदीरितानि, ते = तव, सुवचनानि = मृदुभाषितानि, म्लानस्य = ग्लानस्य, सांसारिकताप-परम्परया शुष्कस्येति भावः । जीवकुसुमस्य = जीव एव कुसुमं तस्य जीवनपुष्पस्ये-त्यर्थः । विकासनानि = विकासजनकानि, संतर्पणानि = संतृप्तिजनकानि, सकलेन्द्रिय-मोहनानि = सर्वेन्द्रियव्यापाररोधकानि, कर्णाऽमृतानि = श्रोत्रपीयूषाणि, पीयूषवत् कर्णयोस्तृप्तिजनकानीति भावः । मनसश्च = चित्तस्य च, रसायनानि = रसायन-तुल्यानि, रसायनौषधवत् शक्तिवर्द्धकानीत्यर्थः । यद्वा—रसः शृङ्गाररसस्तस्य अयनानि = आश्रयभूतानि, सन्तीति शेषः । अत्र **रूपकाऽलङ्कारः । वसन्त-तिलका** वृत्तम् ॥ ३६ ॥

सीतेति । प्रियंवद—प्रियं वदतीति प्रियंवदस्तत्संबुद्धौ = प्रियभाषणशील ! 'प्रियवशे वदः खच्' इति खच्, 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् । संवि-शावः = स्वपिवः । शयनाय = शयितुं, 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । समन्ततः = सर्वतः, निरूपयति = अन्विष्यति, उपधानमिति शेषः ।

राम इति । किम् अन्वेष्टव्यं = किं गवेषणीयं, न किमपीत्यर्थः, अन्विष्ट-पदार्थस्य इहैव सान्निध्यादिति भावः । **'अपि सन्देष्टव्यम्'** इति पाठे—अपिः प्रश्नाऽर्थकः, कः सन्देशः कर्तव्यः ? 'एहि सविशावः' इति कथनाऽभावेऽपि त्व-

---

करनेवाले, उत्तम प्रकारसे तृप्त करनेवाले, सम्पूर्ण इन्द्रियोंके मोहजनक, कर्णोंमें अमृतस्वरूप और रसायनकी तरह मनकी शक्तिको बढ़ानेवाले हैं ॥ ३६ ॥

सीता—हे प्रिय भाषण करनेवाले ! आइए, शयन करें (ऐसा कहकर सोनेके लिए चारों तरफ देखती हैं)।

राम—सीते ! क्या ढूँढ़ना पड़ता है।

आ विवाहसमयाद् गृहे वने शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥ ३७ ॥

सीता—(निद्रां नाटयन्ती) अत्थि एदम् । अज्जउत्त ! अत्थि एदम् ।
(अस्त्येतत् । आर्यपुत्र ! अस्त्येतत् ।) इति स्वपिति ।

रामः—कथं प्रियवचनैव मे वक्षसि प्रसुप्ता ? । (निर्वर्ण्य । सस्नेहम्)।

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-

दभिप्रायज्ञानेनैव त्वदभीष्टं संपादयामि, किमर्थमुक्तिप्रयास इति भावः ।

आ विवाहेति । आ विवाहसमयात् शैशवे गृहे तदनु पुनर्यौवने वने स्वापहेतुः अन्यया अनुपाश्रितः एष रामबाहुः ते उपधानम् (अस्ति) इत्यन्वयः । आ विवाहसमयात् = उद्वाहकालादारभ्य, 'आङ् मर्यादावचने' इति आङः कर्मप्रवचनीयसंज्ञा, 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । शैशवे = बाल्यावस्थायां, गृहे = भवने, तदनु = तदनन्तरं, पुनः = भूयः, यौवने = तारुण्ये, वने = अरण्ये । स्वापहेतुः = शयनकारणं, शयनोपकरणमित्यर्थः । अन्यया = त्वदितरया स्त्रिया, अनुपाश्रितः = असेवितः, एषः = अयम्, रामबाहुः = रामभुजः, ते = तव, उपधानम् = उपबर्हः, अस्तीति शेषः, 'उपधानं तूपबर्हः' इत्यमरः । **रथोद्धता** वृत्तम् ॥ ३७ ॥

सीतेति । एतत् = भवत्कथनं 'मदीयो बाहुस्त्वदुपधानमि'त्येवंरूपमित्यर्थः, अस्ति = वर्तते, सत्यमिति शेषः । स्वपिति = शेते, रामबाहुमुपधानीकृत्येति शेषः ।

राम इति । प्रियवचनैव = अभीष्टभाषणैव, प्रियं भाषमाणा सत्येवेत्यर्थः ।

इयमिति । इयं गेहे लक्ष्मीः, इयं नयनयोः अमृतवर्तिः, असौ अस्याः स्पर्शः वपुषि बहुलः चन्दनरसः, अयं बाहुः कण्ठे शिशिरमसृणः मौक्तिकसरः, अस्याः किं न प्रेयः ? तु विरहो यदि, परम् असह्यः इत्यन्वयः । इयं = सीता

विवाहके समयसे लेकर बचपनमें घरमें उसके अनन्तर जवानीमें, वनमें शयनका कारण, दूसरी स्त्रीसे अनाश्रित यह रामकी बाहु तुम्हारा तकिया है ॥ ३७ ॥

सीता—(निद्राका अभिनय करती हुई) ऐसा ही है, आर्यपुत्र ! ऐसा ही है ।

(ऐसा कहकर सोतीं हैं) ।

राम—प्रिय वचन बोलने-बोलते ही कैसे मेरी छातीपर सो गई ।

(देखकर, प्रेमके साथ) ।

यह सीता घरमें लक्ष्मी है, यह नेत्रोंमें अमृतशलाका है, इसका यह स्पर्श शरीरमें

रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ ३८ ॥

(प्रविश्य)

प्रतीहारी—देव ! उवट्ठिदो । (देव ! उपस्थितः)

रामः—अयि ! कः ?

गेहे=भवने, लक्ष्मीः = श्रीः, इयं = सीता, नयनयोः = नेत्रयोः, अमृतवर्तिः=अमृतशलाका, असौ = अनुभूतः, अस्याः=सीतायाः, स्पर्शः = आमर्शनं, वपुषि=शरीरे, बहुलः=प्रचुरः, चन्दनरसः=श्रीखण्डद्रवः, चन्दनवत्सन्तापहारक इत्यर्थः । अयम्= समीपस्थ एषः, बाहुः = भुजः, कण्ठे = गले, अर्पित इति शेषः, शिशिरमसृणः = शीतलमृदुलः, मौक्तिकसरः = मुक्ताहारः, सर्वत्र 'अस्ती'ति सम्बन्धः कार्यः । अस्याः=सीतायाः, किं न प्रेयः = किं न प्रियतरम् ? अपि तु सीतासम्बद्धं सर्वमपि प्रियतरमित्यर्थः । 'तु' शब्देन उक्तार्थस्यैकदेशमाक्षिपति—तु = परन्तु, विरहो यदि = वियोगश्चेत् , परम् = अत्यर्थम् , असह्यः = असहनीयः, वियोगं विना सीतासम्बद्धं सर्वमपि वस्तु अभीष्टत्वेन प्रियतरं केवलं वियोगः सोढुमशक्य इति भावः । अत्र प्रथमचरण एकस्याः सीताया अनेकधोल्लेखादुल्लेखाऽलङ्कारः । द्वितीयतृतीयचरणयोश्च **व्यस्तरूपकद्वयं**, तथा च त्रयाणामलङ्काराणां मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **शिखरिणी** वृत्तम् ॥ ३८ ॥

प्रतीहारीति । (प्रविश्य = प्रवेशं कृत्वा) । प्रतीहारी = अन्तःपुरदौवारिकी । उपस्थितः = समायातः । अत्र 'दुर्मुख उपस्थित' इति प्रतीहार्यास्तात्पर्यविषयेऽपि रामोक्तस्य पूर्वश्लोकस्य 'यदि परमसह्यस्तु विरहः' इत्येकदेशस्य विरहस्य सान्निध्यात् समनन्तरभावी सीताविरहो गम्यते ।

प्रचुर चन्दनका रस है और यह बाहु गलेपर शीतल और कोमल मुक्ताहार है। इसकी क्या वस्तु प्रियतर नहीं है ? परन्तु इसका वियोग तो बहुत ही असहनीय है ॥ ३८ ॥

(प्रवेश कर)

प्रतीहारी—महाराज ! उपस्थित है ।

राम—अरी ! कौन उपस्थित है ?

प्रतीहारी—आसण्णपरिआरओ देवस्स दुम्मुहो । (आसन्नपरिचारको देवस्य दुर्मुखः ।)

रामः—(स्वगतम् ।) शुद्धान्तचारी दुर्मुखः, । स मया पौरजानपदेष्वपसर्पः प्रहितः । (प्रकाशम्) आगच्छतु ।

(प्रतीहारी निष्क्रान्ता ।)

(प्रविश्य ।)

दुर्मुखः—(स्वगतम् ।) हा ! कहं दाणि देवीमन्तरेण ईरिसं अचिन्तणिज्ज जणाववादं देव्वस्स कहइस्सं ? अहवा णिओओ क्खु मह मन्दभाअहेअस्स एसो । (हा कथमिदानीं देवीमन्तरेणेदृशमचिन्तनीयं जनापवादं देवस्य

प्रतीहारीति । देवस्य = महाराजस्य, 'राजा भट्टारको देव' इत्यमरः, आसन्नपरिचारकः=परिचरतीति परिचारकः, कर्तरि ण्वुल् । आसन्नः=निकटवर्ती, परिचारकः = सेवकः, दुर्मुखः = दुर्मुखनामकः, अनभीप्सितभाषणात् दुष्टं मुख यस्य स दुर्मुख इति तन्निरुक्तिः ।

राम इति । शुद्धान्तचारी = अन्तःपुरमचरणशीलः, अपसर्पः = गूढचरः, पौरजानपदेषु=पुरि भवाः पौराः । जनपदेषु भवाः जानपदाः । पौराश्च ते जानपदाश्चेति तेषु, अयोध्यापुरीवासिषु अयोध्याप्रदेशवासिषु चेत्यर्थ, 'तत्र भव' इत्यण् । प्रहितः = प्रेरितः, पुर्यां प्रदेशेषु च क्रियमाणा मम स्तुति निन्दा वा ज्ञातुं प्रेषितोऽयमित्यर्थः, **'अपसर्पितुम्'** इति पाठे गुप्तरूपेण परीक्षितुमित्यर्थः ।

दुर्मुख इति । इदानीम् = अधुना, देवी = सीताम् , 'अन्तरेण' इति पदेन योगे 'अन्तरान्तरेण युक्ते' इति द्वितीया । अन्तरेण = मध्ये, सीताविषय इति भावः, 'आऽन्तरेऽन्तरा । अन्तरेण च मध्ये स्युः' इत्यमरः । अचि-

प्रतीहारी—महाराजका समीपवर्ती सेवक दुर्मुख ।

राम—(मन ही मन) दुर्मुख अन्तःपुरमे भी आनेवाला है । उसको मैंने नगरवासी और देशवासीलोगोंमें गुप्तचर बनाकर भेजा था । (प्रकाशभावसे) आजाय ।

(प्रतीहारी जाती है)

(प्रवेश कर)

दुर्मुख—(मन ही मन) हा ! कैसे अभी सीतादेवीके विषयमें ऐसे अचिन्तनीय लोकापवादको महाराजके सामने निवेदन करूँ ? अथवा मुझ हतभाग्यका काम ही ऐसा है ।

* 'सीतादेइए' इति पाठान्तरम् । 'सीता देव्याः' इति छाया ।

कथयिष्यामि ? अथवा नियोगः खलु मम मन्दभागधेयस्यैवः)

सीता—(उत्स्वप्नायते ।) अज्जउत्त ! कहिंसि ? (आर्यपुत्र ! कुत्रासि ?)

रामः—सेयमेव रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्योगं करोति । (सस्नेहमङ्गमस्याः परामृशन् ।)

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।

न्तनीयं=चिन्तयितुमपि अशक्यं, किमुत कथनीयमिति भावः । जनाऽपवादं=लोकाऽपवादम् । मन्दभागधेयस्य = भाग एव भागधेयं, 'वा भागरूपनामभ्यो धेय.' इति स्वाऽर्थे धेयप्रत्ययः, तस्य = अल्पभाग्यस्य, नियोगः=नियुक्तिरधिकार इत्यर्थः ।

सीतेति । उत्स्वप्नायते = उत्थितः स्वप्नो यस्याः सा उत्स्वप्ना, सा इव आचरतीति, स्वप्नदर्शनेन प्रलपतीत्यर्थः । 'कर्तुः क्यङ् सलोपश्च' इति क्यङ् । आर्यपुत्र = स्वामिन् ! कुत्राऽसि = क्व वर्तसे ? ।

राम इति । रणरणकदायिनी = उत्कण्टादायिनी, विरहभावना = मम वियोगचिन्ता, स्वप्नोद्योगं-स्वप्ने=निद्रायाम् , उद्योगम्=वचनादिप्रगल्भम् , जाग्रदवस्थायां कृता चिन्ता स्वप्नेऽपि जनमनुसरत्येवेत्यर्थः । सस्नेहं=प्रेमपूर्वकम् , अस्याः=सीतायाः, अङ्गम् = शरीरम् , परामृशन् = स्पृशन् ।

अद्वैतमिति । यत् सुखदुःखयो अद्वैतं, सर्वाम् अवस्थाम्, अनुगतं, यत्र हृदयस्य विश्रामः, यस्मिन् रसः जरसा अहार्यः, यत् कालेन आवरणाऽत्ययात् परिणते प्रेमसारे स्थितं, तस्य सुमानुषस्य तत् एकं भद्रं कथमपि हि प्राप्यते इत्यन्वयः । यत् = दाम्पत्यं, सुखदुःखयोः, अद्वैतम् = द्वाभ्याम् भेदाभ्याम् , इतं = प्राप्तं, द्वीतं तदेव द्वैतं, स्वार्थेऽण् , अविद्यमानं द्वैतं यस्मिंस्तत् , एकरूपं, दम्पत्योरन्यतरस्य सुखे अन्यतरस्य सुखं तदभावे दुःखमपि तथेति भावः । सर्वासु=सकलासु, अवस्थासु = दशासु, अनुगतम् = अनुयातं, सर्वास्ववस्थासु सम्पद्विपद्रूपासु दाम्पत्यस्य मिथोऽनुसरणं भवतीत्यर्थः । **'अनुगुणम्'** इति पाठे अनुकूलमित्यर्थः । यत्र = यस्मिन् हृदयस्य = मनसः, विश्रामः = विश्रान्तिः, बहुविधसांसारिकव्यवहारभारपरिश्रान्तस्याऽपि चेतसो दाम्पत्य एव श्रमापनोदनं भवतीत्यर्थः ।

सीता—(स्वप्नमें बड़बड़ाती है ।) हे आर्यपुत्र ! आप कहां हैं ?

राम—चित्रदर्शनसे उत्कण्ठा करानेवाली यह वही वियोगचिन्ता सीताके स्वप्नमें भी उद्योग करती है । (स्नेहपूर्वक सीताका अङ्गस्पर्श करते हुए) जो (दाम्पत्य) सुख और

कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥ ३९ ॥

दुर्मुखः—(उपसृत्य) जेदु देव्वो । (जयतु देवः ।)

'विश्राम' इत्यत्र 'भावे' इति सूत्रेण घञ्, 'नोदात्तोपदेशस्य मान्तस्याऽनाचमेः' इति उपधावृद्धिनिषेधेन 'विश्राम' इति अपाणिनीयमिति बहवः । अस एव श्रामः 'प्रज्ञादिभ्यश्च' इति सूत्रेण अण् इति केचित् । यस्मिन् = दाम्पत्ये, स्थित इति शेषः, रसः = प्रीतिः, जरसा = वृद्धत्वेनाऽपि, अहार्यः = हर्तुमशक्यः, किमुत यौवन इत्यर्थः, 'ऋहलोर्ण्यत्' इति ण्यत् । यत् = दाम्पत्यं, कालेन = समयेन, आवरणाऽत्ययात् = विवाहमरणमभिव्याप्य, विवाहादारभ्य मरणपर्यन्तमित्यर्थः, वरणं=स्वीकरणं, विवाह इति यावत्, तच्च अत्ययश्च=मरणं चेति वरणाऽत्ययं समाहारद्वन्द्वः, तदारभ्य तस्मात् । यद्वा आवरणाऽत्ययात्=लज्जाभयाद्यपगमादित्यर्थः । परिणते = परिपक्वे, प्रेमसारे=उत्कृष्टप्रेम्णि, स्थितम् = अवस्थितं, तस्य = पूर्वोक्तस्य, सुमानुषस्य = दाम्पत्यस्य, 'सुमानुषं तु दाम्पत्यम्' इति कोशः । शोभनं मानुषं—मनुष्यत्वम् यस्मिंस्तत् इति विग्रहेण योगरूढोऽयं शब्दः । केचित्तु प्रकरणाऽनुसारेण दाम्पत्ये लभ्ये शोभनो मानुषो येन इति विग्रहेण विशेषणतया योजनीयोऽयं शब्द इति । अपरे तु सुमानुषस्य सौजन्यस्य इत्याहुः, सर्वं चैतत्प्रपञ्चितं वीरराघवव्याख्यायाम् । तत् = प्रसिद्धम्, एकं = मुख्यम् 'एके मुख्याऽन्यकेवलाः' इत्यमरः । भद्रं = कल्याणमविच्छेदरूपमित्यर्थः । कथमपि = सर्वप्रकारेण, प्रार्थ्यते = प्रकर्षेण याच्यते, अभिलष्यते वा 'प्राप्यते' इति पाठे कथमपि = केनाऽपि प्रकारेण; प्राप्यते = आसाद्यते, महता पुण्यप्रकर्षेण दाम्पत्यस्य अविच्छिन्नरूपं कल्याणं प्राप्यते इति भावः । शार्दूलविक्रीडितं वृत्तं—'सूर्याऽश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणम् ॥ ३९ ॥

दुःखमें एकरूप हैं और सभी अवस्थाओंमें अनुगत है, जिसमें हृदयका विश्राम है, जिसमें प्रीति बुढ़ापेसे भी नहीं हट सकती है। जो कि समयसे—विवाहसे लेकर मरणपर्यन्त, परिपक्व और उत्कृष्ट प्रेममें अवस्थित है, उस दाम्पत्यका वह एक कल्याण बड़े पुण्यसे पाया जाता है ॥ ३९ ॥

दुर्मुख—(समीप आकर) महाराजकी जय हो ।

रामः—ब्रूहि यदुपलब्धम् ।

दुर्मुखः—उवत्थुवन्ति देवं पौरजाणपदा जहा विसुमरिदा अह्मे महाराअदसरहस्स रामदेवेणेत्ति। (उपस्तुवन्ति देवं पौरजानपदा, यथा विस्मारिता वयं महाराजदशरथस्य रामदेवेनेति ।

रामः—अर्थवाद एवैषः । दोषं तु मे कथंचित्कथय. येन प्रतिविधीयते ।

दुर्मुखः—(सास्रम् ।) सुणादु महाराओ । (कर्णे ।) एव्वं विअ । इति । (शृणोतु महाराजः । एवमिव ।)

रामः—अहह, अतितीव्रोऽयं वाग्वज्रः । (इति मूर्च्छति ।)

राम इति । उपलब्धम् = अनुभूतं, ज्ञातमित्यर्थः; श्रुतमिति शेषः, 'उपलम्भस्त्वनुभव' इत्यमरः ।

दुर्मुख इति । उपस्तुवन्ति = प्रशंसन्ति, विस्मारिताः = विस्मरणं प्रापिताः महाराजदशरथस्येत्यत्र 'अधीगर्थदयेशां कर्मणि' इति षष्ठी ।

राम इति । अर्थवादः = प्रशंसा, स्तुतिनिन्दाऽन्यतरफलकं वाक्यमर्थवाद', तत्र क्वचित् स्तुतौ कुत्रचिच्च निन्दायां तात्पर्यं कल्प्यते, न तु वास्तवार्थकथने । अत्र च मत्कर्तृकपितृविस्मारणकथने मदीयस्तुतावेव तात्पर्यम् , न यथार्थकथन इति भावः । प्रतिविधीयते = प्रतिविधानं क्रियते, दोषप्रतिकारः करिष्यत इति भावः ।

दुर्मुख इति । शृणोतु=श्रवणं करोतु, देवः=महाराजः । **कर्णे एवमिवेति** । 'रामो रावणेन बलादपहृतां यौवनस्थां बहुकालपर्यन्तं लंकायामवस्थितामपि सीतां पत्नीत्वेन गृह्णाति, अनुचितमेतत्' इत्याकारकं रामकर्णे कथितं दुर्मुखवचनमनुसन्धेयम् ।

राम इति । अहह = इदं खेदद्योतकमद्भुताऽर्थद्योतकं वाऽव्ययम् 'अहहे-

---

राम—जो जाना है, वह कहो ।

दुर्मुख—पुरवासी और देशवासी लोग महाराजकी प्रशंसा करते हैं कि—'महाराज रामचन्द्रजीने हमलोगोंके चित्तसे महाराज दशरथको भुलवा दिया' ।

राम—यह तो प्रशंसा ही हुई । किसी तरहसे हुए मेरे दोषको भी कहो, जिससे कि उसका निवारण किया जाय ।

दुर्मुख—(आँखोंमें आँसू भरकर) महाराज ! (कानमें कहता है ।)

राम—यह वचनवज्र अत्यन्त दुःसह है (ऐसा कहकर मूर्च्छित होते हैं) ।

दुर्मुखः—आस्ससदु देवो । (आश्वसितु देव ।)

रामः—(आश्वस्य)

हा हा धिक् ! परगृहवासदूषणं यद्वैदेह्याः प्रशमितमद्भुतैरुपायैः ।
एतत्तत्पुनरपि दैवदुर्विपाकादालर्कं विषमिव सर्वतः प्रसक्तम् ॥४०॥

तत्किमत्र मन्दभाग्यः करोमि । (विमृश्य सकरुणम् ।) अथवा किमेतत् ।

स्यद्भुते खेदे' इत्यमरः, अतितीव्र• = अतिदुःसहः 'तीव्रसंवेग' इति पाठे—तीव्रः = दुःसहः, संवेगः = संभ्रमो यस्य स इत्यर्थः । वाग्वज्र•=वागेव वज्रं, 'मयूरव्यंसकादयश्च' इति रूपकसमास, उपमेये उपमानारोपाद्रूपकालङ्कारश्च । 'ह्रादिनी वज्रमस्त्री स्यात्' इत्यमरः ।

हा हेति । हा ! हा ! ! धिक् ! ! ! वैदेह्या यत् परगृहवासदूषणम् अद्भुतैः उपायैः प्रशमितम् । दैवदुर्विपाकात् तत् एतत् पुनरपि आलर्कं विषमिव सर्वतः प्रसक्तमित्यन्वयः । हा हा, लोकमिति शेष, लोकस्य अत्यर्थं शोच्यते, सीतासमायाः पतिव्रतायाः परिवादादिति भावः । धिक् = आवयो (सीतारामयोः) भाग्यमिति शेषः । वैदेह्याः = मैथिल्याः, सीताया इत्यर्थः । यत् , परगृहवासदूषणं = परपुरुषभवननिवासदोष , अद्भुतैः = आश्चर्यजनकैः , उपायैः=अग्निप्रवेशादिभिः, प्रशमितं= परिहृत, दैवदुर्विपाकात् = भाग्यस्य दुष्परिणामात् , तत् = पूर्वाऽनुभूतम् , एतत् = परगृहवासदूषण, पुनरपि = भूयोऽपि, आलर्कम्=अलर्कसम्बन्धि, विक्षिप्तकुक्कुरस्येत्यर्थः, 'अलर्कस्तु स योगितः' इत्यमरः । विषमिव = गरलमिव, सर्वत = सर्वत्र, प्रसक्तं = संसक्तम् । 'प्रसृतम्' इति पाठे व्याप्तमित्यर्थः । यथा, विक्षिप्तकुक्कुरस्य विषमौषधादिभिरुपायैर्निराकृतमपि दुर्भाग्येन कालान्तरे सर्वाङ्गे प्रसरति तथैवेदं सीतायाः परगृहवासदूषणमपि अग्निशुद्ध्यादिभिरुपायैः परिहृतमपि सर्वत्र देशे प्रसरतीति भावः । उपमाऽलङ्कारः । प्रहर्षिणी वृत्तम् ॥ ४० ॥

तदिति । तत् = तस्माद्धेतोः सीतादोषप्रचरणादिति भावः , मन्दभाग्यः =

दुर्मुख—महाराज आश्वस्त हों।

राम—(आश्वस्त होकर)

हाय ! हाय !! धिक्कार है !! सीताका दूसरे के घरमें रहनेका जो दोष अनूठे उपायोंसे हटाया गया था, भाग्यके दुष्परिणामसे वही दोष पागल कुत्तेके विषकी तरह फिर सब जगह फैल गया ॥ ४० ॥

इस कारणसे मैं अभागा आज क्या करूं ? (विचार-कर करुणाके साथ) अथवा यह क्या विचार करता है ?

सतां केनापि कार्येण लोकस्याराधनं परम् ।
तत्प्रतीतं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४१ ॥
सम्प्रत्येव च भगवता वसिष्ठेन संदिष्टम् । अपि च ।
यत्सावित्रैर्दीपितं भूमिपालैर्लोकश्रेष्ठैः साधु चित्रं चरित्रम् ।

हीनभाग्यः, करोमि = सम्पादयामि । विमृश्य = भावयित्वा, विचार्येत्यर्थः । सकरुणम् = सदयम् , एतत् = दूषणं, किं = किं विचार्यम् । एतद्दूषणमुद्दिश्य कि कर्तव्यमिति कार्यसरणिरविचारणीया, तस्याः प्रागेव उपपादितत्वादिति भावः ।

तदेव निदर्शयति—सतामित्यादिना । केनाऽपि कार्येण लोकस्य आराधनं सतां परम् , मां च प्राणांश्च मुञ्चता तातेन तत् प्रतीतमित्यन्वयः । केनाऽपि = लोकोत्तरेणाऽपि, कार्येण = कर्मणा, लोकस्य = जनस्य 'लोकस्तु भुवने जने ।' इत्यमरः, 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति जनानां वा । आराधनम् = अनुरञ्जनं, सतां=सज्जनानां, परम्=उत्कृष्टं, कार्यमिति शेषः । मां च= रामं च, प्राणांश्च = असूंश्च, मुञ्चता=त्यजता, तातेन=पित्रा दशरथेन, तत् = लोकाराधनं, प्रतीतं, = प्रथितं, प्रख्यापितमित्यर्थः । 'परम्' इत्यस्य स्थाने 'व्रतम्' इति क्वाचित्कः पाठस्तस्य कर्तव्यो नियम इत्यर्थः । 'तत् प्रतीतम्' इत्यत्र 'यत् पूरितम्' इति पाठान्तरं तत्र 'पूरितम्' इत्यस्य पूर्णीकृतमित्यर्थः । यथा पूजनीयेन पितृचरणेन लोकाऽनुरञ्जनार्थं ज्येष्ठपुत्रस्य मम प्राणानां च परित्यागः कृतस्तथैवाऽहमपि सीतां परित्यजामीति भावः । अत्र विशेषेण सामान्यस्य समर्थनरूपोऽर्थान्तरन्यासस्तथा च प्रस्तुतयोः 'मां च प्राणांश्चे'त्यनयोर्मुञ्चतेत्येकक्रिययाऽभिसम्बन्धात्तुल्ययोगिता चेत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥ ४१ ॥

पूर्वोक्तिसमर्थनाय स्वोक्तिं स्मरति—भगवतेति । भगवता—'उत्पत्तिं च स्थितिं चैव लोकानामगतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥' इति लक्षणलक्षितेनेति भावः । सन्दिष्टं = सन्देशः प्रेषितोऽष्टावक्रमुनिद्वारा—'युक्तः प्रजानामनुरञ्जने स्याः' (पृ० २२) इत्यादिनेति भावः ।

यदिति । लोकश्रेष्ठैः सावित्रैः भूमिपालैः यत् चित्रं चरित्रं साधु दीपितम् ,

किसी भी कामसे लोकका अनुरञ्जन करना सज्जनोंका श्रेष्ठ कार्य है, मुझे और प्राणोंको छोड़ते हुए पिताजीने उस कर्मको प्रख्यात किया ॥ ४१ ॥

अभी भगवान् वसिष्ठने सन्देश दिया है । और भी—

लोकमें श्रेष्ठ सूर्यवंश में उत्पन्न राजाओंने जिस विचित्र चरित्रको भली भांति प्रकाशित

मत्संबन्धात्कश्मला किंवदन्ती स्याच्चेदस्मिन् हन्त ! धिङ्मामधन्यम् ॥

हा देवि देवयजनसंभवे ! हा स्वजन्मानुग्रहपवित्रितवसुन्धरे ! हा मुनि-
जनकनन्दिनि ! हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि ! हा राम-

अस्मिन् मत्संम्बन्धात् कश्मला किंवदन्ती स्यात् चेत् हन्त ! अधन्यं मां धिक् इत्य-
न्वयः । लोकश्रेष्ठैः = भुवनप्रशस्यतमैः, सावित्रैः = सवितृसम्बन्धिभिः, सूर्यकुलोत्पन्नै-
रित्यर्थः । भूमिपालैः = राजभिः, यत् , चित्रम् = अद्भुतं, 'शुभ्रम्' इति पाठे
पवित्रमित्यर्थः । चरित्रं = वृत्तम् , साधु = समीचीनं यथा तथा, दीपितं = प्रकाशि-
तम् । अस्मिन्=एतादृशे चरित्रे, मत्सम्बन्धात्=मत्सम्पर्कात् , कश्मला = मलिना,
किंवदन्ती = जनश्रुतिः, स्यात् = भवेत् , चेत् = यदि, हन्त = खेदद्योतकमव्यय-
मिदम् , अधन्यं = पुण्यरहितं, मां = रामं, धिक् । मम यशसा चरित्रोल्लासनस्य
कथा तु दूरे आस्ताम् , एष लोकाऽपवाद आपतितो येन निरपराधायाः सीतायाः
परित्याग आवश्यकः संवृत्तोऽतोऽहं पापकारिणमात्मानमेव निन्दामीति भावः ।
शालिनी वृत्तम्—'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः' इति ॥ ४२ ॥

हा देवीति । स्वतो निर्दोषेत्याह हा देवि ! उत्पत्तिवंशदोषोऽपि नास्तीत्या-
ह—देवयजनसम्भवे = देवा इज्यन्ते (पूज्यन्ते) अस्मिन्निति देवयजनं=यज्ञभूमिः,
'करणाऽधिकरणयोश्च' इति अधिकरणे ल्युट् , देवयजनं संभवः उत्पत्तिस्थानं
यस्यास्तत्सम्बुद्धौ । स्वोत्पत्तिभूमेरपि शुद्धिकारिणीत्याह—स्वजन्माऽनुग्रहपवित्रित-
वसुन्धरे = स्वजन्म = आत्मजनुः, एव अनुग्रहः = प्रसादः, तेन पवित्रिता = पवि-
त्रीकृता, वसुन्धरा = पृथ्वी, यया तत्सम्बुद्धौ । 'पवित्रिते'त्यत्र 'तत्करोति तदाचष्टे'
इति णिजन्तात् क्तः । संपर्कदोषोऽपि नास्तीत्याह—मुनिजनकनन्दिनि = मननशील-
जनकानन्दकारिणि ! गुरुदेवताऽभिमतेत्याह—पावकवसिष्ठारुन्धतीप्रशस्तशीलशालि-
नि = पावकवसिष्ठारुन्धतीभिः प्रशस्तं=स्तुतम् , यत् शीलं=पवित्रचरितं स्वभावो वा,
तेन शालते शोभते, तत्सम्बुद्धौ । अग्निना लङ्कायां विशुद्धिकाले, अरुन्धतीवसिष्ठा-
भ्यां च सर्वदैव प्रशस्ता सीतेति भावः । राममयजीविते = राम एव राममयं, स्वार्थे
मयट् । राममयं जीवितं यस्यास्तत्सम्बुद्धौ = हे रामाऽभिन्नजीवने ! इत्यर्थः ।

क्रिया, उस चरित्रमें मेरे सम्बन्धसे मलिन जनश्रुति हो तो हाय ! पुण्यरहित मुझको
धिक्कार है ॥ ४२ ॥

हा देवि ! यज्ञभूमिसे उत्पन्न होनेवाली !! हा अपने जन्मरूप अनुग्रह से पृथ्वीको पवित्र
करनेवाली ! हा मुनि जनकको आनन्दित करनेवाली ! हा अग्नि, वसिष्ठ और अरुन्धतीसे

मयजीविते ! हा महारण्यवासप्रियसखि ! हा तातप्रिये ! हा स्तोकवादिनि ! कथमेवंविधायास्तवायमीदृशः परिणामः ?

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ४३ ॥

(दुर्मुखं प्रति ।) दुर्मुख ! ब्रूहि लक्ष्मणम् । एष नूतनो राजा रामः समाज्ञापयति । (कर्णे ।) एवमेवम् । इति ।

अनेन रावणस्मरणमपि दूरोत्सारितमिति गम्यते । पातिव्रत्यं निदर्शयति—महारण्यवासप्रियसखि = अरण्यानीवासेऽपि दयितसहचरि ! तातप्रिये = पितृवल्लभे हे, श्वशुरदशरथप्रियस्नुषे ! इत्यर्थः । स्तोकवादिनि=अल्पभाषिणि ! कथं=केन प्रकारेण, एवंविधायाः = ईदृश्याः, गुणगणभूषिताया इत्यर्थः । ईदृशः = एतादृशो लोकापवादरूप इत्यर्थः, परिणामः = परिपाकः ।

त्वयेति । त्वया जगन्ति पुण्यानि (सन्ति, परन्तु), त्वयि अपुण्या जनोक्तयः (सन्ति), त्वया लोका नाथवन्तः (सन्ति, परन्तु), त्वम् अनाथा विपत्स्यसे इत्यन्वयः । त्वया=सीतया, जगन्ति = लोकाः, पुण्यानि=पवित्राणि (सन्ति), त्वदीयपावनलीलाऽऽधारत्वादित्यर्थः । परन्तु त्वयि=त्वद्विषये, अपुण्या =अपवित्राः, जनोक्तयः=लोकवचनानि, सन्तीति शेषः । त्वया = सीतया, लोकाः=जनाः, नाथवन्तः = स्वामिसम्पन्नाः, तव श्रीरूपत्वात्, लोकनाथस्य मम पत्नीत्वाद्वा इति भावः । परन्तु त्वं=सीता, अनाथा=स्वामिरहिता सती, विपत्स्यसे=विपत्प्राप्ता भविष्यसि, स्वामिना मया परित्यक्ष्यमाणत्वादिति भावः । अत्र **विरोधाभासोऽलङ्कारः** ॥ ४३ ॥

दुर्मुखमिति । नूतनः - नवीनः, नूतनपदेन प्रजाऽनुरञ्जनमात्र आग्रही कर्तव्याऽकर्तव्यविचारहीन इति व्यज्यते । समाज्ञापयति = ममादिशति ।

एवमेवमिति । 'पञ्चवटीवने सीता नेतव्या, तत्रैव परित्याज्या चे'ति दुर्मुख कर्णे कथितं लक्ष्मणं प्रति रामवचनमनुसन्धेयम् ।

प्रशंसित चरित्रसे शोभित होनेवाली ! हा रामसे अभिन्न जीवनवाली ! हा बड़े जङ्गलोंके वासमे प्रिय सहचरि ! हा पिताजीको प्रिय लगनेवाली ! हा अल्पभाषिणि ! ऐसी (इन गुणोंवाली) तुम्हारा इस तरहका परिणाम कैसे हुआ ?

तुमसे जगत् पवित्र है, परन्तु तुम्हारे विषयमे लोगोंकी उक्तियाँ अपवित्र हो रही हैं । तुमसे लोक नाथवाले हैं, परन्तु तुम अनाथ होकर आपत्ति पाओगी ॥ ४३ ॥

(दुर्मुखको) दुर्मुख ! लक्ष्मणको कहो । यह नया राजा राम आज्ञा करता है । (कानमें —ऐसा ऐसा……) ।

दुर्मुखः—हा ! कहं अग्गिपरिसुद्धाए गब्भट्ठिदपवित्तसंताणाए देवीए दुज्जणवअणादो एदं ववसिदं देव्वेण ? (हा, कथमग्निपरिशुद्धाया गर्भस्थितपवित्रसंतानाया देव्या दुर्जनवचनादिदं व्यवसितं देवेन ?)

रामः—शान्तं पापम् । शान्तं पापम् । दुर्जना नाम पौरजानपदाः ?

इक्ष्वाकुवंशोऽभिमतः प्रजानां जातं च दैवाद्वचनीयबीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले प्रत्येतु कस्तद्यदि दूरवृत्तम् ॥४४॥

दुर्मुख इति । अग्निपरिशुद्धायाः=वह्निपवित्रायाः, गर्भस्थितपवित्रसन्तानायाः= गर्भस्थितः = भ्रूणस्थः, पवित्रसन्तानः = पूतसन्ततिः, यस्यास्तस्याः । देव्याः=महाराज्ञ्याः, दुर्जनवचनात् = दुष्टवाक्यात्, इदं = त्यागरूपं कर्म, व्यवसितं=निश्चितम् । **'अध्यवसितम्'** इति पाठेऽपि अयमेवार्थः, देवेन = महाराजेन भवतेत्यर्थः ।

राम इति । पापं = कल्मषं, पौरजानपदेषु दुर्जनत्वारोपरूपमित्यर्थः । शान्तं= निवारितमस्त्विति शेषः । पौरजानपदाः = नागरिका देशस्थिताश्च जनाः, दुर्जनाः, नाम = किम् अनार्याः ? इति काक्वाक्षिप्तः प्रश्न उन्नेयः । पौरजानपदा न दुर्जना इति भावः ।

इक्ष्वाकुवंश इति । इक्ष्वाकुवंशः प्रजानाम् अभिमतः दैवात् वचनीयबीजं च जातम् । विशुद्धिकाले यच्च अद्भुतं कर्म, तत् यदि, दूरवृत्तं कः प्रत्येतु ? इत्यन्वयः । इक्ष्वाकुवंशः = इक्ष्वाकुकुलं, प्रजानां = जनानाम्, 'अभिमत' इति पदेन योगे 'क्तस्य च वर्तमाने' इति षष्ठी । अभिमतः = अभीष्टः, दैवात् = भाग्यात्, दुर्भाग्यादिति भावः । वचनीयबीजं च = निन्दाकारणं च, सीतायाः रक्षोगृहस्थितिरूपमित्यर्थः । जातम् = उत्पन्नम् । वचनीयबीजोत्पत्त्यभावे कथं प्रजा अभिमतस्येक्ष्वाकुवंशस्य परिवादं कुर्युरिति भावः । विशुद्धिकाले = परीक्षासमये, यच्च, अद्भुतम् = आश्चर्ययुक्तं, कर्म=कार्यमग्निप्रवेशरूपमित्यर्थः, तत् यदि = तत् अस्ति चेत् । दूरवृत्तं = दूरदेशे जातं चरितं, कः = पुरुषः प्रत्येतु = विश्वसितु ? इक्ष्वाकुवंशस्य अभिमतत्वेन प्रजा मच्चरित्रसंशोधनायैव मदीयमपवादं ख्यापयन्ति, न दौर्जन्येन ।

दुर्मुख—हा ! दुर्जनोंके वचनसे अग्निमें शुद्ध तथा गर्भमें पवित्र सन्तानको धारण करनेवाली महारानीका महाराजने यह (त्याग करनेका) कैसे निश्चय किया ?

राम—पाप शान्त हो, पाप शान्त हो । नगरमें और देशमें रहनेवाले लोग दुर्जन हैं क्या ?
इक्ष्वाकुकुल प्रजाओंको अभीष्ट है, परन्तु भाग्ययोगसे उसमें निन्दाका कारण हो गया है । विशुद्धिके समयमें ज ... दूठा काम हुआ, सो भी दूरमें हुए उसका कौन विश्वास करे ? ॥४४॥

तद्गच्छ ।

दुर्मुखः—हा ! देवि ! (इति निष्क्रान्तः ।)

राम—हा कष्टम् । अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः ।

शैशवात्प्रभृति पोषितां प्रियां सौहृदादपृथगाश्रयामिमाम् ।
छद्मना परिददामि मृत्यवे सौनिके गृहशकुन्तिकामिव ॥ ४५ ॥

या नाम सीतायाः पातिव्रत्यपरीक्षा संजाता सा दूरवृत्तत्वादलौकिकत्वाच्च न केनाऽपि प्रतीतेति भावः । अत्रेन्द्रवज्रा वृत्तं—'स्यादिन्द्रवज्रा यदि तौ जगौ गः' । इति तल्लक्षणम् ॥ ४४ ॥

राम इति । अतिबीभत्सकर्मा = अतिबीभत्सम् = अतिनिन्द्यम् , कर्म=क्रिया, यस्य सः । नृशंसः = घातुकः, 'नृशंसो घातुकः क्रूर' इत्यमरः ।

स्वस्यातिबीभत्सकर्मत्वं नृशंसत्वं च प्रतिपादयति—**शैशवादिति** । शैशवात् प्रभृति पोषिता सौहृदात् अपृथगाश्रयाम् इमां प्रियां सौनिके गृहशकुन्तिकाम् इव छद्मना मृत्यवे परिददामि इत्यन्वयः । शैशवात् प्रभृति = बाल्यात् आरभ्य, पोषितां = वर्द्धितां, सौहृदात् = सौहार्दात् , प्रेम्ण इत्यर्थः । अपृथगाश्रयां = पृथगाश्रयरहिताम् , इमां = पुरोवर्तिनीं, प्रियां = दयितां सीतामित्यर्थः, सौनिके=प्राणिहिंसाजीविनि, चतुर्थ्यर्थे सप्तमी । सूना = वधस्थानं, तेन दीव्यति व्यवहरतीति सौनिकस्तस्मिन्, 'तेन दीव्यति खनति जयति जितम्' इति ठक्, कित्त्वात् 'किति च' इति आदिवृद्धिः । **'सौनिक'** इति प्रथमान्तपाठोऽप्यस्ति । गृहशकुन्तिकामिव = गेहपालितामनुकम्पितपक्षिणीमिव, गृहपदेन बाल्यात्प्रभृति पालनं व्यज्यते । अनुकम्पिता शकुन्ती शकुन्तिका, 'अनुकम्पायाम्' इति कन्, अनुकम्पाबीजं स्नेकतः स्त्रीत्वं तदुपरि गृहपालितत्वं चेति विज्ञेयम् । गृहे शकुन्तिका गृहशकुन्तिका, ताम् । छद्मना = छलेन, सीताऽभीष्टवनप्रस्थानरूपेणेत्यर्थः । मृत्यवे = कालाय, परिददामि = वितरामि । गृहपालितायाः पक्षिण्या घातुकाय समर्पणं यथा

सो (इस कारणसे) जाओ ।

दुर्मुख—हा ! देवि !! (ऐसा कहकर जाता है) ।

राम—हा ! कष्ट है । अतिशय निन्दनीय कर्म करनेवाला मैं हत्यारा हो गया हूँ ।

बचपनसे पोषण की गई, प्रेमसे मुझसे बिछुड़कर न रहनेवाली प्रिया सीताको—जैसे कोई कसाईके लिये घरमें पली हुई चिड़ियाको देता है, उसी तरह मैं छलसे मौतके लिये दे रहा हूँ ॥ ४५ ॥

तत्किमस्पृश्यः पातकी देवीं दूषयामि ? (इति सीतायाः शिरः समुन्नमय्य बाहुमाकृष्य ।)

अपूर्वकर्मचण्डालमयि मुग्धे ! विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥ ४६ ॥

(उत्थाय) हन्त हन्त ! संप्रति विपर्यस्तो जीवलोकः । अद्यावसितं

तथैव मत्कर्तृकं सीतानिर्वासनमपि अतिबीभत्सकर्मत्वं नृशंसत्वं च ख्यापयतीति भावः । अत्र **पूर्णोपमाऽलङ्कारः** । रथोद्धता वृत्तम्, 'रान्नराविह रथोद्धता लगौ' इति लक्षणात् ॥ ४५ ॥

तदिति । अस्पृश्यः = स्प्रष्टुमयोग्यः । तत्र हेतुमाह—**पातकीति** । पातकित्वं च निर्दोषपत्नीत्यागेन बोध्यम् । दूषयामि = स्पर्शेन दूषितां करोमि । समुन्नमय्य = समुन्नतं कृत्वा ।

अपूर्वेति । अयि मुग्धे ! अपूर्वकर्मचण्डालं मां विमुञ्च, चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमं श्रिता असि इत्यन्वयः । अयि = अयीति कोमलामन्त्रणे, मुग्धे = मूढे ! 'प्राणवल्लभोऽयं मदीयः कान्तोऽल्पमपि मदहिताचरणं न करिष्यती'त्याकारकमोहयुक्ते ! इत्यर्थः । अपूर्वकर्मचण्डालं = विलक्षणकृत्यचण्डालम् साध्व्याः पत्न्याः परित्यागरूपेण कर्मणा चण्डालः कर्मचण्डालः । जन्मचण्डालोऽपि क्रूरो भवति, कर्मचण्डालस्तु ततोऽपि क्रूरतरो भवति । अपूर्वश्चाऽसौ कर्मचण्डालोऽपूर्वकर्मचण्डालस्तं, चण्डालोऽपि स्वपत्न्यास्तत्राऽपि पतिव्रतायास्तत्राऽपि गर्भिण्याः परित्यागं न करोति, अतोऽत्र जन्मचण्डालाऽपेक्षया वैशिष्ट्यम् । मां = रामं, विमुञ्च = परित्यज, चन्दनभ्रान्त्या = श्रीखण्डभ्रमेण, दुर्विपाकं = दुष्टो विपाको यस्य तं, दुष्परिणामं, विषद्रुमं = विषवृक्षं, श्रिता = आश्रिता, असि = वर्तसे । अत्र चन्दनभ्रान्त्या विषद्रुमाश्रयणस्याऽसम्भवात् असम्भवद्वस्तुसम्बन्धरूपा **निदर्शना**, मोचनक्रियायामुत्तरार्द्धवाक्यस्य हेतुत्वाद्वाक्यार्थहेतुकं **काव्यलिङ्गं** चेति द्वयोरङ्गाङ्गिभावेन **सङ्करः** ॥ ४६ ॥

उत्थायेति । हन्त = दुःखद्योतकमिदमव्ययम् । सम्प्रति = अधुना, सीता-

---

तब क्यों अस्पृश्य पातकी होकर (मैं) देवीको स्पर्शसे दूषित करूँ । (ऐसा कहकर, सीताका शिर ऊँचा कर और बाहु खींचते हुए)

अरी भोली सीते ! अपूर्व कर्म करनेसे चण्डाल होनेवाले मुझको छोड़ो, तुम चन्दनकी भ्रान्तिसे विषवृक्षका आश्रय कर रही हो ॥ ४६ ॥

(उठकर) हाय ! हाय !! अब जीवलोक उलट गया । आज रामके जीवनका प्रयोजन

जीवितप्रयोजनं रामस्य। शून्यमधुना जीर्णारण्यं जगत्। असारः संसारः। काष्ठप्रायं शरीरम्। अशरणोऽस्मि। किं करोमि ? का गतिः ? अथवा।

दुःखसंवेदनायैव रामे चैतन्यमागतम्।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि॥ ४७॥

विरह इत्यर्थः। जीवलोकः = प्राणिलोकः, विपर्यस्तः=अन्यथाभूतः। रामस्य सीता-साहित्ये '*यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना*' इति रामायणोक्तरीत्या जीवलोकस्य प्राक् स्वर्गत्वमासीत, सीतावियोगे तु नरकत्वमेवेति, अत उक्तं 'विपर्यस्त' इति। 'जीवितप्रयोजनं = जीवनफलम्, अवसितं = समाप्तम्, अधुना = सीतावियोगे, जगत्=लोकः, जीर्णारण्यम्=पुष्पफलरहितं वनम्, तस्माद्धेतोः-शून्यं = निर्जनं, जातमिति शेषः। असारः =साररहितः। शरीरं=देहः, काष्ठप्रायम्=इन्धन-प्रायं, 'ज्योत्स्नेव हिमदीधितेः' इत्युक्त्या यथा चन्द्रस्य चन्द्रिकाऽभावे काष्ठप्रायता तथा सीताभावे रामस्य सुखसंवेदनाऽभावेन शरीरस्य काष्ठप्रायत्वम्। '**कष्टप्रायम्**' इति पाठे दुःखप्रचुरमित्यर्थः। अशरण = रक्षकरहितः, यद्वा 'शरणं गृहरक्षित्रोः' इति कोषात् 'न गृहं गृहमित्याहुः' इति वचनात् गृहिणीराहित्याद् गृहविहीनोऽस्मी-त्यर्थः। गतिः = गमनस्थानं, कुत्र गच्छामीत्यर्थः।

मच्कृते किमपि दुःखनिवारणस्थानं नाऽस्तीति प्रतिपादयति-**दुःखेति**। दुःख-संवेदनाय एव रामे चैतन्यम् आगतम्। मर्मोपघातिभिः प्राणैः हृदि वज्रकीलायि-तम् इत्यन्वयः। दुःखसंवेदनाय एव = पीडानुभवाय एव, रामे = मयि, चैतन्य = चेतनभावः, आगतम् = आयातम्, '**अर्पितम्**' इति पाठे आहितमित्यर्थः, विधि नेति शेषः। मर्मोपघातिभिः = मर्मस्थलप्रहारिभिः, मर्माणि = हृदयादिप्रदेशान्, उपघ्नन्तीति तच्छीला मर्मोपघातिनस्तैः, 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः। प्राणैः = असुभिः, हृदि = हृदये, '**स्थिरैः**' इति पाठे अचलैरित्यर्थः। पदमिदं च प्राणविशेषणं ज्ञेयम्। वज्रकीलायितं = वज्रशङ्कुवत् आचरितं, क्यङन्ताद्भावे क्तः। एतादृश्यां दुर्दशायां समुपस्थितायामपि प्राणाः स्थिरीभूय मा न मुञ्चन्ती-त्यर्थस्तथा च दुःखाऽनुभवपारवश्येन मत्कृते मरणमपि दुर्लभं सञ्जातमिति भावः। '**वज्रकीलायितम्**' इत्युपमाऽलङ्कारः॥ ४७॥

समाप्त हुआ। अब जगत् जीर्ण जङ्गलकी तरह शून्य हो गया। संसार सारसे रहित हो गया। शरीर काष्ठकी तरह हो गया। मैं शरणहीन हूं। क्या करूँ ? कहाँ जाऊँ ? अथवा-

दुःख भोगनेके लिए ही राममें चैतन्य आ गया है। मर्मस्थलमें प्रहार करनेवाले प्राणोंने हृदयमें वज्रकी कीलके सदृश आचरण किया है॥ ४७॥

हा अम्ब अरुन्धति ! भगवन्तौ वसिष्ठविश्वामित्रौ ! भगवन् पावक ! हा देवि भूतधात्रि ! हा तातजनक ! हा मातः ! हा प्रियसख महाराज सुग्रीव ! सौम्य हनूमन् ! महोपकारिन् लङ्काधिपते बिभीषण ! हा सखि त्रिजटे ! परिमुषिताः स्थ, परिभूताः स्थ रामहतकेन । अथवा को नाम तेषामहमिदानीमाह्वाने ?

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।

हा अम्बेति । अम्ब अरुन्धति = हे मातः अरुन्धति ! अरुन्धत्या गुरुपत्नीत्वेन मातृवत्पूजनीयत्वादम्बेतिपदेनाऽभिधानं संगच्छते, अरुन्धतीकृतसीतापातिव्रत्याऽनुमोदनं लोकैर्न प्रमाणीकृतमिति भावः । पावक = अग्ने ! भूतधात्रि=पृथिवि ! भूताना (प्राणिनाम्) धारणात्पोषणाच्च पृथिव्या भूतधात्रीत्व संगच्छते, तथा च योगरूढोऽयं शब्दः । प्रियसख = अभीष्टमित्र ! सीतोद्धारे त्वत्कृतं साहाय्यमपि निष्फलं जातमिति भावः । सौम्य = सदाशय, हनूमन = अञ्जनानन्दन ! त्वदीय समुद्रतरणादिविक्रमप्रदर्शनं दौत्यं च अफलं समजनीति भावः । सखि = सहचरि ! सीतायाः सख्याऽनुष्ठानात् रामस्यापि त्रिजटा सखी सञ्जाताऽनस्तत्सम्बोधनं संगच्छते । त्रिजटा नाम काचिद्राक्षसी या सीतासंतर्जिका राक्षसीर्निवार्य सीता प्रियवचनैरसान्त्वयत् । तथा च यूयं सर्वे, रामहतकेन = हतप्रायेण रामेण, हत इव हतकः । राम एव हतको रामहतकस्तेन, सीतापरित्यागरूपेण स्वकीयेनैव दुष्कर्मणा हतप्रायेण रामेणेति भावः । परिमुषिताः स्थ = अपहृतसीतारूपद्रव्याः स्थ, **'दूषिताः स्थ'** इति पाठे 'सीतेयं निर्दोषा अनुग्राह्या च' इति युष्मदीयं वचनमवमान्य 'यूयमनृतभाषिण' इति दत्तदोषाः स्थ इति भावः । परिभूताः स्थ=तिरस्कृताः स्थ, युष्मद्वचनाऽनभ्युपगमेनेति भावः । अथवा=पक्षान्तरे—इदानीं=सीता परित्यागरूपपापाचरणकाले, आह्वाने=आकारणे, को नाम = न कोऽपीत्यर्थः, पुण्यात्मनां तेषां नामोच्चारणे सर्वथैवाऽहमयोग्य इत्यर्थः ।

अयोग्यत्वं प्रतिपादयति—**ते हीति** । कृतघ्नेन दुरात्मना मया गृहीतनामानः

हा माता अरुन्धति ! भगवन् वसिष्ठ और विश्वामित्रजी ! भगवन् अग्निदेव ! हा देवि पृथिवि ! हा पिताजी ! हा जनकजी ! हा मातः ! हा प्रियमित्र महाराज सुग्रीव ! सदाशय हनुमान्जी ! महान् उपकार करनेवाले लङ्काधीश विभीषण ! हा सखि त्रिजटे ! तुम सबलोग हतभाग रामसे परिहृत और तिरस्कृत हो गये हो । अथवा अब उन लोगोंको बुलानेका मुझे क्या अधिकार है ?

कृतघ्न और दुष्ट स्वभाववाले मुझसे नाम लिये जानेपर भी वे महानुभाव पापसे सम्बद्ध

मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ४८ ॥

योऽहम्—

विस्रम्भादुरसि निपत्य जातनिद्रामुन्मुच्य प्रियगृहिणीं गृहस्य लक्ष्मीम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वीं क्रव्याद्भ्यो बलिमिव दारुणः क्षिपामि ॥

ते महात्मानः पाप्मना स्पृश्यन्त इव (इति) मन्ये हि इत्यन्वयः । कृतघ्नेन = उपकारविस्मरणशीलेन । कृतं हन्तीति कृतघ्नः, तेन, अरुन्धत्यादिकृतसीतासतीत्व-प्रतिपादनरूपोपकारविस्मरणशीलेनेति भावः । दुरात्मना=दुष्टस्वभावेन, दुष्टः=दोषयुक्तः, आत्मा = स्वभावो यस्य स दुरात्मा तेन । मया=रामेण, गृहीतनामानः=उच्चारितनामधेयाः सन्तः, ते = पूर्वोक्ताः, अरुन्धत्यादय इत्यर्थः । महात्मानः = महानुभावाः, पाप्मना = पातकेन, स्पृश्यन्त इव = आमृश्यन्त इव, मत्कर्तृकतन्नामोच्चारणात्तेऽपि पापेन स्पृष्टा भवन्ति इवेत्यर्थः । (इति = इत्थम्) मन्ये=उत्प्रेक्षे । अत्रोत्प्रेक्षाऽलङ्कारः ॥ ४८ ॥

विस्रम्भादिति । विस्रम्भात् उरसि निपत्य जातनिद्राम् आतङ्कस्फुरितकठोरगर्भगुर्वीं गृहस्य लक्ष्मीं प्रियगृहिणीं दारुणः (सन्) उन्मुच्य क्रव्याद्भ्यो बलिम् इव क्षिपामि इत्यन्वयः । विस्रम्भात् = विश्वासात् 'अयं मम हिताचरणशीलोऽतीवाऽनुरक्तः पतिः' इति विश्वासं कृत्वेत्यर्थः । उरसि = वक्षसि, निपत्य=निपतनं कृत्वा, जातनिद्राम्=सुप्ताम्, आतङ्कस्फुरितकठोरगर्भगुर्वीम्=आतङ्केन=तापशङ्कया, चित्रदर्शनजन्याया भीतेः स्वप्नेऽप्यनुवृत्तेरिति भावः । स्फुरितः=कम्पितः, कठोरः = पूर्णः, यो गर्भः = भ्रूणः तेन गुर्वीम् = गौरववतीम् । 'गुर्वीम्' इत्यनेन यमलगर्भत्वं सीताया अनपलायनाऽक्षमत्वं च व्यज्यते । गृहस्य = गेहस्य, लक्ष्मीं = शोभारूपां, प्रियगृहिणीं=हृदयदयितां पत्नीं, सीतामित्यर्थः । दारुणः=कठोरः (सन्), '**निर्घृणः**' इति पाठे निर्दय इत्यर्थः, उन्मुच्य = त्यक्त्वा, क्रव्याद्भ्यः = राक्षसादिभ्यः, आममांसभक्षकेभ्य इत्यर्थः । क्रव्यम् = आममांसम्, अदन्तीति क्रव्यादस्तेभ्यः 'क्रव्ये च' इति विट्, बलिमिव = भक्ष्यपदार्थमिव, क्षिपामि = क्षिप्त्वा ददामी-

---

होते हैं, ऐसा मुझे लगता है ॥ ४८ ॥

जो मैं—

विश्वाससे छातीपर लेटकर सोई, तापशङ्कासे कम्पित और कठोर गर्भसे बोझवाली तथा गृहलक्ष्मी, अपनी प्रिय गृहिणी सीताको, कठोर होता हुआ, परित्याग कर राक्षसोंको भक्ष्य पदार्थकी तरह दे रहा हूँ ॥ ४९ ॥

(सीतायाः पादौ शिरसि कृत्वा ।) अयं पश्चिमस्ते रामशिरसि पादपङ्कजस्पर्शः । (इति रोदिति ।)

(नेपथ्ये ।)

अब्रह्मण्यम् , अब्रह्मण्यम् ।

रामः—ज्ञायतां भोः ! किमेतत् ?

(पुनर्नेपथ्ये ।)

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥ ५० ॥

त्यर्थः । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानवत्त्वम् । मदधिको विश्वासघातकः पापश्च कोऽन्यो भवेदिति भावः । उपमाऽलंकारः । प्रहर्षिणी वृत्तम् ॥४९॥

सीतायाः इति । पश्चिमः = अन्त्यः, 'अन्त्यपाश्चात्यपश्चिमाः' इत्यमरः, पश्चाद्भवः पश्चिमः 'अग्रादिपश्चाड्डिमच्' इति डिमच्प्रत्ययः ।

नेपथ्य इति । अब्रह्मण्यं = ब्राह्मणानामत्याहितम् , आपतितमिति शेषः । ब्रह्मणि = ब्राह्मणे साधु ब्रह्मण्यं, 'तत्र साधुः' इति यत् । न ब्रह्मण्यमब्रह्मण्यम् , 'अब्रह्मण्यमवध्योक्तौ' इत्यमरः ।

ऋषीणामिति । यमुनातीरवासिनाम् उग्रतपसाम् ऋषीणां स्तोमः लवणत्रासितः (सन्) त्रातारं त्वाम् उपस्थितः इत्यन्वयः । यमुनातीरवासिनां = कालिन्दीतटाऽधिष्ठितानाम् , उग्रतपसां = कठिनतपश्चारिणाम् , ऋषीणां = मुनीनां, स्तोमः = समूहः, लवणत्रासितः = लवणराक्षसेन त्रासं प्रापितः (सन्), त्रातारं = रक्षकं, त्वां = भवन्तम् , उपस्थितः = समायातः, अस्तीति शेषः । उग्रतपश्चरणेन लवणनिग्रहसामर्थ्ये सत्यपि निग्रहकार्यस्य राजाऽधीनत्वेन ऋषयः शरणार्थं भवन्तमुपस्थिता इति भावः ॥ ५० ॥

(सीताके चरणोंको शिर में रखकर) रामके शिरमें तुम्हारे चरणकमलोंका यह अन्तिम स्पर्श है (ऐसा कहकर रोते हैं) ।

(नेपथ्यमें ।)

ब्राह्मणोंको महाभय ! ब्राह्मणोंको महाभय !!

राम—अरे ! पता लगाओ, यह क्या बात है ?

(फिर नेपथ्यमें ।)

यमुनाके तटपर रहनेवाले और कठोर तपस्या करनेवाले ऋषियोंका समूह लवणनामक राक्षससे त्रस्त होकर रक्षाकरनेवाले आपके पास आया है ॥ ५० ॥

रामः—कथमद्यापि राक्षसत्रासः ? तद्यावदस्य दुरात्मनो माधुरस्य कुम्भीनसीकुमारस्योन्मूलनाय शत्रुघ्नं प्रेषयामि । (परिक्रम्य पुनर्निवृत्य ।) हा देवि ! कथमेवंविधा गमिष्यसि ? भगवति वसुन्धरे ! सुश्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ ५१ ॥

(इति रुदन्निष्क्रान्तः ।)

सीता—हा सोम्म अज्जउत्त ! कहिंसि ? (इति सहसोत्थाय ।) हद्धी हद्धी ! दुस्सिविणरणरणअविप्पलद्धा अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि । (विलोक्य) हद्धी हद्धी ! एआइणिं पसुत्तं म उज्झिअ कहिं गदो णाहो ! होदु !

राम इति । अद्यापि = अधुनाऽपि, रावणनाशाद्राक्षसानां पराभवे जातेऽपीति भाव । दुरात्मन. = दुष्टस्वभावस्य, माधुरस्य—मधुरेश्वरस्य, कुम्भीनसीकुमारस्य = कुम्भीनस्याः रावणभगिन्याः, कुमारस्य = पुत्रस्य, उन्मूलनाय = मूलेन सहोत्पाटनाय । एवंविधा=एतादृशी पूर्णगर्भा सता-यर्थ. । भगवति=सर्वज्ञे ! सुश्लाघ्या = प्रशस्यचरित्राम् ।

जनकानामिति । जनकाना रघूणा च यत् कृत्स्नं गोत्रमङ्गलम् । पुण्यशीला या पुण्ये देवयजने (त्वम्) अजीजन. इत्यन्वयः । जनकाना = जनकवंश्याना, रघूणा च = रघुवंश्याना राज्ञा च, उभयत्र लक्षणयैषोऽर्थः । यत् = सीतारूपमिति भावः । कृत्स्न = सम्पूर्णं, गोत्रमङ्गलं = वंशकल्याणभूतं, तथा च पुण्यशीला = पवित्राचरणा, या = सीतां, पुण्ये = पवित्रे, देवयजने = देवयज्ञस्थाने, (त्वम्) अजीजन = उत्पादितवती असि 'तां सुश्लाघ्यां दुहितरं जानकीमवेक्षस्वे'ति पूर्वेणाऽन्वय' । अत्र पूर्वार्द्धे व्यस्तरूपकम् ॥ ५१ ॥

राम—क्या आज भी राक्षसोंका त्रास है ही ? तब मधुरेश्वर कुम्भीनसीके पुत्र इस दुरात्मा लवणको मारनेके लिए शत्रुघ्नको भेजता हूं। (दो-चार कदम चलकर फिर लौटकर) हा देवि! ऐसी तुम किस तरह जाओगी ? भगवति पृथिवि ! प्रशसनीया पुत्री सीताकी देखभाल करो।

जनकवंश और रघुवंशके राजाओंकी जो (सीता) सपूर्ण कुलका कल्याणस्वरूप है, पवित्र आचरणवाली जिनको आपने पवित्र देवयज्ञस्थानमें पैदा किया था ॥ ५१ ॥

(ऐसा कहकर रोते हुए चले जाते हैं ।)

सीता—हा सौम्य आर्यपुत्र ! आप कहां हैं ? (ऐसा कहकर सहसा उठकर) हा धिक् !

से कुपिस्सं, जइ तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिअणो ?
(हा सौम्य आर्यपुत्र ! कुत्राऽसि ? हा धिक् हा धिक् ! दुःस्वप्नरणरणकविप्रलब्धा आर्यपुत्रशून्यमिवात्मानं पश्यामि । ... हा धिक् हा धिक् ! एकाकिनीं प्रभुमां मामुज्झित्वा कुत्र गतो नाथः ? भवतु । अस्मै कोपिष्यामि, यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि । कोऽत्र परिजनः ?)

(प्रविश्य ।)

दुर्मुखः—देवि ! कुमारलक्खणो विण्णवेदि—'सज्जो रहो । तं आरुहदु देवी'त्ति । (देवि ! कुमारलक्ष्मणो विज्ञापयति—सज्जो रथः । तदारोहतु देवी' इति ।)

सीता—इअं आरूढह्मि । (उत्थाय परिक्रम्य ।) फुरइ मे गब्भभारो । सणिअं गच्छह्म । (इयमारूढास्मि । स्फुरति मे गर्भभारः । शनैर्गच्छामः ।)

सीतेति । दुःस्वप्नरणरणकविप्रलब्धा = दुःस्वप्ने यो रणरणकः = उत्कण्ठा, विरहमूलेत्यर्थः । तेन विप्रलब्धा = वञ्चिता, **'आर्यपुत्रम् आक्रन्दामि'** इति पाठे आर्यपुत्रं = रामम् , आक्रन्दामि = आह्वयामीत्यर्थः, विलोक्य = दृष्ट्वा, रामरहितमात्मानं दृष्ट्वेत्यर्थः । उज्झित्वा = त्यक्त्वा, अस्मै कोपिष्यामि = रामे प्रणयकोपं करिष्यामीत्यर्थः । 'अस्मै' इत्यत्र 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति चतुर्थी । आत्मनः प्रभविष्यामि = स्वस्य विषये समर्था भविष्यामि, रामदर्शनानन्तरं मम कृत्रिमकोपस्यापि तिरोभावादिति भावः । कोऽत्र परिजनः = परिजनानां मध्ये कोऽत्र सन्निहित इत्यर्थः ।

प्रविश्येति । सज्जः = सन्नद्धो गमनायेति शेषः ।

सीतेति । स्फुरति = चलति, शनैः = मन्दम् ।

हा धिक् !! दुःस्वप्नमें उत्कण्ठासे वञ्चित होकर अपनेको आर्यपुत्रसे शून्यकी तरह देख रही हूं । (देखकर) हा धिक् ! हा धिक् !! मुझको अकेली छोड़कर स्वामी कहाँ चले गये ? अस्तु, उनको देखती हुई यदि चित्तको अपने आधीन रख सकूंगी तो उनपर क्रोध करूँगी । यहाँपर कौन परिजन है ?

(प्रवेश कर)

दुर्मुख—देवि ! कुमार लक्ष्मण निवेदन करते हैं—'रथ तैयार है । महारानी आरूढ हों' ।

सीता—यह मैं चढ़ी (उठकर दो-चार कदम चलकर) मेरा गर्भका भार हिलता है धीरे-धीरे चलें ।

दुर्मुखः—इदो इदो देवी। (इत इतो देवी।)

सीता—णमो रहुउलदेवदाणं। (नमो रघुकुलदेवताभ्यः।)

(इति निष्क्रान्ताः सर्वे।)

इति महाकविश्रीभवभूतिविरचित उत्तररामचरिते

चित्रदर्शनो नाम प्रथमोऽङ्कः॥ १॥

दुर्मुख इति। देवी=राजमहिषी, इतः=अस्मात्स्थानात्, इतः=अस्मिन्स्थाने, सप्तम्यर्थे सार्वविभक्तिकस्तसिः। आगच्छत्विति शेषः।

सीतेति। रघुकुलदेवतानाम् = रघुकुलदेवताभ्यः, प्राकृते चतुर्थीस्थाने षष्ठी प्रयुज्यते।

इतीति। सर्वे = सीतादुर्मुखादयः। अङ्कः = नाटकस्यांशः। अङ्कलक्षणं यथा साहित्यदर्पणे—'प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः। अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः।' इति।

इति श्रीशेषराजशर्म्मप्रणीतायामुत्तररामचरित-व्याख्यायां चन्द्रकला-ऽऽख्यायां चित्रदर्शनो नाम प्रथमोऽङ्कः॥ १॥

दुर्मुख—महारानी इधरसे पधारें, इधरसे।

सीता—रघुकुलके देवताओंको नमस्कार।

(सब जाते हैं)

यह प्रथम "चित्रदर्शन" नामक अङ्क समाप्त हुआ॥ १॥

द्वितीयोऽङ्कः

(नेपथ्ये ।)

स्वागतं तपोधनायाः ।

(ततः प्रविशत्यध्वगवेषा तापसी ।)

तापसी—अये, वनदेवता फलकुसुमगर्भेण पल्लवार्घ्येण दूरान्मामुपतिष्ठते ।

(प्रविश्य ।)

नेपथ्य इति । 'कुशीलवकुटुम्बस्य स्थली नेपथ्यमिष्यते ।' इत्युक्तत्वात् जवनिकातिरोहितं नटवेशभूषापरिग्रहस्थानं नेपथ्यमुच्यते । तपोधनायाः = तप एव धनं यस्यास्तस्याः, स्वागतम् = शोभनमागमनम् । आगमनमागतमित्यत्र 'नपुंसके भावे क्त' इति क्तप्रत्ययः ।

तत इति । ततः = अनन्तरं, स्वागतकरणाऽनन्तरमित्यर्थः । 'अध्वगवेशा= पथिकवेशधारिणी । अध्वान गच्छतीति अध्वगः, तस्य इव वेशो यस्याः सा, 'सप्तमीविशेषणे बहुव्रीहौ' इत्यत्र सप्तमीपदज्ञापितो व्यधिकरणबहुव्रीहिः । अध्वनीनोऽध्वगोऽध्वन्य' पान्थः पथिक इत्यपि ।' इत्यमर' ।

तापसीति । फलकुसुमगर्भेण = फलपुष्पयुक्तेनेत्यर्थः । पल्लवार्घ्येण = सपल्लवपूजाजलेन । अर्घार्थमुदकमर्घ्यं 'पादार्घाभ्यां च' इति यत् , 'मूल्ये पूजाविधावर्घः' इत्यमरः । पल्लवयुक्तमर्घ्यं पल्लवाऽर्घ्यं, तेन, 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्' इति मध्यमपदलोपी समासः । उपतिष्ठते = पूजयति, अतिथौ गुरुत्वेन देवतात्वारोपात् 'उपाद् देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम्' इत्यात्मनेपदम् ।

(नेपथ्यमें)

तपस्विनीजीका स्वागत है ।

(तब पथिक-वेषमें तपस्विनी प्रवेश करती है ।)

तापसी—अरे ! वनदेवता फल और फूलोंसे भरे पल्लवसहित अर्घ्यके द्वारा दूरसे ही मेरा सत्कार करती है ।

(प्रवेश करके)

वनदेवता—(अर्घ्यं विकीर्य ।)

यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं यदपि तपसां योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः ॥ १ ॥

तापसी—किमत्रोच्यते ?

वनदेवतेति । विकीर्य = दत्त्वेत्यर्थः ।

यथेच्छेति । इदं वनं वः यथेच्छाभोग्यम् , अयं मे सुदिवसः (अस्ति); हि सतां सद्भिः सङ्गः कथमपि पुण्येन भवति । तरुच्छाया, तोयं, यदपि तपसां योग्यम् अशनं फलं वा मूलं वा, तदपि इह वः पराऽधीनं न इत्यन्वयः । इदं = पुरोवर्ति, वनं = विपिनं, वः = युष्माकम् , आदराऽर्थकं बहुवचनं बोध्यम् । यथेच्छाभोग्यम्=इच्छानुसारं समन्तात् उपभोगाऽर्हम् । इच्छामनतिक्रम्य यथेच्छं, यथाऽर्थे अव्ययीभावः । भोक्तुं योग्यं भोग्यम् , 'ऋहलोर्ण्यत्' इति ण्यत् 'चजोः कु घिण्यतोः' इति कुत्वम् , समन्ताद्भोग्यम् आभोग्यं, यथेच्छम् आभोग्यं, 'सुप्सुपा' समासः । अयं = वर्तमानः, मे = मम, सुदिवसः = शोभनं दिनं, सज्जनसंपर्कादिति भावः । उक्तमर्थमर्थान्तरन्यासेन द्रढयति–हीति । हि = यतः, 'हि हेतावधारणे ।' इत्यमरः । सतां=सज्जनानां, सद्भिः = सज्जनैः, सङ्गः=सम्पर्कः, कथमपि = कष्टेन, पुण्येन = धर्मेण, भवति । तरुच्छाया = वृक्षच्छाया, तोयं = जलं, यदपि तपसां = नियमानां, योग्यम् = उचितम् , अशनं = भक्षणीयं, फलं वा=प्रसवो वा, मूलं वा = कन्दं वा, तदपि = फलं मूलं च, इह = अस्मिन्वने, वः = युष्माकं, पराऽधीनम् = अन्याऽऽयत्तं, न = नाऽस्तीत्यर्थः । इदं वनं त्वदीयमेवाऽतोऽत्रत्यानां फलमूलानामुपभोगेनाऽनुग्राह्या वयमिति भावः । अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । शिखरिणी वृत्तं—'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।' इति तल्लक्षणात् ॥ १ ॥

तापसीति । अत्र=अस्मिन् विषये, किमुच्यते=न किमपि वक्तव्यमिति भावः ।

वनदेवता—(अर्घ्य देखकर) यह वन आपकी इच्छाके अनुसार उपभोगयोग्य है, क्योंकि सज्जनोंका सज्जनोंके साथ संपर्क कष्टमय पुण्यसे होता है । वृक्षकी छाया, जल और जो कुछ तपस्याके योग्य भक्ष्य पदार्थ—फल अथवा मूल है, वह भी यहाँ आपका पराधीन नहीं है ॥१॥

तापसी—इसपर क्या कहा जाय ?

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥
(उपविशतः)

वनदेवता—कां पुनरत्रभवतीमवगच्छामि ?

प्रियेति । वृत्तिः प्रियप्राया वाचि नियमो विनयमधुरः, मतिः प्रकृत्या कल्याणी, परिचयः अनवगीतः—तत् इदं पुरो वा पश्चाद्वा अविपर्यासितरसम् अनुपधि विशुद्धं साधूनां रहस्यं विजयते इत्यन्वयः । वृत्तिः=व्यवहारः, प्रियप्राया= प्रियप्रचुरा, अतिशयप्रीतिकरो व्यापार इत्यर्थः । वाचि = वचने, नियमः = प्रकारः, विनयमधुरः = नम्रतामनोहरः । मतिः = बुद्धिः, प्रकृत्या = स्वभावेन, 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया, कल्याणी = मङ्गलरूपा । परिचयः = संस्तवः, 'संस्तवः स्यात्परिचय' इत्यमरः । अनवगीतः = अनिन्दितः, दोषशून्यत्वादिति भावः । तत् = प्रसिद्धम् , इदम् = अभिधीयमानं, पुरो वा=संगमात्पूर्वं वा, पश्चाद्वा= संगमाऽनन्तरं वा, अविपर्यासितरसम् = अनुल्लङ्घिताऽनुरागं, विपर्यासः सञ्जातोऽस्येति विपर्यासितः 'तदस्य सञ्जातं तारकादिभ्य इतच्' इतीतच्प्रत्ययः, तारकादिराकृतिगणः । 'स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये' इत्यमरः । अविपर्यासितो रसो यस्य तत् । अनुपधि = छलशून्यम् , (अतएव) विशुद्धं = पवित्रं, साधूनां = सज्जनानां, रहस्यं=चरितं, रहसि भवं रहस्यं, दिगादित्वाद्यत् । विजयते= सर्वोत्कर्षेण वर्तते इत्यर्थः, 'विपराभ्यां जेः' इत्यात्मनेपदम् । अत्राऽप्रस्तुतात्साधुरहस्यसामान्यात्प्रस्तुतवनदेवतारहस्यरूपविशेषस्य गम्यमानत्वादप्रस्तुतप्रशंसाऽलङ्कारः । शिखरिणी वृत्तम् ॥ २ ॥

वनदेवतेति । अवगच्छामि=जानामि, का नाम भवतीति प्रश्नरूपो वाक्यार्थः ।

व्यवहार अतिशय प्रीतिकारक, वचनमें नियम, नम्रतासे मनोहर, बुद्धि स्वभावसे ही मङ्गलरूपा और परिचय अनिन्दित तथा संगमसे पहले या पीछे प्रेमका उल्लङ्घन नहीं करनेवाला, निश्छल और विशुद्ध, ऐसा सज्जनोंका चरित्र सबसे उत्कृष्ट होता है ॥ २ ॥

(दोनों बैठती हैं ।)

वनदेवता—आपको मैं क्या समझूँ ?

तापसी—आत्रेय्यस्मि ।

वनदेवता—आर्ये आत्रेयि ! कुतः पुनरिहागम्यते ? किंप्रयोजनो दण्डकारण्योपवनप्रचारः ?

आत्रेयी—

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि ॥३॥

वनदेवता—यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचे-

---

तापसीति । आत्रेयी = अत्रेरपत्यं स्त्री आत्रेयी, 'इतश्चाऽनिञः' इति ढक्, तदन्तात् 'टिड्ढाणञ्' त्यादिना ङीप् । स्त्रीनाम्नस्तद्धिताऽन्तत्वे 'अयुजाक्षरमाकारान्तं स्त्रियै तद्धितम्' इति पारस्करगृह्यसूत्रोक्तिः प्रमाणम् ।

वनदेवतेति । कुतः = कस्मात् स्थानात्, प्रचारः = सञ्चारः ।

अस्मिन्निति । अस्मिन् प्रदेशे अगस्त्यप्रमुखा भूयास उद्गीथविदो वसन्ति, तेभ्यो निगमान्तविद्याम् अधिगन्तुम् इह वाल्मीकिपार्श्वात् पर्यटामि इत्यन्वय । अस्मिन् प्रदेशे = दण्डकारण्याऽऽख्ये स्थाने, अगस्त्यप्रमुखाः = अगस्त्यादयः । भूयासः = बहव, उद्गीथविदः = ब्रह्मवेत्तारः, 'ओमित्येकाक्षरमुद्गीथमुपासीत' इति छान्दोग्योपनिषत्प्रमाणेन ब्रह्मणि उद्गीथदृष्टिं कुर्वन्त इत्यर्थः । वसन्ति = निवसन्ति । तेभ्यः = अगस्त्यादिमुनिभ्यः, 'आख्यातोपयोगे' इति पञ्चमी, निगमान्तविद्या = वेदान्तविद्याम्, अधिगन्तुं=ज्ञातुम्, इह = दण्डकारण्ये, वाल्मीकिपार्श्वात् = वाल्मीकिसमीपात्, पर्यटामि = भ्रमामि । 'पुरा कल्पे तु नारीणा मौञ्जीबन्धनमिष्यते । अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥' इति यमोक्तेस्तु आत्रेय्या वेदाऽध्ययनं संगच्छते । **इन्द्रवज्रा** वृत्तम् ॥ ३ ॥

वनदेवतेति । पुराणब्रह्मवादिनं = पुरातनवेदाऽध्यापकं, प्राचीनं ब्रह्मप्रतिपादकं । वा ब्रह्म वेदं शुद्धचैतन्यं वा वदतीति तच्छीलो ब्रह्मवादी, ताच्छील्ये णिनिः, 'वेदस्तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः' इत्यमरः । पुराणश्चासौ ब्रह्मवादी

तापसी—मैं आत्रेयी हू ।

वनदेवता—आर्ये आत्रेयि ? आप कहाँसे आ रही है, और दण्डकारण्यमें घूमनेका क्या प्रयोजन है ?

आत्रेयी—इस स्थानमें उद्गीथको जाननेवाले अगस्त्य आदि बहुतेरे ऋषि रहते हैं, उनसे वेदान्तविद्या पढनेके लिए यहाँ वाल्मीकि ऋषिके पाससे आ रही हूं ॥ ३ ॥

वनदेवता—जब कि और भी मुनिलोग पुराने ब्रह्मवादी उन्हीं वाल्मीकि ऋषिकी

तसमृषिं ब्रह्मपारायणायोपासते, तत्कोऽयमार्याया: प्रवासः ?

आत्रेयी—तस्मिन् हि महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासोऽङ्गीकृतः।

वनदेवता—कीदृशः ?

आत्रेयी—तत्र भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम् । तत्खलु न केवलं तस्य, अपि तु तिरश्चामप्यन्तःकरणानि तत्त्वान्युपस्नेहयति ।

पुराणब्रह्मवादी तम् । प्राचेतसं = वाल्मीकिं, प्रचेतसोऽपत्यं पुमान्प्राचेतसस्तं वरुण-पुत्रम् । ब्रह्मपारायणाय = वेदपारगमनाय, वेदान्ताऽध्ययनायेत्यर्थः, । पारस्याऽयनं पारायणं 'पूर्वपदात्संज्ञायामगः' इति णत्वम् । ब्रह्मणः पारायणं ब्रह्मपारायणं तस्मै । उपासते = गुरुत्वेन सेवन्त इत्यर्थः, 'गुरुशुश्रूषया विद्या पुष्कलेन धनेन च । अथवा विद्यया विद्या' इति स्मरणादिति भावः । प्रवासः = देशान्तरगमनम् ।

आत्रेयीति । तस्मिन् = वाल्मीकेराश्रमे । अध्ययनप्रत्यूहः = पठनविघ्नः, 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः ।

आत्रेयीति । भगवतः = वाल्मीकेः, समीप इति शेषः । केनाऽपि = अविज्ञात-नामधेयेन, स्तन्यत्यागमात्रके = स्तन्यत्यागाऽनन्तरोद्भूते, शैशवे इत्यर्थः । त्यजनं त्यागः, भावे घञ् । स्तनयोर्भवं स्तन्यं, 'शरीरावयवाच्च' इति यत् । स्तन्यत्यागः मात्रा (परिमाणम्) यस्य तत् स्तन्यत्यागमात्रकं तस्मिन् , समासान्तः कप् । स्तन्यत्यागपदेन स्तन्यत्यागकालो लक्ष्यते । दारकद्वयं = शिशुद्वितयम् , उपनीतं = समर्पितम् , तत् = दारकद्वयम् , तस्य = भगवतो वाल्मीकेरित्यर्थः, तिरश्चामपि = पशुपक्ष्यादीनामपि, अन्तःकरणानि = मनोबुद्ध्यादीनि, तत्त्वानि = पदार्थान् । 'न केवलम्' इत्यतोऽनन्तरम्—'ऋषीणामपि तु सचराऽचराणां भूतानामान्त-राणि' इति पुस्तकान्तरस्थः पाठस्तत्र—सचराऽचराणा = स्थावरजङ्गमसहितानाम् ,

---

सपूर्ण वेदका अध्ययन करनेके लिए सेवा करते हैं, तब क्यों आर्याका यह प्रवास है ?

आत्रेयी—वहाँ पढ़नेमें बड़ा विघ्न आ पड़ा, इस कारण मैने इस दीर्घ प्रवासको स्वीकृत किया है ।

वनदेवता—कैसा (विघ्न) ?

आत्रेयी—वहापर भगवान् वाल्मीकिके समीपमें किसी देवताने सब तरहसे अनूठे और दूध छोड़नेकी बाल्यावस्थामें विद्यमान दो लड़कोंको छोड़ा है, वे लड़के केवल उन्हींके नहीं, बल्कि पशु-पक्षियोंके भी अन्तःकरणरूप तत्त्वोंको स्नेहयुक्त करते हैं ।

वनदेवता—अपि तयोर्नामसंज्ञानमस्ति ?

आत्रेयी—तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः।

वनदेवता—कीदृशः प्रभावः ?

आत्रेयी—तयोः किल सरहस्यानि जृम्भकास्त्राणि जन्मसिद्धानीति।

वनदेवता—अहो नु भोश्चित्रमेतत्।

आत्रेयी—तौ च भगवता वाल्मीकिना धात्रीकर्मतः परिगृह्य पोषितौ

भूतानां = प्राणिनाम्, आन्तराणि = मनोबुद्धयादीनि इत्यर्थः। उपस्नेहयति = स्नेहवन्ति करोति, स्नेहवच्छब्दात् 'तत्करोती'ति णिच् मतुब्लोपश्च।

वनदेवतेति। नामसंज्ञानं = नाम्नः (अभिलापकशब्दस्याभिधानस्येत्यर्थः) संज्ञानम् (सङ्केतसम्बन्धकरणं, यद्वा बोधः), अपिशब्दः प्रश्नार्थकः।

आत्रेयीति। तयैव किल देवतया = वाल्मीकिसमीपे दारकद्वयमानेत्र्येत्यर्थः, गङ्गयेति यावत्। नामनी = अभिधाने, अत्र वक्ष्यमाणस्य 'आख्यात' इति पदस्य लिङ्गविभक्त्योर्विपरिणामेन 'आख्याते' = कथिते इत्यर्थो बोध्यः। प्रभावश्च = सामर्थ्यं च, आख्यातः = कथितः।

आत्रेयीति। तयोः = कुशलवयोः, सरहस्यानि = प्रयोगसंहारमन्त्रसहितानि, जन्मसिद्धानि=जन्मनः सिद्धानि, न तूपदेशादिति भावाऽर्थः। '**आजन्मसिद्धानी**'-ति पाठे जन्मन आरभ्य सिद्धानीत्यर्थः।

वनदेवतेति। चित्रमेतत् = दुरधिगमानामेषा जृम्भकास्त्राणा गुरूपदेशमन्तरेण स्वतः सिद्धिराश्चर्यमेतदिति भावः।

आत्रेयीति। धात्रीकर्मतः = उपमातृक्रियया, '**धात्रीकर्मवत्सलताम्**' इति पाठे उपमातृक्रियया स्निग्धत्वमित्यर्थः। परिगृह्य=स्वीकृत्य, पोषितौ=क्षीरादिना

वनदेवता—क्या आप उन दोनोंका नाम जानती है ?

आत्रेयी—उन्हीं देवताने उन दोनोंका 'कुश और लव' यह नाम और प्रभाव भी बतलाया है।

वनदेवता—कैसा प्रभाव ?

आत्रेयी—उन दोनोंको मन्त्रसहित जृम्भकास्त्र जन्मसिद्ध है।

वनदेवता—ओह ! यह आश्चर्य है।

आत्रेयी—भगवान् वाल्मीकिने उन दोनोंको लेकर धात्रीकर्मसे पोषण और रक्षण किया

रक्षितौ च, निर्वृत्तचौलकर्मणोस्तयोस्त्रयीवर्जमितरास्तिस्रो[1] विद्याः सावधानेन परिनिष्ठापिताः । तदनन्तरं भगवतैकादशे वर्षे क्षात्रेण कल्पेनोपनीय त्रयीविद्यामध्यापितौ । न त्वेताभ्यामतिदीप्तिप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति । यतः ।

वर्द्धितौ, रक्षितौ च=गोपितौ च, भयहेतुभ्य इति शेषः । निर्वृत्तचौलकर्मणोः=निष्पन्नचूडासंस्कारयोः । निर्वृत्तं चौलकर्म ययोस्तौ निर्वृत्तचौलौ तयोः, डलयोरभेदः । चूडासंस्कारकालस्तु 'चूडाकर्म द्विजातीना सर्वेषामेव धर्मतः । प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्' ॥ इति मनूक्त्या बोद्धव्यः । तयोः कुशलवयोः, त्रयीवर्जं = वेदं वर्जयित्वा, अज्ञान्यपीति शेषः । इतराः = अपराः, तिस्रो विद्याः = त्रिसंख्याका विद्याः, आन्वीक्षिकी वार्ता दण्डनीतिश्चेत्यर्थः । यत्तु 'इतरा' इत्यस्य व्याकरणाद्या विद्या इति केषाञ्चिद्व्याख्यानं तन्न, उपनयनात्प्राक् वेदप्रधानाङ्गव्याकरणाऽध्ययनस्याऽनुपपत्तेः, 'इतरास्तिस्रो विद्या' इति कथनेन विद्याचातुर्विध्यं प्रतीयते, तच्च 'आन्वीक्षिकीत्रयीवार्तादण्डनीतयश्चतस्रो विद्या' इति कौटिल्योक्तिप्रकारकम्, तत्र व्याकरणाऽभावाच्च । सावधानेन=सप्रणिधानेन । अवधानेन सहितः साऽवधानस्तेन, 'अवधानं समाधान प्रणिधानं तथैव च' इति कोषः । परिनिष्ठापिताः = सम्यङ् निष्पादिताः, वाल्मीकिनेति शेषः । एकादशे = गर्भादेकादशानां पूरणे, 'तस्य पूरणे डट्' इति डट्, उपनयनकालश्च यथोक्तो भगवता मनुना—'गर्भाऽष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥' इति क्षात्रेण=क्षत्रियसम्बन्धिना, इदमर्थेऽण् । कल्पेन = विधिना, उपनीय = उपनयनं कृत्वा, त्रयीविद्या = वेदविद्याम्, अध्यापितौ = पाठितौ, ताविति शेषः, 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ' इति अणि कर्तुः कर्मत्वम् । अतिदीप्तिप्रज्ञाभ्याम् = अतिशयप्रतिभाज्ञानयुक्ताभ्याम् । दीप्तिश्च प्रज्ञा च दीप्तिप्रज्ञे, अति अत्यन्तं दीप्तिप्रज्ञे ययोस्तौ अतिदीप्तिप्रज्ञौ, ताभ्याम् । **'अतिदीप्तप्रज्ञाभ्याम्'** इति पाठे अतिप्रखरमतिभ्यामित्यर्थः, सहयोगे 'सहयुक्तेऽप्रधाने' इति तृतीया । अध्ययनयोगः=पठनसम्बन्धः, अतिशयमेधान्विताभ्यामाभ्यां सहाऽस्माकमध्ययनं दुःशकमिति भावः ।

चूडाकर्म होनेके बाद सावधानीसे वेदको छोड़कर और तीन (आन्वीक्षिकी, वार्ता और दण्डनीति) विद्याओंका उन्हें अध्ययन कराया । फिर भगवान्‌ने ग्यारहवें साल्में क्षत्रियकी विधिसे उपनयन संस्कार कर उन्हें वेद पढ़ाया । परन्तु अत्यन्त प्रतिभा और ज्ञानसे युक्त इन दोनोंके साथ हम लोगोंको पढ़ना कठिन है । क्योंकि—

[1] 'तिस्र' इति कुत्रचित्पुस्तके नास्ति ।

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति हि पुनर्भूयान् भेदः फलं प्रति, तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥ ४ ॥

वनदेवता—अयमध्ययनप्रत्यूहः ?

वितरतीति । गुरुः यथा प्राज्ञे तथैव जडे विद्यां वितरति, तयोर्ज्ञाने शक्तिं तु न करोति वा न अपहन्ति । फलं प्रति पुनः भूयान् भेदो भवति । तद् यथा शुचिः मणिः बिम्बग्राहे प्रभवति, मृदादयः न (प्रभवन्ति) इत्यन्वयः । गुरुः = आचार्यः, यथा=येन प्रकारेण, प्राज्ञे=बुद्धिमति, सम्प्रदानस्याऽपि अधिकरणत्वविवक्षया वैषयिकी सप्तमी । तथैव = तेन प्रकारेणैव, न तु भेदबुद्ध्येत्यर्थः । जडे = मन्दबुद्धौ, विद्यां= वेदादिं, वितरति = ददाति । तयोः=प्राज्ञजडयोः, ज्ञाने=बोधे, शक्तिं तु=सामर्थ्यं तु, योग्यतां त्विति भावः । करोति=विदधाति, वा=अथ वा, न अपहन्ति=न नाशयति, गुरुः प्राज्ञस्य बोधे अपूर्वां शक्तिं नोत्पादयति न वा मन्दमतेर्बोधशक्तिं नाशयति, पर्जन्यवत्तस्योभयत्राऽपि ज्ञानोत्पादने तुल्यरूपैव प्रवृत्तिरिति भावः । खलु=निश्चयेन । फलं प्रति = परिणामं प्रति, ज्ञान इति भावः 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया । भूयान=अधिकः, भेदः=वैषम्यं, भवति=जायते, तत=भेदभवनं, यथा=येन प्रकारेण, शुचिः = निर्मलः, मणिः = हीरकादिः, बिम्बग्राहे=प्रतिबिम्बग्रहणे, प्रभवति=समर्थो भवति, मृदादयः=मृत्तिकाप्रभृतयः, आदिपदेन वृक्षादिपरामर्शः न प्रभवन्तीति वचनविपरिणामः कार्यः, न समर्था भवन्तीत्यर्थः । एतच्छात्राणां बुद्धेरेव तारतम्यं यत् तुल्यरूपेऽपि गुरूपदेशे केचिद् द्रागेव विनीता भवन्ति केचिद्विलम्बेन, अतोऽत्र न गुरुरपराध्नोतीति भावः । **अत्राऽप्रस्तुतप्रशंसा, यथासंख्यमुपमा** चेत्येतेषामङ्गाङ्गिभावेन **सङ्करः** । **हरिणी वृत्तम्** ॥ ४ ॥

वनदेवतेति । अध्ययनप्रत्यूहः = पठनविघ्नः, 'विघ्नोऽन्तरायः प्रत्यूहः' इति कोशः ।

गुरु जिस तरह बुद्धिमान् छात्रको, उसी तरह मन्दबुद्धि छात्रको भी विद्या देता है । उन दोनोंके बोधमें न सामर्थ्य देता है और न उसका नाश ही करता है । ऐसा होनेपर भी फलमें बहुत भेद होता है, जैसे कि हीरा आदि निर्मल मणि प्रतिबिम्बके ग्रहण करनेमें समर्थ होते हैं, परन्तु मिट्टी आदि पदार्थ प्रतिबिम्ब ग्रहण करनेमें समर्थ नहीं होते । ४ ॥

वनदेवता—पढनेमें यही विघ्न है ?

आत्रेयी—अन्यच्च ।

वनदेवता—अथापरः कः ?

आत्रेयी—अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुप्रपन्नः । तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन वध्यमानं ददर्श । आकस्मिकप्रत्यवभासां देवीं वाचमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत् ।

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।

आत्रेयीति । अन्यच्च = अपरञ्च, प्रत्यूहोऽस्तीति शेषः ।

आत्रेयीति । सः = पूर्वोक्तः, ब्रह्मर्षिः = वाल्मीकिः, माध्यन्दिनसवनाय = मध्याह्नस्नानाय, तमसां = तमसानामधेयाम् , अनुप्रपन्नः = प्राप्तः, युग्मचारिणोः = मिथुनचारिणोः ,क्रौञ्चयोः = क्रुञ्चोः, एकम्=एकतरं, पुरुषक्रौञ्चमित्यर्थः । वध्यमानं = हन्यमानं 'विध्यमानञ्च' इति पाठे शरेण क्रियमाणवेधनमित्यर्थः । आकस्मिकप्रत्यवभासाम् = निर्हेतुकाविर्भावाम् , अचिन्तितोपनतामित्यर्थः , स्वतः सिद्धामिति यावत् । आनुष्टुभेन = अनुष्टुभा; अनुष्टुवेव आनुष्टुभं, तेन, स्वार्थिकोऽण्प्रत्ययः, 'क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति वचनात् क्लीबत्वम् । परिणता = जातपरिणामाम् , अभ्युदैरयत् = उच्चारयामास । अनुष्टुप्छन्दोलक्षणं यथा—'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । गुरु षष्ठं तु पादानां शेषेष्वनियमो मतः ॥' इति छन्दोमञ्जरी ।

मा निषादेति । हे निषाद ! त्वं शाश्वतीः समाः प्रतिष्ठां मा अगमः, यत् क्रौञ्चमिथुनात् काममोहितम् एकम् अवधीः इत्यन्वयः । हे निषाद = हे व्याध, निषीदन्ति अस्मिन्पापानीति निषाद इत्ययं शब्दो योगार्थे प्रयुक्तः । त्वं, शाश्वतीः = सनातनीः, समाः = वर्षाणि, 'कालाऽध्वनोरत्यन्तसंयोगे' इति द्वितीया । प्रतिष्ठा = स्थितिं, मा अगमः = न प्राप्नुहि, चिरकालपर्यन्तं त्वं सुखं न लभस्वेत्यर्थः, 'माङि

आत्रेयी—और भी ।

वनदेवता—और दूसरा क्या विघ्न है ?

आत्रेयी—अनन्तर एक दिन वे महर्षि (वाल्मीकि) मध्याह्नस्नानके लिए तमसा नदीमें पहुँचे । वहाँपर साथ-साथ चलते हुए (नर और मादा) दो क्रौञ्च-पक्षियोंमेंसे एक (नर)को उन्होंने व्याधसे मारे जाते हुए देखा । तब उन्होंने अकस्मात् आविर्भूत अनुष्टुप् छन्दसे परिणत आर्षवाणीका उच्चारण किया—

हे व्याध ! जो कि तूने क्रौञ्च पक्षीके जोड़ेमेंसे काममोहित एक (नर) को

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥

वनदेवता—चित्रम् ! आम्नायादन्यत्र नूतनश्छन्दसामवतारः ।

आत्रेयी—तेन हि पुनः समयेन तं भगवन्तमाविर्भूतशब्दप्रकाशमृषिमुपसंगम्य भगवान् भूतभावनः पद्मयोनिरवोचत्—'ऋषे ! प्रबुद्धोऽसि

लुङ्' इत्यनेन माङि उपपदे लुङ्, 'न माङ्योगे' इत्यडागमनिषेधस्याऽभावस्त्वार्षः । अत्र 'न माङ्योगे' इत्यडागमनिषेधस्य परिपालनार्थं भवभूतिभावतलस्पर्शिन्या 'त्वमगम' इत्यत्र 'तु अम गम' इति पदत्रैविध्यं स्वीकृत्य हे अम = लक्ष्मीरहित ! अविद्यमाना मा लक्ष्मीर्यस्य तत्सम्बुद्धौ, त्वं प्रतिष्ठा मा गम इति व्याख्यातं, तत्तु क्लिष्टत्वादुपेक्षितम् । एव च भावभूतार्थबोधिन्या पूर्वोक्तनिषेधशास्त्रस्य मर्यादारक्षणार्थं 'नाऽयं माङ् किन्तु माशब्दः अतो 'न माङ्योगे' इति अडागमनिषेधो न' इति यदुक्त, तन्न सम्यक् । एवं चेत्तर्हि कुतो लुङ् प्रसङ्गः ? 'माङि लुङ्' इत्यस्याऽप्रसक्तेः, क्रियमाणशापस्योत्तरकालसम्बन्धाल्लुङोऽनवकाशाच्च, ततोऽस्मद्व्याख्यानमेव समीचीनमिति दिक् । शापकरणस्य हेतुमाह—**यदित्यादिना** । यत् = यस्मात् , क्रौञ्चमिथुनात् = क्रौञ्चपक्षिद्वन्द्वात् , क्रौञ्ची च क्रौञ्चश्च क्रौञ्चौ, 'पुमान्स्त्रिया' इत्येकशेषः । 'क्रुङ् क्रौञ्चः' इत्यमरः, क्रौञ्चयोर्मिथुनं, तस्मात् , 'स्त्रीपुंसोर्मिथुनं द्वन्द्वम्' इत्यमरः । काममोहितं = कामेन = मदनेन, मोहितम् = संजातमोहम् , एकं = पुमांसम् , अवधीः = हतवानसि ॥ ५ ॥

वनदेवतेति । आम्नायात् = वेदात् , 'श्रुतिः स्त्री वेद आम्नायस्त्रयी' इत्यमरः, अन्यत्र = अन्यस्मिन् , लोक इत्यर्थः । 'अन्य' इति पाठे भिन्न इत्यर्थः, नूतनः = नवीनः, अश्रुतपूर्व इत्यर्थः । छन्दसां=छन्दसः, बहुवचनं तु तत्कालादारभ्य भाविनीं क्रियामाश्रित्येत्यवधेयम् , अवतारः = आविर्भावः ।

आत्रेयीति । समयेन = कालेन, 'समयाः शपथाचारकालसिद्धान्तसंविदः' । इत्यमरः, भूतभावनः = लोकोत्पादकः । भूतपदेन भूताधारो लोको लक्ष्यते, तथा च भूतं भावयतीति भूतभावनः, णिजन्ताद् भूधातोर्बाहुल्येन कर्तरि ल्युट् , पद्मयोनिः

दिया, इस कारण तू बहुत कालतक स्थिति मत प्राप्त कर ॥ ५ ॥

वनदेवता—आश्चर्य है ! वेद से अन्यत्र (लोकमें) भी छन्दका नया आविर्भाव होगया ।

आत्रेयी—उस समय जिनको शब्दप्रकाश आविर्भूत हो गया है—ऐसे भगवान् वाल्मीकि ऋषिके पास आकर लोककी उत्पत्ति करनेवाले भगवान् ब्रह्माने कहा—'ऋषि जी !

वागात्मनि ब्रह्मणि । तद् ब्रूहि रामचरितम् । अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु । आद्यः कविरसि' इत्युक्त्वान्तर्हितः । अथ स भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय ।

कमलोद्भव', ब्रह्मेत्यर्थः । पद्मं=विष्णुनाभिकमलम् , योनिः=कारणं यस्य स पद्मयोनिः । आविर्भूतशब्दप्रकाशम्=प्रादुर्भूतशब्दज्योतिष्कम् । आविर्भूतः शब्दप्रकाशो यस्मात्तम् । वागात्मनि=शब्दस्वरूपे, ब्रह्मणि=शब्दब्रह्मणीत्यर्थ', प्रबुद्धोऽसि=प्रकृष्टज्ञानोऽसि, तत् = तस्माद्धेतो', शब्दब्रह्मणि तव प्रकृष्टं ज्ञानं सम्पन्नमत', रामचरित = रामस्य चरितं = रामकथा, ब्रूहि = कथय । तत्प्रतिपादने योग्यतावैशिष्ट्योत्पादनार्थं वरमपि वितरति तावत्पद्मयोनि**रव्याहतेत्यादिना** । अव्याहतज्योतिः = अकुण्ठितप्रकाशम् । अव्याहतं ज्योतिर्यस्य तत् , आर्षम् = ऋषिसम्बन्धि, योगजन्यमित्यर्थ' । ते = तव, **'प्रातिभम्'** इत्यधिकः क्वाचित्कः पाठस्तत्र प्रतिभोत्पन्नमित्यर्थः, प्रतिभालक्षणं च 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।' इत्युक्तप्रकारं बोध्यम् , चक्षुः = नेत्र, ज्ञानमित्यर्थः । प्रतिभातु = प्रकाशितं भवतु, चक्षुरादीन्द्रियजन्यं ज्ञानं तु प्रत्यक्षमेव, अत्र रामचरितप्रतिपादने त्रैकाल्यज्ञानमपेक्षितमतो लक्षणया एषोऽर्थः । आद्य =प्रथम', कवि = कवयिता, तत्कालात्प्राक् परमेश्वर एव 'कविः क्रान्तदर्शी'त्युक्तनयात् कविशब्दः प्रयुक्त', अतो लोके त्वमेव आद्यः कविरसीत्यभिप्रायः, अन्तर्हितः = परोक्षता गत । अथ = पद्मयोनेरन्तर्धानानन्तरमित्यर्थ', प्राचेतसः = वाल्मीकि', शब्दब्रह्मण =शब्दरूपस्य ब्रह्मणः, विवर्तं=परिणामविशेषम् , इतिहासं = पुरावृत्तं, रामायण = रामायणनामकं महाकाव्यम् । रामस्याऽयन = गमन, 'ये गत्यर्थास्ते ज्ञानाऽर्थाः' इति न्यायेन ज्ञानमित्यर्थः, यस्मिंस्तत् रामायणम् । प्रणिनाय = निर्मितवान् । अत्र विवर्तपदेन 'अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः' इत्युक्तेर्वस्तुनः स्वस्वरूपाऽपरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिकारकस्य परिणामविशेषस्य बोधो भवति, तथा च शब्दब्रह्मणः स्वस्वरूपपरित्यागं विनैवाऽत्राऽपि रामायणरूपस्वरूपाऽन्तरेण मिथ्याप्रतीतिर्भवति ।

तुम शब्दरूप ब्रह्ममें ज्ञानसम्पन्न हो गये हो । इस कारण रामचरित्रका वर्णन करो । अकुण्ठित प्रकाशवाला आर्ष (ऋषिसम्बन्धी) ज्ञान तुम्हें प्रकाशित हो । तुम आदि कवि हो ।' ऐसा कहकर वे अन्तर्हित हो गये । तब भगवान् वाल्मीकिने मनुष्योंमें सबसे पहले 'शब्दब्रह्मका' वैसा रूपान्तर रामायणनामक इतिहास बनाया ।

वनदेवता—हन्त ! पण्डितः संसारः ।

आत्रेयी—तस्मादेव हि ब्रवीमि 'तत्र महानध्ययनप्रत्यूह' इति ।

वनदेवता—युज्यते । ·

आत्रेयी—विश्रान्तास्मि भद्रे ! संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वनदेवता—इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रेयी—(सास्रम् ।) अप्येतत्तपोवनम् ? अप्येषा पञ्चवटी ? अपि सरिदियं गोदावरी ? अप्ययं गिरिः प्रस्रवणः ? अपि जनस्थानवनदेवता त्वं वासन्ती ?

वनदेवता—तथैव तत्सर्वम् ।

आत्रेयी—हा वत्से जानकि !

वनदेवतेति । हन्त = हर्षद्योतकमव्ययमिदम् । संसारः = सासारिको जनः, लक्षणया एषोऽर्थः । पण्डितः = विद्वान्, सरलया शैल्या रचितत्वाद्रामायणस्य पाठादेव सर्वेऽपि विद्वांसो भविष्यन्तीति भावः ।

वनदेवतेति । युज्यते = सम्बद्ध्यते, 'तत्र महानध्ययनप्रत्यूह' इति तव कथनं हेतुना सम्बध्यत इति भाव. ।

आत्रेयीति । विश्रान्ता = कृतविश्रामा ।

वनदेवतेति । पञ्चवटीं=पञ्चानां वटानां समाहारः पञ्चवटी ताम् 'तद्धितार्थो-त्तरपदसमाहारे च' इति समासस्तस्य 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञा, 'अकाराऽ-न्तोत्तरपदो द्विगु' स्त्रियामिष्टः' इति वचनात् 'द्विगोः' इति ङीप् ।

आत्रेयीति । सास्रम् = अश्रूणि विमुच्येत्यर्थः, अश्रुमोचनं तु रामपरित्यक्तायाः सीतायाः स्मरणाद्बोध्यम् । अपि = इदं प्रश्नार्थकमव्ययम् ।

वनदेवता—हन्त ! तब तो सासारिक जन भी पण्डित हो जायेंगे ।

आत्रेयी—इसी कारणसे कहती हू कि—'वहाँ पढनेमें बडा विघ्न है' ।

वनदेवता—ठीक है ।

आत्रेयी—कल्याणि ! मैं विश्राम कर चुकी । अब अगस्त्यजीके आश्रमका रास्ता बतलाइये ।

वनदेवता—यहाँसे पञ्चवटीमें प्रवेश कर गोदावरीके इस किनारेसे जाइए ।

आत्रेयी—(आँसू भरकर) क्या यह तपोवन है ? क्या यह पञ्चवटी है ? क्या यह गोदावरी नदी है । क्या यह प्रस्रवण पर्वत है ? और क्या आप जनस्थानकी वनदेवता वासन्ती हैं ?

वनदेवता—जैसा आप कहती हैं, सब वैसा ही है ।

आत्रेयी—हा बेटी सीते !

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम् ।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव नः करोति ॥ ६ ॥

वासन्ती—(सभयम् । स्वगतम् ।) कथं नामशेषेत्याह ? (प्रकाशम् ।) किमत्याहितं सीतादेव्याः ?

आत्रेयी—न केवलमत्याहितम्, सापवादमपि । (कर्णे ।) एवमिति ।

स इति । प्रासङ्गिकीनां कथानां विषयः दृश्यमानः स एष ते वल्लभबन्धुवर्गः नामशेषामपि त्वा नः प्रत्यक्षदृष्टामिव करोति इत्यन्वयः । प्रासङ्गिकीनाम्=अवसराऽऽगतानां, 'प्रसङ्गः स्यादवसरः' इत्यमरः । कथाना = वाक्यानां, विषयः = प्रतिपाद्यः, दृश्यमानः = अवलोक्यमानः, सः=पूर्वाऽनुभूतः, एषः = पुरोवर्ती, ते = तव वल्लभबन्धुवर्गः = प्रियबन्धुसमूहः तपोवनपञ्चवटीगोदावरीप्रस्रवणा अपि सीतायाः प्रिया बन्धुतुल्याश्च, वासन्ती तु सख्याद्वन्धुरेव; अतो वर्गपदोपादानेन समेषां समुच्चयः 'बन्धु' स्थाने 'शाखी'ति पुस्तकान्तरस्थ· पाठस्तस्य वृक्ष इत्यर्थः कार्य, सीतया जलसेचनात्परिवर्द्धनात्तेषां वृक्षाणामपि प्रियबन्धुत्वमवधेयम् । नामशेषामपि=अभिधानमात्राऽवशिष्टामपि, श्वापदबहुलेऽरण्ये त्यक्तत्वात् 'सीतोपरते'ति सम्भावनयेयमुक्तिः; त्वां = सीता, नः = अस्माक, प्रत्यक्षदृष्टामिव = साक्षादवलोकितामिव, प्रत्यक्षदृश्याम्' इति पाठे 'चक्षुर्ग्राह्याम्' इत्यर्थः । करोति = विदधाति, 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवती'ति न्यायादिति भावः । अत्र क्रियोत्प्रेक्षा भूतस्य सीतारूपपदार्थस्य प्रत्यक्षायमाणत्वेन वर्णनाद् भाविकालङ्कारश्चैत्यनयोरङ्गाङ्गिभावेन सङ्करः । इन्द्रवज्रोपेन्द्रवज्रयो' संमिश्रणादुपजातिर्वृत्तम् । 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इति तल्लक्षणम् ॥ ६ ॥

वासन्तीति । अत्याहितं = जीवनाऽपेक्षारहितं कर्म, जीवनेऽपि सन्देहात्मकं किं कर्म सीतायाः संवृत्तमिति भावः, 'अत्याहितं महाभीतिः कर्म जीवाऽनपेक्षि च' । इत्यमरः ।

आत्रेयीति । साऽपवादमपि = लोकाऽपवादसहितमपि, अत्याहितं जातमिति

प्रसङ्गसे आयी हुई कथाओंके विषयमें और दिखाई देते हुए ये ही तुम्हारे प्रियबन्धुओंसे नाममात्रसे अवशिष्ट भी तुमको हमें प्रत्यक्ष देखी जाती हुईकी तरह कर रहे हैं ॥ ६ ॥

वासन्ती—(डरके साथ मनही मन) क्यों 'नाममात्रसे अवशिष्ट' कहती हैं ? (प्रकाश भावसे) सीतादेवीकी कैसी महाभीति (अनर्थ) हुई है ?

आत्रेयी—केवल महाभीति ही नहीं, लोकापवाद भी (कानमें) ऐसा र''' ।

वासन्ती—हा ! दारुणो दैवनिर्घातः । (इति मूर्च्छति ।)

आत्रेयी—भद्रे ! समाश्वसिहि समाश्वसिहि ।

वासन्ती—हा प्रियसखि ! ईदृशस्ते निर्माणभागः । हा रामभद्र ! अथवा अलं त्वया । आत्रेयि ! अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीतायाः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ?

आत्रेयी—नहि नहि ।

वासन्ती—कष्टम् । आर्यारुन्धतीवसिष्ठाधिष्ठितेषु नः कुलेषु[1] जीवन्तीषु च वृद्धासु राज्ञीषु कथमिदं जातम् ?

सम्बन्धः । अत्याहितस्यैव का कथा ? लोकनिन्दाऽपि संजातेति भावः । कर्णे इति । 'लोकाऽपवादप्रयुक्तया रामाज्ञया लक्ष्मणेन श्वापदबहुलेऽरण्ये एकाकिनी सीता परित्यक्ते' त्ययमर्थः, एवमितीति वाक्यगर्भस्थो बोद्धव्यः ।

वासन्तीति । हा = खेदद्योतकमव्ययम् । 'अहह्रे'ति पाठे खेद आश्चर्य वा द्योत्यते, 'अहहेत्यद्भुते खेदे' इत्यमरः । दारुणः = तीव्रः, दैवनिर्घातः = दुर्भाग्यप्रहारः ।

वासन्तीति । ते = तव, निर्माणभागः = सृष्टिफलम् , ईदृशः = एतादृशः, यत्त्वमेतादृशे विजने महारण्य एकाकिनी परित्यक्तेति भावः । अथवा = पक्षान्तरे, त्वया अलं = तवोपालम्भेन कोऽपि लाभो नाऽस्तीत्यर्थः । किं वृत्तं = किं निष्पन्नं, प्रवृत्तिः = वार्ता ।

आत्रेयीति । नहि नहि=नैव काऽपि प्रवृत्तिरिति भावः, द्विरुक्तिरवधारणार्था ।

वासन्तीति । आर्याऽरुन्धतीवसिष्ठाऽधिष्ठितेषु = पूज्याऽरुन्धतीवसिष्ठाभ्यां कृत-

---

वासन्ती—हाय ! दुर्भाग्यका कठोर प्रहार है । (ऐसा कहकर मूर्च्छित होती है ।)

आत्रेयी—कल्याणि ! आप आश्वस्त हों, आश्वस्त हों ।

वासन्ती—हा प्रियसखि ! तुम्हारे जीवनका ऐसा परिणाम हुआ । हा रामभद्र ! अथवा तुम्हें उलहना देनेकी कोई आवश्यकता नहीं । आर्ये आत्रेयि ! पीछे सीताजीको छोड़कर लक्ष्मणजीके लौटने पर सीता का क्या हुआ, कुछ ज्ञान है ?

आत्रेयी—नहीं, नहीं ।

वासन्ती—कष्ट है । आर्या अरुन्धती और वसिष्ठसे अधिष्ठित रघुवंशमें बूढ़ी महारानियोंके जीते हुए यह कैसे हुआ ?

---

१. '—धिष्ठिते रघुकुलगृहे ?' इति पाठान्तरम् ।

आत्रेयी—ऋष्यशृङ्गसत्रे गुरुजनस्तदाऽऽसीत् । संप्रति परिसमाप्तं सत्रम् । ऋष्यशृङ्गेण च संपूज्य विसर्जिता गुरवः । ततो भगवत्यरुन्धती 'नाहं वधूविरहितामयोध्यां गच्छामी'त्याह । तदेव राममातृभिरनुमोदितम् । तदनुरोधाद्भगवतो वसिष्ठस्यापि श्रद्धा 'वाल्मीकिवनं गत्वा वत्स्याम'इति ।

वासन्ती—अथ स रामभद्रः किमाचारः ?

आत्रेयी—तेन राज्ञा राजक्रतुरश्वमेधः प्रक्रान्तः ।

स्थितिषु, नः = अस्माकम्, आत्मीयानामिति शेषः । वृद्धासु = जरतीषु, राज्ञीषु = देवीषु, कौसल्यादिष्विति भावः, इदं = गर्भिणीवधूपरित्यागात्मकं कर्म, कथं = केन प्रकारेण, जातं = सम्पन्नम्, ईदृशाऽकार्यकरणप्रवृत्तो रामः कथमरुन्धतीवसिष्ठादिभिर्न निवारित इति भावः ।

आत्रेयीति । तदा=तस्मिन् समये, सीतानिर्वासनकाल इति भावः । गुरुजनः= पूज्यजनः, अरुन्धतीवसिष्ठादिरित्यर्थः । ऋष्यशृङ्गसत्रे = ऋष्यशृङ्गयज्ञे, संपूज्य = समर्च्य, गुरवः = अरुन्धतीवसिष्ठादयः, विसर्जिताः = स्वस्वस्थानगमनार्थमनुमताः, वधूविरहितां = स्नुषावियुक्ता, सीतावियुक्तामिति भावः । अनुमोदितम् = अनुमोदनं कृतम् । तदनुरोधात्=तासामनुसरणाद्धेतोः, श्रद्धा = स्पृहा, स्पृहास्थाने 'परिशुद्धा वाचः' इति पुस्तकान्तरस्थः पाठः ।

वासन्तीति । अथ = सीतानिर्वासनाऽनन्तरं, सः = पूर्वोक्तः, किमाचारः = क आचारो यस्य सः, किंकर्मेत्यर्थः, अस्तीति शेषः, साम्प्रतं स किमनुतिष्ठतीति वाक्यार्थः, 'किमारम्भ' इति पुस्तकान्तरपाठः, तस्य किमारभते इति भावाऽर्थः ।

आत्रेयीति । तेन = पूर्वोक्तेन, राज्ञा = भूपेन, 'रामभद्रेण' इति नामग्राह-व्यतिरेकेण ईदृङ्निर्देशः प्रणयाऽभाववद्योतकः । राजक्रतुः = राजसाधारणो यज्ञः । यद्वा—क्रतूनां राजा राजक्रतुः, 'राजदन्तादिषु परम्' इति राजपदस्य पूर्वनिपातः, यज्ञश्रेष्ठ इत्यर्थः अश्वमेध इति भावः । प्रक्रान्तः = आरब्धः ।

आत्रेयी—उस समय गुरुजन ऋष्यशृङ्गके यज्ञमें थे । अभी बारह वर्षमें सम्पन्न होनेवाला यह समाप्त हो गया । ऋष्यशृङ्गने पूजा करके गुरुजनोंको विदा कर दिया । तब भगवती अरुन्धतीने—'मैं बहू सीतासे रहित अयोध्यामें नहीं जाऊँगी' ऐसा कहा । रामकी माताओंने उसी वचनका अनुमोदन किया । उसके अनुरोधसे भगवान् वसिष्ठकी भी 'हमलोग वाल्मीकिके वनमें जाकर रहें' ऐसी इच्छा हुई ।

वासन्ती—अब वे रामचन्द्र क्या कर रहे हैं ?

आत्रेयी—अब राजाने राजयज्ञ अश्वमेधका आरम्भ किया है ।

वासन्ती—अहह धिक् ! परिणीतमपि ?

आत्रेयी—शान्तम् ! नहि नहि ।

वासन्ती—का तर्हि यज्ञे सहधर्मचारिणी ?

आत्रेयी—हिरण्मयी सीताप्रतिकृतिर्गृहिणीकृता ।

वासन्ती—हन्त भोः !

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ? ॥ ७ ॥

वासन्तीति । धिक् = राममिति शेषः । परिणीतमपि = किं विवाहोऽपि कृतः, ऋते पत्न्याः यज्ञाऽनुष्ठानासंभवादियमाशङ्का ।

आत्रेयीति । शान्तं = निवृत्तं, भवेदिति शेषः, ईदृक्क्रूरताऽऽरोपणमिति अभ्याहार्यम् ।

वासन्तीति । तर्हि = यदि न परिणीतं तदा, सहधर्मचारिणी = सहधर्मिणी, पत्नीत्यर्थः ।

आत्रेयीति । हिरण्मयी = सुवर्णमयी, हिरण्यस्य विकारो हिरण्मयी 'तस्य विकार' इति मयट्प्रत्ययः, 'दाण्डिनायने'त्यादिना यलोपनिपातः, टित्वात् ङीप् । सीताप्रतिकृतिः = सीताप्रतिमा, गृहिणीकृता = सहधर्मिणीकृता ।

वासन्तीति । हन्त = हर्षद्योतकमव्ययम् । भो = सम्बोधनाऽर्थकमव्ययम् ।

वज्रादपीत्यादि । वज्रादपि कठोराणि कुसुमादपि मृदूनि लोकोत्तराणां चेतांसि को विज्ञातुम् अर्हति हि इत्यन्वयः । वज्रादपि=कुलिशादपि, कठोराणि = कठिनतराणि, कुसुमादपि = पुष्पादपि मृदूनि = कोमलतराणि, लोकोत्तराणां = भुवनश्रेष्ठानां, व्यवस्थाऽभावादुत्तरशब्दस्य न सर्वनामता, अतः सुडपि न । चेतांसि= हृदयानि, कः = जनः, विज्ञातुं = विशेषेण बोद्धुम् , अर्हति = योग्यो भवति, हि = निश्चयेन । अयं भावः—आत्मसमक्षमेव वह्निपरिशुद्धायाः सहधर्मचारिण्याः

वासन्ती—हाय ! धिक्कार है । विवाह भी कर लिया ?

आत्रेयी—शान्त ! नहीं नहीं ।

वासन्ती—तब यज्ञमें सहधर्मचारिणी (पत्नी) कौन है ?

आत्रेयी—सोनेकी सीताकी मूर्ति गृहिणी बनाई गई है ।

वासन्ती—ओह !

वज्रसे भी कठिन और फूलसे भी [illegible] ?॥७॥

आत्रेयी—विसृष्टश्च वामदेवानुमन्त्रितो मेध्याश्वः। प्रकल्पिताश्च तस्य यथाशास्त्रं रक्षितारः। तेषामधिष्ठाता लक्ष्मणात्मजश्चन्द्रकेतुर्दत्तदिव्यास्त्र-संप्रदायश्चतुरङ्गसाधनान्वितोऽनुप्रहितः।

वासन्ती—(सहर्षकौतुकास्रम्।) कुमारलक्ष्मणस्यापि पुत्र इति मातः! जीवामि।

अन्तर्वत्न्याः सीतायाः प्राकृतलोकापवादमात्रेण रामहृदयस्य कठोरत्वमेवं यज्ञाऽनुष्ठाने पत्न्या आवश्यकत्वेऽपि तथा परित्यक्तायां सीतायामनितरसाधारणया प्रणय-प्रवणया करुणया सीताप्रतिकृत्या एव कार्यनिर्वहणेन निरतिशयमार्दवं च द्योत्यते। अतस्तादृशस्य हृदयस्य ज्ञानमपि दुर्लभं विज्ञानस्य तु किमुतेत्यभिप्रायः। अत्र कठोरमृद्वोर्विरूपयोः सङ्घटनाद्विषमाऽलङ्कारोऽप्रस्तुतप्रशंसा चेत्यनयोरङ्गाङ्गि-भावेन सङ्करः॥ ७॥

आत्रेयीति। वामदेवानुमन्त्रितः = वामदेवेन (तन्नामकेन केनचिदृषिणा), अनुमन्त्रितः (मन्त्रेण संस्कृतः), मेध्याश्वः = यज्ञियहयः। मेधितुं योग्यो मेध्यः, 'ऋहलोर्ण्यत्' इति ण्यत्। विसृष्टः = मुक्तः। यथाशास्त्रं = शास्त्रवचनपूर्वकम्। शास्त्रमनतिक्रम्य यथाशास्त्रं, पदार्थाऽनतिवृत्तिरूपे यथाऽर्थे अव्ययीभावः। तस्य = मेध्याश्वस्य, रक्षितारः = रक्षकाः, प्रकल्पिताः = कल्पिताः, तेषां = रक्षकाणाम्, अधिष्ठाता = नियामकः, दत्तदिव्याऽस्त्रसम्प्रदायः = वितीर्णाऽलौकिकायुधसमूहः, दत्तो दिव्याऽस्त्रसम्प्रदायो यस्मै स इति चतुर्थीबहुव्रीहिः। चतुरङ्गसाधनाऽन्वितः = चतुरङ्गबलयुक्तः, हस्त्यश्वरथपदातिरूपयुद्धोपकरणयुक्त इत्यर्थः। चतुर्णामङ्गानां समाहारश्चतुरङ्गं, द्विगुसमासः। चतुरङ्ग च तत्साधनं, तेन अन्वितः। अनुप्रहितः= यज्ञियाऽश्वस्य पृष्ठतः प्रेषितः।

वासन्तीति। सहर्षकौतुकास्रम्=लक्ष्मणनामश्रवणाद्धर्षः, तस्य पुत्रोऽपि जातः, सोऽपि सेनापतिरिति कौतुकम्, 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्' इति नयेन पतिपरित्यक्तायाः सीतायाः स्मरणादस्रमिति यथायथं ज्ञेयम्। हर्षकौतुकास्रैः

आत्रेयी—वामदेव ऋषिद्वारा मन्त्रसे संस्कार किया गया पवित्र घोड़ा छोड़ा गया है। शास्त्रानुसार उसके रक्षक भी नियुक्त किये गये हैं। उनके अध्यक्ष लक्ष्मणपुत्र चन्द्रकेतु, दिये गये दिव्य अस्त्रों तथा हाथी, घोड़े, रथ और पैदल चतुरङ्गिणी सेनाओंसे युक्त होकर भेजे गये हैं।

वासन्ती—(हर्ष, कौतुक और अश्रुपातके साथ) कुमार लक्ष्मणके भी पुत्र हैं! इस कारण मातः! मैं जीवित हूँ।

आत्रेयी—अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडम-ब्रह्मण्यमुद्घोषितम्। ततो 'न राजापचारमन्तरेण प्रजानामकालमृत्युः संचरती'त्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्—

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम! तं हत्वा जीवय द्विजम्॥ ८॥

सहितं यथा तथा। मातः = जननि! आत्रेय्या ब्राह्मणजातित्वेन इदं सम्बोधनं सङ्गच्छते। जीवामि = जीवनं धारयामि, 'जीवन्नरो भद्रशतानि पश्येत्' इति न्यायेन मयेयं भद्रपरम्पराऽवलोकितेति भावः।

आत्रेयीति। अत्र = अस्मिन्, अन्तरे = अवकाशे, उत्क्षिप्य = उत्क्षेपणं कृत्वा, सोरस्ताडम् = वक्षःस्थलताडनपूर्वकम्। ताडनं ताडः, भावे घञ्। उरस-स्ताडनेन सहितं यथा तथेति क्रियाविशेषणम्। अब्रह्मण्यम् = ब्राह्मणानामत्याहितम्, उद्घोषितम् = उच्चैरुच्चारितम्। राजापचारं = राजदोषम्, 'अन्तरेणं'तिपदयोगे 'अन्तराऽन्तरेण युक्ते' इति द्वितीया। अन्तरेण = विना, करुणामये = प्रचुरकरुणा-युक्ते, निरूपयति = निरूपणं कुर्वति, मीमांसमाने इत्यर्थः। ततः प्राक् पितरि जीवति पुत्रस्य मरणाऽभावादिति भावः, 'यस्य च भावेन भावलक्षणम्' इति सप्तमी। अश-रीरिणी वाक् = आकाशवाणी। उदचरत् = उद्गता।

शम्बूक इति। शम्बूको नाम वृषलः पृथिव्या तपः तप्यते। हे राम! स ते शीर्षच्छेद्यः, तं हत्वा द्विजं जीवय इत्यन्वय। शम्बूको नाम = 'शम्बूक' इति नाम्ना प्रसिद्धः, वृषलः = शूद्र', वृषं = धर्मम्, लुनाति = छिनत्ति, शूद्रस्य द्विज-शुश्रूषाया एव विहितत्वात्तद्व्यतिरेकेण तपश्चरणादिति भावः, 'अन्येभ्योऽपि दृश्यते' इति डः। पृथिव्या = भूलोके, तप = तपस्या, तप्यते=चरति, दिवादित्वात् श्यन्। हे राम = भो राघव! सः = शम्बूकः, ते = तव, शीर्षच्छेद्यः = शिरश्छेदाऽर्हः, शीर्षच्छेदमर्हतीति शीर्षच्छेद्य, पक्षान्तरे ठकि शैर्षच्छेदिक इति च, 'शीर्षच्छे-

आत्रेयी—इस बीचमें कोई ब्राह्मण मरेहुए पुत्रको राजद्वारपर फेंककर और छाती पीटकर 'ब्राह्मणोंको महाभय है' ऐसा ऊंचे स्वरसे चिल्लाने लगा। तब 'राजाके दोषके विना प्रजाओंकी अकालमृत्यु नहीं होती है।' ऐसा कहकर करुणापूर्ण रामभद्रके अपने दोषका निरूपण करते रहनेपर अतर्कित रूपसे आकाशवाणी हुई—

शम्बूक नामका शूद्र पृथिवीपर तपस्या कर रहा है। हे राम! आपको उसका शिर काटना चाहिए, उसे मारकर ब्राह्मणको जिलाइए॥ ८॥

इत्युपश्रुत्य कृपाणपाणिः पुष्पकमधिरुह्य सर्वा दिशो विदिशश्च शूद्र-तापसमन्वेषणाय जगत्पतिः सञ्चारं समारब्धवान् ।

वासन्ती—शम्बूको नामाधोमुखो धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति । अपि नाम रामभद्रः पुनरिदं वनमलङ्कुर्यात् ?

आत्रेयी—भद्रे ! गम्यतेऽधुना ।

वासन्ती—अयि आत्रेयि ! एवमस्तु । कठोरश्च दिवसः । तथाहि—

कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन संपातिभि-

दात्यन्च' इति यत्, चकारात् ठक् च, शिरश्छेदेन स त्वया दण्डनीय इति भावः । तं = शम्बूकं, हत्वा = विनाश्य, द्विज = ब्राह्मणपुत्रं, जीवय = जीवितं कुरु, द्विजाति-सेवनरूपं स्वकीय वर्णधर्मं हित्वा तपश्चरणरूपमनाचारं कुर्वतः शूद्रस्य शम्बूकस्य हननेनैव ब्राह्मणपुत्रो जीविष्यतीति भावः ॥ ८ ॥

इत्युपेति । जगत्पतिः = लोकनाथः, राम इत्यर्थः । कृपाणपाणिः=खड्गहस्तः सन्, शूद्रदण्डार्थमिति भावः । कृपाणः पाणौ यस्य सः, 'सप्तमी विशेषणे बहुव्रीहौ' इत्यत्र 'सप्तमी' तिपदज्ञापितो व्यधिकरणबहुव्रीहिः, 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति वचना सप्तम्यन्तस्य पाणिपदस्य परनिपातः । पुष्पकं=पुष्पकनामकं विमानम्, दिशः = आशाः, प्राच्यादिका इत्यर्थः । विदिशः = कोणदिशः, आग्नेय्यादिका इत्यर्थः, लक्ष्यीकृत्य इति शेषः । सञ्चारं = सञ्चरणम् ।

वासन्तीति । धूमपः = धूमपानकर्ता, धूमं पिबतीति 'आतोऽनुपसर्गे कः' इति कः । अलङ्कुर्यात् = भूषयेत्, अपिशब्दः सम्भावनायाम् ।

वासन्तीति । कठोरः = कठिनः, प्रखररविकिरणै दुःसह इत्यर्थः ।

कण्डूलेति । कूले छायाऽपरिकरमाणविष्किरमुखव्याकृष्टकीटत्वचः कूज त्क्लान्तकपोतकुक्कुटकुलाः कुलायद्रुमाः कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन संपा-

---

ऐसा सुनकर जगत्पति रामचन्द्रने हाथ मे तलवार लेकर और पुष्पकविमानपर चढ़कर शूद्र तपस्वीके अन्वेषणके लिए सब दिशाओंमे और विदिशाओंमे भ्रमण करना आरम्भ किया है ।

वासन्ती—अधोमुख होकर धूवा पीनेवाला शम्बूक नामका शूद्र इसी जनस्थानमें तपस्या कर रहा है । क्या रामभद्र फिर इस वनको सुशोभित करेंगे ?

आत्रेयी—कल्याणि ! अब जाती हूं ।

वासन्ती—आर्य आत्रेयि ! अच्छी बात है । दिन कठोर हो गया है । जैसा कि—किनारेपर छायामें चोंचसे जमीनपर आघात करनेवाले कौवा आदि पक्षियोंके मुखसे जिन

घर्मस्रंसितबन्धनैश्च कुसुमैरर्चन्ति गोदावरीम् ।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥ ९ ॥

(इति परिक्रम्य निष्क्रान्ते ।)

इति शुद्धविष्कम्भकः ।

तिभिः, घर्मस्रंसितबन्धनैः कुसुमैः गोदावरीम् अर्चन्ति इत्यन्वयः । कूले = तीरे, गोदावर्या इति शेषः । छायाऽपस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः = छायायाम् = अनातपे, अपस्किरमाणाः = भक्षणाऽर्थं चञ्च्वा भूमिं लिखन्तः, 'किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्' इत्यात्मनेपदम् 'अपाच्चतुष्पाच्छकुनिष्वालेखने' इति सुट्, स च सुट् 'सुडपि हर्षादिष्वेव वक्तव्यः' इत्यतः हर्षाद्यर्थेषु बोद्धव्यः । छायाऽपस्किरमाणाश्च ते विष्किरा = पक्षिणो वायसादय इत्यर्थः, तेषां मुखैः = आननैः, व्याकृष्टाः = विशेषेणाऽऽकृष्टाः, कीटत्वचः = कीटाश्चर्माणि च येषां ते । कूजत्क्लान्तकपोतकुक्कुटकुलाः = कूजन्ति = अव्यक्तशब्दं कुर्वन्ति, क्लान्तानि = ग्लानानि, आतपादिति शेषः । कपोतकुक्कुटानां = पारावतकृकवाकूनाम्, कुलानि= समूहाः, येषु ते, एतादृशाः कुलायद्रुमाः = पक्षिभिः कृतनीडा वृक्षाः । कण्डूलद्विपगण्डपिण्डकषणोत्कम्पेन = कण्डूलानां = कण्डूयुक्तानाम्, द्विपगण्डपिण्डानां=पिण्डाकारगजकपोलानाम् । कषणं = सङ्घट्टनम्, तेन य आकम्पः = अत्यर्थचलनम्, तेन संपातिभिः = संपतनशीलैः । घर्मस्रंसितबन्धनैः = घर्मेण=आतपेन, स्रंसितानि=शिथिलितानि, बन्धनानि = वृन्तानि येषां तैः, तथाभूतैः कुसुमैः = पुष्पैः, गोदावरी = गोदावरीनामधेयां नदीम्, अर्चन्ति = पूजयन्ति । अत्र इवशब्दाऽभावात्प्रतीयमानोत्प्रेक्षा । **शार्दूलविक्रीडितं** वृत्तम् ॥ ९ ॥

इतीति । इति = अनन्तरं, परिक्रम्य = पादविक्षेपं कृत्वा, निष्क्रान्ते=निर्गते, आत्रेयीवासन्त्याविति शेषः ।

इतीति । शुद्धविष्कम्भकः = विष्कम्भकश्च भूतानां भाविनां च कथांशानां

वृक्षोंके कीडे और छाल निकाले गये हैं और जहाँपर धूपसे ग्लानियुक्त कबूतर और मुर्गोंका झुण्ड शब्द कर रहा है, ऐसे चिडियोंके घोंसलेवाले पेड, हाथियोंके खुजलीवाले गालोंकी रगडके कम्पसे गिरनेवाले और घामके कारण शिथिल वृन्तोंसे युक्त फूलोंसे गोदावरीकी पूजा करते हैं ॥ ९ ॥ (दोनों घूमकर जाती है)

शुद्ध विष्कम्भक समाप्त ।

(ततः प्रविशति सदयोद्यतखड्गो रामभद्रः ।

रामः—

हे हस्त दक्षिण ! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य बाहुरसि निर्भरगर्भखिन्न-

निदर्शकः तल्लक्षणं यथा 'वृत्तवर्तिष्यमाणाना कथांशाना निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥' इति । तत्र चाऽस्मिन् प्रबन्धे शुद्धविष्कम्भकः, तस्याऽपि लक्षणं यथा साहित्यदर्पणे—'मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात्, स तु सङ्कीर्णो नीचमध्यमकल्पितः ॥' इति । तथा चाऽत्र मध्यमाभ्यामात्रयीवासन्तीरूपाभ्यां पात्राभ्यां सम्प्रयोजितत्वात् शुद्धविष्कम्भक इति ज्ञेयः ।

तत इति । सदयोद्यतखड्गः = सदयम् = सकरुणं यथा तथेति क्रियाविशेषणम् , तथा च उत्तरपदेन सह सुप्सुपेति समासः । उद्यत = उद्गूर्णः, खड्गः = कृपाणो येन सः ।

हे हस्तेति । हे दक्षिणहस्त ! द्विजस्य मृतस्य शिशोः जीवातवे शूद्रमुनौ कृपाणं विसृज । निर्भरगर्भखिन्नसीताविवासनपटोः रामस्य बाहुरसि, ते करुणा कुतः ? इत्यन्वयः । हे = सम्बोधनाऽर्थकमव्ययम् , 'अथ सम्बोधनाऽर्थकाः । स्युः पाट् प्याडङ्ग है हे भोः' इत्यमरः । 'रे' इति पुस्तकान्तरपाठे अनादरद्योतकमव्ययमिदमिति बोध्यम् । हे दक्षिण हस्त = हे वामेतर कर ! द्विजस्य = ब्राह्मणस्य, द्विजपदस्य ब्राह्मणक्षत्रियवैश्यरूपद्विजातिबोधकत्वेऽपि अत्र प्रकरणेनाऽयमेवाऽर्थो बोध्यः । मृतस्य = पञ्चत्वं गतस्य, शिशोः = बालकस्य, जीवातवे = जीवनाय, तादर्थ्ये चतुर्थी, 'जीवातुरस्त्रिया भक्ते जीविते जीवनौषधे' इति मेदिनी । शूद्रमुनौ = शूद्रतापसे । शूद्र एव मुनिः शूद्रमुनिस्तस्मिन् , रूपकसमासः । कृपाणं = खड्गं, विसृज = विमुञ्च । शूद्रमुनौ कृपाणविसर्गे हस्तसामर्थ्यमाह—**रामस्येति** ।

(तदनन्तर दयाके साथ तलवार उठाये हुए रामभद्र प्रवेश करते हैं ।)

राम—हे दक्षिण हस्त ! ब्राह्मणके मरे हुए बालकको जिलानेके लिए शूद्र तपस्वीपर तलवार छोड़, क्योंकि तू पूर्ण गर्भके भारसे आलस्ययुक्त सीताके निर्वासनमें समर्थ

सीताविवासनपटोः करुणा कुतस्ते ? ॥ १० ॥

(कथञ्चित्प्रहृत्य ।) कृतं रामसदृशं कर्म । अपि जीवेत्स ब्राह्मणपुत्रः ?

(प्रविश्य ।)

दिव्यपुरुषः—जयतु देवः ।

दत्ताभये त्वयि यमादपि दण्डधारे
संजीवितः शिशुरसौ, मम चेयमृद्धिः ।

निर्भरगर्भखिन्नसीताविवासनपटोः = पूर्णगर्भालससीताप्रवासनकुशलस्य । निर्भरश्चासौ गर्भस्तेन खिन्ना, सा चाऽसौ सीता, तस्या विवासनं, तस्मिन् पटुस्तस्येति विग्रहः कार्यः । निर्भरस्थाने **'दुर्वह'** इति क्वाचित्कः पाठस्तस्य गुरुर्दु खेन वोढुं शक्यो वेत्यर्थः कार्यः । रामस्य = रामचन्द्रस्य, बाहुः = भुजः, असि = वर्तसे, ते = तव, करुणा = दया, कुतः = कस्माद्धेतो', सम्भवतीति शेषः । यो नाम रामो गर्भभराऽलसा स्वपरिणीता निरपराधा सीतामपि विवासितवान् , तस्यैव रामस्य दक्षिणो हस्तस्त्वमसि; अतस्ते कुतो दयेति भावः । अत्र पदार्थहेतुकं **काव्यलिङ्गमलङ्कार'**, तल्लक्षणं यथा—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति । **वसन्ततिलकावृत्तम्** ॥ १० ॥

कथञ्चिदिति । कथञ्चित् = केनाऽपि प्रकारेण, कष्टेनेति भावः । रामसदृशं = रामतुल्यं, न तु दशरथसदृशमित्यर्थः, निरपराधदण्डनमिति भावः । अपिशब्दः प्रश्नाऽर्थकः ।

प्रविश्येति । दिव्यपुरुषः = देवाकारपुरुष', शम्बूकशरीरं विहाय देवत्वेनेति भावः ।

दत्ताभय इति । यमादपि दत्ताऽभये त्वयि दण्डधारे (सति) असौ शिशुः संजीवितः, मम च इयम् ऋद्धिः । एष शम्बूकः शिरसा ते चरणौ नतः, सत्सङ्गजानि निधनान्यपि तारयन्ति इत्यन्वयः । यमादपि = यमराजादपि, दत्ताऽभये = वितीर्णाऽभीतौ । दत्तमभयं येन तस्मिन् , त्वयि = भवति, दण्डधारे = दण्डधारके

रामका हाथ है, इसलिए तुझको दया कहाँसे होगी ? ॥ १० ।

(किसी तरह प्रहार कर) रामके योग्य काम किया । क्या वह ब्राह्मणकुमार जीवित होगा ?

(प्रवेश कर)

दिव्यपुरुष—महाराज जय हो ।

यमराजसे भी अभयदान देकर आपके दण्डधारण करनेपर वह ब्राह्मणकुमार जी उठा

शम्बूक एष शिरसा चरणौ नतस्ते ।
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

रामः—द्वयमपि प्रियं नः, तदनुभूयतामुमस्य तपसः परिपाकः ।
यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च संपदः ।

सति, असौ = विप्रकृष्टस्थः, शिशुः = ब्राह्मणकुमारः, संजीवितः = संजीवनं प्रापितः, न केवलमेतावदेव अपि तु मम च = प्राक् शम्बूकनामधेयस्य च, इयं = पुरःस्था, ऋद्धिः = समुन्नतिः, दिव्यरूपप्राप्तिस्वरूपेति भावः । एषः=समीपतरवर्त्ती, शम्बूकः = प्राक् शम्बूकाऽभिधानः, अहमित्यर्थः । शिरसा = मूर्ध्ना करणेन, ते = तव, चरणौ = पादौ, नतः = प्रणतः, अस्मीति शेषः । अर्थान्तरन्यासेनैनमर्थं द्रढयति— **सत्सङ्गजानीति** । सत्सङ्गजानि = सज्जनसंसर्गोत्पन्नानि । सतां सङ्गस्तस्माज्जातानि, निधनान्यपि = मरणान्यपि, तारयन्ति = तरणं कारयन्ति, संसाराब्धेरिति शेषः । अत्र कारणविरुद्धकार्योत्पत्तिकथनाद्विषमाऽलङ्कारः, चरमचरणस्थसामान्याऽर्थेन शम्बूकसमृद्धिरूपस्य विशेषाऽर्थस्य समर्थनाद**र्थान्तरन्यासश्च**, तथा च विषमाऽर्थान्तरन्यासयोर्मिथोऽनपेक्षया स्थितेः **संसृष्टिः**, 'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते' इति साहित्यदर्पणः । **वसन्ततिलकावृत्तम्** ॥ ११ ॥

राम इति । द्वयमपि = द्वितयमपि, ब्राह्मणशिशोः सञ्जीवनं त्वदीया ऋद्धिश्चेति द्वयमपीति भावः, 'संख्याया अवयवे तयप्' इति तयप्, तस्य स्थाने 'द्वित्रिभ्यां तयस्याऽयज्वा' इति अयजादेशश्च । तत् = तस्माद्धेतोः, अमुस्य = दुष्करस्य, परिपाकः = परिणामः, फलमित्यर्थः ।

यत्रेति । यत्र आनन्दाश्च मोदाश्च, यत्र पुण्याः सम्पदश्च । वैराजा नाम तैजसाः शिवास्ते लोकास्ते सन्तु इत्यन्वयः । यत्र=येषु लोकेषु, आनन्दाः = आत्माऽनुभवजन्या हर्षाः, मोदाः = दिव्यविषयाऽनुभवजन्या हर्षाः, यत्र = येषु लोकेषु, पुण्याः = पवित्राः, सम्पदश्च = विभूतयश्च, सन्तीति शेषः, 'पुण्याश्च सम्पद' इत्यत्र

और मेरी भी यह समृद्धि हुई । यह शम्बूक शिरसे आपके चरणोंको नमस्कार करता है । सत्सङ्गसे उत्पन्न मरण भी लोगोंका उद्धार करते हैं ॥ ११ ॥

राम—दोनों ही बातें हमें प्रिय हैं, इस कारण दुष्कर तपका फल भोगो ।
जहाँपर आनन्द (आत्माके अनुभवसे उत्पन्न हर्ष) और मोद (दिव्य विषयोंके

वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवाः ॥ १२ ॥

शम्बूकः—स्वामिन् ! युष्मत्प्रसादादेवैष महिमा । किमत्र तपसा ? अथवा महदुपकृतं तपसा ।

अन्वेष्टव्यो यदसि भुवने लोकनाथः शरण्यो

'पुण्याऽभिसंभवा' इति पाठान्तरं, तस्य पुण्योत्पन्ना इत्यर्थः । वैराजा नाम = वैराजा इति प्रसिद्धाः, 'नामे'ति' प्रसिद्धिद्योतकमव्ययम् । विशेषेण राजते = शोभते इति विराट् = ब्रह्मा, कर्तरि क्विप् । विराज इमे वैराजाः = ब्रह्मसम्बन्धिन इत्यर्थः, 'तस्येदम्' इत्यण् । तैजसाः = तेजोमयाः । तेजस इमे तैजसाः, पूर्ववदण् । शिवाः = कल्याणकारकाः, 'ध्रुवा' इति पाठे सनातना इत्यर्थः । ते = प्रसिद्धाः, लोकाः = भुवनानि, ते = तव, सन्तु = भवन्तु । त्वदीयतपःफलरूपवैराजलोकप्राप्तिस्ते भवेदिति भावः ॥ १२ ॥

शम्बूक इति । स्वामिन् = हे प्रभो ! स्वमस्याऽस्तीति स्वामी, तत्सम्बुद्धौ, 'स्वामिन्नैश्वर्ये' इति आमिनच्प्रत्ययान्तो निपातः । युष्मत्प्रसादात् = भवदनुग्रहात् , 'युष्मत्पादप्रसादोपाय' इति पाठे-युष्माकं=भवताम् , पादस्य = चरणस्य, प्रसादः = अनुग्रहः, एव उपायः = हेतुः यस्य स इत्यर्थो बोध्यः । एषः = अयं, महिमा = महत्त्वं, दिव्यशरीरप्राप्तिरूपमित्यर्थः । अत्र = अस्मिन्महत्त्वे, तपसा = तपश्चर्यया, किम्=किं कृतम् ? भवदनुग्रहेणेयं मम दिव्यशरीरप्राप्तिर्न तपसेति भावः । अथवा = यद्वा, पक्षान्तरेण तपोमाहात्म्यं वर्णयति—

अन्वेष्टव्य इति । (हे प्रभो !) भुवने अन्वेष्टव्यः लोकनाथः शरण्यः (त्वम्) यत् मां वृषलकम् अन्विष्यन् योजनानां शतानि क्रान्त्वा इह प्राप्तः असि । इह स तपसां संप्रसादः, अन्यथा तु वः अयोध्याया दण्डकायां वने क्व पुनः उपगम इत्यन्वयः । (हे प्रभो !=हे स्वामिन् !) भुवने=लोके, अन्वेष्टव्यः अन्वेष्टुं=योग्यः, श्रुतिस्मृत्युक्तोपायैर्गवेषणीय इति भावः, लोकनाथः = भुवनेश्वरः, अथ वा भूतनाथः,

अनुभवसे उत्पन्न हर्ष) तथा पवित्र विभूतियां हैं, वैराज नामक तेजोमय कल्याणकारक वे प्रसिद्ध लोक तुमको मिलें ॥ १२ ॥

शम्बूक—प्रभो ! आपके अनुग्रहसे ही मेरी यह महिमा है । इसमें तपस्याने क्या किया ? अथवा तपस्याने बड़ा उपकार किया—

लोकमें ढूँढ़नेके योग्य, लोकपति और शरण देनेवाले आप जो मुझ कुत्सित शूद्रको

ग्राममन्विष्यन्निह वृषलकं योजनानां शतानि ।
क्रान्त्वा प्राप्तः स इह तपसां संप्रसादोऽन्यथा तु
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ॥ १३ ॥

रामः—किं नाम दण्डकेयम् ? (सर्वतोऽवलोक्य) हा ! कथम्—
स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः

शरण्यः = रक्षणसाधुः, 'तत्र साधुः' इति यत् । एतादृशस्त्वम् , यत् मां वृषलकं = मां कुत्सितशूद्रं, यद्वा अज्ञातशूद्रं, कुत्सितो वृषलो वृषलकस्तं, 'कुत्सिते' इति कुत्सायां कप्रत्ययः । यद्वा अज्ञातो वृषलो वृषलकस्तम् , 'अज्ञाते' इति कप्रत्ययः । शम्बूकस्य द्विजातिशुश्रूषारूपधर्मविरुद्धाचरणाद् धर्मच्छेदकत्वेन वृषलपदेन व्यपदेशः संगच्छते, वृषं = धर्मं लुनातीति वृषलस्तदुक्तं मनुस्मृतौ प्रकारान्तरेण—'वृषो हि भगवान् धर्मस्तस्य यः कुरुते ह्यलम् । वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् ।' इति, कामान्वर्षतीति व्युत्पत्त्या वृषशब्दो धर्मवाचकस्तस्य यो ह्यलं = वारणं कुरुते स वृषल इति भाव । अन्विष्यन् = विचिन्वन् , न तु चारादिना अन्वेषयन्निति भावः । योजनानां शतानि = अत्र 'शत' शब्दो बहुत्ववाचकः, अतो बहूनि योजनानि इति भावः । क्रान्त्वा = लङ्घयित्वा, इह = अस्मिन् वने, प्राप्तः = आगतः, असि = वर्तसे । इह = अस्मिन्विषये, सः = भवदागमः, तपसां = मन्नियमाचरणानां, सम्प्रसादः = समनुग्रहः । अन्यथा तु = एतद्वैपरीत्ये तु, तपश्चरणेन न भवदागमनम् इति स्वीकारे तु इति भावः । वः = युष्माकम् , अयोध्यायाः = अयोध्यानगर्याः, दण्डकायां वने = दण्डकारण्ये, क्व = कुत्र, हेताविति शेषः । पुनः= भूयः, उपगमः = आगमनं, भवेदिति शेषः । इत्थं दुर्घटस्याऽपि भवदागमनस्य हेतुस्तप एवेति भावः । अन्वेषणकर्मभूते रामे अन्वेषणकर्तृत्वस्याऽपि सत्त्वात् विषमालङ्कारः । मन्दाक्रान्ता वृत्तम् ॥ १३ ॥

स्निग्धेति । क्वचित् स्निग्धश्यामा अपरतो भीषणाभोगरूक्षाः स्थाने स्थाने निर्झराणां झाङ्कृतैः मुखरककुभः तीर्थाश्रमगिरिसरिद्गर्तकान्तारमिश्राः परिचितभुव एते दण्डकारण्यभागाः संदृश्यन्ते इत्यन्वयः । क्वचित्=कुत्रचिद्देशे, स्निग्धश्यामाः =

ढूँढ़ते हुए सैकड़ों योजनोंको लांघकर यहां आये, तपस्याका ही अनुग्रह है । नहीं तो आपका अयोध्यासे दण्डकारण्यमें फिर आना कैसे होता ? ॥ १३ ॥

राम—क्या यह दण्डकारण्य है ? (सब तरफ देखकर) हाय ! कैसे—

कहीं स्निग्ध और श्यामवर्णवाले और दूसरी तरफ भयानक विस्तीर्णता से रूखे,

स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम् ।
एते तीर्थाश्रमगिरिसरिद्‌गर्तकान्तारमिश्राः
संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ १४ ॥

शम्बूकः—दण्डकैवैषा । अत्र किल पूर्वं निवसता देवेन—
चतुर्दश सहस्राणि चतुर्दश च राक्षसाः ।

जलेन स्निग्धा', तृणादिभिर्नीलाश्च, एतानि सर्वाण्यपि 'दण्डकारण्यभागा' इत्यस्य विशेषणानि । अपरतः = अन्यस्मिन् प्रदेशे, सार्वविभक्तिकस्तसिः । भीषणाऽऽभोग-रूक्षाः = भीषणः = भयङ्कर, य आभोगः = परिपूर्णता, 'आभोगः परिपूर्णता' । इत्यमरः । भीषणाभोगेन रूक्षा' = कठोरा', स्थाने स्थाने=तत्तत्प्रदेशे, निर्झराणां = झराणां, झाङ्कृतैः = झाम्' इति शब्दै, मुखरककुभः=मुखराः=शब्दायमानाः, ककुभ =दिशो येषु ते । 'दिशस्तु ककुभ' काष्ठा' इत्यमर' । तीर्थाश्रमगिरिसरिद्गर्त कान्तारमिश्राः = तीर्थानि = ऋषिसेवितजलानि, 'निपानाऽऽगमयोस्तीर्थमृषिजुष्टजले गुरौ ।' इत्यमरः । आश्रमाः = ऋषिनिवासस्थानानि, गिरयः = पर्वताः, सरितः = नद्यः, गर्ता =अवटाः, कान्ताराणि=दुर्गममार्गाः, 'कान्तारं वर्त्म दुर्गमम्' इत्यमरः। तैर्मिश्राः = युक्ताः, परिचितभुवः = परिचिताः=संस्तुता', भुवः = प्रदेशा येषु ते, एते = समीपस्थाः, दण्डकारण्यभागाः, सदृश्यन्ते = विलोक्यन्ते । इक्ष्वाकुराज-पुत्रो दण्डः शुक्राचार्यकुमार्या अरजायाः कौमारमपजहार, तत' शुक्राचार्यः— 'दिनसप्तकाऽभ्यन्तरे सभृत्यबलवाहनो राजा दण्डको वधं प्राप्स्यति, तद्राज्यं च पांसुवर्षेण विनङ्क्ष्यती'ति शशाप, तत एव दण्डराज्यं दण्डकारण्यत्वेन परिणत-मिति पौराणिकी कथा स्मर्तव्या । **स्वभावोक्तिरलङ्कारः । मन्दाक्रान्ता वृत्तम्** ॥

शम्बूक इति । देवेन = महाराजेन, भवतेत्यर्थः ।

चतुर्दशेति । चतुर्दश सहस्राणि चतुर्दश च राक्षसा', त्रयः दूषणखरत्रिमूर्धाः च रणे नो हताः ? इत्यन्वयः । चतुर्दश सहस्राणि चतुर्दश च=चतुर्दशाधिकचतुर्दश-

---

जगह जगह पर झरनोंके कलकल शब्दोंसे शब्दायमान दिशाओंसे युक्त, तीर्थ, आश्रम, पर्वत, नदी, गड्ढे और दुर्गम मार्गोंसे मिश्रित और परिचित भूमिवाले ये दण्डकारण्यके भाग दिखाई दे रहे हैं ॥ १४ ॥

शम्बूक—यह दण्डकारण्य ही है । यहाँपर पहले रहते हुए आपने—

चौदह हजार चौदह राक्षस और तीन दूषण, खर और त्रिमूर्द्धाको भी संग्राममें

अयश्च दूषणखरत्रिमूर्धा नो रणे हताः ? ॥ १५ ॥

येन सिद्धक्षेत्रेऽस्मिन्मादृशामपि जानपदानामकुतोभयः संचारः संवृत्तः।

रामः—न केवलं दण्डकैव, जनस्थानमपि ?

शम्बूकः—बाढम् । एतानि खलु सर्वभूतरोमहर्षणान्युन्मत्तचण्डश्वापदकुलाक्रान्तविकटगिरिगह्वराणि जनस्थानपर्यन्तदीर्घारण्यानि दक्षिणां दिशमभिवर्तन्ते । तथाहि—

सहस्रसंख्यकाः, राक्षसाः=निशाचराः, 'चतुर्दश च राक्षसा'इत्यत्र '**रक्षसां भीमकर्मणाम्**'इति पुस्तकान्तरस्थः पाठस्तत्र भीमकर्मणां=भीमं=भयङ्करम् , कर्म=क्रिया, येषां तेषां, रक्षसां=राक्षसानां, चतुर्दश सहस्राणि इत्यर्थोऽन्वयश्च कर्तव्यः । त्रयः = त्रिसंख्यकाः, दूषणखरत्रिमूर्धाश्च=त्रयो मूर्धानो यस्य स त्रिमूर्धः, 'द्वित्रिभ्यां ष मूर्ध्नः' इति समासाऽन्तः षप्रत्ययः । दूषणश्च खरश्च त्रिमूर्धश्चेति 'चार्थे द्वन्द्वः' इति इतरेतरद्वन्द्वः । केचित्तु समासाऽन्तविधेरनित्यत्वात् '**दूषणखरत्रिमूर्धान**' इति पठन्ति, इत्थं चोभयथाऽपि '**त्रिमूर्धाः समरे हताः**' इति कपोलकल्पितः पाठोऽनावश्यकः । रणे = संग्रामे, नो हताः = न मारिता इति काकुः, अपि तु मारिता एवेति भावः । **अनुष्टुब्** वृत्तम् ॥ १५ ॥

येनेति । येन=दूषणादिराक्षसहननेन, सिद्धक्षेत्रे = सिद्धानाम् = अणिमादिसिद्धियुतानाम् , क्षेत्रे=स्थाने, मादृशामपि = मत्सदृशानामपि, जानपदानां = जनपदभवानां, नागरिकाणामिति भावः । अकुतोभयः=नाऽस्ति कुतोऽपि भयं यस्मिन् सः'मयूरव्यंसकादयश्च' इति समासः । सञ्चारः = सञ्चरणं गमनमित्यर्थः । संवृत्तः=जातः ।

शम्बूक इति । बाढं = दृढम् , सर्वभूतरोमहर्षणानि = सर्वेषां भूतानां=प्राणिनाम् , रोमहर्षणानि=रोमाञ्चजनकानि, भयहेतोरिति भावः । उन्मत्तचण्डश्वापदकुलाक्रान्तविकटगिरिगह्वराणि = उन्मत्ताः = उद्धतमदाः चण्डाः = अतिशयक्रुद्धाः एतादृशा ये श्वापदाः = व्याघ्रादयो हिंस्रजन्तवः, तेषां कुलानि = सजातीयसमूहाः, तैः आक्रान्तानि = कृताक्रमणानि, विकटानि=विकृतानि, गिरिगह्वराणि=पर्वतगुहाः,

---

नहीं मारा ? (अर्थात् अवश्य मारा) ॥ १५ ॥

जिससे इस सिद्धक्षेत्रमें मेरे-जैसे नगरवासियोंका भी निर्भयरूपसे भ्रमण सम्पन्न हुआ ।

राम—यह केवल दण्डकारण्य ही नहीं, जनस्थान भी है क्या ?

शम्बूक—जी हां । ये सब प्राणियोंके रोंगटे खड़े करनेवाले उन्मत्त और अत्यन्त क्रोधी हिंस्र जन्तुओंके समूहसे विकृत पर्वतकी गुफाओंसे युक्त जनस्थानतक फैले हुए लम्बे जङ्गल दक्षिण दिशाके अभिमुख वर्तमान हैं जैसा कि—

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विरलस्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रव. पीयते ॥ १६ ॥

येषु तानि, 'आक्रान्तविकट' स्थाने 'संकुले'ति पदं पुस्तकान्तरस्थं, तत्र संकुलानि व्याप्तानीत्यर्थः । जनस्थानपर्यन्तदीर्घाऽरण्यानि = जनस्थानस्य पर्यन्तेषु = सीमसु, स्थितानि यानि दीर्घारण्यानि=विस्तृतवनानि, तानि । दक्षिणाम् = अवाची, दिशं= काष्ठाम् , अभिवर्तन्ते = लक्ष्यीकृत्य विद्यन्ते ।

निष्कूजेति । क्वचित् निष्कूजस्तिमिताः, क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः प्रदरोदरेषु विरलस्वल्पाम्भसः सीमानः सन्ति, यासु तृष्यद्भिः प्रतिसूर्यकैः अयम् अजगरस्वेदद्रव. पीयते इत्यन्वयः । क्वचित् = कुत्रचित्स्थले, निष्कूजस्तिमिताः = निष्कूजाः = पक्ष्यादिशब्दशून्याः, अत एव स्तिमिताः = निश्चलाः क्वचिदपि = कुत्रचिदपि स्थले, प्रोच्चण्डसत्त्वस्वनाः = प्रोच्चण्डानाम्=अतिशयकुद्धानां, व्याघ्रादीनामित्यर्थः । सत्त्वानां=जन्तूनाम्, स्वनाः = शब्दाः यासु ताः । तथा च क्वचित् स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताऽग्नयः = स्वेच्छया = आत्मवाञ्छया, न तु परप्रेरणयेति भावः । सुप्ता = निद्राणाः, गभीर-भोगाः = गमनशीलशरीराः, गभीरपदस्य निम्नार्थे रूढत्वेऽपि अवयवार्थमाश्रित्या-ऽयमर्थः, अतो लक्षणायाः पाठान्तरकल्पनायाश्च गौरवं परिहृतं भवतीति बोध्यम् । 'अहेः शरीरं भोगः स्यात्' इत्यमर. । कुत्रचित्तु भोगस्थाने 'घोष' पदस्य पाठः, तत्र गम्भीरशब्दा इत्यर्थः, एतादृशा य भुजगाः = सर्पाः, तेषां श्वासैः = निश्वासवायुभिः, प्रदीप्ताः=प्रज्वलिताः, अग्नयः = अनलाः, यासु ताः । प्रदरोदरेषु-प्रदराणां = गर्तानाम् 'प्रदरं स्त्रीरुजो भेदे प्रदरः श्वभ्रभीतयोः ।' इति विश्वः । उदरेषु = मध्येषु, लक्षणयाऽयमर्थो बोध्यः । विरलस्वल्पाम्भसः = विरलस्वल्पम्=अ-तिशयन्यूनम् , अम्भः=जलं, यासु, ताः, क्वचित्तु 'विरल'स्थाने '**विलसत्**'पाठस्तत्र विलसत् = प्रकाशमानमित्यर्थः, एतादृश्यः सीमानः = पर्यन्तभूमयः, सन्तीति शेषः ।

कहींपर शब्दशून्य अतएव निश्चल और कहींपर व्याघ्र आदि क्रोधी जन्तुओंके शब्दों-वाले, अपनी इच्छासे सोये हुए तथा गमनशील शरीरवाले सर्पोंके श्वासोंसे प्रज्वलित अग्नियों से युक्त और गड्ढोंके बीचमें बहुत कम जलवाले सीमाभाग हैं जहाँपर प्यासे गिरगिट अजगरोंके पसीनोंकी बूँदें पी रहे हैं ॥ १६ ॥

रामः—

पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षानिव वृत्तान्तान्पूर्वाननुभवामि च ॥ १७ ॥

(सर्वतोऽवलोक्य ।) प्रियारामा हि वैदेह्यासीत् । एतानि नाम कान्ताराणि । किमतः परं भयानकं स्यात् ? (सास्रम् ।)

याम् = सीमसु, तृष्यद्भिः = पिपासितैः, प्रतिसूर्यकैः = कृकलासैः, 'सरटः कृकलासः स्यात्प्रतिसूर्यशयानकौ' इति हलायुधः । अयं = सन्निकृष्टवर्ती, अजगरस्वेदद्रव = बृहत्सर्पधर्मजलं, पीयते=आचम्यते । वनमिदं सर्वतोऽपि रोमहर्षणमस्तीति भावः । **स्वभावोक्तिरलङ्कारः । शार्दूलविक्रीडितं वृत्तम्**, 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणम् ॥ १६ ॥

पश्यामीति । भूतपूर्वखरालयं जनस्थानं पश्यामि । पूर्वान् वृत्तान्तान् प्रत्यक्षानिव अनुभवामि च इत्यन्वयः । भूतपूर्वखरालयं = भूतपूर्वः = पूर्वं भूतः, 'सुप्सुपा' इति समासः, खरालयः = खरनामकराक्षसनिवासो यस्मिंस्तत्, जनस्थानं, पश्यामि = प्रेक्षे, पूर्वान् = पुरातनान्, वृत्तान्तान् = उदन्तान्, शूर्पणखाऽऽगमनादिरूपानिति भावः । प्रत्यक्षानिव = पुरोवर्तमानानिव, अनुभवामि च = अनुभवं करोमि च । अत्र शूर्पणखाऽऽगमनादिभूतवृत्तान्तानां प्रत्यक्षायमाणत्वेन वर्णनात् **भाविकाऽलङ्कारः**, तल्लक्षणं यथा साहित्यदर्पणे-'अद्भुतस्य पदार्थस्य भूतस्याऽथ भविष्यतः । यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ॥' इति ॥ १७ ॥

प्रियारामेति । वैदेही = सीता, प्रियारामा = प्रियः = अभीष्टः, आरामः = उपवनं यस्याः सा । यद्वा प्रियः आरामः=आरमणं यस्याः सा । एतानि=अतिसमीपतो दृश्यमानानि, कान्ताराणि = दुर्गममार्गाः । साऽस्रं = सबाष्पम् ।

त्वयेति । त्वया सह मधुगन्धिषु वनेषु निवत्स्यामि इतीव असौ इह अरमत । तादृशः तस्याः स स्नेहः (आसीत्) इत्यन्वयः । त्वया = रामेण, सह =

राम—मैं खर राक्षसके प्राचीन निवास जनस्थानको देख रहा हूँ, और पहलेके वृत्तान्तोंका प्रत्यक्षकी तरह अनुभव भी कर रहा हूँ ॥ १७ ॥

(सब तरफ देखकर) सीताको वन प्रिय था । ये महावन हैं । इनसे अधिक भयानक क्या होगा ? (आँखोंमें आँसू भरकर)

'आपके साथ पुष्परसोंके गन्धोंसे युक्त वनोंमें मैं रहूँगी' इस तरहसे ही सीता यहाँपर

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।
इतीवारमतेहासौ स्नेहस्तस्या स तादृश ॥ १८ ॥
न किञ्चिदपि कुर्वाण सौख्यैर्दु खान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जन ॥ १९ ॥

शम्बूक —तदलमेभिदुरासदै । अथतानि मदकलमयूरकण्ठकोमल-

सार्धं मधुगन्धिषु मधुगन्ध एषु अस्तीति मधुगन्धिनि तेषु पुष्परसगन्धयुक्तेषु वनेषु = अरण्येषु निवत्स्यामि निवास करिष्यामि इति = इत्थम् इव – एव असौ = सीता इह = कान्तारेऽपि अरमत = प्रीतिं प्राप्तवती मया सह वनवासे ऽपि सीता प्रीता सञ्जाता मद्विना अयोध्यायामपि स्नातु न इच्छति इति भाव । हा = खेदद्योतकोऽय निपात तादृश तथाविध अनिर्वाच्य इति भाव तस्या = सीताया स – पूर्वाऽनुभूत स्नेह = प्रेमा आसीदिति शेष ॥ १८ ॥

नति । यो जनो यस्य प्रियो हि (स) किञ्चित् न कुर्वाणोऽपि सौख्यै दुःखानि अपोहति तत् तस्य किमपि द्रव्यम् (अस्ति) इत्यन्वय । य जन = मनुष्य यस्य प्रिय = प्रीतमान् प्रीतिविषयो वा (स –जन) किञ्चित्=किमपि, न कुर्वाणोऽपि=न विदधदपि सौख्य =सामीप्यमात्रोपनै सुखै (करण) सखा येव सौख्यानि स्वार्थे ष्यञ तै । दुःखानि पीडा अपोहति=नाशयति तत्=दुःख नाशहेतुभूतो जन विषय (द्रव्य) प्राधान्यात् नपुंसकत्वम् । तस्य अपोहनीय दुःखस्य, किमपि = अनिर्वचनीय विलक्षणमिति भाव । द्रव्य भव्यवस्तु द्रव्य च भव्य इति निपात । एव चाऽह सीताविषय किमपि अकुर्वाणोऽपि अकृत्रिम प्रीतिविषय वा सन्निधिमात्रजनितै सुखैस्तद्दुःखनिवर्तक इत्यतो मदनुसरणाथ सीताया वनगमन युक्तमिति भाव । अर्थान्तरन्यासोऽलङ्कार १९ ॥

शम्बूक इति । सीतास्मरणन सञ्जातदुःख राम निरीक्ष्य तच्चित्तविनोदार्थं शम्बूकस्येयमुक्तिस्तदलमित्यादि । दुरासदै = दुःखेन आसत्तु योग्यानीति दुरासदानि तै दुर्गमन्त्यिर्थ ईषद्दुःसुषु कृच्छ्राऽकृच्छ्रार्थेषु खल इति खल्प्रत्यय । एभि = वनै अलं=पर्याप्तं वनै साध्य नाऽस्ती यथ गम्यमानाऽपि क्रिया कारक विभक्तौ प्रयोजिका इत्यत करण वा तृतीया महाभाग महान् भागो = भाग्य

प्रसन्न होती थी ऐसा उनका वह प्रेम था १८

जो मनुष्य जिसका प्यारा है वह कुछ न करता हुआ भी सामीप्यमात्रसे उत्पन्न सुखोंके द्वारा दुःखों का नाश करता है इस कारणसे वह उसका अनिर्वचनीय पदार्थ है १९

शम्बूक—तब दुर्गम इन वनोंको रहने द । महाभाग्यवान् आप मदसे मधुर शब्दवाले

च्छविभिरवकीर्णानि पर्यन्तैरविरलनिविष्टनीलबहुलच्छायातरुषण्डमण्डितान्यसंभ्रान्तविविधमृगयूथानि पश्यतु महाभागः प्रशान्तगम्भीराणि श्वापदकुलशरण्यानि महारण्यानि ।

इह समदशकुन्ताक्रान्तवानीरमुक्त-

यस्य स महाभाग्ययुक्त इत्यर्थः, एतादृशो भवानिति शेषः । 'पश्यतु' इति क्रियापदाऽनुरोधात् '**महाऽनुभाव**' इति पुस्तकान्तरपाठः, तत्र महाप्रभाव इत्यर्थः । एतानि = समीपतरवर्तीनि, मदकलमयूरकण्ठकोमलच्छविभिः = मदेन = दर्पेण, कलाना = मधुर कूजताम् , मयूराणा=नीलकण्ठानाम् , कण्ठानाम्=गलानाम् , इव कोमला = स्निग्धा, छविः = कान्तिर्येषां ते, तैः, एतादृशैः पर्यन्तैः = समीपप्रदेशैः । '**पर्वतैः**' इति क्वाचित्कः पाठः. अवकीर्णानि = व्याप्तानि, अविरलनिविष्टनीलबहुलच्छायातरुषण्डमण्डितानि = अविरलम् = निबिडम् , यथा स्यात्तथा निविष्टाः = स्थिताः, नीलाः = श्यामलाः, बहुलाः = सान्द्राः, एतादृशा ये छायातरवः = छायाप्रधाना वृक्षाः, 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपसंख्योपसंख्यानम्' इति मध्यमपदलोपी समासः । बहुलच्छायापदस्थाने क्वचित् '**बहुलच्छाये**' ति पाठस्तत्र बहुला = गाढा, छाया येषा त इति विग्रहः, तेषां षण्डाः=समूहाः, 'कदम्बे षण्डमस्त्रियाम्' इत्यमरः, तैर्मण्डितानि = अलङ्कृतानि । एवम् असंभ्रान्तविविधमृगयूथानि = असंभ्रान्तानि = अत्रस्तानि, विविधमृगाणाम् = अनेकप्रकारहरिणानाम् , यूथानि = समूहाः, येषु तानि । एवं प्रशान्तगम्भीराणि = प्रशान्तानि=श्वापदकुलानां = हिंस्रजन्तुसजातीयानाम् , शरण्यानि=वासस्थानानि, 'सजातीयैः कुलम्' इत्यमरः, एतादृशानि महारण्यानि = महावनानि, '**मध्यमारण्यकानि**' इति पुस्तकान्तरस्थः पाठस्तस्य जनस्थानमध्यस्थानि वनानीत्यर्थः, पश्यत्विति पूर्वपदेनान्वयः ।

इहेति । इह समदशकुन्ताक्रान्तवानीरमुक्तप्रसवसुरभिशीतस्वच्छतोयाः फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसो निर्झरिण्यो वहन्ति इत्यन्वयः । इह = एषु, महारण्येष्वित्यर्थः, समदशकुन्ताक्रान्तवानीरमुक्तप्रसवसुरभिशीतस्वच्छ-

---

मयूरोंके कण्ठोंकी तरह स्निग्ध कान्तिसे युक्त निकटके प्रदेशोंसे व्याप्त, घनभावसे अवस्थित श्यामल और सान्द्र छाया-प्रधान वृक्षोंके समूहोंसे अलङ्कृत निर्भय अनेक प्रकारके मृगोंके समूहोंसे युक्त, निरुपद्रव और दुष्प्रवेश्य तथा हिंसक जलचरोंके झुण्डोंके वासस्थान महावनोंको देखिये ।

यहांपर मदवाले पक्षियोंसे आश्रित वेतससे गिरेहुए फूलोंसे सुगन्धित, ठण्डे और

प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ २० ॥

अपि च—

दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।

तोयाः = समदैः = मत्तैः शकुन्तैः=पक्षिभिः, 'आक्रान्ता'=उपेत्य आश्रिताः, एतादृशा ये वानीराः = वेतसविशेषाः, तेभ्यः मुक्ताः = पतिताः, 'वीरुत्' इति पाठे वानीरवीरुधाम्=वेतसलतानामित्यर्थः कार्यः । तादृशा ये प्रसवाः=पुष्पाणि, तैः सुरभीणि= संजातसौरभाणि, शीतानि, = शीतलानि, स्वच्छानि = अतिशयनिर्मलानि, तोयानि= जलानि यासां ताः । एवं च फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसः=फलभरस्य=फलसमूहस्य, परिणामेन=परिपाकेन, श्यामाः = कृष्णवर्णाः, ये जम्बूनिकुञ्जाः = सान्द्रजम्बूवृक्षाः, तेषु स्खलनेन = वेगप्रतिघातेन, मुखराणि = शब्दयुक्तानि, भूरीणि = बहूनि, स्रोतांसि = प्रवाहाः यासां ताः । एतादृशो निर्झरिण्यः = नद्यः, 'कूलङ्कषा निर्झरिणी रोधोवक्रा सरस्वती ।' इति कोषः, वहन्ति = स्यन्दन्ते । अर्थान्तरवृत्तित्वेनाऽत्र वहधातोरकर्मकत्वं, तदुक्तं - 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति ।' अत्र स्वभावोक्तिरलङ्कारः । मालिनी वृत्तम् ॥ २० ॥

अपि चेति । अपरं च कथनीयमस्तीत्यभिप्रायः ।

दधतीति । अत्र कुहरभाजां भल्लूकयूनाम् अनुरसितगुरूणि अम्बूकृतानि स्त्यानं दधति । सल्लकीनां शिशिरकटुकषायः इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः स्त्यायत इत्यन्वयः । अत्र = महारण्येषु, कुहरभाजां = कुहरं भजन्तीति कुहरभाजस्तेषां, 'भजो ण्विः' इति ण्विप्रत्ययः, गिरिगुहावर्तिनामित्यर्थः । यद्यपि 'अथ कुहरं शुषिरं विवरं बिलम्' इत्यमराऽनुरोधेन कुहरशब्दस्य बिलवाचकत्वं,

निर्मल जलसे युक्त तथा फलसमूहके पकनेसे श्याम वर्णवाले घने जामुन वृक्षोंके कुंजोंमें गिरनेसे शब्दायमान बहुतेरे प्रवाहोंसे युक्त नदियां बहती हैं ॥ २० ॥

और भी—

यहांपर गुफाओंमें रहनेवाले जवान भालुओंकी प्रतिध्वनिसे फैले हुए निष्ठीवन (थुत्कृत) से

शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

रामः—(सबाष्पस्तम्भम्) भद्र ! शिवास्ते पन्थानो देवयानाः । प्रलीयस्व पुण्येभ्यो लोकेभ्यः ।

तथाऽपि लक्षणया गुहावाचकत्वमवसेयम् । भल्लूकयूनां = भल्लूकाश्च ते युवानस्तेषां, विशेषणविशेष्यत्वे कामचारादेव प्रयोगः । तरुणानामृक्षाणामित्यर्थः, शब्दगुरुत्वद्योतनाऽर्थो युवशब्दः । अनुरसितगुरूणि = अनुरसितेन = प्रतिध्वनिना, गुरूणि = महान्ति, एतादृशानि अम्बूकृतानि = सनिष्ठीवाश्शब्दाः, थुत्कारात्मका इत्यर्थः, 'अम्बूकृतं सनिष्ठीवम्' इत्यमरः । स्त्यानं = वृद्धिं, दधति = धारयन्ति । तथा च सल्लकीनां = गजभक्ष्याणां लताविशेषाणां, क्वचित् 'शल्लकीनाम्' इति पाठान्तरम् । शिशिरकटुकषायः = शिशिरः = शीतलः, कटुः = तीक्ष्णः, कषायः=सुरभिः । इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः = इभैः = हस्तिभिः, दलिताः=मर्दिताः, अत एव विकीर्णाः = इतस्ततः पर्यस्ताः ग्रन्थयः = पर्वाणि, 'ग्रन्थिर्ना पर्वपरुषी' इत्यमरः, तेषां यो निष्यन्दः = रसः, तस्य गन्धः = आमोदः, 'गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः, इति विश्वः, स्त्यायते = वर्द्धते । अत्र पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । मालिनी वृत्तम् ॥ २१ ॥

राम इति । सबाष्पस्तम्भं = साश्रुनिरोधं, सीतासंस्मरणेन समायातानामश्रूणां निरोधपूर्वकमिति भावः । देवयानाः = देवयाननामकाः, 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्' इत्युक्तप्रकाराः । ते = तव । पन्थानः = मार्गाः, शिवाः = कल्याणकारकाः, भवन्तु इति शेषः । लोकेभ्यः = लोकाननुभवितुम् 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी । प्रलीयस्व = संयुक्तो भवेत्यर्थः, 'लीङ् श्लेषणे' इति धातोर्लोट् । **'देवयानं प्रतिपद्यस्व'** इति पुस्तकान्तरपाठस्तत्र देवयानं = विमानं, प्रतिपद्यस्व = प्राप्नुहि, इत्यर्थः ।

युक्त शब्द वृद्धिको प्राप्त करते हैं । शल्लकी (हाथीसे खाई जानेवाली) लताओंका ठण्ढा, तीक्ष्ण और सुगन्धित, हाथियोंसे मर्दित और बिखरे हुए पर्वों (गाठों) के रसका गन्ध बढ़ रहा है ॥२१॥

राम—(आंसू रोककर) भद्र ! देवयाननामक मार्ग तुम्हें कल्याणकारक हो । पुण्यलोकोंका अनुभव करनेके लिए तत्पर हो जाओ ।

शम्बूकः— यावत्पुराणब्रह्मर्षिमगस्त्यमभिवाद्य शाश्वतं पदमनुप्रविशामि। (इति निष्क्रान्तः।)

रामः—

[१]एतत्पुनर्वनमहो [२]कथमद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः।
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥
एते त एव गिरयो विरुवन्मयूरा-

शम्बूक इति। यावत् = अवधारणार्थकमिदमव्ययम्। पुराणब्रह्मर्षिं = प्राचीनं ब्रह्मवादिनमृषिम्, अभिवाद्य = अभिवादनं कृत्वा, प्रणम्येत्यर्थः। शाश्वतं = नित्यं, पदं = स्थानम्, अनुप्रविशामि = अनन्तरं प्रविशामि।

एतदिति। अहो! अद्य एतत् वनं पुनः कथं दृष्टं हि। यस्मिन् पुरा चिरमेव वसन्तः आरण्यका गृहिणश्च वयं स्वधर्मे रताः, सांसारिकेषु सुखेषु रसज्ञाश्च अभूम इत्यन्वयः। अहो = आश्चर्यम्, अद्य = अस्मिन्दिने, एतत्=समीपतरवर्ति, वनम् = अरण्यम्, पुनः = भूयः, प्राक्तनवनवासाऽनन्तरं द्वितीयवारमित्यर्थः। कथं = केन प्रकारेण, दृष्टम् = अवलोकितं, हि = निश्चयेन, यस्मिन् = वने, पुरा=पूर्वं दण्डकारण्यवाससमय इत्यर्थः, चिरमेव = बहुकालपर्यन्तमेव, वसन्तः=निवसन्तः, आरण्यकाः= वानप्रस्थाः, तथा च, गृहिणश्च = गृहस्थाश्च, वयं = रामादयः, अत एव स्वधर्मे = पित्राज्ञापालनरूप इति भावः। सांसारिकेषु = संसारजन्येषु, सुखेषु = आनन्देषु, रसज्ञाश्च=आस्वादज्ञाश्च, अभूम = अभवाम। सीतासाहचर्यावसरे विलोकितमतद्वनं कथं दैववशाल्लोचनगोचरीकृतमिति भावः। **वसन्ततिलका** वृत्तम् ॥ २२ ॥

एतदिति। विरुवन्मयूरा एते त एव गिरयः (सन्ति)। मत्तहरिणानि तान्येव वनस्थलानि (सन्ति)। आमञ्जुवञ्जुललतानि नीरन्ध्रनीपनिचुलानि अमूनि

शम्बूक—प्राचीन ब्रह्मर्षि अगस्त्यको प्रणाम कर पीछे नित्य लोकमें प्रवेश करूंगा। (ऐसा कहकर जाता है।)

राम—अहो! आज इस वनको मैंने कैसे देखा? जहां पहले बहुत कालतक रहते हुए वानप्रस्थ तथा गृहस्थ भी होते हुए हमलोग अपने धर्ममें तत्पर तथा सांसारिक सुखोंमें अनुभव करनेवाले हुए थे ॥ २२ ॥

शब्द करनेवाले मयूरोंसे युक्त ये वे ही पर्वत हैं। मत्तमृगोंसे युक्त ये वे ही वनस्थल हैं और

१. 'एतत्तदेव हि वनम्' इति पाठान्तरम्। २. 'पुनरद्य' इति पाठान्तरम्।

एतान्येव मत्तहरिणानि वनस्थलानि ।
आमञ्जुवञ्जुललतानि च तान्यमूनि
नीरन्ध्रनीपनिचुलानि सरित्तटानि ॥ २३ ॥
मेघमालेव यश्चायमारादिव विभाव्यते ।
गिरिः प्रस्रवणः सोऽयमत्र गोदावरी नदी ॥ २४ ॥

तानि सरित्तटानि (सन्ति) इत्यन्वयः । विरुवन्मयूराः = विरुवन्तः = विशेषेण कूजन्तः, मयूराः=बर्हिणः, येषु ते । एते=समीपतराः, ते एव=पूर्वाऽवलोकिता एव, गिरयः=पर्वताः, मत्तहरिणानि=मत्ताः=मदयुक्ताः, हरिणाः=मृगाः येषु तानि, एतानीति पदमध्याहार्यम् । एतानि = समीपतरवर्तीनि, तानि एव = पूर्वाऽनुभूतानि एव, वनस्थलानि = अरण्यस्थल्यः, आमञ्जुवञ्जुललतानि = आ = समन्तात् , मञ्जवः= मनोज्ञाः इति आमञ्जवः = अतिशयमनोज्ञाः । वञ्जुलाः = अशोकाः वेतसास्तिनिशा वा, लताः = वल्ल्यो येषु तानि, 'वञ्जुलः पुंसि तिनिशे वेतसाऽशोकयोरपि ।' इति मेदिनी । नीरन्ध्रनीपनिचुलानि = निर्गतं रन्ध्रं येभ्यस्ते नीरन्ध्राः = अविरलाः, नीपाः = कदम्बाः, 'नीला' इति पाठे श्यामा इत्यर्थः, तथा च नीरन्ध्रा नीपा निचुलाः=हिज्जलवृक्षाः येषु तानि, 'निचुलो हिज्जलोऽम्बुज' इत्यमरः, अमूनि = एतानि, तानि=पूर्वानुभूतानि, सरित्तटानि=नदीतीराणि, सर्वत्राऽपि सन्ति इति शेषः । तथा चाऽत्र तुल्ययोगिताऽलङ्कारः । वसन्ततिलका वृत्तम् ॥२३॥

मेघमालेति । मेघमाला इव यश्चाऽयम् आरादिव विभाव्यते, सोऽयं प्रस्रवणो गिरिः (अस्ति) । अत्र गोदावरी नदी (अस्ति) इत्यन्वयः । मेघमाला इव= मेघपङ्क्तिसदृशः, यश्चाऽयं = दृश्यमानः पदार्थः, आरादिव=समीपस्थ इव, 'आराद् दूरसमीपयोः ।' इत्यमरः । विभाव्यते = ज्ञायते । सोऽयं = स एषः, प्रस्रवणः=प्रस्रवणनामकः, गिरिः = पर्वतः, अस्तीति शेषः । अत्र = अस्मिन्पर्वते, गोदावरी = गोदावरीनाम्नी, नदी = सरित् , अस्तीति शेषः । 'मेघमालेवे'त्यत्रोपमा 'आरादिवे'त्यत्र चोत्प्रेक्षा, द्वयोर्मिथोऽनपेक्षयाऽत्र स्थितेः संसृष्टिः ॥ २४ ॥

अत्यन्त सुन्दर अशोक और लताओंसे युक्त तथा घने कदम्ब और हिज्जल वृक्षोंसे सम्पन्न वे वे ही नदियोंके किनारे हैं ॥ २३ ॥

मेघमालाके तुल्य जो यह निकटवर्तीकी तरह जान पड़ता है, वह प्रस्रवण-नामक पर्वत है और यहां गोदावरी नदी है ॥ २४ ॥

१. 'ऋलितानि' इति पाठान्तरम् । २. 'इपि' इति पाठान्तरम् ।

अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु।
गोदावर्याः पयसि विततानोकहश्यामलश्री-
रन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः॥ २५॥

अत्रैव सा पञ्चवटी, यत्र निवासेन विविधविस्रम्भातिप्रसङ्गसाक्षिणः

अस्यैवेति। अस्य एव महति शिखरे गृध्रराजस्य वास आसीत्, तस्य अधस्तात् वयमपि तेषु पर्णोटजेषु रताः, यत्र गोदावर्याः पयसि विततऽनोकहश्यामलश्रीः मुखरशकुनः अन्तः कूजन् रम्यः वनान्तः (अस्ति) इत्यन्वयः। अस्यैव = प्रस्रवणपर्वतस्यैव, महति = उन्नते, शिखरे = शृङ्गे, गृध्रराजस्य = दाक्षाय्याऽधिपतेः, जटायोः इत्यर्थः। वासः = वसति अस्मिन्निति वासः 'हलश्च' इति अधिकरणे घञ्, निवासस्थानमित्यर्थः। आसीत्=अभूत्। तस्य=शिखरस्य, अधस्तात्=अधःप्रदेशे, अस्तातिप्रत्ययान्तमव्ययमेतत्। वयमपि = रामादयोऽपि, तेषु=पूर्वाऽनुभूतेषु, पर्णोटजेषु = पर्णशालासु, रताः = निरताः, उषिता इति भावः। यत्र = यस्मिन् स्थाने, गोदावर्याः = तदाख्याया नद्याः, पयसि = जले, विततऽनोकहश्यामलश्रीः=अनसः=शकटस्य, अकं=गतिम्, घ्नन्तीति अनोकहाः=वृक्षाः, 'अन्येष्वपि दृश्यते' इति डप्रत्ययः, 'अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः।' इत्यमरः। विततैः=विस्तृतैः, अनोकहैः (हेतुभिः), श्यामला = नीला, श्रीः = शोभा, यस्य सः, वृक्षसमूहेन नीलकान्तिरित्यर्थः। **'विनतश्यामलाऽनोकहश्रीः'** इति पाठे— विनताः = पुष्पफलातिभारेणाऽतिनम्राः, श्यामलाः = नीलवर्णाः ये अनोकहाः = वृक्षाः तेषां श्रीः = शोभा यस्मिन् सः। एवं च मुखरशकुनः = मुखराः = शब्दं कुर्वन्तः, शकुनाः = पक्षिणो यस्मिन् सः, कूजत्पक्षियुक्त इति भावः। अत एव अन्तः = मध्ये, कूजन् = स्वयं शब्दं कुर्वन्निव स्थितः, रम्यः = सुन्दरः, वनान्तः = आरामभागः, अस्तीति शेषः। अत्र 'कूजन्नि'त्यत्र इवादिपदाऽभावात्प्रतीयमानोत्प्रेक्षा। मन्दाक्रान्ता वृत्तम्॥ २५॥

अत्रैवेति। अत्रैव = अस्मिन्नेव देशे, सा = पूर्वाऽनुभूता, यत्र = यस्यां,

---

इसकी बड़ी (ऊँची) चोटीपर गृध्रराज (जटायु) का निवासस्थान था, उसके नीचे हमलोग भी उन पर्णशालाओंमें रहते थे, जहांपर गोदावरीके जलमें फैले हुए वृक्षोंसे नीली कान्तिसे सम्पन्न और शब्द करनेवाले पक्षियोंसे युक्त, अत एव भीतर शब्द करते हुएकी तरह सुन्दर वनप्रान्त है॥ २५॥

यहींपर वह पञ्चवटी है, जहां रहनेसे अनेकों विश्वस्त विलासोंके अतिशय विस्तारके साक्षी

प्रदेशाः, प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता । किमिदमापतितमद्य रामस्य ? संप्रति हि—

> चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
> कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः ।
> व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः
> पुराभूतः शोको विकलयति मां नूतन इव ॥ २६ ॥

निवासेन=स्थित्या, विविधविस्रम्भाऽतिप्रसङ्गसाक्षिणः = विविधानाम् = अनेकप्रकाराणाम् , विस्रम्भाणाम् = विश्वस्तविलासानाम् , अतिप्रसङ्गस्य = अतिविस्तारस्य, साक्षिणः = साक्षाद्दर्शिनः, प्रदेशाः=स्थानानि, सन्तीति शेषः । प्रियायाः = वल्लभायाः, सीतायाः इत्यर्थः । आपतितम् = समागतम् , अतिदुःसहत्वेनाऽनिर्वाच्यदशा समायातेति भावः ।

चिरादिति । तीव्रः चिरात् वेगारम्भी प्रसृतो विषरस इव, कुतश्चित् संवेगात् प्रचलः शल्यस्य शकल इव, रूढग्रन्थिः स्फुटितः हृन्मर्मणि व्रण इव पुराभूतः शोको नूतन इव पुनः मां विकलयति इत्यन्वयः । तीव्रः = दारुणः, स्पर्शदशायामपि दुःसह इति भावः । चिरात् = भूयांसं कालं शमित्वा, वेगारम्भी= वेगम् = वेदनाशीघ्रत्वम् , आरभते = उत्पादयति इति वेगारम्भी, **चिरोद्वेगारम्भी** इति पाठे—चिरम् = बहुकालं यावत् , उद्वेगम् = चित्तदाहमारभते इति चिरोद्वेगारम्भी इति विग्रहः कार्यः प्रसृतः=सर्वत्र जातप्रसरः, विषरस इव=गरलद्रव इव, कुतश्चित् = कस्माच्चित् स्थानात्, संवेगात्=अतिशयवेगात्, प्रचलः = चलितः, शल्यस्य = बाणाग्रस्य, शकल इव = खण्ड इव, रूढग्रन्थिः = रूढाः = प्रादुर्भूताः, ग्रन्थयः = उपव्रणाः, यस्मात् सः, स्फुटितः = दलितः, हृन्मर्मणि = हृदयमर्मस्थले, व्रण इव = ईर्ममिव, पुराभूतः = प्राचीनः, 'घनीभूत' इति क्वाचित्कः पाठस्तस्य

प्रदेश हैं, यहींपर प्यारी सीताकी प्रियसखी वासन्ती नामकी वनदेवता थी । आज रामकी यह क्या आ पड़ा (हो गया) ? इस समय—

दारुण, बहुत कालके बाद वेदनाकी शीघ्रताको पैदा करनेवाला और सर्वत्र फैले हुए विषरसकी तरह, कहींसे अत्यन्त वेगसे चले हुए बाणाग्रके टुकड़ेकी तरह, उपव्रणवाले और हृदयके मर्मस्थलमें फूटे हुए फोड़ेकी तरह पुराना शोक भी नवीनके सदृश होकर फिर मुझे विकल कर रहा है ॥ २६ ॥

१. 'चिरोद्वेग' इति पाठान्तरम् ।

तथाविधानपि तावत्पूर्वसुहृदो भूमिभागान् पश्यामि। (निरूप्य।) अनवस्थितो भूतसन्निवेशः। तथा हि—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं

घनत्वमापन्न इत्यर्थः, शोकः = मन्युः, नूतन इव = नवीन इव, पुनः = भूयः, मां= रामं, विकलयति = विकलं करोति, 'मां नूतन इव' इत्यत्र **'संमूर्च्छयति च'** इति पाठस्तस्य मोहयति चेत्यर्थः कार्यः। प्राचीनोऽपि सीतावियोगजन्यः शोकः पञ्चवट्यायुद्दीपकविभाववशान्नूतन इव मां विकलीकरोतीति भावसंक्षेपः। अत्र चतसृणामुत्प्रेक्षाणां मिथोऽनपेक्षया स्थितेः **संसृष्टिः शिखरिणी** वृत्तम् ॥ २६ ॥

तथाविधानिति। तथाविधानपि = तादृशानपि, शोकोद्दीपकत्वेन मद्वैकल्योत्पादकानपि। पूर्वसुहृदः = प्राचीनान सखीन्, भूमिभागेषु सुहृत्त्वं च निवासादिष्वत्यन्तोपकारकत्वगुणयोगाद् बोध्यम्। निरूप्य = निरूपणं कृत्वा, दृष्ट्वेत्यर्थः। भूतसंनिवेशः = पदार्थस्थितिः, अनवस्थितः, अनियतः, परिवर्तनं गत इत्यर्थः।

पुरेति। यत्र पुरा सरितां स्रोतः, तत्र अधुना पुलिनम् (अस्ति)। क्षितिरुहां घनविरलभावो विपर्यासं यातः। बहोः कालात दृष्टम् इदं वनम् अपरम् इव मन्ये, (परं) शैलानां निवेश इदं तदिति बुद्धिं द्रढयति इत्यन्वयः। यत्र=यस्मिन् स्थाने, पुरा = पूर्वं, वनवाससमय इति भावः। सरिताम् = नदीनां, स्रोतः=प्रवाहः, आसीदिति शेषः। तत्र=तस्मिन् स्थाने, अधुना=साम्प्रतं, पुलिनं=सैकतम्, अस्तीति शेषः। क्षितिरुहां = वृक्षाणाम्। घनविरलभावः = सान्द्रत्वं विरलत्वं च, विपर्यासं = वैपरीत्यं, यातः = प्राप्तः, यत्र प्राग् वृक्षाणां सान्द्रत्वमासीत्तत्राऽधुना विरलत्वं, यत्र च विरलत्वं तत्र सान्द्रत्वं वर्तत इति भावः। बहोः=अधिकात्, कालात्=समयात्, अनन्तरमिति शेषः। यद्वा बहोः कालात्=बहुकालमदृष्ट्वा, 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी। दृष्टम् = अवलोकितम्, इदं = पुरतो दृश्यमानं वनम् = अरण्यम्, अपरम् इव = अन्यदिव, मन्ये = विचारयामि। परं शैलानां= पर्वतानाम्, निवेशः=अवस्थितिः, इदं = पुरो दृश्यमानं वनं, तत्=प्रागवलोकितम्,

वैसे होते हुए भी प्राचीन मित्रोंके सदृश भूमिभागोंको देखता हूं। (देखकर) पदार्थोंकी स्थिति नियत (एकरूप) नहीं है जैसे कि—

पहले जहाँ नदियोंका प्रवाह था, अब वहाँ तट है। वृक्षोंका घनभाव और विरलभाव भी बदल गया है। बहुत कालके अनन्तर देखा गया यह वन दूसरे वनकी तरह लग रहा है,

निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ २७ ॥
हन्त हन्त ! परिहरन्तमपि मां पञ्चवटी स्नेहाद्बलादाकर्षतीव । (सकरुणम् ।)
यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सम्बन्धकथाभिरेव सततं दीर्घाभिरास्थीयत ।
एकः सम्प्रति नाशितप्रियतमस्तामेव रामः कथं

इति=इत्याकारिकां, बुद्धिं = प्रत्यभिज्ञाऽऽत्मिकां मतिं, द्रढयति = दृढां करोतीत्यर्थः । अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः 'परमिवे'त्यत्रोत्प्रेक्षा चेति द्वयोरङ्गाङ्गिभावेन सङ्करः । शिखरिणी वृत्तम् ॥ २७ ॥

हन्तेति । हन्त हन्तेति खेदाऽतिशयद्योतनार्था द्विरुक्तिः । परिहरन्तम् अपि= परित्यजन्तम् अपि, स्नेहात् = प्रेम्णो हेतोः, आकर्षतीव = आकर्षणं करोतीव । सीतया लक्ष्मणेन च सह प्रागनुभूतस्य सुखस्य स्मारणेन पञ्चवटी मां रुणद्धीवेति भावः । सकरुणं = सदयम् ।

यस्यामिति । यस्यां मया तया सह ते दिवसाः स्वे गृहे यथा नीताः । सततं दीर्घाभिः यत्सम्बन्धकथाभिरेव आस्थीयत । सम्प्रति नाशितप्रियतम एकः पापो रामः तामेव पञ्चवटीं कथं विलोकयतु, वा असंभाव्य कथं गच्छतु इत्यन्वयः । यस्यां = पञ्चवट्यां, मया=रामेण, तया सह=सीतया समं, ते=पूर्वानुभूताः दिवसाः= दिनानि, स्वे = आत्मीये, 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने ।' इत्यमरः । गृहे = भवने, यथा=इव, नीताः=अतिवाहिताः, सततं=निरन्तरं दीर्घाभिः=विस्तृताभिः, यत्सम्बन्धकथाभिरेव=यत्पञ्चवटीविषयकवार्ताभिरेव, आस्थीयत= स्थितं, 'ष्ठा गतिनिवृत्तौ' इति धातोर्भावे लङ् । अयोध्यायामपि सीतया सह पञ्चवटीसम्बद्धमेव वार्तालापमकरवमिति भावः । सम्प्रति = अधुना, नाशितप्रियतमः= नाशिता = लक्ष्मणद्वारा वननिर्वासनेन विनाशं प्रापिता, प्रियतमा = दयिततमा, सीतेत्यर्थः, येन सः । अत एव एकः = एकाकी, अपत्नीक इत्यर्थः । नाशितप्रिय-

किन्तु पर्वतोंकी स्थिति 'यह वही वन है' इस बुद्धि (प्रत्यभिज्ञा) को दृढ कर रही है ॥२७॥

हाय ! हाय !! छोड़ते हुए भी मुझको पञ्चवटी प्रेमसे मानो बलात्कारपूर्वक खींच रही है । (दयाके साथ)

जिस पञ्चवटीमें मैंने उन (सीता) के साथ अपने घरकी तरह उन दिनोंको बिताया । निरन्तर जिस पञ्चवटीविषयक बड़ी-बड़ी कथाओंसे ही हम अयोध्यामें रहते थे । इस समय प्रियतमा (सीता) को नष्ट करनेवाला, अत एव अकेला पापी राम,

पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा ॥२८॥

(प्रविश्य ।)

शम्बूकः—जयतु देवः । भगवानगस्त्यो मत्तः श्रुतसन्निधानस्त्वामाह- 'परिकल्पितावरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा, सर्वे च महर्षयः । तदेहि । सम्भावयाऽस्मान् । अथ प्रजविना पुष्पकेण स्वदेशमुपगत्याश्वमेधसज्जो भव' इति ।

तमत्वादेव—पापः = पापशीलः, एतादृशो रामः । तामेव = सीतया सह पूर्वाऽनुभूतामेव पञ्चवटीं, कथं = केन प्रकारेण, विलोकयतु, = पश्यतु वा = अथ वा, असंभाव्य = अनादृत्य, कथं = केन प्रकारेण, गच्छतु = यातु । सीतया सह पूर्वाऽनुभूतायां पञ्चवट्यां गमनं तत्परिवर्जनं चैतद् द्वयमपि मत्कृते साम्प्रतं दुष्करमिति भावः । अत्र **उपमाऽलङ्कारः काव्यलिङ्गं** च । तथा च द्वयोर्मिथोऽनपेक्षया **संसृष्टिः । शार्दूलविक्रीडितं** वृत्तम् ॥ २८ ॥

शम्बूक इति । अगस्त्यः = मैत्रावरुणिः, श्रुतसन्निधानः = श्रुतम् = आकर्णितम् , सन्निधानं = भवत्सामीप्यं येन सः । परिकल्पिताऽऽवरणमङ्गला = परिकल्पितम् = सज्जीकृतम् , आवरणमङ्गलं = नीराजनादिकं यया सा । **'परिकल्पितविमानाऽवतरणमङ्गला'** इति पाठे=परिकल्पितानि = सज्जीकृतानि, विमानावतरणमङ्गलानि = व्योमयानावरोहणमाङ्गलिकवस्तूनि यया सा इत्यर्थः । वत्सला = स्नेहवती, प्रतीक्षते = प्रतीक्षां करोति, महर्षयः = महामुनयः, प्रतीक्षन्त इति वचनपरिणामः । तत् = तस्माद्धेतोः, संभावय = सत्कुरु । अथ = अनन्तरं, समीपागमनेनाऽस्मत्सत्काराऽनन्तरमिति भावः । प्रजविना = प्रकृष्टवेगयुक्तेन, अश्वमेधसज्जः = अश्वमेधयज्ञाऽनुष्ठानतत्परः ।

उसी पञ्चवटीको कैसे देखे ? अथवा उसका अनादर करके कैसे जाय ? ॥ २८ ॥

(प्रवेश कर)

शम्बूक—महाराजकी जय हो । भगवान् अगस्त्यने मुझसे आपका आगमन सुनकर कहा है—'वात्सल्यशील लोपामुद्रा नीराजन आदि तैयार कर आपकी बाट जोह रही है और महर्षि भी आपकी प्रतीक्षा कर रहे हैं । इस कारण पधारिए और हमलोगोंको सत्कृत कीजिए । उसके बाद बड़े वेगवाले पुष्पक विमानसे अयोध्यामें पहुँचकर अश्वमेध यज्ञ करनेके लिए तत्पर हो जाइये ।'

रामः—यथाज्ञापयति भगवान् ।

शम्बूकः—इत इतो देवः ।

रामः—(पुष्पकं प्रवर्तयन् ।) भगवति पञ्चवटि ! गुरुजनादेशोपरोधा-त्क्षण्यं क्षम्यतामतिक्रमो रामस्य ।

शम्बूकः—देव ! पश्य—

गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चाभिधोऽयं गिरिः ।

राम इति । भगवान् = अगस्त्यः, आज्ञापयति = आदिशति, तथैवाऽनुतिष्ठा-मीति शेषः ।

राम इति । प्रवर्तयन् = गमयन्, गुरुजनादेशोपरोधात् = गुरुजनानाम्=अग-स्त्यादीनाम्, आदेशस्योपरोधात्=आज्ञाऽनुसरणाद्धेतोः, अतिक्रमः=अतिक्रमणम्, अतिक्रम्य गमनमित्यर्थः, क्षम्यतां = मृष्यताम् ।

गुञ्जदिति । गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचकस्तम्बाडम्बरमूक-मौकुलिकुलः क्रौञ्चाऽभिधोऽयं गिरिः (अस्ति)। एतस्मिन् प्रचलतां प्रचलाकिनां कूजितैः उद्वेजिताः कुम्भीनसाः पुराणरोहिणतरुस्कन्धेषु उद्वेल्लन्ति इत्यन्वयः । गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचकस्तम्बाडम्बरमूकमौकुलिकुलः = कुञ्जाः = लताद्याच्छादितस्थानानि, एव कुटीराः = अल्पाः कुटयः इति कुञ्जकुटीराः 'कुटी-शमीशुण्डाभ्यो र' इति रप्रत्ययः, 'अल्पा कुटी कुटीरः स्यात्' इत्यमरः । गुञ्जन्तः= अव्यक्तशब्दवन्तो ये कुञ्जकुटीरास्तेषु कौशिकघटाः = उलूकपङ्क्तयः, तासां यो घुत्कारः = घुत्करणम्, 'घुत्' इत्याकारको योऽव्यक्तशब्द इत्यर्थः । तद्वन्तः=तादृश-शब्दयुक्ता ये कीचकाः = वंशविशेषाः, 'कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः।' इत्यमरः, तेषां ये स्तम्बाः = काण्डाः, तेषां य आडम्बरः = शब्दः, तेन मूकानि= निःशब्दानि, मौकुलिकुलानि = काकसमूहाः यस्मिन् सः । 'मौकुलिः काक' इति

राम—भगवान् जैसी आज्ञा करते हैं (वही करूंगा)

शम्बूक—महाराज ! इधरसे पधारें, इधरसे ।

राम—(पुष्पकको चलाते हुए) भगवति पञ्चवटि ! गुरुजनकी आज्ञा के अनुरोधसे रामके इस अतिक्रमको क्षमा करो ।

शम्बूक—महाराज ! देखिए—

अस्पष्ट शब्दवाले कुञ्ज कुटीरोंमें उल्लुओंके शब्दोंसे युक्त कीचकों (फटनेके कारण हुए छिद्रोंमें हवाके प्रवेश-निर्गमनसे स्वयं शब्द करनेवाले बाँस) के काण्डोंके शब्दसे-शब्दशून्य

एतस्मिन्प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः ॥२९॥

अपि च—

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः ।

हेमचन्द्रः । एतादृशः क्रौञ्चाऽभिधः = क्रौञ्चः अभिधा = नाम यस्य सः, क्रौञ्चनामक इत्यर्थः । अयं = पुरो दृश्यमानः, गिरिः = पर्वतः, अस्तीति शेषः । एतस्मिन् = क्रौञ्चपर्वते, प्रचलतां = प्रचलनं कुर्वतां, प्रचलाकिनां = प्रचलाकोऽस्ति येषां ते प्रचलाकिनस्तेषां = मयूराणामित्यर्थः । 'प्रचलाकः शिखण्डश्च' इति, 'केकी शिखी शिखण्डी प्रचलाकी बर्हिणः कलापी च' इति च हलायुधः । 'अत इनिठनौ' इति नित्ययोगे इनिप्रत्ययः । कूजितैः = शब्दैः, उद्वेजिताः = भीताः, कुम्भीनसाः = सर्पाः, पुराणरोहिणतरुस्कन्धेषु = पुराणाः = प्राचीनाः, ये रोहिणतरवः = चन्दनवृक्षाः, 'रोहिणश्चन्दनद्रुम' इति हारावली, तेषां स्कन्धाः = प्रकाण्डदेशाः, तेषु उद्वेल्लन्ति=इतस्ततश्चलन्ति, न तु तांस्त्यक्त्वा पलायन्त इति भावः । 'वेल्ल चलने' इति धातोर्लट् । अत्रत्यविषयविशेषाकृष्टा जन्तवो मृत्युभयमपि अगणयित्वा नान्यत्र गच्छन्तीति भावः । अत्र रूपकाऽलङ्कारः, स्वभावोक्तिश्चेति द्वयोरङ्गाङ्गिभावेन सङ्करः । शार्दूलविक्रीडितं वृत्तम् ॥ २९ ॥

एत इति । कुहरेषु गद्गदनदद्गोदावरीवारयो मेघालम्बितमौलिनीलशिखराः त एते दाक्षिणाः क्षोणीभृतः (सन्ति) । अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः उत्तालाः त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः (सन्ति) इत्यन्वयः । कुहरेषु = गुहासु, गद्गदनदद्गोदावरीवारयः = गद्गदम् = अव्यक्तशब्दं यथा तथा, नदन्ति=शब्दायमानानि, गोदावरीवारीणि=गोदावरीजलानि येषु ते । मेघालम्बितमौलिनीलशिखराः = मेघैः = जलदैः, आलम्बिताः = अवलम्बिताः, मौलयः=शिखराऽग्राणि येषां ते, अत एव नीलानि = नीलवर्णानि, शिखराणि = कूटानि येषां

कौञ्चोंके समूहसे युक्त क्रौञ्च नामक यह पर्वत है। यहाँपर चलते हुए मोरोंके शब्दोंसे डरे-हुए सर्प पुराने चन्दन वृक्षोंके स्कन्धप्रदेशोंमें इधर-उधर चल रहे हैं ॥ २९ ॥

और भी—

गुफाओंमें कल कल शब्द कर चलनेवाले गोदावरीके जलसे युक्त और मेघोंसे अवलम्बित शिखरके अग्रभागवाले, अत एव नीलवर्णकी चोटियोंसे युक्त ये दक्षिण दिशाके पर्वत हैं।

अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः ॥ ३० ॥

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविश्रीभवभूतिविरचित उत्तररामचरिते
पञ्चवटीप्रवेशो नाम द्वितीयोऽङ्कः ॥ २ ॥

ते । ते = प्रसिद्धाः, एते = पुरोऽवलोक्यमानाः, दाक्षिणाः = दक्षिणदिग्भवाः, क्षोणी-भृतः = पर्वताः, अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः = अन्योन्येषां = परस्परेषाम् , प्रतिघातेन = आघातेन, सङ्कुलाः = निबिडाः, चलन्तो ये कल्लोलाः = महातरङ्गाः, तेषां कोलाहलाः = कलकलशब्दाः, तैः, 'इत्थम्भूतलक्षणे' इति तृतीया । उत्तालाः = त्वरिताः, वेगवन्त इत्यर्थः, 'उत्तालस्त्वरितो ज्ञेय' इति हलायुधः । ते = प्रसिद्धाः, इमे = पुरोऽवलोक्यमानाः, गभीरपयसः = गभीराणि पयांसि येषु ते दुष्प्रवेशजला इत्यर्थः । पुण्याः=पवित्राः, सरित्सङ्गमाः=नदीसङ्गमाः, वर्तन्त इति शेषः । अत्र तद्गुणाऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ३० ॥

इति श्रीशेषराजशर्मप्रणीतायामुत्तररामचरितव्याख्यायां चन्द्रकला-ऽऽख्यायां पञ्चवटीप्रवेशो नाम द्वितीयोऽङ्कः ॥ २ ॥

परस्परमें आघातसे अत्यधिक चञ्चल महातरङ्गोंके कोलाहलोंसे वेगवाले ये गहरे जलसे युक्त पवित्र नदियोंके सङ्गम हैं ॥ ३० ॥

(सब निकल जाते हैं)

यह 'पञ्चवटीप्रवेश' नामक द्वितीय अङ्क समाप्त हुआ ॥ २ ॥

तृतीयोऽङ्कः

(ततः प्रविशति नदीद्वयम्[1])

एका—सखि मुरले ! किमसि सम्भ्रान्तेव ?

मुरला—सखि तमसे ! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्। 'जानास्येव यथा वधूपरित्यागात्प्रभृति—

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥ १ ॥

तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकृष्टगद्गदेन दीर्घशोक-

---

तत इति । नदीद्वयं = सरिद्द्वितयं, नद्यभिमानिन्यौ तमसामुरलानाम्न्यौ द्वे देवते इत्यर्थः ।

तमसेति । संभ्रान्ता=संभ्रमयुक्ता, त्वरितेति भावः । किमसि=किमर्थं वर्तसे ?

मुरलेति । सरिद्वरां = नदीश्रेष्ठां, वधूत्यागात् प्रभृति = पत्नीनिर्वासनकालमारभ्येत्यर्थः, 'कार्तिक्याः प्रभृती'ति भाष्यप्रयोगात्प्रभृत्यर्थयोगे पञ्चमी । 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः ।

अनिर्भिन्न इति । गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथो रामस्य करुणो रसः पुटपाकप्रतीकाशः (अस्ति) इत्यन्वयः । गभीरत्वात् = गम्भीरत्वात् , अनिर्भिन्नः = निर्भेदमप्राप्तः, अव्यक्त इत्यर्थः, किन्तु अन्तर्गूढघनव्यथः = अन्तः = अभ्यन्तरे, हृदय इत्यर्थः, गूढा = गुप्ता, घना = निबिडा, व्यथा = दुःखं यस्य सः, रामस्य = रामचन्द्रस्य, करुणो रसः = सीतावियोगजन्यो मनोविकारः । पुटपाकप्रतीकाशः = पुटे = लोहादिमयौषधपाकपात्रे, पाकः = पचनं, यस्य सः पुटपाकः = औषधविशेषः, तेन सदृशः = तुल्यः, अस्तीति शेषः । गम्भीरत्वाद् बहिरस्फुटः सीतावियोगजन्यः शोकाऽतिशयो रामं भृशं तापयतीति भावः । पूर्णोपमाऽलङ्कारः ॥१॥

तेनेति । तेन = पुटपाकसदृशेन, तथाविधेष्टजनकष्टविनिपातजन्मना = तथा-

---

(तब दो नदियाँ तमसा और मुरला, प्रवेश करती हैं ।)

एक नदी—सखि मुरले ! क्यों घबड़ाई-सी हो ?

मुरला—सखि तमसे ! भगवान् अगस्त्यकी पत्नी लोपामुद्राने नदीश्रेष्ठ गोदावरीको कहनेके लिए मुझे भेजा है । 'तुम जानती ही हो कि सीताको छोड़नेके बादसे—

गम्भीरतासे अव्यक्त, भीतर छिपी हुई गाढ़ वेदनासे युक्त रामका करुण रस (शोक) पुटपाकके सदृश है ॥ १ ॥

इस कारण प्रिया सीताकी कष्टप्राप्तिसे उत्पन्न और अधिक गद्गद शब्द करनेवाली और

---

१. 'तमसा मुरला च' इत्यधिकः क्वचित्पाठः ।

सन्तानेन सम्प्रति परिक्षीणो रामभद्रः । तमवलोक्य कम्पितमिव कुसुमसमबन्धनं मे हृदयम् । अधुना च रामभद्र प्रतिनिवर्तमानेन नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः । तत्र च निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात्पदे पदे महाप्रमादानि शोकस्थानानि शङ्कनीयानि । तद्भगवति गोदावरि ! त्वया तत्रभवत्या सावधानया भवितव्यम् ।'

विधः = तादृशः, अनुपम इत्यर्थः । इष्टजनः = वल्लभजनः, सीतारूप इति भावः, तस्य कष्टविनिपातः = दुःखप्राप्तिः, ततो जन्म = उत्पत्तिः यस्य स तेन । प्रकृष्टगद्गदेन = प्रकृष्टः=अधिकः, गद्गदः=गद्गदशब्दः येन, तेन, अविकाव्यक्तशब्दकारिणेत्यर्थः । **'प्रकर्षगद्गदेन'** इति पाठे प्रकर्षेण गद्गदो यस्मिन्निति विग्रहः, **'प्रकर्षगतेन'** इति पाठे अतिशयेनेत्यर्थः । दीर्घशोकसन्तानेन = चिरकालव्यापकमन्युपरम्परया, परिक्षीणः = अतिशयदुर्बलः, अस्तीति शेषः । तं = रामभद्रम् , कुसुमसमबन्धनं = पुष्पसदृशबन्धनं, पुष्पवत्सुच्छेद्यमित्यर्थः । मे = मम, लोपामुद्राया इत्यर्थः । कम्पितमिव = संजातकम्पमिव, वर्तत इति शेषः, प्रतिनिवर्तमानेन=प्रत्यागच्छता, अयोध्यामिति शेषः । नियतमेव = निश्चितमेव, वधूसहनिवासविस्रम्भसाक्षिणः = वध्वाः = सीतायाः, सहनिवासे = सहवासे, ये विस्रम्भाः=स्वच्छन्दलीलाः, तत्साक्षिणः = तद्द्रष्टारः, प्रदेशाः = स्थानानि, द्रष्टव्याः = दर्शनीयाः, रामः सीतासहवाससाक्षिणः प्रदेशान पश्येदिति संभावना । तत्र च=तेषु प्रदेशेषु च, निसर्गधीरस्याऽपि = स्वभावेन धैर्ययुक्तस्याऽपि, चञ्चलस्य तु किं वक्तव्यमिति भावः । एवंविधायाम्=ईदृश्यां, विरहयुक्तायामिति भावः, अवस्थायां = दशायाम् , अतिगम्भीराभोगशोकक्षोभसंवेगात् = अतिगम्भीरः = अतिशयदुर्ज्ञेयः, आभोगः = परिपूर्णता, यस्य सः, एतादृशो यः शोकः = मन्युः, तेन (हेतुना) क्षोभः = चित्तविकारः, तस्य संवेगात = वेगाऽतिशयात् हेतोः, पदे पदे=प्रतिपदं, प्रतिस्थान-

---

बहुत कालतक रहनेवाली शोकपरम्परासे आजकल रामभद्र बहुत दुर्बल हो गये हैं । उनको देखकर फूलके सदृश बन्धनवाला मेरा हृदय कांप-सा गया है । अभी रामभद्र लौटते हुए पञ्चवटीके वनमें सीताके सहवासमें हुई स्वच्छन्द लीलाओंके साक्षी स्थानोंको अवश्य ही देखेंगे । वहांपर ऐसी अवस्थामें अत्यन्त बढ़े हुए शोकसे उत्पन्न चित्तविकारके अधिक वेगसे, स्वभावसे ही धीर होते हुए भी रामके पग पगमें अधिक प्रमादोंसे युक्त शोकस्थानों—(मूर्च्छादिकों) की आशङ्का करनी चाहिए । इस कारण हे भगवति गोदावरि ! पूजनीय आपको सावधान (होशियार) होना चाहिए ।'

**वीचीवातैः सीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।
मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति ॥ २ ॥**

तमसा—उचितमेव दाक्षिण्यं स्नेहस्य । सञ्जीवनोपायस्तु मूलत एव रामभद्रस्य सन्निहितः ।

मित्यर्थः । महाप्रमादानि = महान्तः = अधिकाः, प्रमादाः=अनवधानताः येषु तानि संज्ञाऽपहारकाणीति भावः, एतादृशानि शोकस्थानानि = शोकाऽवकाशाः, शङ्कनीयानि = शङ्कायोग्यानि, रामभद्रस्येति शेषः । तत् = तस्माद्धेतोः, सावधानया= अवधानेन = चित्तैकाग्र्येण, विषयान्तरसंचारवैमुख्येनेति यावत् , सहितया=युक्तया भवितव्यं = भाव्यम् , भाववाच्यप्रयोगः ।

वीचीति । सीकरक्षोदशीतैः पद्मकिञ्जल्कगन्धान् आकर्षद्भिः स्वैरं स्वैरं प्रेरितैः वीचीवातैः रामभद्रस्य मोहे मोहे जीवं तर्पयेत्यन्वयः । सीकरक्षोदशीतैः = सीकराणाम् = अम्बुकणानाम्, क्षोदाः = चूर्णाः, 'सीकरोऽम्बुकणाः स्मृताः' इत्यमरः । पुस्तकान्तरे शीकरेति तालव्यादिपाठस्तैः शीकरक्षोदैः शीताः = शीतलास्तैः, एतेन वायोः शीतलत्वं सूच्यते । तथा च पद्मकिञ्जल्कगन्धान् = पद्मानां=कमलानाम् , किञ्जल्काः = केसराः, 'किञ्जल्कः केसरोऽस्त्रियाम्' इत्यमरः । पद्मकिञ्जल्कानां गन्धास्तान् , आकर्षद्भिः=हरद्भिः, एतेन सौगन्ध्यं सूच्यते । स्वैरं स्वैरं=मन्दं मन्दं, वीप्सायां द्विरुक्तिः, 'मन्दस्वच्छन्दयोः स्वैरम्' इत्यमरः, एतेन मान्द्यं सूच्यते । प्रेरितैः = प्रेषितैः, एतादृशैः वीचीवातैः = तरङ्गवायुभिः, रामभद्रस्य = वत्सस्य रामचन्द्रस्य, मोहे मोहे = प्रतिमोहं, मोहपदेन मोहाऽवस्था लक्ष्यते, अतः प्रतिमोहाऽवस्थमिति भावः, जीवं = जीवनं जीवनं जीवस्तं, भावे घञ् । तर्पय = प्रीणय, इति = इत्याकारकं, वाक्यम् 'अभिधातुं प्रेषिताऽस्मी'ति पदत्रयं पूर्ववाक्यतोऽनुवर्तनीयम् । **शालिनी वृत्तम्** ॥ २ ॥

तमसेति । दाक्षिण्यं = दक्षिणस्य भावो दाक्षिण्यमौदार्यमित्यर्थः, 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् ; 'दक्षिणे सरलोदारौ' इत्यमरः । उचितमेव = योग्यमेव । मूलतः = मूलादिति मूलतः मूलं = सीता, तस्या एवेत्यर्थः, 'अपादाने चाहीयरुहोः' इति तसिः । '**मौलिक**' इति पाठे मूलात् = सीतायाः,

---

जलकी छोटी छोटी बूंदोंसे ठण्डे, कमलके केसरकी खुशबूको फैलाते हुए और मन्द मन्द चलनेवाले तरङ्गवायुओंसे रामभद्रको प्रत्येक मूर्च्छाऽवस्थामें होशमें लाओ ॥ २ ॥

तमसा—प्रेमकी उदारता योग्य ही है । रामभद्रको होशमें लानेका उपाय तो मूलसे ही निकटस्थ है ।

मुरला—कथमिव ?

तमसा—तत्सर्वं श्रूयताम् । पुरा किल वाल्मीकितपोवनोपकण्ठात्परित्यज्य निवृत्ते सति लक्ष्मणे सीतादेवी प्राप्तप्रसववेदनमतिदुःखसंवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती । तदैव तत्र दारकद्वयं च प्रसूता भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलं च नीता । स्तन्यत्यागात्परेण दारकद्वयं च तस्य प्राचेतसस्य महर्षेर्गङ्गादेव्या समर्पितं स्वयम् ।

आगत इत्यर्थः, 'तत आगत' इति ठञ् । सन्निहितः = निकटस्थः, अस्तीति शेषः ।

मुरलेति । कथमिव = कीदृशः, संजीवनोपायः सन्निहित इति शेषः ।

तमसेति । पुरा = प्राक्, किल = निश्चयेन, वाल्मीकितपोवनोपकण्ठात् = वाल्मीकितपोवनस्य = प्राचेतसाश्रमस्य, उपकण्ठात् = निकटात्, 'उपकण्ठान्तिकाऽभ्यर्णाऽभ्यग्रा अप्यभितोऽव्ययम्' इत्यमरः । परित्यज्य = त्यक्त्वा, सीतामिति शेषः । निवृत्ते=गते, देवी=कृताभिषेका, सीतेत्यर्थः । प्राप्तप्रसववेदनं=प्राप्ता=आसादिता, प्रसववेदना=प्रसवदुःखम्, येन तम् । आत्मानं=स्वम्, अतिदुःखसंवेगात्= व्यथाऽतिशयजवात्, निक्षिप्तवती = प्रेरितवती । तदैव = निक्षेपाऽनन्तरमेव, तत्र = गङ्गाप्रवाहे, दारकद्वयं = शिशुद्वितयं, प्रसूता = प्रसूतवती, 'आदिकर्मणि क्तः कर्तरि च' इति कर्तरि क्तप्रत्ययः । पृथ्वीभागीरथीभ्यां=पृथिवीगङ्गाभ्याम्, अभ्युपपन्ना = अनुगृहीता (सती), 'अभ्युपपत्तिस्त्वनुग्रहः' इत्यमरः । रसातलं = रसायाः = पृथिव्याः, 'भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा' । इत्यमरः, तलम् = अधःस्थानम्, रसातलं, पातालमित्यर्थः, 'अधःस्वरूपयोरस्त्री तलम्' इति 'अधोभुवनपातालं बलिसद्म रसातलम्' इति चामरः । नीता = प्रापिता । स्तन्यत्यागात् = दुग्धपानत्यागात्, 'परेण' इति पदेन योगे 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति पञ्चमी, परेण = परवर्तिकालेन उपलक्षितमिति शेषः, 'इत्थंभूतलक्षणे' इति तृतीया । तद्दारकद्वयं = सीताशिशुद्वितयम्, प्राचेतसस्य = वाल्मीकेः, 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव' इति वचनात् सम्प्रदानार्थे षष्ठी ।

मुरला—कैसे ?

तमसा—वह सब सुनो । पहले सीताको छोड़कर वाल्मीकिके तपोवनके निकट भागसे लक्ष्मणके लौटनेपर महारानी सीताने अत्यन्त दुःखके वेगसे प्रसवकी वेदनासे युक्त अपनेको गङ्गाके प्रवाहमें फेंक दिया । उन्होंने उसी समय वहाँपर दो बालकोंको पैदा किया । भगवती पृथिवी और गङ्गाजीने अनुग्रह कर उनको पातालमें पहुँचाया । दूध छूटनेके बाद सीताके दोनों लड़कोंको गङ्गादेवीने स्वयम् महर्षि वाल्मीकिको सौंपा ।

मुरला—(सविस्मयम् ।)

ईदृशानां विपाकोऽपि जायते परमाद्भुतः ।
यत्रोपकरणीभावमायात्येवंविधो जनः ॥ २ ॥

तमसा—इदानीं तु शम्बूकवृत्तान्तेनानेन सम्भावितजनस्थानं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव लोपामुद्रया स्नेहादभिशङ्कितं

ईदृशानामिति । ईदृशानां विपाकोऽपि परमाद्भुतो जायते, यत्र एवंविधो जन उपकरणीभावम् आयाति इत्यन्वयः । ईदृशानाम् = एतादृशानां, सीताराम-सदृशानां महानुभावानामित्यर्थः । विपाकोऽपि = परिणामोऽपि, दुरवस्थाऽपीत्यर्थः । परमाऽद्भुतः = अतिशयाश्चर्ययुक्तः, जायते = भवति, निर्वासनदुरवस्थाऽसह्यत्वेन मरणनिश्चयाद् गङ्गापातेऽपि तदभावो गङ्गायामेव पुत्रद्वयप्रसूतिः, ताभ्यां च पुत्राभ्यां सार्धं पृथ्वीगङ्गाकर्तृकं सीतायाः पातालनयनं, स्तन्यत्यागाऽनन्तरं च शिशुद्वयस्य वाल्मीकये समर्पणमित्यादिभिर्विपाकस्य परमाद्भुतत्वं ज्ञेयम्, यद्दर्शन-मपि महापुण्यमन्तरेण न लभ्यत इति भावः । यत्र = विपाके, एवंविधः = एतादृशः पृथ्वीगङ्गादिसदृशः, जनः = लोकः, उपकरणीभावम् = उपकरणत्वं, सहायत्वमित्यर्थः । आयाति = प्राप्नोति । अत्र काव्यलिङ्गमलङ्कारः ॥ २ ॥

तमसेति । शम्बूकवृत्तान्तेन = शम्बूकतपश्चरणरूपेण उदन्तेन (हेतुना) 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः । संभावितजनस्थानं = सम्भावितम् = आगमनेन सत्कृतम् , जनस्थानं = दण्डकारण्यं येन तं, शम्बूकहननाऽर्थमिति शेषः । **'संभावितजनस्थानाऽऽगमनम्'** इति पाठे तु अनुमितदण्डकारण्या-गमनमित्यर्थः । एतादृशं रामभद्रं = वत्सरामचन्द्रम् , सरयूमुखात् = सरयूनाम्न्याः कस्याश्चिन्नद्या मुखात् , 'आख्यातोपयोगे' इति पञ्चमी । उपश्रुत्य = आकर्ण्य, 'शम्बूकहननाऽर्थमागत्य रामो जनस्थानं सत्कृतवान्' इति सरयूमुखादाकर्ण्य । यद्वाऽत्र 'श्रु'धातुर्ज्ञानसामान्यवचनः, 'अदर्शनं लोपः' इत्यत्र दृशिवत् , अतः

मुरला—(आश्चर्यके साथ)

ऐसे लोगोंकी दुरवस्था भी बहुत ही अनूठी होती है, जिस दुरवस्थामें ऐसे (गङ्गा और पृथ्वीके सरीखे) लोग सहायता करते हैं ॥ २ ॥

तमसा—अभी 'इस शम्बूकके वृत्तान्तसे जनस्थानको रामभद्रने अनुगृहीत किया है' ऐसा सरयूके मुखसे सुनकर भगवती गङ्गाजी लोपामुद्राने स्नेहसे जिस बातकी शङ्का की थी;

तदेवाभिशङ्क्य सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीमुपागता ।

मुरला—सुष्ठु चिन्तितं भगवत्या भागीरथ्या । 'राजनीतिस्थितस्यास्य खलु तैश्च तैश्च जगतामाभ्युदयिकैः कार्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः । अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थ' इति । कथं सीतया रामभद्रोऽयमाश्वासनीयः स्यात् ?

तमसा—उक्तमेव भगवत्या भागीरथ्या—'वत्से देवयजनसम्भवे सीते !

उपश्रुत्य = ज्ञात्वेत्यर्थः । यदेव = राममोहादि, सीतासमेता = सीतया समेता = मिलिता सती, गृहाचारव्यपदेशेन = गेहकार्यव्याजेन ।

मुरलेति । सुष्ठु=शोभनं, चिन्तितं=विचारितम् । राजनीतिस्थितस्य=क्षत्रियोचितराजपालनात्मकधर्मनिष्ठस्येति भावः । **'राजधानीस्थितस्य'** इति पाठे अयोध्यायां विद्यमानस्येत्यर्थः । तैस्तैः=अतिशयप्रसिद्धैः, आभ्युदयिकैः = उन्नतिजनकैः, कार्यैः = कर्मभिः (हेतुभिः), 'हेतौ' इति तृतीया । व्यापृतस्य = व्यापारयुक्तस्य, चित्तविक्षेपाः = मानसक्षोभाः, सीताविरहजनिता इति शेषः । नियताः = नियन्त्रिताः । अत्र जनस्थानवने तु—अव्यग्रस्य = व्यग्रतारहितस्य, प्रजापालनादिव्यापारान्तरशून्यस्येति भावः । अव्यग्रत्वादेव शोकमात्रद्वितीयस्य=मन्युमात्रसहायस्य, असहायत्वेन शोचिष्यति इति भावः । अनर्थः = अनिष्टम् , 'आयुर्घृतम्' इतिवत् कार्यकारणभावसम्बन्धे लक्षणया अनिष्टकारणमित्यर्थः । आश्वासनीयः = आश्वासयितुमर्हः, स्यात् = भवेत् , द्वयोर्भिन्नदेशत्वात्सीता कथं राममाश्वासयेदिति भावः ।

तमसेति । आयुष्मतोः = जैवातृकयोः, 'जैवातृकः स्यादायुष्मान्' इत्यमरः, मतुप्प्रत्ययः । द्वादशस्य = द्वौ च दश च द्वादश, 'द्व्यष्टनः संख्यायामबहुव्रीह्य-

उसी बातकी शङ्का कर सीताको साथमें ले कुछ घरके कामके बहानेसे गोदावरीके पास आई ।

मुरला—भगवती गङ्गाजीने अच्छा विचार किया । 'राजनीतिमें रहे हुए और जगत्के उन २ कल्याणकारक कार्योंसे व्यग्र रामभद्रके चित्तकी चञ्चलता नियन्त्रित रहती थी । परन्तु इस समय व्यग्र न होनेसे और शोकमात्र के साथमें रहनेसे भी रामभद्रका पञ्चवटीमें प्रवेश बड़ा अनिष्टकारक है ।' सीतासे रामभद्रको कैसे आश्वासन होगा ?

तमसा—भगवती गङ्गाजीने सीताको कहा है कि 'हे वत्से यज्ञभूमिमें उत्पन्न सीते ! आज

अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशस्य जन्मवत्सरस्य सङ्ख्यामङ्गलग्रन्थिरभिवर्तते। तदात्मनः पुराणश्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तापचितैः पुष्पैरुपतिष्ठस्व। न त्वामवनिपृष्ठवर्तिनीमस्मत्प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति किमुत मर्त्याः ?' इति। अहमप्याज्ञापिता 'तमसे ! त्वयि प्रकृष्टप्रेमैव वधूर्जानकी। अतस्त्वमेवास्याः प्रत्यनन्तरीभव' इति। साऽहमधुना यथाऽदिष्टमनुतिष्ठामि।

शीत्योः' इत्यात्वम्। द्वादशानां पूरणो द्वादशस्तस्य, 'तस्य पूरणे डट्'। सङ्ख्यामङ्गलग्रन्थिः = सङ्ख्यापूर्तिहेतुको मङ्गलग्रन्थिः, लक्षणया तत्कालः। अभिवर्तते = अभिविद्यते, **'अभिवध्यते'** इति क्वाचित्कः पाठः, अभिग्रथ्यत इति तदर्थः। पुराणश्वशुरं = पुरातनश्वशुरम्, एतावतः = एतत्परिमाणस्य, विस्तीर्णस्येत्यर्थः। मानवस्य = मनुसम्बन्धिनः, वैवस्वतमनुजातस्येत्यर्थः। प्रसवितारं = प्रसूत इति प्रसविता तं, जनकमित्यर्थः, 'ण्वुल्तृचौ' इति तृच्प्रत्ययः। अपहतपाप्मानम् = अपहतः = विनाशितः, पाप्मा = पापं, येन तम्। 'अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम्' इत्यमरः। सवितारं = सूर्यम्, स्वहस्ताऽपचितैः = आत्मकरसंगृहीतैः, उपतिष्ठस्व = पूजय, 'उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' इत्यात्मनेपदम्। अवनिपृष्ठवर्तिनीं=भूपृष्ठे विद्यमानाम्, अस्मत्प्रभावात् = मत्सामर्थ्यात्, न द्रक्ष्यन्ति=न विलोकयिष्यन्ति, मर्त्याः=मरणधर्माणो मनुष्या इत्यर्थः, द्रक्ष्यन्ति इति, किमुत=किं वक्तव्यम् ? वनदेवता अपि त्वां न द्रक्ष्यन्ति, मनुष्याणां का कथेति भावः, इति = इत्थम्, आज्ञापितेति शेषः। अहमपि = तमसाऽपि, आज्ञापिता=आदिष्टा, त्वयि=त्वद्विषये, वधूः=स्नुषा, रामस्य पुत्रस्थानीयत्वात् तत्पत्नी सीता गङ्गायाः स्नुषैव संवृत्तेति भावः। प्रत्यनन्तरीभव = निकटवर्तिनी भव। यथाऽऽदिष्टम्=आदिष्टमनतिक्रम्येति विग्रहे यथार्थेऽव्ययीभावः, आदेशाऽनुसारमिति भावः। अनुतिष्ठामि = करोमि।

चिरजीव कुश और लवकी माङ्गलिक बारहवी वर्षगाँठ है। इस कारण अपने पुराने ससुर, इतने बड़े वैवस्वत मनुके वंशकी उत्पत्ति करनेवाले और पापनाशक सूर्यदेवको अपने हाथसे तोड़े गये फूलोंसे पूजा करो। जमीनपर रहती हुई तुमको मेरे प्रभावसे वनकी देवियाँ भी नहीं देख सकेंगी, मनुष्योंकी तो कुछ बात ही क्या ?' मुझे भी उन्होंने आज्ञा दी है कि - 'हे तमसे ! बहू सीता तुमसे बहुत प्रेम करती ही हैं। इसलिये तुम हो इनके साथ रहो'। सो मैं अब आज्ञाके अनुसार करती हूँ।

मुरला—अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि । रामभद्रोऽप्यागत एवेति तर्कयामि ।

तमसा—तदियं गोदावरीह्रदान्निर्गत्य—

परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ॥४॥

मुरला—इयं हि सा—

मुरलेति । तर्कयामि = अनुमिनोमि ।

तमसेति । गोदावरीह्रदात् = गोदावर्या अगाधजलात् ।

परिपाण्डिवति । परिपाण्डुदुर्बलकपोलसुन्दरं विलोलकबरीकम् आननं दधती जानकी करुणस्य मूर्तिः अथवा शरीरिणी विरहव्यथा इव वनम् एति इत्यन्वयः । परिपाण्डुदुर्बलकपोलसुन्दरं = परितः पाण्डू परिपाण्डू = अतिशयविरहेण परितः श्वेतौ, 'कुगतिप्रादय' इति समासः । दुर्बलौ = कृशौ, कपोलौ = गण्डौ यस्मिंस्तत् इति त्रिपदबहुव्रीहिः, तच्च तत् सुन्दरं = मनोहरम् , तादृशपरिपाण्डुकृशगण्डस्थलाभ्याम् उपलक्षितमपि स्वभावसुन्दरमिति भावः । विलोलकबरीकं = विलोला = संस्काराऽभावाच्चञ्चला, कबरी = केशवेशः यस्मिंस्तत् , 'क्रीडां शरीरसंस्कारं त्यजेत प्रोषितभर्तृका ।' इति नियमादिति भावः, 'नद्यृतश्च' इति कप् , 'न कपि' इति ह्रस्वनिषेधः । एतादृशमाननं = मुखं, दधती = धारयन्ती, जानकी = सीता, करुणस्य = करुणरसस्य, मूर्तिः = शरीरम् , 'मूर्तिः काठिन्यकाययोः' इत्यमरः, शरीरधारी करुणरस इवेत्यर्थः । अथवा = आहोस्वित् , शरीरिणी = शरीरधारिणी, विरहव्यथा इव = रामवियोगवेदना इव, वनं = पञ्चवटीवनम् , एति = प्राप्नोति । अत्र 'करुणस्य मूर्तिरि'त्यत्र इवशब्दाऽभावात्प्रतीयमानोत्प्रेक्षा 'विरहव्यथेवे'त्यत्रोत्प्रेक्षा चेति द्वयोः संसृष्टिः । **मञ्जुभाषिणी वृत्तं**, 'सजसा जगौ भवति मञ्जुभाषिणी' इति तल्लक्षणम् ॥ ४ ॥

मुरला-मैं भी इस वृत्तान्तको भगवती लोपामुद्रासे निवेदन करता हूँ। रामभद्र भी आ ही गये हैं, ऐसा अनुमान करती हूं ।

तमसा—यह सीता गोदावरीके ह्रदसे निकलकर—

पीले और कृश गालोंसे सुन्दर और चञ्चल केश समूहवाले मुखको धारण करती हुई करुण रसकी मूर्ति वा देह धारण करनेवाली वियोगकी वेदनाके सदृश वनमें आ रही है ॥४॥

मुरला—यह सीता—

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकमलशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ ५ ॥

(इति परिक्रम्य निष्क्रान्ते ।)

इति शुद्धविष्कम्भकः ।

(नेपथ्ये ।) जात ! जात !!—

किसलयमिति । हृदयकमलशोषी दारुणो दीर्घशोको बन्धनात् विप्रलूनं मुग्धं किसलयम् इव परिपाण्डु क्षामम् अस्याः शरीरं शरदिजो घर्मः केतकीगर्भपत्रम् इव ग्लपयति इत्यन्वयः । हृदयकमलशोषी = हृदयम् = उरः, एव कमलं = पद्मम् = हृदयकमलं, 'मयूरव्यंसकादयश्च' इति रूपकसमासः । हृदयकमलं शोषयतीति तच्छीलो हृदयकमलशोषी, दारुणः = कठोरः दीर्घशोकः = चिरस्थायिमन्युः, बन्धनात् = वृन्तात् , विप्रलूनं = छिन्नं, मुग्धं = सुन्दरं, किसलयम् इव = नवपल्लवम् इव, परिपाण्डु = रामविरहेण अतिशयश्वेतं क्षामं = कृशं, 'क्षायो मः' इति निष्ठातस्य मः, एतादृशम् अस्याः = सीतायाः, शरीरं = देहं, शरदिजः = शरदि जातः, शरदृतूत्पन्न इत्यर्थः, 'सप्तम्यां जनेर्डः' इति डप्रत्ययः, 'प्रावृट्शरत्कालदिवां जे' इत्यलुक् । घर्मः = आतपः, केतकीगर्भपत्रम् इव = केतकीपुष्पाऽभ्यन्तरदलम् इव, ग्लपयति = म्लानं करोति, 'ग्लास्नावनुवमां च' इति मित्त्वे 'मितां ह्रस्व' इति ह्रस्वत्वम् । अत्र रूपकस्योपमाद्वयेन **सङ्करः । मालिनी** वृत्तम् , एतल्लक्षणं पृ० ४० नमे द्रष्टव्यम् ॥ ५ ॥

शुद्धेति । शुद्धविष्कम्भकः = संस्कृतात्मकविष्कम्भक इत्यर्थः ।

नेपथ्य इति । जात जात = पुत्र पुत्र ! पुस्तकान्तरे वीप्सया **'प्रमाद'** इति पाठान्तरम् , तस्य अनवधानतेत्यर्थः ।

जैसे शरद् ऋतुकी धूप केतकीके फूलके भीतरी पत्तेको मलिन कर देती है, उसी तरह हृदय-कमलको सुखानेवाला, कठोर, बहुत बड़ा शोक, वृन्त (डंठल) से टूटे हुए सुन्दर पल्लवकी तरह पीली और दुर्बल सीताके शरीरको मलिन करता है ॥ ५ ॥

(तब दोनों घूमकर निकल जाती है ।)

शुद्ध विष्कम्भक समाप्त ।

(नेपथ्यमें) पुत्र ! पुत्र !!—

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता ।)

सीता—अम्हहे ! जाणामि-'पिअसही वासन्दी व्वाहरदि'त्ति। (अहो जानामि 'प्रियसखी वासन्ती व्याहरती'ति ।

(पुनर्नेपथ्ये ।)

सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै-
रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत् ।

तत इति । पुष्पाऽवचयव्यग्रहस्ता = पुष्पाणाम्=कुसुमानाम्, अवचये=संग्रहे, व्यग्रौ=आसक्तौ, 'हस्तौ यस्याः सा 'अवचय'इत्यत्र 'हस्तादाने चेरस्तेये'इति सूत्रेण घञा भाव्यम्, ततः 'अवचाय'इति रूपेण भवनीयम् । यद्वा हस्तादान इत्यनेन आदेयानां पुष्पाणां प्रत्यासत्तिर्लक्ष्यते, अत्र च प्रत्यासत्त्यभावेन सीता यद्दृच्छया पुष्पाऽऽवचयं करोतीति कल्पनीयं, 'स्थितस्य गतिश्चिन्तनीया' इति न्यायात् । सकरुणौत्सुक्यं = करुणया = दयया, औत्सुक्येन = औत्कण्ठ्येन, मत्सखी वासन्ती किं कथयतीत्याकारकेणेति भावः, अत्र च सहितं यथा तथेति क्रियाविशेषणम् ।

सीतेति । पुरा अग्रे लोलो यः करिकलभकः सीतादेव्या स्वकरकलितैः, सल्लकीपल्लवाग्रैः वर्धितोऽभूत् , इति पूर्वार्द्धस्यान्वयो बोध्यः । पुरा = पूर्वकाले, अग्रे = अग्रदेशे, सीतादेव्या इति शेषः । लोलः = चञ्चलः, सल्लकीपल्लवाऽग्रभक्षणाऽर्थमिति भावः । यः करिकलभः = यो हस्तिशावकः, 'कलभः करिशावकः' इत्यमरः । अत्र कलभपदस्यैव हस्तिशावकरूपाऽर्थबोधकत्वेऽपि पुनः करिपदोपादानेन करिवैशिष्ट्यं प्रतीयत इत्यनुसन्धेयम् । सीतादेव्या = राजमहिष्या सीतया, क्वचित् षष्ठ्यन्तः पाठः । स्वकरकलितैः = आत्महस्तदत्तैः, सल्लकीपल्लवाग्रैः = सल्लकीनां=गजभक्ष्यलताविशेषाणाम् , पल्लवाऽग्रैः= किसलयाऽग्रैः, वर्धितः = एधितः क्वचित् 'पोषित' इति पाठान्तरमर्थे तु न भेदः ।

(तब फूल इकट्ठा करनेमें आसक्त सीता करुणा और उत्कण्ठाके साथ प्रवेश करती हैं ।)

सीता—अहो ! मैं विचार करती हूं कि 'मेरी प्यारी सहेली वासन्ती बोल रही है' ।

(फिर नेपथ्य में)

पहले अपने आगे चञ्चल जिस हाथीके बच्चेको सीता देवीने अपने हाथसे दिये गये सल्लकी लताके अग्रभागोंसे बढ़ाया था—

सीता—किं तस्स ? (किं तस्य ?)

(पुनर्नेपथ्ये ।)

वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा-
उद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥ ६ ॥

सीता—(ससंभ्रमं कतिचित्पदानि गत्वा ।) अज्जउत्त! परित्ताहि परित्ताहि मह पुत्तअम् । (विचिन्त्य) हद्धी हद्धी ; ताइं एव्व चिरपरिइदाइं अक्खराइं पञ्चवटीदंसणेण मं मंदभाइणि अनुबन्धन्ति । हा अज्जउत्त ! (इति मूर्च्छति।) (आर्यपुत्र ! परित्रायस्व परित्रायस्व मम पुत्रकम् । हा धिक् हा धिक् ! तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति । हा आर्यपुत्र !)

(प्रविश्य ।)

तमसा—समाश्वसिहि समाश्वसिहि ।

वध्वेति । सोऽयं वध्वा सार्धं पयसि विहरन् अन्येन उद्दामेन द्विरदपतिना दर्पात् सन्निपत्य अभियुक्त इत्युत्तरार्द्धश्लोकस्यान्वयः । सः = करिशावकः, अयं = सन्निकृष्टस्थः (सन्) वध्वा सार्धं = करेणुकया सह, पयसि = जले, विहरन् = क्रीडन् , अन्येन = अपरेण, उद्दामेन = मदयुक्तेन, द्विरदपतिना = गजश्रेष्ठेन, दर्पात् = अवलेपात् , क्वचित् 'वेगात्' इति पाठस्तस्य जवादित्यर्थः । सन्निपत्य = स्वयमागत्य, अभियुक्तः = आक्रान्तः । अतः सीतादेव्याः पुत्रनिर्विशेषस्य हस्तिशावकस्य विपद्ग्रस्ततया दुःखस्थानमेतदिति भावः । मन्दाक्रान्ता वृत्तम् ॥ ६ ॥

सीतेति । ससंभ्रमं = सत्वरं, पुत्राऽभियोगश्रवणात्संभ्रम इत्यवधेयम् । परित्रायस्व = रक्ष, चिरपरिचितानि = बहुकालमनुभूतानि, अक्षराणि = 'आर्यपुत्र'-त्याकारकाणि, अनुबध्नन्ति = अनुसरन्ति, मन्मुखात्सहसा निष्क्रामन्तीत्यर्थः ।

सीता—उसका क्या हुआ ?

(फिर नेपथ्यमें)

वह अपनी भार्याके साथ जलमें क्रीडा करता हुआ दर्पसे आते हुए दूसरे बड़े मतवाले हाथीसे आक्रान्त हुआ है ॥ ६ ॥

सीता—(शीघ्रताके साथ कुछ कदम चलकर) आर्यपुत्र ! मेरे पुत्रको बचाइये २ । (विचार कर) हा धिक् हा धिक् ! वे ही बहुत कालसे परिचित अक्षर पञ्चवटीको देखनेसे मुझ अभागिनीका अनुसरण करते हैं । हा आर्यपुत्र ! (ऐसा कहकर मूर्च्छित होती है ।)

(प्रवेश कर)

तमसा—सीते ! आश्वस्त हो जाओ, आश्वस्त हो जाओ ।

(नेपथ्ये)

विमानराज ! अत्रैव स्थीयताम् ।

सीता—(ससाध्वसोल्लासम्) अम्हहे ! जलभरभरिअमेहमन्थरत्थणिअगम्भीरमंसलो कुदो णु भारईणिग्घोसो भरन्तकण्णविवरं मं वि मन्दभाइणिं उस्सुआवेइ ? (अहो, जलभरभरितमेघमन्थरस्तनितगम्भीरमांसलः कुतो नु भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकापयति ?)

तमसा—(सस्मितास्रम् ।) अयि वत्से !

नेपथ्य इति । विमानराज = व्योमयानश्रेष्ठ ! रामस्य पुष्पकं प्रत्युक्तिरियम् ।

सीतेति । ससाध्वसोल्लासं = साध्वसेन = भयेन, उल्लासेन = हर्षेण, च सहितं यथा तथेति क्रियाविशेषणमिदम् । तत्र परित्यक्तां मां दृष्ट्वा रामः किं कथयिष्यती· त्याशङ्कया भयं, बहुकालव्यवहितदर्शनस्य प्रियस्य दर्शनेन उल्लासश्चेति द्वयं यथायोग्यं विज्ञेयम् । जलभरभरितमेघमन्थरस्तनितगम्भीरमांसलः = जलस्य = तोयस्य, भरः = भारः, तेन भरितः = सञ्जातभरः, एतादृशो यो मेघः = बलाहकः, तस्य यत् मन्थरं = मन्दम् , स्तनितं = गर्जितम् तद्वत् गम्भीरः = गभीरः, स चाऽसौ मांसलः=पुष्टः । एतादृशो भारतीनिर्घोषः = वर्णोच्चारणध्वनिः, स कुतो नु = कस्मात्प्रदेशात् नु ? आगत्येति शेषः, 'नु' इति वितर्के । भ्रिय· माणकर्णविवरां = भ्रियमाणे = पूर्यमाणे, कर्णविवरे = श्रोत्रच्छिद्रे, यस्याः सा ताम् । मन्दभागिनीमपि = मन्दभागामपि, अल्पभाग्यामपीत्यर्थः । मां = सीतां, झटिति = शीघ्रम् , उत्सुकापयति = उत्कण्ठितां करोति, **'उच्छ्वासयति'** इति पाठे उज्जीवयतीत्यर्थः । अत्र पत्युर्जीवनमात्रेण भाग्यं तत्साहचर्याऽलाभेन मन्दत्वं च बोधनीयम् ।

तमसेति । सस्मिताऽस्रं = स्मितेन = मन्दहास्येन, अस्रेण = अश्रुणा च

(नेपथ्यमें)

विमानराज ! यहींपर रुको ।

सीता—(भय और हर्षके साथ) अहो ! जलके भारसे भरे हुए मेघके मन्द गर्जनके सदृश गम्भीर और जोरदार वाणीकी ध्वनि कहाँसे आकर मेरे कानके छेदको भरकर मुझ अभागिनीको भी शीघ्र ही उत्कण्ठित कर रही है ?

तमसा—(मुस्कुराकर और आँखोंमें आँसू भरकर) अरी बेटी !

अपरिस्फुटनिक्वाणे कुतस्त्येऽपि त्वमीदृशी ।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता ॥ ७ ॥

सीता—भअवदि ! किं भणासि अपरिप्फुडेत्ति । सरसंजोएण पच्चहिजाणामि णं अज्जउत्तेण एव्व एदं वाहरिदम् । (भगवति ! किं भणस्यपरिस्फुटेति । स्वरसंयोगेन प्रत्यभिजानामि नन्वार्यपुत्रेणैवैतद्व्याहृतम् ।)

तमसा—श्रूयते—'तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा दण्डकारण्यमागत' इति ।

सहितं यथा तथेति क्रियाविशेषणम् । अत्र त्यागकर्तुरपि पत्युः स्वरश्रवणेन सीताया औत्सुक्यं दृष्ट्वा तमसाया मन्दहास्यं तस्याः पतिसाहचर्याऽभावमूलकदुःखदर्शनेनाऽश्रुपातश्चेति बोध्यम् ।

अपरिस्फुटेति । स्तनयित्नोः अपरिस्फुटनिक्वाणे मयूरी इव त्वं कुतस्त्ये अपरिस्फुटनिक्वाणे अपि ईदृशी चकितोत्कण्ठितं स्थिता इत्यन्वयः । स्तनयित्नोः = मेघस्य, अपरिस्फुटनिक्वाणे = अव्यक्तनिनदे, मयूरी इव = मयूरभार्या इव, त्वं = सीता, कुतस्त्ये = कस्माच्चित्प्रदेशादागते, वक्तुः स्वरूपदर्शनाऽभावादियमुक्तिरित्यवधेयम् । अपरिस्फुटनिक्वाणे अपि = अव्यक्तनिनदे, 'विमानराज ! अत्रैव स्थीयताम्' इत्याकारकेऽपीति भावः । ईदृशी = एतादृशी । ईदृक्त्वं विवृणोति—चकितोत्कण्ठितं स्थिता = साश्चर्यं सोत्कण्ठं च विद्यमाना सती, वर्तसे इति शेषः । **अत्रोपमाऽलंकारः । अनुष्टुब् वृत्तम्** ॥ ७ ॥

सीतेति । अपरिस्फुटा=अव्यक्ता, अत्र गद्यवाक्येऽपि अपरिस्फुटेति पदपाठात् **'अपरिस्फुटनिक्वाणे'** अयमेव ग्रन्थकृत्सम्मतः पाठ इति प्रतिभाति । स्वरसंयोगेन = स्वरसम्बन्धेन, श्रोत्रेन्द्रिये इति शेषः । व्याहृतं=कथितं, प्रत्यभिजानामि=तदिदमिति वेद्मि । प्रत्यभिज्ञा नाम संस्कारेन्द्रियसंप्रयोगोभयजन्यं ज्ञानं, यथा सोऽयं देवदत्त इति ।

तमसेति । तपस्यतः = तपश्चरतः; शूद्रस्य = शम्बूकस्येत्यर्थः, दण्डधार-

---

मेघके अस्पष्ट शब्दसे मयूरीकी तरह तुम, कहींसे हुए अस्पष्ट शब्दसे इस तरह चकित और उत्कण्ठित हो रही हो ॥ ७ ॥

सीता—भगवति ! 'अस्पष्ट शब्द' यह आप क्या कह रही हैं ? स्वर-संयोगसे मैं पहचानती हूँ कि अवश्य यह आर्यपुत्रने ही कहा है ।

तमसा—सुनते हैं कि 'तपस्या करनेवाले शूद्रको दण्ड देनेके लिए इक्ष्वाकुवंशके राजा (राम) दण्डकारण्यमें आये हैं ।'

सीता—दिट्ठिआ अपरिहीणधम्मो सो राआ (दिष्ट्या अपरिहीनधर्मः स राजा)

(नेपथ्ये ।)

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम् ।
एतानि तानि बहुकन्दरनिर्झराणि[1]
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

सीता—दिट्ठिआ कहं पहादचन्दमण्डलापण्डरपरिक्खामदुब्बलेन

णाऽर्थं = निग्रहणाऽर्थम् , अपराधाऽनुकूलशिक्षार्थमिति भावः । ऐक्ष्वाकः=इक्ष्वाकुकुलोत्पन्नः 'दाण्डिनायने'त्यादिसूत्रेण टिलोपः ।

सीतेति । दिष्ट्या = भाग्येन, सः = पूर्वोक्तः, राजा = नृपः, राम इत्यर्थः । अपरिहीनधर्मः = अन्यूनधर्मः ।

यत्रेति । यत्र द्रुमा अपि मृगा अपि मे बन्धवः, प्रियासहचरः (सन्) यानि चिरम् अध्यवात्सम् , एतानि बहुकन्दरनिर्झराणि गोदावरीपरिसरस्य गिरेः तानि तटानि (विद्यन्ते) इत्यन्वयः । यत्र=येषु, तटेष्वित्यर्थः । द्रुमा अपि=वृक्षा अपि, मृगा अपि = पशवोऽपि, मे = मम, बन्धवः = बान्धवाः, बन्धुतुल्या इति भावः, आसन्निति शेषः । प्रियासहचरः = सीतासहचरः (सन्), यानि=तटानि, 'अध्यवात्सम्' इत्यधिपूर्वकवसधातोर्योगेन 'उपान्वध्याङ्वस' इति आधारस्य कर्मत्वम् । चिरं = बहुकालपर्यन्तम् , अध्यवात्सम् = उषितवानस्मि । एतानि = आसन्नवर्तीनि, बहुकन्दरनिर्झराणि = बहवः = अदभ्राः, कन्दराः = गुहाः, निर्झराः = जलप्रवाहाः येषु तानि । गोदावरीपरिसरस्य=गोदावरी=तदाख्या नदी, परिसरः=पर्यन्तभूः, यस्य तस्य, गोदावरीसमीपवर्तिन इत्यर्थः, 'पर्यन्तभूः परिसर' इत्यमरः । गिरेः=पर्वतस्य, तानि=निवासविचरणादिना पूर्वाऽनुभूतानि, तटानि=प्रदेशाः, समीपस्थानानीत्यर्थः, विद्यन्त इति शेषः । **वसन्ततिलका** वृत्तम् ॥ ८ ॥

सीतेति । प्रभातचन्द्रमण्डलापाण्डरपरिक्षामदुर्बलेन = प्रभातचन्द्रमण्डलम् =

सीता—भाग्यसे वे राजा धर्मसे हीन नहीं हुए हैं ।

(नेपथ्यमें)

जहाँ वृक्ष और पशु भी मेरे बान्धव थे, जिन स्थानोंमें सीताके साथ मैं बहुत कालतक रहा, बहुत गुफा और झरनोंसे युक्त गोदावरी नदीके निकटवर्ती पर्वतके ये वे ही समीपवर्ती स्थान हैं ॥

सीता—प्रातःकालके चन्द्रमण्डलकी तरह सफेद, क्षीण और दुर्बल आकृतिवाले आर्यपुत्र

१. 'बहुनिर्झरकन्दराणि' इति पाठान्तरम् ।

आआरेण णिअसोम्हगम्भीराणुभावमेत्तपच्चहिजाणज्जो एव्व अज्जउत्तो होदि। भअवदि तमसे! धारेहि मम्। (इति तमसामाश्लिष्य मूर्च्छति।)
[दिष्ट्या कथं प्रभातचन्द्रमण्डलापाण्डरपरिक्षामदुर्बलेनाकारेण निजसौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञेय एवार्यपुत्रो भवति। भगवति तमसे! धारय माम्।]

तमसा—वत्से! समाश्वसिहि समाश्वसिहि।

(नेपथ्ये।)

अनेन पञ्चवटीदर्शनेन—

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम्॥ ९॥

विभातेन्दुमण्डलम्, इव आपाण्डरः = ईषच्छ्वेतः, परिक्षामः = कृशः, दुर्बलः=बलहीनः, तेन। आकारेण = आकृत्या, उपलक्षित इति शेषः, 'इत्थंभूतलक्षणे' इति तृतीया। निजसौम्यगम्भीराऽनुभावमात्रप्रत्यभिज्ञेयः = निजः = स्वकीयः, सौम्यः = शान्तः, गम्भीरः=धीरः, एतादृशो योऽनुभावः = प्रभावः, तन्मात्रेण प्रत्यभिज्ञेयः = प्रत्यभिज्ञातुं शक्यः। धारय = गृहाण, येनाऽहं नो पतेयमिति भावः।

अन्तरिति। अन्तर्लीनस्य अद्य उद्दामं ज्वलिष्यतो दुःखाऽग्नेः धूमस्य उत्पीड इव मोहो मां प्राक् आवृणोति इत्यन्वयः। अन्तर्लीनस्य = अन्तःकरणे गुप्तस्य, कार्यान्तरव्यापृतत्वादिति भावः। अद्य = अस्मिन्दिने, उद्दामम् = अत्यन्तं, ज्वलिष्यतः = दीपिष्यमाणस्य. पञ्चवटीदर्शनेनेति भावः। एतादृशस्य दुःखाऽग्नेः = दुःखम् अग्निरिवेति दुःखाग्निस्तस्य = पीडानलस्येत्यर्थः, 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः। धूमस्य = शिखिध्वजस्य, उत्पीड इव = राशिरिव, मोहः = मूर्च्छा, मां = रामं, प्राक् = प्रथमम्, आवृणोति = आच्छादयति। यथाऽग्नेर्ज्वलनात्पूर्वं धूमः समन्तत आच्छादयति तथैव दुःखोत्पन्ना मूर्च्छा दुःख-

भाग्यसे किस तरह शान्त और गम्भीर अपने प्रभावमात्रसे पहचाननेके योग्य हो गये हैं। भगवति तमसे! मुझे सँभालिए। (ऐसा कहकर और तमसाको आलिङ्गन कर मूर्च्छित होती हैं।)

तमसा—वत्से! समाश्वस्त हो, समाश्वस्त हो।

(नेपथ्यमें)

इस पञ्चवटीके दर्शनसे—

अन्तःकरणमें छिपी हुई और आज पीछे अत्यन्त जलनेवाली दुःखाग्निकी धूँकी राशिकी तरह मूर्च्छा मुझको पहले (दुःख फैलनेके पहले) ढांक देती है॥ ९॥

हा प्रिये जानकि !

तमसा—(स्वगतम् ।) इदं तावदाशङ्कितं गुरुजनेन ।

सीता—(समाश्वस्य ।) हा ! कहं एदम् ? (हा ! कथमेतत् ?)

(पुनर्नेपथ्ये ।)

हा देवि दण्डकारण्यवासप्रियसखि विदेहराजपुत्रि ! (इति मूर्च्छति ।)

सीता—हद्धी हद्धी ! मं मन्दभाइणिं वाहरिअ आमीलिदणेत्तणीलुप्पलो मुच्छिदो एव्व । हा ! कहं धरणिपिट्ठे णिरुद्धणिस्सासणीसहं विपल्हत्थो । भअवदि तमसे ! परित्ताएहि परित्ताएहि । जीवावेहि अज्जउत्तं । (इति पादयोः पतति ।) (हा धिक् हा धिक् मां मन्दभागिनीं व्याहृत्यामीलितनेत्रनीलोत्पलो मूर्च्छित एव । हा ! कथं धरणीपृष्ठे निरुद्धनिःश्वासनिःसहं विपर्यस्तः । भगवति तमसे ! परित्रायस्व जीवयार्यपुत्रम् ।)

प्रसरणात्पूर्वं मां संछादयतीति तात्पर्यम् । अत्र पूर्वार्द्धे दुःखाऽग्नेरित्यत्र **लुप्तोपमा** पश्चार्द्धे च **उपमेति** द्वयोरङ्गाङ्गिभावेन **सङ्करः** । **अनुष्टुब्** वृत्तम् ॥ ९ ॥

तमसेति । गुरुजनेन = पूज्यजनेन, लोपामुद्रादिनेति भावः ।

सीतेति । आमीलितनेत्रनीलोत्पलः = आमीलिते = मुद्रिते, नेत्रे=नयने, एव नीलोत्पले=नीलकमले यस्य सः । धरणीपृष्ठे=भूतले, निरुद्धनिःश्वासनिःसहम्=निरुद्धः= प्रवृत्तिहीनः, निःश्वासः यस्मिन्कर्मणि तद्यथा तथा, एवं निःसहं = दुर्बलं यथा तथेति द्वयमपि क्रियाविशेषणं, 'सुप्सुपे'ति समासः । विपर्यस्तः = विपरीतः पतितः, अधोमुखत्वेन पतित इति भावः । परित्रायस्व = रक्ष, मामिति शेषः । ननु त्वं स्वतो रक्षिताऽसीत्यत आह—जीवयेति । जीवय = जीवितं कुरु, आर्यपुत्रजीवनेनैव मद्रक्षणं भविष्यतीति भावः ।

हा प्रिये ! सीते !!

तमसा—(मन ही मन) गुरुजन (गङ्गा और लोपामुद्रा) ने इसी बातकी शङ्का की थी ।

सीता—(आश्वस्त होकर) हा ! कैसे यह हुआ ? (फिर नेपथ्यमें)

हा देवि! दण्डकारण्य-वासकी प्रियसखि ! जनकपुत्रि ! (ऐसा कहकर मूर्च्छित होते हैं ।)

सीता—हा धिक् ! हा धिक् !! मुझ मन्दभाग्यवालीको पुकारकर नीलकमलोंके सदृश नेत्रोंको मूँदकर आर्यपुत्र मूर्च्छित ही हो गये हैं । हाय ! किस तरह रुके हुए श्वासवाले और दुर्बल होकर जमीनपर गिर पड़े हैं ? भगवति तमसे ! बचाइये, बचाइये । आर्यपुत्रको जीवित कीजिए । (ऐसा कहकर चरणोंमें गिरती हैं ।)

तमसा—

त्वमेव ननु कल्याणि ! सञ्जीवय जगत्पतिम् ।
प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः ॥ १० ॥

सीता—जं होदु तं होदु । जह भअवई आणवेइ (इति ससंभ्रमं निष्क्रान्ता ।) यद्भवतु तद्भवतु । यथा भगवत्याज्ञापयति ।)

(ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामः)

त्वमेवेति । ननु कल्याणि ! त्वमेव जगत्पतिं संजीवय, हि ते पाणिः प्रियस्पर्शः, तत्र एष जनो निरत इत्यन्वयः । ननु=अनुज्ञाद्योतकमव्ययम् , अनुज्ञां दर्शयति—हे कल्याणि = हे भद्र ! एतादृशे परित्यागेऽपि प्रियप्रबोधस्त्वत्स्पर्शाऽधीनः, अतः कल्याणीति सम्बोधनम् । त्वमेव, जगत्पतिं = लोकनाथं रामचन्द्रमित्यर्थः । संजीवय = सचेतनं कुरु । कथं कुर्यामित्यत आह—**हीति** । हि = यतः, ते = तव, पाणिः = करः, प्रियस्पर्शः = प्रियः = अभीष्टः, रामाऽभीष्टइति भावः, स्पर्शः= आमर्शनं यस्य सः । अतः—तत्र = तस्मिन् त्वत्स्पर्शे इत्यर्थः, एषः = सन्निकृष्टस्थः, जनः = रामः, निरतः=समनुरक्तः, अस्तीति शेषः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, । अत्र चतुर्थपादे **'तत्रैव नियता भव'** इति पुस्तकान्तरस्थः पाठस्तत्र तत्रैव=त्वपाणिना रामस्पर्श एव, नियता = व्यापृता, भव = एधीत्यर्थः, तत्र वाक्याऽर्थहेतुकं **काव्यलिङ्ग**मलंकारः ॥ १० ॥

सीतेति । यद्भवतु तद्भवतु = निर्वासिताया मम स्पर्शाद्रामस्य कोपनत्वं भवतु प्रसन्नत्वं भवतु वेति तात्पर्यम् । रामहिताधायकव्यापारे मया न किमपि चिन्तनीयमिति भावः । भगवती = तमसा, आज्ञापयति = आदिशति, तथा करोमीति शेषः, आर्यपुत्रं पाणिना स्पृशामीति भावः । ससम्भ्रमं = सत्वरम् ।

तत इति । सास्रया = अश्रुसहितया, रामस्य भूमिनिपतनेन सास्रत्वं बोध्यम् । साह्लादोच्छ्वासः = आह्लादेन = हर्षेण, उच्छ्वासेन = श्वाससंचारेण च सहितः, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः ।

तमसा—हे कल्याणि ! तुम ही जगत्‌के स्वामी रामचन्द्रको होशमें लाओ, क्योंकि तुम्हारा हाथ कोमल स्पर्शवाला है, अतः उसीमें ये रामचन्द्र अनुरक्त हैं ॥ १० ॥

सीता - चाहे जो हो । भगवती जैसी आज्ञा करती हैं । (ऐसा कहकर फुर्तीसे जाती हैं ।)

(तब जमीनपर गिरे हुए और आँखोंमें आंसू-भरी सीतासे स्पर्श किये गये तथा हर्ष और चैतन्यसे युक्त राम दिखाई पड़ते हैं ।)

सीता—(किञ्चित्सहर्षम् ।) जाणे उण पच्चाअदं विअ जीविअं तेल्लोकस्स (जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य ।)

रामः—हन्त भोः ! किमेतत् ?

आश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः ।
आतप्तजीवितमनःपरितर्पणोऽयं
सञ्जीवनौषधिरसो हृदि नु प्रसक्तः ॥ ११ ॥

सीतेति । त्रैलोक्यस्य=स्वर्गमर्त्यपातालात्मकस्य लोकत्रयस्येत्यर्थः । जीवितं= जीवनं, प्रत्यागतमिव = पुनरागतमिव, जाने = अवगच्छामि, लोकत्रयस्याऽपि जीवितस्य राममयत्वाद्रामजीवने तज्जीवनमिति भावः ।

राम इति । एतत् = स्पर्शनं, किं = कतमत् , तदेव श्लोकेन प्रतिपादयति =

आश्च्योतनमिति । हृदि हरिचन्दनपल्लवानाम् आश्च्योतनं नु ? निष्पीडितेन्दुकरकन्दलजः सेको नु ? आतप्तजीवितमनःपरितर्पणोऽयं सञ्जीवनौषधिरसः प्रसक्तो नु ? इत्यन्वयः । हृदि = हृदये, हरिचन्दनपल्लवानां = कल्पवृक्षकिसलयानाम् , आश्च्योतनं = रसक्षरणं नु = वितर्कद्योतकमव्ययमिदम् । निष्पीडितेन्दुकरकन्दलजः = निष्पीडिताः = निष्पिष्टाः, ये इन्दुकरकन्दलाः = चन्द्ररश्मिनवाङ्कुराः, तेभ्यो जातः, सेको नु = सेचनं नु ? आतप्तजीवितमनःपरितर्पणः = आतप्तयोः = सन्तप्तयोः जीवितमनसोः = जीवनचित्तयोः, **'आतप्तजीविततरोः'** इति क्वाचित्कः पाठस्तस्य—जीवितमेव तरुर्जीविततरुः = जीवनवृक्षः, आतप्तः=संतप्तः, जीविततरुस्तस्येति विग्रहादिकं बोध्यम् । परितर्पणः = परितृप्तिकारकः, संतापाऽपनयनादिति भावः । **'अनुदात्तेतश्च हलादेः'** इति युच् । अयम्=एषः प्रत्यक्षाऽनुभूतः इत्यर्थः, सञ्जीवनौषधिरसः = प्राणप्रदौषधद्रवः, प्रसक्तो-

---

सीता - (कुछ हर्षके साथ) मैं विचार करती हूं कि तीनों लोकोंका जीवन फिर लौट आया है ।

राम—हन्त ! यह क्या है ?

हृदयपर हरिचन्दनके पल्लवोंका रसक्षरण हुआ है क्या ? अथवा निचोड़े हुए चन्द्रकिरणरूपी नवाऽङ्कुरोंसे किया गया सेचन है ? वा सन्तापयुक्त जीवन और मनको तृप्त करनेवाला यह सञ्जीवन ओषधिका रस हृदयपर सींचा गया है ? ॥ ११ ॥

---

१. 'प्रश्च्योतनम्' इति पाठान्तरम् । २. 'प्रसक्तिः' इति पाठान्तरम् ।

अपि च—

स्पर्शः पुरा परिचितो नियतं स एव
सञ्जीवनश्च मनसः परितोषणश्च ।
सन्तापजां सपदि यः परिहृत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति ॥ १२ ॥

सीता—(ससाध्वसकरुणमुपसृत्य ।) एत्तिअं एव्व दाणिं मह बहुदरम् । (एतावदेवेदानीं मम बहुतरम् ।)

नु = सम्बद्धो नु ? किमिदमिति नाऽहं निश्चिनोमीति भावः । अत्र प्रकृते सीता-स्पर्शे आश्च्योतनादीनां वस्तूनां, संशयस्य एव पर्यवसानात् **शुद्धसन्देहा-ऽलङ्कारः**, तल्लक्षणं यथा साहित्यदर्पणे—'सन्देहः प्रकृतेऽन्यस्य वस्तुनः प्रतिभो-त्थितः । शुद्धो निश्चयगर्भोऽसौ निश्चयाऽन्त इति त्रिधा ॥' इति । **वसन्ततिलका** वृत्तम् ॥ ११ ॥

स्पर्श इति । पुरा परिचितः सञ्जीवनो मनसः परितोषणश्च नियतं स एव स्पर्शः । यः सन्तापजां मूर्च्छां परिहृत्य सपदि आनन्देनेन पुनर्जडताम् आतनोति इत्यन्वयः । पुरा = पूर्वकाले, परिचितः = संस्तुतः, सञ्जीवनः = सम्यग्जीवनहेतुः, 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणात् ल्युट् । मनसः = चित्तस्य, परितोषणश्च = परितोषजनकश्च, पूर्ववत् ल्युट् । '**परिमोहनश्च**'ति पाठे परिमोहजनकश्चेत्यर्थः । नियतं = निश्चितं, स एव = पूर्वाऽनुभूत एव, स्पर्शः=आमर्शनम्, अस्तीति शेषः । यः = स्पर्श, सन्तापजां = विरहदुःखोत्पन्नां, मूर्च्छां=प्रज्ञाशून्यतां, परिहृत्य=अप-नीय, सपदि = तत्क्षणे, आनन्दनेन = आनन्दोत्पादनेन, 'टुनदि समृद्धौ' इति धातोर्भावे ल्युट् । पुनः = भूयः, जडताम् = आनन्दाऽऽधिक्यप्रयुक्तप्रज्ञाशून्यताम् , आतनोति = समन्ताद्विस्तारयति । **वसन्ततिलका** वृत्तम् ॥ १२ ॥

सीतेति । ससाध्वसकरुणम् = साध्वसेन = निर्वासिताया मम स्पर्शेन राघवः

और भी –

पूर्व परिचित, उत्तम जीवनका हेतु और मनको सन्तुष्ट करने वाला निश्चय ही वही स्पर्श है, जो कि सन्ताप-जन्य मूर्च्छाको हटाकर तत्क्षण आनन्दको उत्पन्न कर फिर जड़ताको पैदा कर देता है ॥ १२ ॥

सीता—(भय और करुणाके साथ तमसाके पास जाकर) इस समय मेरे लिए इतना ही बहुत अधिक है ।

रामः—(उपविश्य) न खलु वत्सलया देव्याभ्युपपन्नोऽस्मि ?

सीता—हद्धी हद्धी ! किंति अज्जउत्तो मं मग्गिस्सदि ? (हा धिक् हा धिक् ! किमित्यार्यपुत्रो मां मार्गिष्यति ?)

रामः—भवतु, पश्यामि ।

सीता—भअवदि तमसे ! ओसरह्म दाव । मं पेक्खिअ अणब्भणुण्णादेण संणिहाणेण राआ अहिअं कुविस्सदि । (भगवति तमसे ! अपसराव तावत् । मां प्रेक्ष्याऽनभ्यनुज्ञातेन सन्निधानेन राजाऽधिकं कोपिष्यति ।)

कोपं करिष्यतीति हेतुनोत्पन्नेन भयेन, करुणया = स्वविरहव्याकुलं रामं प्रत्युत्पन्नया दयया च सहितं यथा तथेति क्रियाविशेषणम् । **'ससाध्वसोत्कम्पम्'** इति पुस्तकान्तरस्थः पाठस्तस्य ऋजुरर्थः । इदानीं = विरहकाले, एतावदेव = एतत्परिमाणमेव, आर्यपुत्रस्पर्शनमात्रमेवेति भावः । मम=सीतायाः, बहुतरम् = अधिकतरम् । निर्वासने दर्शनस्याऽपि दुर्लभत्वात् किमुत स्पर्शनस्य । अत एतावदपि बहुतरमेवेति भावः ।

राम इति । वत्सलया = स्निग्धया, 'स्निग्धस्तु वत्सल' इत्यमरः, देव्या = महिष्या सीतयेति भावः । न अभ्युपपन्नोऽस्मि खलु = नाऽनुगृहीतोऽस्मि किम् ? 'अभ्युपपत्तिस्त्वनुग्रहः' इत्यमरः ।

सीतेति । हा धिक् हा धिक्, मामिति शेषः । आर्यपुत्रः = रामः, मां = सीतां, किमिति मार्गिष्यति = किं विचेष्यति ? रामस्याऽऽकारं दृष्ट्वा सीता तर्कयति—अयं मां विचेष्यति नो वेति भावः ।

राम इति । भवतु = अस्तु, पश्यामि = विलोकयामि, मोहे योऽयं स्पर्शो मयाऽनुभूतः स पूर्वमसकृत्परिचितत्वात्सीताया इत्यनुमितं परं सीताऽत्र नो वर्तते, आस्तां; समन्ततः सम्यग् विलोकयामीति भावः ।

सीतेति । अपसराव = अस्मात् स्थानात् अपसरणं करवाव, स्थानान्तरं गच्छावेति भावः, प्रार्थनायां लोट् । अपसरणहेतुमाह—**मामिति** । अनभ्यनु-

---

राम (बैठकर) स्नेह करनेवाली सीतासे क्या मैं अनुगृहीत तो नहीं हुआ हूँ ?

सीता—हा धिक् ! हा धिक् ! क्या आर्यपुत्र मुझे ढूँढेंगे ?

राम—अस्तु । मैं देखता हूँ ।

सीता—भगवति तमसे ! हमलोग हट जायँ । मुझे देखकर बिना आज्ञाकी उपस्थितिके कारण राजा बहुत क्रोध करेंगे ।

तमसा—अयि वत्से ! भागीरथीप्रसादाद्वनदेवतानामप्यदृश्याऽसि संवृत्ता ।

सीता—अत्थि क्खु एदम् ? (अस्ति खल्वेतत् ?)

रामः—हा प्रिये जानकि !

सीता—(समन्युगद्गदम् ।) अज्जउत्त ! असरिसं क्खु एदं इमस्स वुत्तन्तस्स । (सास्रम्) भअवदि ! किंति वज्जमई जन्मन्तरेसु वि पुणो वि असंभाविअदुल्लहदंसणस्स मं एव्व मन्दभाइणि उद्दिसिअ एव्व वच्छलस्स एव्वं वादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सम्। अहं एव्व एदस्स हिअअं जाणामि, मह एसो । (आर्यपुत्र ! असदृशं खल्वेतदस्य वृत्तान्तस्य । भगवति ! किमिति वज्रमयी जन्मान्तरेष्वपि पुनरप्यसम्भावितदुर्लभदर्शनस्य मामेव

ज्ञातेन = अननुमतेन, निर्वासनाद्धेतोरिति भावः, सन्निधानेन = समीपस्थित्या, कोपिष्यति = क्रोत्स्यति, मह्यमिति शेषः, कोपं करिष्यतीति भावः । प्रजारञ्जनार्थं मन्निर्वासको राजा मां दृष्ट्वा कोपं करिष्यतीति भावः ।

तमसेति । भागीरथीप्रसादात् = गङ्गाऽनुग्रहात् , वनदेवतानामपि=वासन्त्यादीनामपि, अदृश्या=अदर्शनीया, संवृत्ता=संजाता असि, किमुत रामस्येति भावः ।

सीतेति । स्मृतिमभिनयति—**अस्तीति** ।

सीतेति । समन्युगद्गदम् = मन्युना = प्रणयकोपेन, गद्गदम् = अस्फुटवाक् , यथा स्यात्तथेति क्रियाविशेषणम् । एतत् = 'हा प्रिये ! जानकि !' इति कथनम् , एतस्य वृत्तान्तस्य = मत्परित्यागरूपस्योदन्तस्येत्यर्थः, असदृशं खलु = अयोग्यं किल । स्वयमेव मां निर्वास्य पुनर्मामुद्दिश्य विलपनमनुचितमिति भावः । पुनः सीता रामं प्रति सकरुणा भूत्वा कथयति—**भगवतीति** । वज्रमयी = कुलिशमयी, अतिशयकाठिन्ययुक्तेत्यर्थः, एतादृशी अहमिति शेषः । जन्मान्तरेष्वपि = अन्येषु जन्मस्वपि, असंभावितदुर्लभदर्शनस्य = असंभावितम् = संभावनाया अवि-

तमसा—हे पुत्रि ! गङ्गाजीके अनुग्रहसे तुम्हें वनदेवियाँ भी नहीं देख सकती हैं ।

सीता—हाँ यह बात है ?

राम—हा प्रिये सीते !

सीता—(प्रेममय कोपसे अस्पष्ट उच्चारणके साथ) आर्यपुत्र ! आपका ऐसा कहना मेरे इस त्यागरूप वृत्तान्तके लायक नहीं है । (आँखोंमें आँसू भरकर) भगवति ! दूसरे जन्मोंमें भी मेरे लिए जिनका दर्शन दुर्लभ और असंभावित हो गया है और मुझ मन्दभागिनीको ही

मन्दभागिनीमुद्दिश्यैवं वत्सलस्यैवंवादिन आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि । अहमेवैतस्य हृदयं जानामि, ममैषः ।)

रामः—(सर्वतोऽवलोक्य सनिर्वेदम् ।) हा ! न किंचिदत्र ।

सीता—भअवदि ! णिक्कालणपरिच्चाइणो वि एदस्स दंसणेण एव्वंविधेण कीलिसी मे हिअआवत्था ? त्ति ण आणामि, ण आणामि । (भगवति ! निष्कारणपरित्यागिनोऽप्येतस्य दर्शनेनैवंविधेन कीदृशी मे हृदयावस्था ? इति न जानामि, न जानामि ।)

तमसा—जानामि वत्से ! जानामि ।

तटस्थं नैराश्यादपि च कलुषं विप्रियवशाद्

षयभूतम् , अत एव-दुर्लभं = दुष्प्राप्यम् , दर्शनं = विलोकनं यस्य, तस्य । एवम्= इत्थं, वत्सलस्य=स्निग्धस्य, अत एव—एवंवादिनः = 'हा प्रिये जानकि' इति कथयतः, किमिति = किमर्थं, निरनुक्रोशा = निर्दया, 'आर्यपुत्र ! अमदर्शं खल्वेतदस्य वृत्तान्तस्य' इति कथनेनेति भावः, 'कृपा दयाऽनुकम्पा स्यादनुक्रोशः' इत्यमरः । एतस्य = आर्यपुत्रस्य, एषः = आर्यपुत्रः ।

राम इति । सर्वतः = परितः, सनिर्वेदं = सखेदं, खेदश्चात्र सीताऽदर्शनमूलको ज्ञेयः । अत्र = अस्मिन् स्थाने ।

सीतेति । निष्कारणपरित्यागिनोऽपि = अकारणं परित्यक्तवतोऽपि, एतस्य = आर्यपुत्रस्य, एवंविधेन = एतादृशेन, शोकाकुलेनेति भावः । दर्शनेन = विलोकनेन, कीदृशी = किमाकारा, हृदयाऽवस्था = मनोऽवस्था, इति न जानामि = विवरीतुं न शक्नोमीति भावः ।

तमसेति । जानामि = बोधामि, तव हृदयाऽवस्थामिति शेषः ।

तटस्थमिति । तव हृदयम् अस्मिन् क्षणे नैराश्यात् तटस्थम् इव, विप्रिय-

---

उद्देश्य करके स्नेह कर ऐसा कहनेवाले आर्यपुत्रके ऊपर क्यों मैं वज्रमयी और निर्दय हो जाऊंगी । मैं ही इनका हृदय जानती हूं, और ये मेरा हृदय जानते हैं ।

राम (चारों तरफ देखकर खेदके साथ) हाय ! यहां कुछ नहीं है ।

सीता—भगवति ! विना कारणके परित्याग करनेवाले इनके ऐसे दर्शनसे भी मेरे हृदयकी कैसी अवस्था हो रही है ? यह नहीं जानती हू नहीं, जानती हूं ।

तमसा—जानती हूं ! बेटी ! जानती हूं !

तुम्हारा हृदय इस अवसरमें निराशाके कारण उदासीनकी तरह, पतिके परित्यागरूप

वियोगे दीर्घेऽस्मिञ्झटिति घटनात्स्तम्भितमिव[1]।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं-
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव ॥ १३ ॥

रामः—देवि !

प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः।
अद्याप्यानन्दयति मां, त्वं पुनः क्वासि नन्दिनि ? ॥ १४ ॥

वशात् कलुषम् इव, दीर्घे अस्मिन वियोगे झटिति घटनात् स्तम्भितम् इव, सौजन्यात् प्रसन्नम् इव, दयितकरुणैः गाढकरुणम् , प्रेम्णा द्रवीभूतम् इव इत्यन्वयः। हे सीते ! तव = भवत्याः, हृदयं=चित्तम् , अस्मिन् क्षणे = अस्मिन्नवसरे, नैराश्यात् = पुनः समागमाशाया अभावात् , तटस्थम् इव = उदासीनम् इव, प्रसादकालुष्यादिरहितमित्यर्थः । विप्रियवशात् = परित्यागरूपात् अप्रियवशादित्यर्थः, कलुषम् इव = आविलम् इव, क्रोधयुक्तमिवेत्यर्थः। दीर्घे = चिरकालव्यापिनि, अस्मिन = विद्यमाने, वियोगे = विरहे, झटिति घटनात् = आकस्मिकसङ्घटनात् , स्तम्भितम् इव = विस्मयेन निश्चलमिव । सौजन्यात् = प्रियसम्बोधनरूपात्सुजनत्वात , प्रसन्नम् इव = प्रीतम् इव । दयितकरुणैः=दयितस्य=प्रियस्य, रामस्येत्यर्थः, करुणैः = शोकाकुलाऽवस्थाविशेषैः, गाढकरुणं = दृढशोकयुक्तम् , अतः—प्रेम्णा = प्रणयेन, द्रवीभूतमिव = प्राप्तद्रवाऽवस्थमिव, विलीनमिवेत्यर्थः, अस्तीति शेषः। इयं भावशबलतोक्ता। अत्र पञ्चानामुत्प्रेक्षाणां मिथोऽनपेक्षया स्थितेः संसृष्टिः। शिखरिणी वृत्तम् ॥ १३ ॥

राम इति । स्नेहार्द्रशीतलः ते स्पर्शः मूर्तः प्रसाद इव अद्याऽपि माम् आनन्दयति, हे नन्दिनि ! त्वं पुनः क्व असि ? इत्यन्वयः। स्नेहार्द्रशीतलः = स्नेहेन आर्द्रः स्नेहार्द्रः, स चाऽसौ शीतलः = प्रेमक्लिन्नत्वेन शीतल इत्यर्थः। ते = तव, स्पर्शः = आमर्शनं, मूर्तः = मूर्तिमान , प्रसाद इव = अनुग्रह इव, अद्याऽपि =

अप्रिय आचरणसे क्रोधयुक्तकी तरह, बहुत कालतक रहनेवाले इस विरहमें आकस्मिक सम्मेलनसे निश्चलकी तरह, प्रियकी सम्बोधनरूप सुजनतासे प्रसन्नकी तरह और प्यारे रामकी शोकमयी अवस्थाओंसे दृढ शोकसे युक्त, अतः प्रेमसे द्रवीभूतकी तरह हो रहा है ॥ १३ ॥

राम—हे देवि !

स्नेहसे आर्द्र और शीतल तुम्हारा स्पर्श मूर्तिमान् अनुग्रहकी तरह अभीतक मुझे

[1]. 'घटनोत्तम्भितमिव' इति पाठान्तरम् ।

सीता—एदे क्खु अगाधमाणसदंसिदसिणेहसंभारा आणन्दणिस्सन्दिणो सुहामआ अज्जउत्तस्स उल्लावा । जाणे पच्चएण णिक्कालणपरिच्चाअसल्लिदोवि बहुमदो मह जम्मलाहो । (एते खल्वगाधमानसदर्शितस्नेहसम्भारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः । जाने, प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो मम जन्मलाभः ।)

रामः—अथवा कुतः प्रियतमा ? नूनं सङ्कल्पाभ्यासपाटवोपादान एष भ्रमो रामभद्रस्य[1] ।

अस्मिन् क्षणेऽपि, स्पर्शोत्तरव्यवहितक्षणेऽपीति भावः । मा = रामम् , आनन्दयति = आनन्दितं करोति, 'आर्द्रीकरोति' इति पाठे आर्द्रं करोतीत्यर्थः । हे नन्दिनि = आनन्दकारिणि !, त्वं = सीता, पुनः=भूयः, क्व = कुत्र, असि = वर्तसे । अत्रोत्प्रेक्षाऽलङ्कारः ॥ १४ ॥

सीतेति । अगाधमानसदर्शितस्नेहसंभाराः=अगाधम् = अतिगम्भीरम् यत् , मानसं = चित्तम् , तेन दर्शितः=प्रदर्शितः स्नेहसंभारः = प्रेमसमूहो यैस्ते, 'संभारः संभृतौ गणे' इति विश्वः । आनन्दनिष्यन्दिनः = हर्षस्राविणः, सुधामयाः = अमृतमयाः, उल्लापाः = उच्चस्वरा विलापाः । प्रत्ययेन = विश्वासेन, उल्लापानामिति शेषः । निष्कारणपरित्यागशल्यितः = निष्कारणपरित्याग एव शल्यं = शङ्कुः, तत् संजातमस्य सः 'तदस्य संजातं तारकादिभ्य इतच्' इतीतच्प्रत्ययः । मे = मम सीतायाः, जन्मलाभः = जननप्राप्तिः, बहुमतः = अत्यभीष्टः ।

राम इति । सीतामदृष्ट्वा सीताऽरण्ये व्याघ्रादिना भक्षितेति मत्वा समाधत्ते—अथवेति । सङ्कल्पाऽभ्यासपाटवोपादानः = सङ्कल्पस्य = सीताविषयकचिन्तायाः, अभ्यासः = पुनः पुनरावृत्तिः, तस्य पाटवं = पटुत्वम् , तदेव उपादान = कारणं यस्य सः, तादृशः भ्रमः = भ्रान्तिः, अस्तीति शेषः । अनिशं सीताचिन्तनेनैव सीता मामस्प्राक्षीदित्याकारको भ्रमः संजात इति भावः ।

आनन्दित कर रहा है । हे आनन्ददायिनि ! तुम कहां हो ? ॥ १४ ॥

सीता—अत्यन्त गम्भीर चित्तसे प्रेम दिखलानेवाले, आनन्दकी वृष्टि करनेवाले और अमृतमय ये आर्यपुत्रके उच्च विलाप हैं । इनके विश्वाससे मैं विचार करती हूं कि अकारण परित्यागरूप शल्य (कील) से विद्ध होनेपर भी मेरा जन्मलाभ अत्यन्त अभीष्ट है ।

राम—अथवा यहां कहां प्रियतमा है ? निश्चय ही रामभद्रकी सीता-विषयक चिन्तासे अभ्यासकी पटुतासे ही उत्पन्न यह भ्रान्ति है ।

---

१. क्वचित् 'रामस्य' इत्येव पाठः ।

(नेपथ्ये ।)

अहो ! महान् प्रमादः प्रमादः ('सीतादेव्याः स्वकरकलितैः' इत्यर्धं पठ्यते ।)

रामः—(सकरुणौत्सुक्यम्) किं तस्य ?

(पुनर्नेपथ्ये 'वध्वा सार्धम्' इत्युत्तरार्धं पठ्यते ।)

सीता—को दाणिं अभिजुज्जइ ? (क इदानीमभियुज्यते ?)

रामः— काऽसौ दुरात्मा ? यः प्रियायाः पुत्रं वधूद्वितीयमभिभवति । (इत्युत्तिष्ठति ।) (प्रविश्य ।)

वासन्ती—(सम्भ्रान्ता ।) देव ! त्वर्यताम् ।

सीता—हा ! कहं मे पिअसही वासन्दी ? (हा, कथं मे प्रियसखी वासन्ती ?)

रामः—कथं देव्याः प्रियसखी वासन्ती ?

वासन्ती—देव ! त्वर्यतां त्वर्यताम् । इतो जटायुशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य सम्भावयतु देव्याः पुत्रकं देवः ।

सीतेति । इदानीम्=अधुना, अभियुज्यते=अभियोगं करोति, मत्पोषितकलभरक्षणाय कः प्रतिगजमाक्रामतीति भावः **'नियोक्ष्यते'** इति पाठे प्रेर्यते इत्यर्थः ।

राम इति । वधूद्वितीयं = भार्यासहितम् , अभिभवति = आक्रामति ।

वासन्तीति । संभ्रान्ता = सत्वरा, प्रियसख्याः सीतायाः पुत्रकगजस्य रक्षणार्थं त्वरासहितेति भावः ।

वासन्तीति । त्वर्यतां = त्वरा क्रियताम् , 'ञित्वरा सम्भ्रमे' इति धातोः

(नेपथ्यमें) अहो ! बड़ा प्रमाद है, प्रमाद ('सीतादेव्याः स्वकरकलितैः' इत्यादि पद्यका पूर्वार्द्ध श्लोक (पृष्ठ १३३ का) पढ़ा जाता है !)

राम—(करुणा और उत्कण्ठाके साथ) उसका क्या ?

(फिर नेपथ्यमें 'वध्वा सार्धम्' इत्यादि श्लोक (पृष्ठ १३४ का) पढ़ा जाता है ।)

सीता—अब कौन उससे लड़ता है ?

राम—वह दुरात्मा कहाँ है ? जो पत्नीयुक्त प्रियाके पुत्रपर आक्रमण कर रहा है । (ऐसा कह कर उठते हैं ।)

वासन्ती—(प्रवेश कर, घबड़ाई हुई) महाराज ! जल्दी कीजिए ।

सीता—हाय ! कैसे मेरी प्यारी सखी वासन्ती आ गई ?

राम— कैसे सीताकी प्रिय सखी वासन्ती आ गई ?

वासन्ती—महाराज ! शीघ्रता करें, शीघ्रता करें । यहाँ से जटायुके (द्वारा आश्रित)

सीता—हा ताद जडाओ ? सुण्णं तुए विणा इदं जणट्ठाणम् । (हा तात जटायो ! शून्यं त्वया विनेदं जनस्थानम् ।)

रामः—अहह ! हृदयमर्मच्छिदः खल्वमी कथोद्घाताः ।

वासन्ती—इत इतो देवः ।

सीता—भअवदि ! सच्चं एव्व वणदेवदावि मं ण पेक्खदि । (भगवति ! सत्यमेव वनदेवतापि मां पश्यति ।)

तमसा—अयि वत्से ! सर्वदेवताभ्यः प्रकृष्टतममैश्वर्यं मन्दाकिन्याः ।

भावे लोट् । इतः = अस्मात् स्थानात् , जटायुशिखरस्य = जटायोः = तन्नामकगृध्रराजस्य, शिखरस्य = शृङ्गस्य, जटायुना अध्युषितस्य पर्वतस्य शृङ्गस्येति भावः । दक्षिणेन = दक्षिणदिक्स्थितेन, एनप् प्रत्ययः, 'एनपा द्वितीया' इत्यत्र 'एनपे'ति योगविभागात् 'जटायुशिखरस्य' इत्यत्र षष्ठी । सीतातीर्थेन = सीताजलाऽवतरणमार्गेण, देव्याः = सीतायाः, पुत्रकं = पुत्रसदृशं, गजशावकमित्यर्थः । सम्भावयतु = संमानयतु, परित्राणेनेति भावः ।

सीतेति । तात = हे पितः !, जटायोः श्वशुरमित्रत्वेन पितृसमत्वात् तातेति सम्बोधनम् ।

राम इति । अमी = प्रागभिहिताः, कथोद्घाताः = पुरावृत्तोपन्यासाः, हृदयमर्मच्छिदः = हृदयमर्माणि छिन्दन्तीति = हृन्मर्मभेदका इत्यर्थः ।

वासन्तीति । देवः = महाराजः, 'राजा भट्टारको देव' इत्यमरः । इतः = अस्मात्स्थानात् , इतः = अत्र स्थाने, आगच्छत्विति शेषः ।

तमसेति । अयि = पदमिदं कोमलामन्त्रणे, मन्दाकिन्याः = गङ्गा-

पर्वतकी चोटीके दक्षिण और सीतातीर्थ (सीताघाट) से गोदावरीमें उतरकर महाराज सीताके पुत्रकी रक्षा करें ।

सीता—हाय ! पिता जटायो ! आप के विना यह जनस्थान सूना हो गया है ।

राम—हाय ! पूर्ववृत्तके कथन हृदयके मर्मस्थलको भेदन करनेवाले हैं ।

वासन्ती—महाराज ! यहां पधारें, यहां ।

सीता—भगवति ! सचमुच ही वनदेवता भी मुझे नहीं देख रही है ।

तमसा—अरी पुत्रि ! गङ्गाजीका सामर्थ्य सब देवताओंसे बढ़ा चढ़ा है, इसलिये क्यों

तत्किमिति विशङ्कसे ?

सीता—तदो अणुसरह्म । (इति परिक्रामति ।) (ततोऽनुसरावः ।)

रामः—(परिक्रम्य) भगवति गोदावरि ! नमस्ते ।

वासन्ती—(निरूप्य ।) देव ! मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण ।

रामः—विजयतामायुष्मान् ।

सीता—अह्महे ! ईदिसो मे पुत्तओ संवुत्तो । (अहो ! ईदृशो मे पुत्रकः संवृत्तः ।)

रामः—हा देवि ! दिष्ट्या वर्धसे ।

देव्याः, ऐश्वर्यं = प्रभुत्वं, सर्वदेवताभ्यः = संपूर्णदेवेभ्यः, 'पञ्चमी विभक्ते' इति पञ्चमी । प्रकृष्टतमम् = अतिशयेन । प्रकृष्टम् , उत्कृष्टतममित्यर्थः, 'अतिशायने तमबिष्ठनौ' इति तमप्प्रत्ययः । तत् = तस्माद्धेतोः. किमिति = किमर्थं, विशङ्कसे = आर्यपुत्रवासन्त्यादयो मां पश्येयुरिति आशङ्कसे इति भावः ।

सीतेति । ततः = तस्मात् अदृश्यत्वाद्धेतोरित्यर्थः । अनुसरावः = आर्यपुत्रवासन्त्योरनुसरणं कुर्व इति भावः ।

वासन्तीति । निरूप्य = दृष्ट्वा । वधूद्वितीयेन = भार्यान्वितेन, पुत्रकेण = कृतकपुत्रेण, मोदस्व = हृष्टो भव ।

सीतेति । ईदृशः = एतादृशः, बलशालीत्यर्थः ।

राम इति । दिष्ट्या = भाग्येन ।

शङ्का करती हो ?

सीता—तब हमलोग इनके पीछे चलें। (ऐसा कहकर चलती हैं ।)

राम—(चलकर) भगवति गोदावरि ! आपको नमस्कार है ।

वासन्ती—(अच्छी तरह देख कर) महाराज ! भार्यासे युक्त, विजयी और सीताके पुत्रसे आप प्रसन्न हों ।

राम—चिरंजीव विजय प्राप्त करे ।

सीता—अरे ! मेरा पुत्र ऐसा हो गया ?

राम—हा देवि ! भाग्यसे बढ़ रही हो ।

येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण
　व्याकृष्टस्ते सुतनु ! लवलीपल्लवः कर्णमूलात् ।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
　यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥१५॥

सीता—अविउत्तो दाणिं दीहाऊ इमाए सोम्मदंसणाए होदु । (अवियुक्त इदानीं दीर्घायुरनया सौम्यदर्शनया भवतु ।)

येनेति । हे सुतनु ! उद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण येन ते कर्णमूलात् लवलीपल्लवो व्याकृष्टः । सोऽयं तव पुत्रो मदमुचां वारणानां विजेता (सन्) तरुणे वयसि यत् कल्याणं तस्य भाजनं जात इत्यन्वयः । हे सुतनु = शोभना तनूः=शरीरं यस्याः सा तत्सम्बुद्धौ = हे सुन्दरि !, 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः, 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वम् । उद्गच्छद्बिसकिसलयस्निग्धदन्ताऽङ्कुरेण = बिसकिसलये इव स्निग्धौ बिसकिसलयस्निग्धौ, 'मृणालं बिसम्' इति, 'पल्लवोऽस्त्री किसलयम्' इति चाऽमरः, 'उपमानानि सामान्यवचनैः' इति समासः । उद्गच्छन्तौ=प्ररोहन्तौ, बिसकिसलयस्निग्धौ=मृणालपल्लवकोमलौ, दन्ताऽङ्कुरौ=दशनाऽङ्कुरौ यस्य तेन । येन=करिशावकेन, ते = तव, सीताया इत्यर्थः । कर्णमूलात्= श्रवणमूलात् , 'कर्णपूरात्' इति पाठे-'श्रोत्राऽऽभरणात्' इत्यर्थः । लवलीपल्लवः = सुगन्धमूलाकिसलयः, 'लवली सुगन्धमूले'ति राजनिघण्टुः । व्याकृष्टः = गृहीतः, सः = तादृशः, अयं = पुरो दृश्यमानः, तव = सीतायाः, पुत्रः = गजशावकः, (साम्प्रतम्), मदमुचां = दानजलस्राविणां, वारणानां = हस्तिनां विजेता = विजयकर्ता (सन), तरुणे = नूतने, वयसि = अवस्थायां, तारुण्य इति भावः । यत कल्याणं = भद्रं, महाबलशालित्वं वध्वाऽनुगम्यमानत्वं च, भवतीति शेषः । तस्य = तादृरूपस्य कल्याणस्य, भाजनं=पात्रं, जात =सम्पन्नः । अत्रोपमाऽलङ्कारः मन्दाक्रान्ता वृत्तम् ॥ १५ ॥

सीतेति । दीर्घायुः = आयुष्मान् , अनया = दृश्यमानया, सौम्यदर्शनया = प्रियविलोकनया, स्वभार्यया करिण्येत्यर्थः । अवियुक्तः = अविरहितः, भवतु=भूयात् ।

हे सुन्दरि ! उगते हुए मृणालके पल्लवोंकी तरह कोमल दो दन्ताङ्कुरोंसे युक्त जिस हाथीके बच्चेने पहले तुम्हारे कर्णमूलसे लवलीलताका पल्लव खींचा था, वही तुम्हारा पुत्र अब मदजल गिरानेवाले हाथियोंको जीतनेवाला होता हुआ युवावस्था (जवानी) में जो कल्याण है, उसका पात्र हो गया है ॥ १५ ॥

सीता—अब यह चिरायु इस प्रियदर्शनवाली भार्याके वियोगसे रहित हो ।

रामः—सखि वासन्ति ! पश्य पश्य । कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन ।

लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ १६ ॥

राम इति। वत्सेन=करिणा, कान्ताऽनुवृत्तिचातुर्यम्=कान्तायाः=प्रियायाः, करिण्या इत्यर्थः, अनुवृत्तिः=अनुवर्तनम्, इच्छाऽनुवर्तनमित्यर्थः, तत्र चातुर्यम्=पाटवम् ।

लीलेति। यत स्नेहात लीलोत्खातमृणालकाण्डकवलच्छेदेषु पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः सम्पादिताः, शीकरिणा करेण कामं सेको विहितः, पुनः विरामे अनरालनालनलिनीपत्रातपत्रं धृतम् इत्यन्वयः । यत = यस्मात् , स्नेहात् = प्रेम्णः, लीलोत्खातमृणालकाण्डकवलच्छेदेषु = लीलया=अनायासेन, उत्खाताः = उद्धृताः, ये मृणालकाण्डाः = बिसस्तम्बाः, ते एव कवलाः= ग्रासाः, तेषां छेदेषु=अवसानेषु । पुष्यत्पुष्करवासितस्य = पुष्यन्ति=विकसन्ति यानि पुष्कराणि=कमलानि, तैर्वासितं=सुरभितं तस्य । एतादृशस्य पयसः=जलस्य, गण्डूषसंक्रान्तयः=मुखपूरितजलांऽशसञ्चाराः, सम्पादिताः=निर्व्यूढाः, कृता इत्यर्थः । पूर्वं भक्षणाऽर्थं मृणालग्रासेषु दत्तेषु मध्ये पानार्थं गण्डूषा अपि दत्ता इति भावः । एवं शीकरिणा = जलबिन्दुयुक्तेन, 'शीकरोऽम्बुकणाः स्मृताः' इत्यमरः । करेण = शुण्डादण्डेन, कामं = यथेष्टं, 'कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।' इत्यमरः, सेकः = सेचनं, विहितः = सम्पादितः । पुनः = भूयः, विरामे=सेचनाऽवसाने, अनरालनालनलिनीपत्रातपत्रम्=अनरालम्=अवक्रम् , सरलमित्यर्थः, नालं = कमलदण्डो यस्य तत , एतादृशं यत नलिनीपत्रम्=कमलपत्रं, तदेव आतपत्रम् = छत्रम् , धृतम् = करिणीशरीरे आच्छादितमित्यर्थः, एतेन व्यवहारेण कान्ताऽनुवृत्तिचातुर्यं व्यज्यत इति भावः । अत्र नलिनीपत्र आतपत्रत्वारोपणेन **रूपकाऽलङ्कारः** । **शार्दूलविक्रीडितं** वृत्तम् ॥ १६ ॥

राम-सखि वासन्ति ! देखो देखो ! बच्चेने प्रियाको प्रसन्न रखनेकी चतुरता भी सीखी है ।

इसने आयास उखाड़े गये मृणालकाण्डरूप (कमलदण्डमय) ग्रासोंके अन्तमें खिले-हुए कमलोंसे सुगन्धित अपने मुखके जलको हथिनीके मुखमें सक्रान्त किया (छोड़ा), जलकी बूंद छोड़नेवाली सूंड़से खूब सेचन भी कर दिया और पीछेसे सीधे दण्डवाले कमलपत्र-रूप छत्रको भी धूप हटानेके लिए धारण कर लिया है ॥ १६ ॥

सीता—भअवदि तमसे ! अयं दाव ईरिसो जादो। दे उण ण आणामि, एत्तिएण कालेण कुसलवा कीरिसा संवुत्तेति ! (भगवति तमसे ! अयं तावदीदृशो जातः । तौ पुनर्न जानाम्येतावता कालेन कुशलवौ कीदृशौ संवृत्ताविति ?) ।

तमसा—याहशोऽय, तादृशौ तावपि ।

सीता—ईरिसंहि मन्दभाइणी, जाए ण केवलं अज्जउत्तविरहो पुत्तविरहो त्ति । (ईदृश्यस्मि मन्दभागिनी, यस्याः न केवलमार्यपुत्रविरहः, पुत्रविरहोऽपि ।)

तमसा—भवितव्यतेयमीदृशी ।

सीता—किंवा मए पसूदाए ? जे एआरिसं मह पुत्तआणं ईसिविरलधवलदसणकुड्मलुज्जलं अणुबद्धमुद्धकाअलीविहसिदं णिच्चुज्जलं मुहपुण्डरीअजुअलं ण परिचुम्बिअं अज्जउत्तेण । (किं वा मया प्रसूतया ? येनैतादृशं

सीतेति । अयं = करिशावकः, ईदृशः = तारुण्यबलसम्पन्नः । कीदृशौ = किंविधौ, तारुण्येन बलेन च सम्पन्नौ न वेति भावः ।

तमसेति । अय = कलभः, यादृशः = तारुण्येन बलेन च सम्पन्नः, तावपि= कुशलवावपि, तादृशौ = तारुण्येन बलेन च सम्पन्नाविति भावः ।

सीतेति । आर्यपुत्रविरहः = रामचन्द्रवियोगः । मन्दभागेति वक्तव्ये मन्दभागिनीति कथनं स्वमन्दभाग्यस्य नित्ययोगद्योतनाऽर्थमवसेयम् ।

तमसेति । भवितव्यता = भाग्यम् ।

सीतेति । प्रसूतया = प्रसवकर्त्र्या, मम पुत्रोत्पादनं निष्फलमित्यर्थः । नैष्फल्यं प्रतिपादयति—येनेति । येन = कारणेन, पुत्रकयोः = अनुकम्पितपुत्रयोः, कुशलवयोरित्यर्थः, 'अनुकम्पायाम्' इति कन् । ईषद्विरलधवलदशनकुड्मलोज्ज्वलम् = दशनाः कुड्मला इवेति दशनकुड्मलाः 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः, 'कुड्मलो मुकुलोऽस्त्रियाम्' इत्यमरः । ईषद्विरलाः = नाऽतिनिबिडाः,

---

सीता—भगवति तमसे ! यह ऐसा हो गया है । उन दोनोंको नहीं जानती हूं कि इतने समयमें कुश और लव कैसे हो गये होंगे ?

तमसा—जैसा यह है, वैसे वे भी हो गये होंगे ।

सीता—मैं ऐसा मन्दभाग्यशाली हू, जिसे केवल आर्यपुत्रका ही विरह नहीं है, बल्कि पुत्रविरह भी है ।

तमसा—भाग्य ही ऐसा है

सीता—मेरे पुत्रोंको पैदा करने से क्या ? जिससे कि मेरे दोनोंपुत्रोंके विरले, सफेद तथा

मम पुत्रकयोरीषद्विरलधवलदशनकुड्मलोज्ज्वलमनुबद्धमुग्धकाकलीविहसितं नित्योज्ज्वलं मुखपुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण ।)

तमसा—अस्तु देवताप्रसादात् ।

सीता—भअवदि तमसे ! एदिणा अवच्चसंसुमरणेण वस्ससिदपण्हुदत्थणी दुवाणि वाणं पिदुणो सांणहाणेन खणमेत्तं संसारिणी संवुत्तह्मि । (भगवति तमसे ! एतेनापत्यसंस्मरणेनोच्छ्वसितप्रस्नुतस्तनी इदानीं वत्सयोः पितुः सन्निधानेन क्षणमात्रं संसारिणी संवृत्तास्मि ।)

धवलाः = शुक्लाः, ये दशनकुड्मलाः = दन्तमुकुलाः, तैरुज्ज्वलं = निर्मलम् , पुस्तकान्तरेषु **'कोमलधवलदशनोज्ज्वलकपोलम्'** इति पाठस्तत्र-तथाऽभिहिताः= कोमला धवलाश्च ये दशनास्तैरुज्ज्वलौ कपोलौ = गण्डौ यस्य तत् इत्यर्थः । अनुबद्धमुग्धकाकलीविहसितम् = काकली च विहसितं च काकलीविहसिते, 'काकली तु कले सूक्ष्मे, ध्वनौ तु मधुराऽस्फुटे ।' इत्यमरः, अनुबद्धे=निरन्तरं सम्बद्धे, मुग्धे= मनोहरे, काकलीविहसिते = अस्पष्टमधुरशब्दहास्ये यत्र तत् । नित्योज्ज्वलं=सततविशदं, पुस्तकान्तरेषु **'निबद्धकाकशिखण्डकम्'** इति पाठस्तत्र-निबद्धाः = धृताः, काकशिखण्डकाः = काकपक्षा येन तत्, 'काकपक्षः शिखण्डकः' इत्यमरः, एतादृशं मुखपुण्डरीकयुगलम्=वदनपद्मयुग्मम् , आर्यपुत्रेण=पत्या रामेणेत्यर्थः ।

तमसेति । देवताप्रसादात् = देवतानाम् = देवानाम् , प्रसादात् = अनुग्रहात् , अस्तु = स्तात् , रामेण त्वत्पुत्रमुखकमलं चुम्बितं स्यादित्यर्थः, 'आशिषि लिङ्लोटौ' इति आशिषि लोट्, तातङो वैकल्पिकत्वादत्र तदभावः ।

सीतेति । एतेन=कालसन्निकृष्टेन, अपत्यसंस्मरणेन = अपत्ययोः = पुत्रयोः, कुशलवयोरित्यर्थः, संस्मरणेन = ध्यानेन । उच्छ्वसितप्रस्नुतस्तनी=उच्छ्वसितौ=वेपमानौ, प्रस्नुतौ=दुग्धनिष्यन्दिनौ, स्तनौ=पयोधरौ यस्याः सा । वत्सयोः=अपत्ययोः, पितुः = जनकस्य, रामचन्द्रस्येत्यर्थः, सन्निधानेन = सामीप्येन, क्षणमात्रं = कश्चित्

पुष्पकी कलियोंके सदृश दाँतों से उज्ज्वल, निरन्तर सम्बद्ध मनोहर अस्पष्ट मधुर शब्द और हास्यसे युक्त और नित्य उज्ज्वल श्वेत कमलों के सदृश मुखोंको आर्यपुत्रने नहीं चूमा।

तमसा—देवताके अनुग्रहसे ऐसा ही हो।

सीता—भगवति तमसे ! सन्तानोंकी इस स्मृतिसे कम्पमान मेरे पयोधरों से दूध बहने लगा है और उन बच्चोंके पिता (राम) की उपस्थितिसे कुछ समय तक मैं संसारिणी (गार्हस्थ्यसंपन्न) हो गई हूँ।

तमसा—किमत्रोच्यते ? प्रसवः खलु प्रकृष्टपर्यन्तः स्नेहस्य । परं चैतदन्योन्यसंश्लेषणं पित्रोः ।

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ॥ १७ ॥

वासन्ती—इतोऽपि देवः पश्यतु—
अनुदिवसमवर्धयत्प्रिया ते यमचिरनिर्गतमुग्धलोलबर्हम् ।

कालं यावत् , संसारिणि = गार्हस्थ्यसम्पन्ना, पत्युः सन्निधावपत्यस्मरणेन गृहान्निर्वासिताऽपि गृहस्थेव सञ्जाताऽस्मीति भावः ।

तमसेति । अत्र = अस्मिन् विषये । प्रसवः=अपत्यम् , स्नेहस्य=वात्सल्यस्य, प्रकृष्टपर्यन्तः = सातिशयं परा कोटिः, परं च = अपरं च, अन्यच्चेति भावः । एतत् = अपत्यं, पित्रोः = मातापित्रोः, माता च पिता चेति पितरौ, तयोः, 'पिता मात्रा' इत्येकशेषः, 'मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।' इत्यमरः । अन्योन्यसंश्लेषणं = परस्परचित्तानुबन्धनम् ।

अन्तःकरणेति । दम्पत्योः अन्तःकरणतत्त्वस्य स्नेहसंश्रयात् अयमेक आनन्दग्रन्थिः अपत्यमिति पठ्यत इत्यन्वयः । दम्पत्योः=जाया च पतिश्च दम्पती, तयोः = जायापत्योः । अन्तःकरणतत्त्वस्य = हृदयवस्तुनः, स्नेहसंश्रयात् = प्रीतिसंश्रयणात् , अयम्=एषः, एकः=अद्वितीयः, आनन्दग्रन्थिः,=सुखग्रन्थिः, अपत्यमिति = सन्तानस्वरूपः, पठ्यते = परिभाष्यते । **'बध्यते'** इति क्वाचित्कः पाठस्तत्र-'अपत्यमिति एक आनन्दग्रन्थिः बद्ध्यते' । इत्यन्वयः, बद्ध्यते=ग्रथ्यत इत्यर्थः ॥१७॥

अनुदिवसमिति । अचिरनिर्गतमुग्धलोलबर्हं यं ते प्रिया अनुदिवसम् अवर्धयत् , स एष शिखण्डी वध्रूसखः सन् कदम्बे उच्चकैः मणिमुकुट इव नदति इत्यन्वयः । अचिरनिर्गतमुग्धलोलबर्हम् = अचिरनिर्गतम् = प्रत्यग्रनिर्गतम् ,

---

तमसा—इसमें क्या कहना है ? सन्तान स्नेहकी पराकाष्ठा और माता-पिताका परस्पर चित्तका अनुबन्ध है ।

पत्नी और पतिको हृदयरूप वस्तुके प्रेमके आश्रयसे यह एक सुखकी ग्रन्थि (गांठ) ही 'सन्तान' कही जाती है ॥ १७ ॥

वासन्ती—इस तरफ भी महाराज देखें ।

नये निकले हुए सुन्दर और चञ्चल पूंछवाले जिसको आपकी प्रिया सीताने प्रतिदिन

मणिमुकुट इवोच्छिखः कदम्बे नदति स एष वधूसखः शिखण्डी ॥१८॥

सीता—(सकौतुकस्नेहास्रम् ।) एसो सो । (एष सः ।)

रामः—मोदस्व वत्स ! वयमद्य वर्धामहे[1] ।

सीता—एव्वं होदु । (एवं भवतु ।)

रामः—

भ्रमिषु कृतपुटान्तमण्डलावृत्तिचक्षुः प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या ।

मुग्धम् = सुन्दरम् , लोलम् = चञ्चलम् , बर्हम् = पिच्छं यस्य तम् 'पिच्छबर्हे नपुंसके' इत्यमरः । यं = मयूरं, ते = तव. प्रिया = वल्लभा, सीतेत्यर्थः । अनुदिवसं = प्रतिदिवसं, वीप्सायामव्ययीभावः । अवर्धयत् = अपोषयत् । सः = प्रागवलोकितः, एषः = पुरः स्थितः, शिखण्डी=मयूरः, वधूसखः=वध्वाः सखा=पत्नीसहचरः सन् , 'राजाऽहःसखिभ्यष्टच्' इति समासान्तष्टच् । कदम्बे = कदम्बवृक्षे, उच्छिखः = उद्गताः शिखाः = किरणाः यस्य सः । मणिमुकुट इव = मणिखचितः मुकुटः इति मणिमुकुट इव = रत्नकिरीट इव, 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्' इति मध्यमपदलोपी समासः । नदति = कूजति, केकां करोतीति भावार्थः । **'अतरुणमदताण्डवोत्सवान्ते स्वयमचिरोद्गतमुग्धलोलबर्हं'** इति पुस्तकान्तरपाठस्तत्र-अतरुणमदताण्डवोत्सवाऽन्ते नदति इत्यन्वयः । अतरुणः = प्रौढः, यः मदः, तेन ताण्डवोत्सवस्य = पुरुषकर्तृकनृत्योत्सवस्य, अन्ते = अवसाने, नदति इत्यर्थः कार्यः । **उपमाऽलङ्कारः । पुष्पिताग्रा** वृत्तम्—'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ।' इति तल्लक्षणम् ॥ १८ ॥

सीतेति । एषः = पुरःस्थितः, सः = मया वर्द्धितपूर्वः, मयूर इति शेषः ।

राम इति । मोदस्व = हर्षं कुरु, वर्धामहे = एधामहे, पुत्रवत्पालितस्य वधूसनाथस्य तव आनन्दाऽतिशयसम्पादितताण्डवोत्सवदर्शनादिति भावः ।

भ्रमिष्विति । भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः प्रचलितचटुलभ्रू-

बढ़ाया था, यह वही मोर भार्या (मोरनी) को साथमें लेकर कदम्बके पेड़पर ऊँचे किरणोंवाले मणियोंसे जड़े हुए किरीटकी तरह होकर शब्द कर रहा है ॥ १८ ॥

सीता—(उत्कण्ठा और स्नेहके आँसू के साथ) यह वही है ।

राम—पुत्र ! प्रसन्न रहो । हम आज बढ़ रहे हैं ।

सीता—ऐसा ही हो ।

राम—भ्रमणोंमें नेत्राऽऽवरणोंके भीतर मण्डलाऽऽकारसे भ्रमण करनेवाले नेत्रको अत्यन्त

[1]. 'वर्त्तामहे' इति पाठान्तरम् ।

करकिसलयतालैर्मुग्धया नर्त्यमानं सुतमिव मनसा त्वां वत्सलेन स्मरामि ।

हन्त ! तिर्यञ्चोऽपि परिचयमनुरुन्धन्ते ।

कतिपयकुसुमोद्गमः कदम्बः प्रियतमया परिवर्धितोऽयमासीत् ।

ताण्डवैः मण्डयन्त्या मुग्धया करकिसलयतालैः नर्त्यमानं त्वां सुतमिव वत्सलेन मनमा स्मरामि इत्यन्वयः । भ्रमिषु = सीतां परितो मण्डलतो भ्रमणेषु, कृतपुटाऽन्तर्मण्डलावृत्ति = कृता = विहिता, पुटयोः नयनाच्छादनचर्मणो', अन्तः = मध्ये, मण्डलावृत्तिः = मण्डलाकारेण भ्रमणम् , येन तत् एतादृशं यत् , चक्षुः = नयनं, तत् । प्रचलितचटुलभ्रूताण्डवैः = प्रचलिते = अतिचञ्चले, चटुले = सुन्दरे, **'चतुरे'** इति पाठे- लीलानिपुणे, एतादृश्यौ ये भ्रुवौ, तयोः ताण्डवैः = नृत्याकारेण चालनैः । मण्डयन्त्या, = भूषयन्त्या. मुग्धया=सुन्दर्या, सीतयेत्यर्थः, करकिसलयतालैः=करौ= हस्तौ, किसलये = पल्लवे इवेति करकिसलये, तयोस्तालाः = कालक्रियामानशब्दाः, तैः, नर्त्यमानं = कार्यमाणनृत्यम् , 'नृती गात्रविक्षेप' इत्यस्माद्धातोः णिजन्तात् कर्मणि, शानच् । त्वां = मयूरं, सुतमिव = पुत्रमिव, वत्सलेन=स्निग्धेन, 'स्निग्धस्तु वत्सल' इत्यमरः, मनमा = चित्तेन, स्मरामि = चिन्तयामि । **अत्रोपमाऽलङ्कारः । मालिनी वृत्तम्** ॥ १९ ॥

हन्तेति । हन्त = हर्षद्योतकमव्ययमिदम् । तिर्यञ्चोऽपि=पशुपक्षिणोऽपि, परिचयं = संस्तवम् , 'संस्तवः स्यात्परिचय' इत्यमरः । अनुरुन्धते = अनुसरन्ति, **'अनुरुध्यन्ते'** इति दैवादिकपाठेऽप्ययमेवार्थः ।

कतिपयेति । यः कदम्बः प्रियतमया परिवर्द्धितः (सन्) कतिपयकुसुमोद्गम आसीत् इति **श्लोकपूर्वार्द्धान्वयः** । यः कदम्बः = नीपः, प्रियतमया = सीतया, परिवर्द्धितः कृतसंवर्द्धनः (सन), कतिपयकुसुमोद्गमः = कतिपयानां=कियतां, स्वल्पानामित्यर्थः, कुसुमानाम् = पुष्पाणाम् , उद्गमः = उत्पत्तिः यस्मिन् सः, एतादृश आसीत = अभूत्—

चञ्चल और सुन्दर भौंहोंके नृत्योंसे अलङ्कृत करती हुई सुन्दरी सीताके द्वारा पल्लवसदृश हाथोंके तालोंसे नचाये जाते हुए तुझको पुत्रकी तरह स्निग्ध मनसे स्मरण करता हूँ ॥ १९ ॥

वाह ! पशुपक्षी भी परिचयका अनुसरण करते हैं ।

जो कदम्ब सीतासे बढ़ाया जाता हुआ कुछ विकसित पुष्पोंसे युक्त हो गया था—

सीता—(सास्रम् ।) सुट्ठु पच्चहिजाणिदं अज्जउत्तेण । (सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण ।)

रामः—

स्मरति गिरिमयूर एष देव्याः स्वजन इवात्र यतः प्रमोदमेति ॥ २० ॥

वासन्ती—अत्र तावदासनपरिग्रहं करोतु देवः । एतत्तु देवस्याश्रमम् ।

(राम उपविशति ।)

वासन्ती—

नीरन्ध्रबालकदलीवनमध्यवर्ति

सीतेति । प्रत्यभिज्ञातम् = ज्ञातविषयकं ज्ञानं सम्पादितम् , अयं स एवेति ज्ञात इत्यर्थः ।

स्मरतीति । एष गिरिमयूरः देव्याः स्मरति, यतः अत्र स्वजन इव प्रमोदम् एति **इत्युत्तरार्द्धश्लोकाऽन्वयः ।** एषः = पुरोवर्ती, गिरिमयूरः = पर्वतीयः शिखण्डी, देव्याः = सीतायाः, सीतामित्यर्थः, 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी । स्मरति = स्मरणं करोति, यतः = यस्माद्धेतोः, अत्र = अस्मिन् , पूर्वोक्ते कदम्बवृक्ष इत्यर्थः । स्वजन इव = आत्मबान्धव इव, प्रमोदं = हर्षम् , एति = प्राप्नोति, हर्षाऽनुभवं करोतीत्यर्थः । कदम्बवृक्षो मयूरश्चोभावपि सीतया संवर्द्धितौ, अतः भ्रातृसन्निभं कदम्बवृक्षं प्राप्य 'एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति' इति नयेन आवयोर्द्वयोरपि सीतैव मातेति सीतास्मरणेन मयूरो हृष्यति, अत'स्तिर्यञ्चोऽपि परिचयमनुरुन्धन्ते' इति समर्थितं भवतीति भावः । **अत्रोपमाऽलङ्कारः । पुष्पिताग्रा वृत्तम्** ॥ २० ॥

वासन्तीति । देवः = महाराजः ।

नीरन्ध्रेति । कान्तासखस्य ते नीरन्ध्रबालकदलीवनमध्यवर्ति शयनीय-

---

सीता—(आंखोंमें आंसू भरकर) आर्यपुत्रने खूब पहचाना ।

राम—यह पर्वतका मयूर सीताजीको याद कर रहा है, क्योंकि इस पेड़में बान्धवके समान हर्ष प्राप्त कर रहा है ॥ २० ॥

वासन्ती—महाराज यहां पर आसनग्रहण करें (विराजमान होवें) । यह तो महाराजका आश्रम है ।

(राम बैठते हैं ।)

वासन्ती—सीताके सहचर आपका घने और सुकुमार केलोंके वनके बीचमें स्थित यह

कान्तासखस्य शयनीयशिलातलं ते ।
अत्र स्थिता तृणमदाद्वनगोचरेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

रामः—इदमशक्यं द्रष्टुम् । (इत्यन्यतो रुदन्नुपविशति ।)

सीता—सहि वासन्ति ! किं तुए किदं अज्जउत्तस्स मह अ एदं दंस-अन्तीए ! हद्धी हद्धी ! सो एव्व अज्जउत्तो । तं एव्व पञ्चवडीवणम् । सा एव्व पिअसही वासन्दी, दे एव्व विविहविस्सम्भसक्खिणो गोदावरीकाणणुद्देसा, दे एव्व जादणिव्विसेसा मिअपक्खिणो पाअवा अ । मह उण मन्दभाइणीए दीसन्तं वि सव्वं एव्व एदं णत्थि । ईरिसो जीअलोअस्स परिणामो संवुत्तो (सखि वासन्ति ! किं त्वया कृतमार्यपुत्रस्य मम चैतद्दर्शय-

शिलातलम् (अस्ति), अत्र स्थिता सीता वनगोचरेभ्यः तृणम् अदात् , ततो हरिणकैः न विमुच्यते स्म इत्यन्वयः । कान्तासखस्य=सीतासहचरस्य, ते=तव, रामस्येत्यर्थः । नीरन्ध्राबालकदलीवनमध्यवर्ति=निर्गतं रन्ध्रम्=छिद्रम् , याभ्यस्ता नीरन्ध्राः=छिद्रस्याऽप्यवकाशाऽभावादतीव निबिडा इति भावः, ताश्च ता बालकदल्यः=सुकुमाररम्भाः, तासां वनं=विपिनं, तस्य मध्ये = अन्तरे, वर्तते तच्छीलम् , 'नीरन्ध्रबाले'ति पदद्वयस्य स्थाने 'एतत्तदेवे'ति पुस्तकान्तरपाठः । शयनीयशिलातलं = शयनप्रस्तरतलमस्तीति शेषः । अत्र = अस्मिन् , शयनीयशिलातल इत्यर्थः, स्थिता = विद्यमाना, सीता = जानकी, वनगोचरेभ्यः = आरण्यकेभ्यः, मृगेभ्य इति भावः । तृणं=घासम् , अदात=दत्तवती, ततः=तस्मात् तृणादानाद्धेतोः, हरिणकैः=अनुकम्पिता हरिणा हरिणकास्तैः = मृगकैः, 'अनुकम्पायाम्' इति कन्प्रत्ययः । न विमुच्यते स्म = न त्यज्यते स्म, एतदिति शेषः । एतेन तिरश्चामपि परिचयाऽनुरोधित्वं समर्थ्यते । 'वनगोचरेभ्य' इत्यत्र '**बहुशो यदेभ्यः**' इति पाठान्तरन्तत्र—बहुशः = अनेकश इत्यर्थः । अत्र **वसन्ततिलका** वृत्तम् ॥ २१ ॥

राम इति । इदं = शयनीयशिलातलम् । अन्यतः = अन्यस्मिन् स्थाने ।

सीतेति । एतत् = शयनीयशिलातलम् । विविधविस्रम्भसाक्षिणः = अनेक-

शयन करने योग्य शिलातल है। यहाँ पर बैठी हुई सीता वनमें रहनेवाले मृगोंको घास देती थीं, इससे इसको मृगलोग नहीं छोड़ते थे ॥ २१ ॥

राम—यह नहीं देखा जा सकता है। (ऐसा कहकर दूसरी ओर बैठते हैं।)

सीता—सखि वासन्ति। आर्यपुत्रको और मुझको यह स्थान दिखाकर तुमने क्या

न्त्या। हा धिक् हा धिक्! स एवार्यपुत्रः, तदेव पञ्चवटीवनम्, सैव प्रियसखी वासन्ती, त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशाः, त एव जातनिर्विशेषा मृगपक्षिणः पादपाश्च। मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्वमेवैतन्नास्ति। ईदृशो जीवलोकस्य परिणामः संवृत्तः।)

वासन्ती—सखि! सीते! कथं न पश्यसि रामभद्रस्यावस्थाम्।

नवकुवलयस्निग्धैरङ्गैर्ददन्नयनोत्सवं
सततमपि नः स्वेच्छादृश्यो नवो नव एव सः।
विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशोः प्रियः॥ २२॥

विश्वस्तव्यापाराणां साक्षात्कर्तारः, गोदावरीकाननोद्देशाः = गोदावर्याख्यनदीवनप्रदेशाः, जातनिर्विशेषाः=जातेभ्यः=उत्पन्नेभ्यः, पुत्रेभ्य इत्यर्थः, निर्विशेषाः=भेदरहिताः, पुत्रवल्लालिता इति भावः। दृश्यमानमपि=विलोक्यमानमपि, सर्वं=सकलम्, एतत्= पञ्चवटीवनादिकम्, नास्ति=न वर्तते, अविद्यमानमिव भवतीति भावः। ईदृशः=एतादृशः, जीवलोकस्य=मनुष्यलोकस्य, परिणामः=परिणतिः, संवृत्तः=संजातः, ममेति शेषः।

नवेति। नवकुवलयस्निग्धैः अङ्गैः नयनोत्सवं ददत् सततमपि नः स्वेच्छादृश्यः स नवो नव एव (आसीत्, साम्प्रतं तु) शुचा विकलकरणः पाण्डुच्छायः परिदुर्बलः स इति कथमपि उन्नेतव्यः, तथाऽपि दृशोः प्रिय इत्यन्वयः। नवकुवलयस्निग्धैः = नूतननीलकमलवच्चिक्कणैः, **'कुवलयदलस्निग्धैः'** इति पाठे नीलकमलपत्रचिक्कणैरित्यर्थः। अङ्गैः = पाणिपादादिभिरवयवैः, नयनोत्सवं = नेत्रानन्दम्, ददत् = वितरन्, **'ददौ'** इति पाठे दत्तवानित्यर्थः। सततमपि = सर्वदैव, नः = अस्माकं, स्वेच्छादृश्यः = आत्माकाङ्क्षोत्तरमेव दर्शनीयः, सुलभदर्शन इति भावः। तथा च सः = पूर्वाऽवलोकितो रामः, सुलभदर्शनोऽपि, नवो नव एव= नूतनो नूतन एव, प्रतिक्षणं भिन्नरूप एवेत्यर्थः, 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं

किया ? हाय ! धिक् ! हाय ! धिक् ! वही आर्यपुत्र हैं, वही पञ्चवटी वन है, वही प्रियसखी वासन्ती है, वे ही अनेक विश्वस्त कार्योंके साक्षी गोदावरीके वनप्रदेश हैं और वे ही पुत्रके सदृश पशु, पक्षी और वृक्ष भी हैं। परन्तु मुझ मन्दभागिनीके लिए यह सब देखा जाता हुआ भी नहीं के बराबर है। मनुष्यलोकका ऐसा परिणाम हो गया।

वासन्ती—सखि सीते! रामभद्रकी अवस्था क्यों नहीं देखती हो ?

नवीन नीलकमलोंके समान चिकने अङ्गोंसे नेत्रोंको उत्सव देते हुए निरन्तर हमलोगोंके इच्छानुसार दर्शनके योग्य होकर राम जो नये-नये ही प्रतीत होते थे, परन्तु जब शोकसे

सीता—सहि ! पेक्खामि । (सखि ! पश्यामि ।)

तमसा—पश्य प्रियं भूयः ।

सीता—हा ! देव्व एसो मए विणा अहंवि एदेण विणेत्ति केण संभाविदं आसि ? ता मुहुत्तमेत्तं जन्मन्तरादोवि दुल्लहलद्धदंसणं बाहसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तम् । (इति पश्यन्ती स्थिता ।) (हा दैव ! एष मया विना अहमप्येतेन विनेति केन सम्भावितमासीत् ? तन्मुहूर्तमात्रं जन्मान्तरादपि दुर्लभलब्धदर्शनं बाष्पसलिलान्तरेषु पश्यामि तावद्वत्सलमार्यपुत्रम् ।)

रमणीयतायाः' इत्युक्त्यनुसारादिति भावः । साम्प्रतं तु स एव रामः, शुचा = शोकेन, त्वदीयेनेति शेषः । विकलकरणः = क्षीणेन्द्रियः, पाण्डुच्छायः = धूसरकान्तिः, परिदुर्बलः = अतिशयकृशः, अतः-स इति = अयं पूर्वदृष्टो राम एवेति, कथमपि = केनाऽपि प्रकारेण, उन्नेतव्यः = अनुमेयः, तथाऽपि = एवंविधावस्थोऽपि, दृशोः = नयनयोः, प्रियः = प्रीतिजनकः, अनुपहतसौन्दर्यविशिष्टत्वाच्छोकाकान्त्या परिदुर्बलोऽपि रामः प्रागिव नेत्रानन्दसम्पादक एवेति भावः । अत्र लुप्तोपमाऽलङ्कारः । हरिणी वृत्तम् ॥ २२ ॥

सीतेति । पश्यामि = अवलोकयामि, अवलोकनमात्रेण कथं नाम रामस्य दुरवस्था निवारणीयेति भावः ।

तमसेति । भूयः = पुनः । अत्र **'पुत्रि !' पश्यन्ती प्रियं भूया'** इति पाठान्तरम् , तत्र—भूया इति आशीर्लिङ् ।

सीतेति । एषः = आर्यपुत्रः, केन = हेतुना, संभावितम् = उत्पादितम् । यद्वा केन = जनेन, संभावितम् = चिन्तितम् , जन्मान्तरादपि = अन्यस्माज्जन्मनोऽपि, दुर्लभलब्धदर्शनम् = दुर्लभं यथा स्यात्तथा लब्धं दर्शनं यस्य तम् । **'जन्मान्तरादिव अनुपलब्धदर्शना'** इति पुस्तकान्तरपाठः । बाष्पसलिलान्तरेषु=बाष्पसलिलानाम्=अश्रुजलानाम् , अन्तरेषु = अवकाशेषु, अश्रुनिर्गमाऽनन्तरकालेष्वित्यर्थः ।

क्षीण इन्द्रियवाले, धूसर वर्णसे युक्त और बहुत ही दुर्बल होकर 'ये वे ही राम हैं' ऐसे किसी तरह पहिचाने जाते हैं, ऐसे होते हुए भी नेत्रोंको प्यारे हैं ॥ २२ ॥

सीता—सखि ! देख रही हू ।

तमसा—प्यारेको फिर देखो ।

सीता—हा दैव ! 'ये मेरे बिना और मैं भी इनके बिना रहूंगी' किसने यह सम्भावना की थी ? इस कारणसे मुहूर्तमात्र दूसरे जन्ममें भी दुःखसे पाये जाने योग्य दर्शनवाले प्रेमी

तमसा—(परिष्वज्य सास्रम् ।)

विलुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती पक्ष्मलोत्तानदीर्घा ।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः ॥ २३ ॥

विलुलितमिति । अतिपूरैः विलुलितम् आनन्दशोकप्रभवं बाष्पम् अवसृजन्ती पक्ष्मलोत्तानदीर्घा धवलमधुरमुग्धा दुग्धकुल्या इव ते दृष्टिः स्नेहनिष्यन्दिनी (सती) हृदयेशं स्नपयति इत्यन्वयः । अतिपूरैः = अतिशयप्रवाहैः, विलुलितम्= विकीर्णम् , आनन्दशोकप्रभवम्=आनन्दशोकौ=हर्षमन्यू , प्रभवौ = कारणं यस्य तं, तत्र पतिदर्शनेन आनन्दस्तदीयदशाऽवलोकनेन च शोको ज्ञेयः । तादृशं बाष्पम् = अश्रु, अवसृजन्ती=उत्पादयन्ती, पक्ष्मलोत्तानदीर्घा = पक्ष्मला = प्रशस्ताऽक्षिलोमयुक्ता उत्ताना = विस्फारिता, दीर्घा = आयता. विशेषणसमासः, विशेषणपदानां मिथः समासे विशेष्यविशेषणभाव ऐच्छिकः । **'तृष्णयोत्तानदीर्घा'** इति पाठे—तृष्णया = पतिदर्शनस्य अत्युत्कण्ठयेत्यर्थः । एवं च धवलमधुरमुग्धा=धवला=प्रोषितभर्तृकाणां शरीरसंस्कारस्य निषेधेन कज्जलाऽभावात् शुक्ला, मधुरा = प्रिया, 'स्वादुप्रियौ च मधुरौ' इत्यमरः, मुग्धा = सौन्दर्योपेता, पूर्ववत् विशेषणसमासः । **'धवलबहलमुग्धा'** इति पाठे बहलम् = अत्यर्थं यथा स्यात्तथा मुग्धा=मनोहरा इत्यर्थः । तथा दुग्धकुल्या इव = पयसः कृत्रिमनदी इव, 'कुल्याऽल्पा कृत्रिमा सरित्' इत्यमरः । ते = तव, सीतायाः इत्यर्थः । दृष्टिः = नेत्रं, स्नेहनिष्यन्दिनी = प्रेमवर्षिणी (सती), हृदयेशं = सर्वदैव हृदये वर्तमानं राममित्यर्थः । स्नपयति = सिञ्चति, आदन्तत्वात्पुगागमे 'ग्लास्नावनुवमा च' इति वैकल्पिको ह्रस्वः । निरन्तरविलोकनेन ते दृष्टिः स्नेहरूपजलधारया रामं स्नपयतीति भावः । अत्र **उपमाप्रतीयमानोत्प्रेक्षयोः संसृष्टिः । मालिनी** वृत्तम् ॥ २३ ॥

आर्यपुत्रको आँसू निकलनेके अनन्तर समयोंमें देखूँ । (ऐसा कहकर देखती रहती हैं)

तमसा—(आलिङ्गन कर और आँखों में आँसू भरकर)

अधिक प्रवाहों से फैले हुए तथा आनन्द और शोकसे उत्पन्न आँसूको छोड़ती हुई, सुन्दर नेत्र लोमों (पलकोंके बालों) से युक्त विस्फारित और दीर्घ, एवं सफेद, प्रिय और सुन्दर दूधकी नहरकी तरह तुम्हारी दृष्टि प्रेमकी वृष्टि करती हुई हृदयेश्वर (राम) को स्नान कराती है ॥

वासन्ती—

ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः ।
कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः ॥ २४ ॥

राम—एहि सखि वासन्ति ! नन्वितः स्थीयताम् ।

ददत्विति । मधुश्च्युतः तरवः पुष्पैः फलैश्च अर्घ्यं ददतु । स्फुटितकमलामोदप्रायाः वनाऽनिलाः प्रवान्तु । रज्यत्कण्ठाः शकुन्तयः अविरलं कलं क्वणन्तु । अयं देवो रामः स्वयं पुनः इदं वनम् आगत इत्यन्वयः । मधुश्च्युतः = मधूनि = मकरन्दान्, पुष्परसानित्यर्थः, श्च्योतन्ति=क्षरन्ति इति मधुश्च्युतः 'श्च्युतिर् क्षरणे' इत्यस्मादन्तर्भावितण्यर्थाद्धातोः कर्तरि क्विप्प्रत्ययः, एतादृशास्तरवः = वृक्षाः, पुष्पैः = कुसुमैः, फलैश्च, अर्घ्यं = पूजोपहारं, ददतु = वितरन्तु । स्फुटितकमलामोदप्रायाः = स्फुटितानि,=विकसितानि, यानि कमलानि=पद्मानि, तेषामामोदः=सौरभम् , प्रायः=बहुलो येषु ते तादृशाः, वनाऽनिलाः=काननवाताः, प्रवान्तु = प्रवहन्तु, रामतापाऽपनयनार्थमिति भावः । रज्यत्कण्ठाः = रज्यन्तः = रागयुक्ताः, कण्ठाः = गलाः येषां ते, **'रत्युत्कण्ठाः'** इति पाठे रत्या = रामप्रेम्णा, उत्कण्ठाः = उत्कण्ठिताः, उत्कण्ठाशब्दात् 'अर्शआदिभ्योऽच्' इत्यच्प्रत्ययः, अर्शआदिराकृतिगणः । एतादृशा ये शकुन्तयः=पक्षिणः, 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' । इत्यमरः अविरलं = निरन्तरं, कलं = मधुरं यथा स्यात्तथा, क्वणन्तु = शब्दं कुर्वन्तु, विधित्रयेऽपि वाक्यार्थहेतुत्वेनोपन्यस्यति **पुनरिति** । अयं = सन्निकृष्टस्थः, देवः = महाराजः, रामः = रामचन्द्रः, स्वयम् = आत्मनैव, पुनः = भूयः, इदम् = एतत , वनम् = विपिनम् , आगतः = आयातः, अस्तीति शेषः । अतो रामाऽभिनन्दनाय सर्वैरतैर्भाव्यमिति भावः । अत्र चरणत्रयस्यान् विधीन् प्रति चतुर्थचरणवाक्यस्य रामागमनरूपस्य हेतुत्वाद्वाक्याऽर्थहेतुकं **काव्यलिङ्गमलङ्कारः** । **हरिणी** वृत्तम् ॥२४॥

राम इति । ननु = अनुनयार्थोऽयम् । इतः = अस्मिन् स्थाने ।

वासन्ती—मकरन्द बरसानेवाले वृक्ष फूल और फलों से अर्घ्य दें, खिले हुए कमलोंके सुगन्धवाले वनके वायु बहें, रागयुक्त कण्ठवाले पक्षी लगातार मीठी आवाज करें क्योंकि ये महाराज राम फिर स्वयम् वन में आये हुए हैं ॥ २४ ॥

राम—आओ सखि वासन्ति ! यहाँ बैठो ।

वासन्ती—(उपविश्य सास्रम्।) महाराज ! अपि कुशलं कुमारलक्ष्मणस्य ?
रामः—(अनाकर्णनमभिनीय ।)

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान्मैथिली यानपुष्यत् ।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्रवोद्भेदयोग्यः ॥ २५ ॥

वासन्ती—महाराज ! ननु पृच्छामि कुशलं कुमारलक्ष्मणस्येति ?

वासन्तीति । अपि = प्रश्नार्थकोऽयम् ।

राम इति । अनाकर्णनम् = अश्रवणम् । अभिनीय = अभिनयं कृत्वा, सीतास्मरणव्यग्रत्वादिति भावः ।

करेति । मैथिली करकमलवितीर्णैः अम्बुनीवारशष्पैः यान् तरुशकुनिकुरङ्गान् अपुष्यत् तेषु दृष्टेषु प्रस्रवोद्भेदयोग्यो मम हृदयस्य द्रव इव कोऽपि विकारो भवति इत्यन्वयः । मैथिली = सीता, करकमलवितीर्णैः = करौ कमले इव इति करकमले, 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः, ताभ्यां वितीर्णानि तैः करकमलवितीर्णैः = हस्तकमलदत्तैः । अम्बुनीवारशष्पैः = जलमुन्यन्नबालतृणैः, यान्, तरुशकुनिकुरङ्गान = वृक्षपक्षिमृगान् , अत्र अम्बुना तरून् , नीवारैः पक्षिणः, शष्पैः कुरङ्गानिति यथासंख्यम् । अपुष्यत् = अवर्द्धयत् । तेषु = पूर्वोक्तेषु तरुशकुनिकुरङ्गेष्वित्यर्थः । दृष्टेषु=विलोकितेषु सत्सु, प्रस्रवोद्भेदयोग्यः=प्रसरणोत्पत्तियोग्यः, **'प्रस्तरोद्भेदयोग्यः'** इति पाठे—प्रस्तरस्य=पाषाणस्य, उद्भेदः=विदारणम्, तस्मिन् योग्यः=समर्थ इत्यर्थः कार्यः । मम=रामस्य, हृदयस्य=चित्तस्य, द्रव इव=आर्द्रत्वमिव, कोऽपि=अनिर्वचनीयः विकारः=विकृतिः, सीताविरहजनितेति शेषः । भवति= उत्पद्यते । अत्र **यथासंख्योपमयोरङ्गाङ्गिभावेन सङ्करः** । **मालिनी वृत्तम्** ॥२५॥

वासन्तीति । लक्ष्मणविषयककुशलं पुनः पृच्छति—महाराजेति ।

वासन्ती—(बैठकर आँखोंमें आँसू भरकर) महाराज ! कुमार लक्ष्मणका कुशल तो है ?

राम—(न सुननेका अभिनय करके)

कमलतुल्य कोमल हाथोंसे दिये गये जल, नीवार धान्य और घाससे सीताने जिन वृक्षों पक्षी और मृगोंका पोषण किया था, उनको देखनेपर प्रसरणकी उत्पत्तिके योग्य मेरे हृदयकी आर्द्रताकी तरह कोई विकार उत्पन्न होता है ॥ २५ ॥

वासन्ती—महाराज ! मैं कुमार लक्ष्मणका कुशल पूछ रही हूँ ।

रामः—(आत्मगतम्) अये ! महाराजेति निष्प्रणयमामन्त्रणपदम् । सौमित्रिमात्रके बाष्पस्खलिताक्षरः कुशलप्रश्नः। तथा मन्ये विदितसीतावृत्तान्तेयमिति । (प्रकाशम् ।) आः ! कुशलं कुमारलक्ष्मणस्य[1] ।

वासन्ती—(रोदिति ।) अयि देव ! किं परं दारुणः खल्वसि ।

सीता—सहि वासन्ति ! किं तुमं एव्वंवादिणी होसि ? पूआरुहो सव्वस्स अज्जउत्तो, विसेसदो मह पिअसहीए । (सखि वासन्ति ! किं त्वमेवंवादिनी भवसि ? पूजार्हः सर्वस्यार्यपुत्रः विशेषतो मम प्रियसख्याः ।)

राम इति । निष्प्रणयम् = प्रेमशून्यम् , आमन्त्रणपदम् = सम्बोधनशब्दः । 'सखे' इत्यादिकं सौहार्दद्योतकं शब्दमप्रयुज्य महाराजपदस्याऽभिधानेन प्रणयशून्यत्वं द्योत्यत इति भावः । सौमित्रिमात्रके = सुमित्राया अपत्यं पुमान् सौमित्रिः, 'बाह्वादिभ्यश्चे'ति इञ् प्रत्ययः । सौमित्रिरेव सौमित्रिमात्रकं, तस्मिन् = केवले लक्ष्मण इत्यर्थः । बाष्पस्खलिताऽक्षरः = बाष्पेण = अश्रुणा, स्खलितानि=अस्पष्टानि, अक्षराणि = वर्णाः यस्मिन् सः, एतादृशः कुशलप्रश्नः = क्षेमाऽनुयोगः । तथा=तेन कारणेन, इयं = वासन्ती, विदितसीतावृत्तान्ता=विदितः=(ज्ञात·) सीतावृत्तान्तः (सीतोदन्तः, निर्वासनरूप इति भावः) यया सा । आः=पदमिदं सोपालम्भाङ्गीकारद्योतकम् , **'आम'** इति पाठे स्मृतिद्योतकोऽयमव्ययशब्दः ।

वासन्तीति । परम् = सातिशयं यथा तथा, दारुणः = भयङ्करः कठोरो वा, गर्भिण्याः प्राणप्रियायाः सीताया निर्वासनादिति भावः ।

सीतेति । एवंवादिनी = आर्यपुत्रं प्रति कठोरभाषिणी । पूजार्हः = पूजायोग्यः, मर्यादास्थापकत्वादिति भावः । **'प्रियार्ह'**इति पाठे प्रेमभाषणयोग्य इत्यर्थः ।

राम—(अपने मनमें) अरे ! 'महाराज' यह सम्बोधनका शब्द प्रेमशून्य है । केवल लक्ष्मणमें आंसूसे अस्पष्ट अक्षरोंसे युक्त कुशलप्रश्न है । इस तरह मैं विचार करता हूं कि 'ये सीताका वृत्तान्त जान गई हैं' (प्रकाश रूपसे) हां ! कुमार लक्ष्मणका कुशल है ।

वासन्ती—(रोती हैं) महाराज ! क्यों आप बहुत ही कठोर हो गये हैं ?

सीता—सखि वासन्ति ! क्यों तुम इस तरह कहती हो ? आर्यपुत्र सबके पूजनीय हैं, विशेष करके मेरी प्रिय सखीके ।

---

१. '(इति रोदिति)' इत्यधिकः पाठः पुस्तकान्तरेषु ।

वासन्ती—

त्वं जीवितं, त्वमसि मे हृदयं, द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण ? ॥ २६ ॥

वासन्ती रामस्य दारुणत्वं प्रतिपादयति—**त्वमिति** । त्वं जीवितम् । त्वं मे द्वितीयं हृदयम् । त्वं नयनयोः कौमुदी । त्वम् अङ्गे अमृतम् असि, इत्यादिभिः प्रियशतैः मुग्धाम् अनुरुध्य ताम् एव—अथवा शान्तम् , अतः परेण किम् ? इत्यन्वयः । त्वं = सीता, जीवितं = जीवनम् , असीति शेषः । त्वं मे जीवनसमा प्रियतमाऽसि, अतस्त्वां विना नो जीवामीति भावः । त्वं, मे = मम, रामस्येत्यर्थः, द्वितीयम् = अपरम् , हृदयम्=चित्तम् , असि=भवसि, त्वं हृदयवन्मदीयं सर्वं भावं जानासीति भावः । त्वं, नयनयोः=नेत्रयोः, कौमुदी=चन्द्रिका, चन्द्रिकावन्नेत्रानन्दमादधासीत्यर्थः । 'कौ मोदन्ते जना यस्मात्तेनेयं कौमुदी मता ।' इति कौमुदीपदनिरुक्तिः । त्वं=सीता, अङ्गे =कण्ठाद्यवयवे, अमृतं=पीयूषम् , अमृतवज्ज्ञरामपनीय नित्यं यौवनमावहसीत्यर्थः । इत्यादिभिः=इत्याकारकैः, प्रियशतैः = प्रियाणां = प्रियवचनानाम् , शतैः = अनन्तसंख्याभिः 'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्' इत्युक्तः, असंख्यचाटूक्तिभिरिति भावः । मुग्धाम् = उग्रयौवनाम् । त्वत्कौर्यमजानन्तीं मूढामिति वा । अनुरुध्य = अनुनीय, ताम् एव = तथोक्तां सीतामेव, 'कथं त्यक्तवानसि नाशितवानसीति वा' इति शेषः । अथ वा = आहोस्वित् , शान्तम् = अलम् , त्वामुपालभ्येति शेषः । अतः = अस्मात् , परेण = अन्तरेण, 'तामेव' इत्यनन्तरं कथितेनेति भावः, कि = किं फलम् , अलं दुःखद्योतकशब्देनेति तात्पर्यम् । अत्र **रूपकस्यातिशयोक्तेराक्षेपस्य** च परस्परमङ्गाङ्गिभावेन **सङ्करः** । **वसन्ततिलका** वृत्तम् ॥ २६ ॥

वासन्ती—'तुम मेरा जीवन हो, तुम मेरा दूसरा हृदय हो, तुम मेरी आंखोंमें चांदनी हो, तुम शरीरपर अमृत हो' इत्यादि सैकड़ों प्रिय वचनोंसे भोली सीताको अनुनय करके उन्हींको—अथवा बस, इसके आगे कहनेसे क्या फल है ? ॥ २६ ॥

(इति मुह्यति[1] ।)

तमसा—स्थाने वाक्यनिवृत्तिर्मोहश्च ।

रामः—सखि ! समाश्वसिहि समाश्वसिहि ।

वासन्ती—(समाश्वस्य ।) तत्किमिदमकार्यमनुष्ठितं देवेन ?

सीता—सहि वासन्दि ! विरम विरम । (सखि वासन्ति ! विरम विरम)

रामः—लोको न मृष्यतीति ।

वासन्ती—कस्य हेतोः ?

रामः—स एव जानाति किमपि ।

तमसेति । वाक्यनिवृत्तिः=वाग्व्यापारनिरोधः, मोहश्च = मूर्च्छा च, स्थाने = युक्तम् , ग्रन्थान्तरेषु रामोक्तमेव वाक्यमिदम् , अतः परं—'**सखि ! समाश्वसिहि समाश्वसिहि**' इत्यधिकः पाठश्च ।

वासन्तीति । तत् = तदा, अकार्यम् = अप्रशस्तं कार्यं, सीतानिर्वासनात्मकमिति भावः । अत्र अप्राशस्त्यार्थद्योतको नञ् , अनुष्ठितं = कृतम् ।

सीतेति—विरम = तूष्णीं भव, आर्यपुत्रं मा उपालभस्वेति भावः ।

राम इति । लोकः = जनः, न मृष्यति = सीताया गृहस्थितिं न सहत इति भावः, इति = अस्माद्धेतोः, सीता निर्वासितेति शेषः ।

वासन्तीति । कस्य हेतोः = कस्मात्कारणात् , लोकः सीताया गृहस्थितिं न मृष्यतीति शेषः, 'षष्ठी हेतुप्रयोगे' इति षष्ठी ।

राम इति । स एव = लोक एव, किमपि = किञ्चिदपि, कारणमपीति भावः ।

(ऐसा कहकर मूर्च्छित होती है)

तमसा—वाक्य रोकना और मूर्च्छा होना उचित ही है ।

राम—सखि ! समाश्वस्त हो, समाश्वस्त हो ।

वासन्ती – (समाश्वस्त होकर) तब क्यों महाराजने ऐसा दुष्कार्य किया ?

सीता—सखि वासन्ति ! चुप रहो, चुप रहो ।

राम—लोक नहीं सहता है, इसलिए ।

वासन्ती – किस कारणसे ?

राम – कुछ भी कारण हो, उसे लोक ही जानता है ।

१. 'मूर्च्छति' इति पाठान्तरम् ।

तमसा—चिरादुपालम्भः ।

वासन्तीति—

अयि कठोर ! यशः किल ते प्रियं, किमयशो ननु घोरमतः परम् ?
किमभवद्विपिने हरिणीदृशः ? कथय नाथ ! कथं बत ! मन्यसे ? ॥२७॥

तमसेति । चिरात = बहुकालात्, बहुकालमारभ्येति भावः । उपालम्भः = तिरस्कारः, रामस्य लोकं प्रति सीतानिर्वासनकालादारभ्योपालम्भोऽस्तीति भावः । ग्रन्थान्तरेषु 'चिरादुपालम्भ' इति स्थाने, **'उचितस्तदुपालम्भ'** इति पाठस्तत्र—तस्य = लोकस्य, उपालम्भः = तिरस्कारः, उचितः = योग्य आसीत्, न तु सीतानिर्वासनमिति भावः ।

अयीति । अयि कठोर ! यशः ते प्रियं किल, ननु अतः परं घोरम् अयशः किम् ? हरिणीदृशः विपिने किम् अभवत् ? नाथ ! कथय, कथं मन्यसे ? बत इत्यन्वयः । अयि कठोर = हे कठिनहृदय !, अयीतिपदस्य कोमलामन्त्रणद्योतकत्वेऽपि कठोरपदेन सह तस्याऽन्वयानुपपत्तेः विपरीतलक्षणया उपालम्भद्योतकार्थे पर्यवसानम् । यशः = कीर्तिः, ते = तव, रामस्येत्यर्थः, प्रियम् = अभीष्टम्, किलेति प्रसिद्धौ । हे राम ! यश एव तवाऽभीष्टं, सहधर्मचारिणीरक्षणं तु नेति भावः । नन्विति आक्षेपद्योतकं पदम् ? अतः परम् = अस्मादधिकम्, अयशः = अकीर्तिकरं, किं=किमस्ति, न किमपीति भावः । तदेव प्रतिपादयति-हरिणीदृश=हरिण्याः मृग्याः दृशाविव दृशौ = दृष्टी यस्याः सा हरिणीदृक्, तस्याः = चञ्चलनयनायाः सीताया इत्यर्थः । किम् अभवत = कीदृशी अवस्था अभूत ? नाथ = हे स्वामिन् !, स्वपत्नीं प्रति निरर्गलव्यापारसमर्थेति भावः । कथय = ब्रूहि, अत्र विषये कथं मन्यसे=किं विचारयसि, श्वापदसङ्कुले विपिने परित्यक्ता निःसहाया सीता जीवति मृता वेति किं विचारयसीति भावः ?, बत = खेदद्योतकमव्ययमिदम् । अत्र विरूपयोर्यशोऽयशसोः सङ्घटनया **विषमाऽलङ्कारः** । हरिणीदृश इत्यत्र **लुप्तोपमा** चेति द्वयोर्मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **द्रुतविलम्बितं** वृत्तम् । 'द्रुतविलम्बितमाह नभौ भरौ' इति तल्लक्षणम् ॥ २७ ॥

तमसा—बहुत कालसे यह तिरस्कार है ।

वासन्ती—हे निष्ठुर ! यश तुम्हें प्यारा है, लेकिन इससे अधिक भयङ्कर अकीर्तिकर कर्म क्या है ? मृगनयना सीताका जङ्गलमें क्या हुआ ? हे नाथ ! कहिए, आप क्या विचार करते हैं ? हाय ! ॥ २७ ॥

सीता—सहि वासन्दि ! तुम एव्व दारुणा कठोरा अ । जा एव्वं पलवन्तं पलावेसि । (सखि वासन्ति ! त्वमेव दारुणा कठोरा च । यैवं प्रलपन्तं प्रलापयसि ।)

तमसा—प्रणय एवं व्याहरति शोकश्च ।

रामः—सखि ! किमत्र मन्तव्यम् ?

त्रस्तैकहायनकुरङ्गविलोलदृष्टेस्तस्याः परिस्फुरितगर्भभरालसायाः ।

सीतेति । दारुणा = भीषणा, कठोरा = कठिना, विशेषणद्वये हेतुमाह—येति । एवम् = इत्थं, प्रलपन्तम्=अनर्थकं वचः कुर्वन्तं, शोकपारवश्यादिति भावः । प्रलापयसि = प्रलापं कारयसि । एतादृशो वियोगिनः शोकनिवारणमकृत्वा प्रत्युत । शोकमेवाऽनेकैर्वचोभिरुद्दीपयसीति भाव', अतस्त्वमेव दारुणा कठोरा चेति भावः । पुस्तकान्तरेषु 'प्रलपन्तं प्रलापयसी'ति स्थाने **'विलपन्ती प्रदीपयसी'**ति पाठान्तरं, तत्र=विलपन्ती = परिदेवनं कुर्वती, प्रदीपयसि = सन्तापयसीत्यर्थः ।

तमसेति । प्रणयः = वासन्त्यास्त्वद्विषयकं प्रेम, एवम् = इत्थम्, शोकश्च = त्वद्दशाजनितो मन्युश्च, इदं = रामोपालम्भकं वचनं, व्याहरति = कथयति ।

राम इति । अत्र = सीतादशाविषये, किं मन्तव्यम् = अतः परं किं विचारणीयम्–इदमेव सीताया वृत्तमिति प्रतिपादयत्यग्रिमपद्ये ।

त्रस्तैकेति । त्रस्तैकहायनकुरङ्गविलोलदृष्टेः परिस्फुरितगर्भभराऽलसायाः तस्याः मृदुबालमृणालकल्पा ज्योत्स्नामयी इव अङ्गलतिका क्रव्याद्भिः नियतं विलुप्ता इत्यन्वयः । त्रस्तैकहायनकुरङ्गविलोलदृष्टेः = त्रस्तः = भीतः, एकहायनः = एकं हायनं यस्य सः = एकवर्ष इत्यर्थः, एतादृशो यः कुरङ्गः = मृगः, तस्येव विलोले = अतिचञ्चले, दृष्टी=नेत्रे, यस्यास्तस्याः; परिस्फुरितगर्भभराऽलसायाः-परिस्फुरितः= प्रसवकालतया प्रकम्पितः, यो गर्भः = भ्रूणः तस्य भरः = भारः, तेन अलसायाः =

सीता—सखि वासन्ति ! तुम ही भयङ्कर और कठोर हो । जो इस तरह प्रलाप करते हुए आर्यपुत्रसे प्रलाप करवाती हो ।

तमसा—प्रेम और शोक ऐसा कहता है ।

राम—सखि ! इसमें क्या विचार करना है ?

डरे हुए एक सालके मृगके सदृश चञ्चल नेत्रोंवाली और कम्पित गर्भके भारसे आलस्य-

ज्योत्स्नामयीव मृदुबालमृणालकल्पा क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता।

सीता—अज्जउत्त ! धरामि एसा धरामि । (आर्यपुत्र ! ध्रिये एषा ध्रिये ।)

रामः—हा प्रिये जानकि ! कासि ?

सीता—हद्धी हद्धी ! अण्णो विअ अज्जउत्तो पमुक्ककण्ठं परुण्णो होदि । (हा धिक् हा धिक् ! अन्य इवार्यपुत्रः प्रमुक्तकण्ठं प्ररुदितो भवति ।)

आलस्ययुक्तायाः, अन्यत्र अपसर्पिनुमशक्तुवत्या इत्यर्थः, तस्याः=सीतायाः, मृदुबालमृणालकल्पा=मृदु=कोमलम् , यत् बालमृणालम्=नवीनबिसम् , तस्मादीषन्न्यूना बालमृणालकल्पा, नूतनमृणालसममृदुला इति भावः, 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति कल्पप्प्रत्ययः 'कल्पबादयः प्रत्ययास्तुल्यार्थे प्रत्ययमन्ना' इति काव्यादर्शे दण्डी । ज्योत्स्नामयी इव = चन्द्रिकानिर्मितेव, अतिशयशुभ्रेति भावः, विकारार्थे मयट् टित्त्वान्ङीप्, एतादृशी अङ्गलतिका = अङ्गं लतिकेव, अङ्गलतिका = देहलता, कृशेति भावः । नियतं = निश्चितं यथा तथा, क्रव्याद्भिः = हिंस्रजन्तुभिः, विलुप्ता = नाशिता, इदमेव सीताया वृत्तं किमत्र मन्तव्यमत्र इति पूर्वेण सम्बन्धः । अत्र चतसृणां **लुप्तोपमानामङ्गाङ्गिभावेन सङ्करोऽलङ्कारः । वसन्ततिलका** वृत्तम् ॥ २८ ॥

सीतेति । धरामि = धारयामि, यां मदीयामङ्गलतिकां क्रव्याद्भिर्विलुप्तां मन्यसे तां धारयामीति भावः, अन्तर्भावितण्यर्थत्वेनायमर्थः । पुस्तकान्तरेषु **'ध्रिये'** । इति पाठस्तस्य अवतिष्ठे इत्यर्थः, 'धृङ्-अवस्थाने' इति दैवादिकधातोर्लटि उत्तमपुरुषैकवचने रूपम् ।

राम इति । क = कुत्र ?

सीतेति । हा धिक् = मामिति शेषः । यतो मत्कारणादेव । आर्यपुत्रोऽपि, अन्य इव = साधारणजन इव, प्रमुक्तकण्ठम् = कण्ठपदस्य कण्ठस्वररूपाऽर्थे लक्षणा, अत्युच्चैःस्वरं यथा तथेति क्रियाविशेषणम् । प्ररुदितः = प्ररोदिता, रुदधातोरकर्मकत्वात् 'गत्यर्थाऽकर्मके' त्यादिना कर्तरि क्तः ।

युक्त उन सीताका कोमल छोटे मृणालके सदृश, चन्द्रिकासे बने हुए की तरह और लतातुल्य कृश शरीर हिंस्र जन्तुओंसे निश्चय ही नष्ट हुआ होगा ॥ २८ ॥

सीता—आर्यपुत्र ! मैं अपने शरीरको धारण कर रही हूँ, धारण कर रही हूँ ।

राम—हा प्रिये जानकि ; तुम कहा हो ?

सीता—हा धिक् ! हा धिक् ! साधारण पुरुषकी तरह आर्यपुत्र पुक्का फाड़कर रो रहे हैं ।

तमसा—वत्से ! साम्प्रतिकमेवैतत् । कर्त्तव्यानि खलु दुःखितैर्दुःख-निर्धारणानि ।

पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ॥ २९ ॥

विशेषतो रामभद्रस्य बहुप्रकारकष्टो जीवलोकः ।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा

तमसेति । एतत् = प्रमुक्तकण्ठं रोदनम्, साम्प्रतिकमेव = युक्तमेव, कथमिति प्रतिपादयति दु खितैः = मञ्जातदुःखैर्जनैः, दुःखनिर्धारणानि = दुःखाऽसह्यत्वनिश्चयाः, कर्तव्यानि = विधेयानि, उत्तरमेव रोदनादिना किमपि सान्त्वनं भविष्यतीति भावः । **'दुःखनिर्वापणानि'** इति पाठे दुःखोपशमनानीत्यर्थः ।

पुरोत्पीड इति । तटाकस्य पूरोत्पीडे परीवाहः प्रतिक्रिया (अस्ति), हृदयं च शोकक्षोभे प्रलापैरेव धार्यत इत्यन्वयः । तटाकस्य = जलाशयस्य, **'तडागस्य'** इति पाठेऽपि अयमेवाऽर्थः, 'पद्माकरस्तडागोऽस्त्री' इत्यमरः । पूरोत्पीडे=पूरस्य = प्रवाहस्य, उत्पीडे = आधिक्ये सति, 'पूरो जलप्रवाहे स्याद् व्रणसशुद्धिखाद्ययोः' इति मेदिनी । परीवाहः = जलनिःसारणम् , 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इत्युपसर्गस्य दीर्घत्वम् । प्रतिक्रिया = प्रतीकारः, तटभेदनिवारणोपाय इति भावः, अस्ति इति शेषः । एवं हृदयं च = चित्तमपि, शोकक्षोभे=शोकेन=मन्युना यः क्षोभः = चाञ्चल्यम् , तस्मिन् , प्रलापैरेव = रोदनहेतुभिरनर्थकैर्वचोभिरेव, परिदेवनैरेवेत्यर्थः । धार्यते=रक्ष्यते, हृदयभङ्गप्रसङ्गादिति शेषः । अत्र **दृष्टान्तालङ्कारः** ॥२९॥

विशेषत इति । बहुप्रकारकष्टः = बहवः = अनेके; प्रकाराः = भेदाः, यस्मिंस्तत् बहुप्रकारं, तादृशं कष्ट = दुःखं यस्मिन् सः जीवलोकः = मनुष्यलोकः ।

इदमिति । अभियुक्तेन मनसा इदं विश्वं विधिवत् पाल्यम् , धर्मः कुसु-

---

तमसा—बेटी ! यह उचित ही है । दुःखितोंको दुःखका (असह्यत्वका) निश्चय करना चाहिये ।

तालाबमें प्रवाहका आधिक्य होनेपर परीवाह अर्थात् बाहर जल निकलनेके लिए बना-हुआ छोटा-सा मार्ग ही प्रतिकार होता है । इसी तरह हृदय भी शोकसे चञ्चल होनेपर विलापोंसे ही रक्षित किया जाता है ॥ २९ ॥

विशेष कर रामचन्द्रके लिए तो मनुष्यलोक अनेक प्रकारके कष्टोंसे युक्त है ।

सावधान मनसे इस संसारका विधिपूर्वक पालन करना कर्तव्य है । परन्तु जैसे धूप फूलको

---

१. 'रक्ष्यते' इति पाठान्तरम् ।

प्रियाशोको जीवं कुसुममिव घर्मो ग्लपयति ।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम् ॥ ३० ॥

रामः—कष्टं भोः ! कष्टम् ।

दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।

ममिव प्रियाशोको जीवं ग्लपयति, स्वयं त्यागं कृत्वा विलपनविनोदोऽपि असुलभः, तत् अद्याऽपि उच्छ्वासो भवति, ननु रुदितं लाभो हि इत्यन्वयः । अभियुक्तेन = सावधानेन, मनसा = चित्तेन, नो चेन्मर्यादाऽपगता स्यादिति भावः । इदम् = अदः, विश्वं = संसारः, विधिवत् = विधिपूर्वकम् , पाल्यम् = पालनीयम् 'क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनम्' इत्युक्तेः । घर्मः = आतपः, कुसुममिव = पुष्पमिव, प्रियाशोकः = सीतावियोगमन्युः, जीवं = जीवनं, ग्लपयति = ग्लानं करोति, **'क्लमयति'** इति पाठेऽप्ययमेवाऽर्थः । स्वयम् = आत्मना, त्यागम् = निर्वासनं, कृत्वा, विलपनविनोदोऽपि = विलपनेन = परिदेवनेन, विनोदः = शोकाऽपनयनमपि, असुलभः = दुर्लभः, प्राक् स्वयमेव सीतायास्त्यागं कृत्वा पश्चात्तदर्थं परिदेवनेन लोकः किं वक्ष्यतीति मत्वा विलापोऽपि दुर्लभ इति भावः । यद्येवं तर्हि मृत्वा शोकोऽपनीयतामित्यत आह-**तदिति** । तत् = तथापि, विलपनविनोदस्याऽसौलभ्येऽपीत्यर्थः । अद्याऽपि = एतत्कालपर्यन्तमपि, उच्छ्वासः = प्राणधारणं भवति, मरणमपि दुर्लभमेव, आत्महत्याया महापापरूपत्वादिति भावः । अत एतादृश्यां दशायां, साम्प्रतं, ननु = निश्चयेन, रुदितं = रोदनं, लाभो हि = जीवनधारणाऽर्थं लाभस्थानीयो हि, एतेन 'शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ।' इत्युक्तिर्दृढीक्रियते । शोकाऽपनयनाऽसामर्थ्येऽपि रोदनस्य जीवनधारणहेतुत्वान्न नैष्फल्यमिति भावः । **अत्रोपमापरिणामयो**रङ्गाङ्गिभावेन **सङ्करः** । **शिखरिणी** वृत्तम् ॥ ३० ॥

दलतीति । हृदयं शोकोद्वेगात् दलति, द्विधा तु न भिद्यते । विकलः कायः

मलिन कर देता है उसी तरह प्रियाका शोक जीवनको ग्लानियुक्त कर देता है, स्वयम् त्याग करके विलाप कर जी बहलाना भी दुर्लभ है, तो भी अभी तक प्राणधारण हो रहा है। इस लिये रोना मी जीवन-धारणके लिये लाभस्थानीय ही है ॥ ३० ॥

राम—कष्ट है, अहो ! कष्ट है ।

हृदय शोकसे विचलित होनेके कारण विदीर्ण होता है, लेकिन दो टुकड़ोंमें विभक्त नहीं

ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ ३१ ॥

हे भगवन्तः[1] पौरजानपदाः !

मोहं वहति, चेतनां न मुञ्चति । अन्तर्दाहः तनूं ज्वलयति, भस्मसात् न करोति । मर्मच्छेदी विधिः प्रहरति, जीवितं न कृन्तति इत्यन्वयः । हृदयं = वक्षःस्थलं, शोकोद्वेगात्=शोकेन = इष्टवियोगजनितेन मन्युना, य उद्वेगः=आकुलत्वम् , तस्माद्धेतोः । दलति = स्फुटति, विदीर्णं भवतीत्यर्थः । पुस्तकान्तरेषु **'गाढोद्वेगम्'** इति पाठस्तस्य—*गाढः = अतिशयः, उद्वेगः = व्याकुलत्वम् यस्य तदिति हृदयस्य* विशेषणम् । क्वचित्तु **'गाढोद्वेग'** इति प्रथमान्तः पाठस्तत्र तस्य दलतीति क्रियायाः कर्तृत्वं बोध्यम् . क्रियापदस्यापि विदारयतीत्यर्थः । द्विधा तु = द्वाभ्यां प्रकाराभ्यां तु, न भिद्यते = न भिन्नं भवति, पृथक्कारेण खण्डद्वयं न भवतीत्यर्थः । शोकोद्वेगात् विदीर्णत्वेऽपि हृदयस्य शकलद्वयं न भवति, भवेच्चेत् एतादृग् दुःखं न भवेदित्यर्थः । विकलः = विह्वलः. शोकेन इति शेषः । कायः = *शरीरं, मोहं = मूर्च्छां, वहति = धारयति, चेतनां = चैतन्यं, न मुञ्चति=न त्यजति,* चैतन्यत्यागरूपे मरणे सति ईदृग् दुःखं नाऽनुभवेयमिति भावः । अन्तर्दाहः = अन्तःकरणतापः, तनू = शरीरं, ज्वलयति = सन्तापयति, परं भस्मसात् न करोति = भस्मीभूतां न विदधाति, 'विभाषा साति कार्त्स्न्ये' इति सातिप्रत्ययः, मनस्तापो यदि शरीरं भस्मसादकरिष्यत्तर्हि एतादृशो विरहसन्तापो नाऽभविष्यदिति भावः । मर्मच्छेदी = मर्माणि = जीवितस्थानानि, छिनत्ति = विदारयति इति एतादृशो विधिः = भाग्यं, प्रहरति = प्रहारं करोति, परं जीवितं = जीवनं, न कृन्तति = न छिनत्ति, विधिना जीवनच्छेदे कृते त्वसकृदेवं सीतावियोगदुःखाऽनुभवी न भवेयमिति भावः । अत्र दलनादौ कारणे सत्यपि द्विधाभेदनादिरूपफलाऽभावात् चतुर्ष्वपि चरणेषु **विशेषोक्त्य**लङ्काराणां मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **हरिणी** वृत्तम् ॥ ३१ ॥

होता; शोकसे विह्वल शरीर मोहधारण करता है, लेकिन चैतन्यको नहीं छोड़ता । अन्तःकरणका सताप शरीरको जलाता है, लेकिन भस्म नहीं करता; इसी तरह मर्मस्थलको विदारण करनेवाला भाग्य प्रहार करता है; लेकिन जीवनको नष्ट नहीं करता है ॥ ३१ ॥

नगर और देश में रहनेवाले हे महात्माओ !

१. 'भवन्तः' इति पाठान्तरम् ।

न किल भवतां देव्याः स्थानं गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।
चिरपरिचितास्ते ते भावास्तथा द्रवयन्ति मा-
मिदमशरणैरद्यास्माभिः प्रसीदत रुद्यते ॥ ३२ ॥

न किलेति । देव्याः गृहे स्थानं भवता न अभिमतम्, ततः तृणम् इव शून्ये वने त्यक्ता, न च अनुशोचिता अपि । चिरपरिचिताः ते ते भावाः मां तथा द्रवयन्ति । अद्य अशरणैः अस्माभिः इदं रुद्यते प्रसीदत इत्यन्वयः । देव्याः = सीतायाः, गृहे = भवने, स्थानं = स्थितिः, भवतां = युष्माकं, न अभिमतम्=नेष्टम्, ततः = तस्माद्धेतोः, सीताया गृहस्थितेर्भवतामनभिमतत्वादिति भावः, तृणम् इव = व्यर्थप्रायो घास इव, शून्ये = निर्जने, वने=अरण्ये, त्यक्ता, सीतेति शेषः । न च अनुशोचिता = सीतार्थमनुशोकोऽपि न कृत इत्यर्थः । पौरलोकाऽऽराधनाऽर्थमेव निरपराधां प्राणवल्लभां सीतां परित्यज्यापि तदर्थं शोकोऽपि मया न कृत इति भावः । परं साम्प्रतं तु—चिरपरिचिताः = बहुकालाऽभ्यस्ताः, पुरा मीनया संस्तुता इत्यर्थः । ते ते = पूर्वानुभूताः, भावाः = पदार्थाः, मां = रामं तथा = तेन प्रकारेण, द्रवयन्ति=द्रववन्तं कुर्वन्ति, विलापयन्तीति भावः । द्रवच्छब्दात् 'तत्क- रोति तदाचष्टे' इति णिच्, मतुल्लोपे टिलोपे च रूपम् । **'परिद्रवयन्ति'** इत्यपि पाठः । अद्य = अस्मिन्दिने, अशरणैः = रक्षकरहितैः, 'शरणं गृहरक्षित्रोः' इत्यमरः । अस्माभिः इदम् = एतत्, रुद्यते=रोदनं क्रियते, प्रसीदत=प्रसन्ना भवत, प्रार्थनायां लोट् । पौरजानपदाः ! प्राक् युष्माकमाराधनार्थं योगक्षेमयोर्व्यग्रचित्त- तया च सीतामुद्दिश्य शोकमपि कर्तुं न पारितं साम्प्रतं निर्जने वने कार्यान्तराऽव्यग्रतया सीतां संस्मृत्य रुद्यते तत्राऽपि प्रतिबन्धं मा कुरुतेति तात्पर्यम् । अत्र सीतात्यागरूपस्य हेतोः सत्त्वेऽपि अनुशोचनरूपस्य फलस्याभावाद्विशेषोक्तिरलङ्कारस्तथा च 'तृणमिवे'त्यत्रोपमा चेत्युभयोः **सङ्करः** । **हरिणी** वृत्तम् ॥३२॥

सीताका घरमें रहना आप लोगोंको अभीष्ट न हुआ, इसलिए उसको तृणकी तरह शून्य वनमें छोड़ दिया और शोक भी नहीं किया । बहुत कालसे परिचित वे वे पदार्थ मेरे द्वारा अनिर्वचनीय रूपसे विलाप करवाते हैं, इसलिए अशरण होकर मैं रो रहा हूं; आप लोग प्रसन्न हों ॥ ३२ ॥

वासन्ती—(स्वगतम् ।) अतिगभीरमापूरणं मन्युभारस्य । (प्रकाशम् ।) देव ! अतिक्रान्ते धैर्यमवलम्ब्यताम् ।

रामः—किमुच्यते धैर्यमिति ?

देव्याः शून्यस्य जगतो द्वादशः परिवत्सरः ।
प्रणष्टमिव नामापि न च रामो न जीवति ॥ ३३ ॥

वासन्तीति । मन्युभारस्य = शोकभारस्य, क्वचित् **'शोकसागरस्ये'**ति पाठः । अतिगम्भीरम् = अतिशयगूढम् **'अवगूरणम्'** इति पुस्तकान्तरपाठस्तस्य मर्यादामुल्लङ्घ्य गमनमित्यर्थः, अतिवृद्धिरिति तात्पर्यम् । पुस्तकान्तरपाठ उक्तिरियं तमसायाः । अतिक्रान्ते = सीतानिर्वासनादिरूपेऽतीते विषये, अतीतविषये, शोचने न कोऽपि लाभ इति भावः ।

राम इति । धैर्यमिति = धीरत्वमवलम्ब्यतामिति वचनं, किमुच्यते = किमभिधीयते, मया धैर्यावलम्बनस्य परा काष्ठा कृतेति भावः । तदेव द्रढयति—

देव्या इति । देव्याः शून्यस्य जगतो द्वादशः परिवत्सरः (वर्तते), नामाऽपि प्रणष्टमिव (जातम्), रामश्च न जीवति (इति) न इत्यन्वयः । देव्याः = सीतायाः, शून्यस्य = रहितस्य, जगतः = लोकस्य, द्वादशः = द्वादशानां पूरणः, 'तस्य पूरणे डट्' इति डट्, परिवत्सरः = संवत्सरः, वर्तत इति शेषः । नामाऽपि = सीतायाः सीतेत्यभिधानमपि, प्रणष्टमिव=विलुप्तमिव जातमिति शेषः, सीताया दयादाक्षिण्यसहाऽनुवर्तनाऽऽदिगुणगणस्य तु का कथेति भावः । एतादृशे व्यतिकरेऽपि—रामश्च, न जीवति (इति) न = प्राणान् नो धारयति इति न, अपि तु धारयत्येवेति भावः । सहधर्मिण्या नाम्नोऽपि विनष्टप्रायत्वे योऽहं जीवामि, तन्मदीयं जीवनं धैर्यस्य परा काष्ठेति भावः । अत्र प्रणष्टमिवेत्यत्र **क्रियोत्प्रेक्षा**ऽलङ्कारः ॥ ३३ ॥

वासन्ती—(मनही मन) शोक-भारकी अत्यन्त गम्भीर पूर्णता है । (सुनाकर) महाराज ! बीते हुए विषयोंमें धैर्यधारण कीजिए ।

राम—धैर्यधारणकी बात क्या करती हो ?

सीतासे रहित लोकका यह बारहवाँ वर्ष है, उनका नाम भी जैसे लुप्त-सा हो गया है, तो भी राम नहीं जीता है, यह बात नहीं (अर्थात् जी ही रहा है) ॥ ३३ ॥

सीता—ओहरामि अ मोहिआ विअ एदेहिं अज्जउत्तस्स पिअवअणेहिं । (अपहरामि च मोहितेव एतैरार्यपुत्रस्य प्रियवचनैः ।)

तमसा—एवमेव वत्से !

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः ।
एतास्ता मधुनो धाराः श्च्योतन्ति सविषास्त्वयि ॥ ३४ ॥

रामः—अयि वासन्ति ! मया खलु—

यथा तिरश्चीनमलातशल्यं प्रत्युप्तमन्तः सविषश्च दन्तः ।

सीतेति । मोहिता इव = सञ्जातमोहा इव, अपहरामि = यापयामि, कालमिति शेषः ।

नैता इति । एता वाचः प्रियतमाः स्नेहार्द्राः शोकदारुणा न, (किन्तु) एतास्ताः सविषा मधुनो धारास्त्वयि श्च्योतन्ति इत्यन्वयः । एताः = सम्प्रत्येव रामोक्ताः, वाचः = वाण्यः, प्रियतमाः = इष्टतमाः, स्नेहार्द्राः = अनुरागशीतलाः, शोकदारुणाः = मन्युना कठोराः, न = नो वर्तन्ते, किन्तु एताः = रामोक्ताः, ताः = त्वया श्रुताः, सविषाः = गरलसहिताः, मधुनः = पुष्परसस्य, धाराः = प्रवाहाः, त्वयि = सीतायाम् , श्च्योतन्ति = स्रवन्ति, अत एव एता वाचो मधुधारारूपेण त्वत्प्रीतिजनयित्र्यः सविषत्वरूपेण च त्वन्मोहोत्पादिका इति भावः । अत्रोऽपह्नुतिरलङ्कारः ॥ ३४ ॥

यथेति । यथा अन्तः प्रत्युप्तं तिरश्चीनम् अलातशल्यं, सविषो दन्तश्च, तथैव तीव्रो मर्माणि कृन्तन्नपि हृदि शोकशङ्कुः किं न सोढः ? इत्यन्वयः । यथा = येन प्रकारेण, अन्तः = मध्ये, वक्षःस्थल इत्यर्थः, प्रत्युप्तं = निखातं, तिरश्चीनं = तिर्यग्भूतम् , अलातशल्यम् = उल्मुककीलकं, सविषः = सगरलः, 'चवेडस्तु गरलं विषम्' इत्यमरः । दन्तश्च = दशनश्च, सर्पादेरिति शेषः, क्वचिद्दन्तस्थाने 'दंश' इति पाठः । तथैव = तेन प्रकारेणैव, तीव्रः = दुःसहः, मर्माणि =

सीता—आर्यपुत्रके इन प्यारे वचनोंसे मोहितकी तरह होकर समय बिता रही हूँ ।

तमसा—यही बात है बेटी !

ये वचन बहुत ही प्यारे, प्रेमसे शीतल और शोकसे कठोर नहीं हैं, ये वे विषयुक्त मधुकी धारायें तुम्हारे ऊपर बह रही हैं ॥ ३४ ॥

राम—अयि वासन्ति ! मैंने—

जैसे हृदयमें घुसा हुआ तिरछा जलता हुआ काष्ठखण्ड और विषैला दाँत दुःखदायक

तथैव तीव्रो हृदि शोकशङ्कुर्मर्माणि कृन्तन्नपि किं न सोढः ? ॥ ३५ ॥

सीता—एव्वं वि मन्दभाइणी अहं जा पुणो आआसआरिणी अज्जउत्तस्स । (एवमपि मन्दभागिन्यहं या पुनरायासकारिणी आर्यपुत्रस्य ।)

रामः-एवमतिगूढस्तम्भितान्तःकरणस्यापि मम संस्तुतवस्तुदर्शनादद्यायमावेगः । तथा हि—

वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं

हृदयादीनि मर्मस्थलानि, कृन्तन्नपि = छिन्दन्नपि, हृदि = हृदये, शोकशङ्कुः = मन्युरूपकीलकम् , किं न सोढः = किं न व्यसह्यत, अपि तु सोढ एवेत्यर्थः । तथापि त्वं धैर्यावलम्बनमुपदिशसीति भावः । अत्रोपमारूपकयोरङ्गाङ्गिभावेन सङ्करः । अत्र प्रथमतृतीययोर्द्वितीयचतुर्थयोश्चरणयोरुपेन्द्रवज्रेन्द्रवज्रयोः संमिश्रणादुपजातिवृत्तम् ॥ ३५ ॥

सीतेति । मन्दभागिनी = अल्पभाग्या, आयासकारिणी = कष्टदायिनी ।

राम इति । अतिगूढस्तम्भिताऽन्तःकरणस्य = अतिगूढम् = अतिगुप्तं यथा तथा, **'अतिनिष्कम्पमि'**ति पुस्तकान्तरपाठस्तस्याऽतिनिश्चलं यथा तथेत्यर्थः, तथा स्तम्भितम् = रुद्धम् , अन्तःकरणम् = चित्तं येन, तस्य । संस्तुतवस्तुदर्शनात् = संस्तुतानि = परिचितानि, सीतया सह प्राक् साक्षात्कृतानीति यावत् , च तानि वस्तूनि = पदार्थाः, तेषां दर्शनात् = विलोकनात् , क्वचित् **'संस्तुतबहुतरप्रियदर्शनात्'** इति पाठस्तत्र-संस्तुतानां = परिचितानां, बहुतराणाम् = भूरितराणाम् , प्रियाणाम् = अभीष्टपदार्थानाम् , दर्शनादित्यर्थः । आवेगः = चित्तविकारः, क्वचित् **'उद्दामोऽयमावेगः'** इति पाठस्तत्र = उद्दामः = संवृद्ध इत्यर्थः ।

वेलोल्लोलेति । वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनाऽर्थं यो यो यत्नः

होता है, उसी तरह दुःसह और मर्मस्थलोंको छेदन करते हुए एवं हृदयमें घुसे हुए शोकरूप कीलकको क्या मैंने नहीं सहा ? ॥ ३५ ॥

सीता—मन्दभागिनी मैं इस तरहसे भी आर्यपुत्रको फिर दुःख देनेवाली हो गई ।

राम—इस तरह बहुत ही गुप्त रूपसे अन्तःकरणको रोकनेपर भी परिचित वस्तुओंको देखनेसे आज मेरा ऐसा चित्तविकार हो रहा है । जैसा कि—

मर्यादाको लांघनेवाले अत एव क्षुभित शोककी वृद्धिको रोकनेके लिए जो जो यत्न किसी

यो यो यत्नः कथमपि समाधीयते[1] तं तमन्तः ।
हित्वा भित्त्वा प्रसरति बलात्कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ ३६ ॥

सीता—अज्जउत्तस्स एदिणा दुव्वारदारुणारम्भेण दुःखसंजोएण परिमुसिअणिअदुःखं पमुक्कजीविअं मे हिअअं फुडइ। (आर्यपुत्रस्यैतेन दुर्वारदारुणारम्भेण दुःखसंयोगेन परिमुषितनिजदुःखं प्रमुक्तजीवितं मे हृदयं स्फुटति ।)

कथमपि समाधीयते, तं तं कोऽपि चेतोविकारः अप्रतिहतरयः तोयस्य ओघः सैकतं सेतुमिव अन्तः बलात् हित्वा भित्त्वा प्रसरति इत्यन्वयः। वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थम्=वेलायाः=मर्यादायाः, उल्लोलः=उद्गतः, क्वचिद् 'वेला'-स्थाने **'लोल'** पदस्य पाठस्तत्र लोलाः = चञ्चलाः, उल्लोलाः = महातरङ्गाः, यस्य स इत्यर्थः; क्षुभितः = क्षोभं प्राप्तः, यः करुणः = शोकः, तस्य उज्जृम्भणम् = अभिवृद्धिः, तत्स्तम्भनार्थम् = तन्निवारणार्थम् , यो यो यत्नः = यो यः प्रयासः, कथमपि = केनाऽपि प्रकारेण, समाधीयते = उत्पाद्यते, तं तं = यत्नं, कोऽपि = अनिर्वचनीयः, चेतोविकारः = मनोविकृतिः, अप्रतिहतरयः = अप्रतिरुद्धवेगः, तोयस्य = जलस्य, ओघः = प्रवाहः, सैकतम् = बालुकामयम् , सेतुमिव=आलिमिव, अन्तः = मध्ये, आधानस्तम्भनयोर्मध्य इत्यर्थः। बलात् = हठात् , हित्वा = गत्वा, भित्त्वा = भेदं कृत्वा, क्वचित् **'भित्त्वा भित्त्वा'** इति पाठः। प्रसरति = प्रसारं करोति, समुद्रस्येव मदीयशोकस्य स्तम्भनमशक्यमिति भावः। **अत्रोपमाऽलङ्कारः। मन्दाक्रान्ता वृत्तम्** ॥ ३६ ॥

सीतेति । एतेन = पुरोदृश्यमानेन, दुर्वारदारुणारम्भेण = दुर्वारः=दुर्निवर्त्यः, चाऽसौ दारुणः = कठोरः, एतादृशः आरम्भः = उपक्रमः, यस्य तेन, एतादृशेन दुःखसंयोगेन। क्वचित् **'दुःखसंक्षोभेण'** इति पाठान्तरं, तस्य कष्टचाञ्चल्येनेत्यर्थः। प्रमुक्तजीवितम् = प्रमुक्तं = त्यक्तम् , जीवितं = जीवनं येन तत् , इत्यादिपदा-

तरहसे किया जाता है, उस २ यत्नको अनिर्वचनीय चित्तका विकार-नहीं रोके जानेवाले वेगसे युक्त जलप्रवाह जैसे बालूके पुलको तोड़कर फैलता है; उसी तरह बीचमें बलसे जाकर और भेदन कर फैलता है ॥ ३६ ॥

सीता—आर्यपुत्रके इस दुर्निवार्य और कठोर आरम्भवाले दुःखसंयोगसे जीवनको त्याग कर जैसे अपहृत निजदुःखवाला मेरा हृदय विदीर्ण होता है।

१. 'समाऽऽधीयते' इति पाठान्तरम्।

वासन्ती—(स्वागतम्) कष्टमत्यासक्तो देवः । तदाक्षिपामि तावत् । (प्रकाशम्)चिरपरिचितानिदानींजनस्थानभागानवलोकनेन मानयतु देवः।
रामः—एवमस्तु (इत्युत्थाय परिक्रामति ।)
सीता—संदीवण एव्व दुःखस्स पिअसहीए विणोदणोवाओत्ति तक्केमि । (संदीपन एव दुःखस्य प्रियसख्या विनोदनोपाय इति तर्कयामि ।)
वासन्ती—देव देव !

ऽभावेनाऽत्र प्रतीयमानोत्प्रेक्षा । अत एव—परिमुषितनिजदुःखम् = परिमुषितम् = अपहृतम् , निजम् = आत्मीयम् , दुःखं यस्य तत् । क्वचित्परिमुषितस्थाने **'प्रस्फुटितमि'**ति पाठस्तस्य प्रस्फुटितं = दलितं, प्रकाशितमित्यर्थः । क्वचित् 'स्फुटितमि'ति पदं नाऽस्ति **'आकम्पितं मे हृदयम्'** इत्यस्ति ।

वासन्तीति । अत्यासक्तः = अतिशयासक्तियुक्तः, सीतायामिति शेषः । क्वचित् **'अभ्यापन्न'** इति पाठस्तस्य अभित आपन्नः इत्यर्थः, 'आपन्न आपत्प्राप्तः स्यात्' इत्यमरः । आक्षिपामि = आक्षेपं करोमि, अन्यत्र नयामीति भावः । जनस्थानभागान् = दण्डकारण्यांऽशप्रदेशान् , मानयतु = सत्करोतु, क्वचित् **'आत्मानमानन्दयतु'** इति पाठस्तत्र—आत्मानं = स्वम् , आनन्दयतु = साऽऽनन्दं करोतु ।

राम इति । एवम् = इदं भवत्योक्तं जनस्थानभागाऽवलोकनम् , अस्तु = भवतु । परिक्रामति = परितश्चलति ।

सीतेति । दुःखस्य = व्यथायाः, मानस्या इति शेषः । सन्दीपने = उद्दीपने, एव प्रियसख्याः = वासन्त्याः, विनोदनोपायः = चित्ताह्लादनहेतुः, अस्तीति शेषः । तर्कयामि = जानामि, क्वचित् **'मन्यते'** इति पाठस्तत्र मयेति शेषः ।

वासन्ती—(मनही मन) कष्ट है, महाराज बहुत ही आसक्त हो गये हैं । इसलिए इनके चित्तको दूसरी ओर ले जाती हूं । (सुनाकर) महाराज ! अब चिरकालसे परिचित दण्डकारण्यके प्रदेशोंको देखकर सम्मानित करें ।

राम – ऐसा ही हो । (ऐसा कहकर चलते हैं ।)

सीता—'दुःखके उद्दीपनमें ही प्रियसखीका दिल बहलानेका उपाय है' मैं ऐसा विचार करती हूँ ।

वासन्ती—महाराज ! महाराज !!

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद् गोदावरीसैकते[1]।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥ ३७ ॥

अस्मिन्निति । अस्मिन्नेव लतागृहे त्वं तन्मार्गदत्तेक्षणः अभवः । सा हंसैः कृतकौतुका गोदावरीसैकते चिरम् अभूत । आयान्त्या तया त्वां परिदुर्मनायितम् इव वीक्ष्य कातर्यात् अरविन्दकुड्मलनिभो मुग्धः प्रणामाऽञ्जलिः विहित इत्यन्वयः ! अस्मिन्नेव = अङ्गुलिसन्निकृष्ट एव, लतागृहे = निकुञ्जे, त्वं = रामः, तन्मार्गदत्तेक्षणः = तस्याः = सीतायाः, मार्गे = आगमनवर्त्मनि, दत्ते = वितीर्णे, ईक्षणे = नेत्रे येन सः, अभवः = अतिष्ठः, नियतसमयेऽपि सीताया आगमनाऽभावेन औत्सुक्येन तदागमनापेक्षी आसीरिति भावः । सा = सीता, हंसैः=चक्राङ्गैः, 'हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ।' इत्यमरः, कृतकौतुका = कृतम्=उत्पादितम् , कौतुकं = कुतूहलम् , यस्याः सा एतादृशी सती, गोदावरीसैकते = गोदावरीतटे, चिरं = बहुकालं यावत् , अभूत = आसीत् , हंसकेलिविलोकनकुतूहलेन सीतया चिरकालं यावत्तत्रैव स्थितमिति भावः । अनन्तरमायान्त्या = समीपमागच्छन्त्या, तया = सीतया, त्वां = भवन्तं, परिदुर्मनायितमिव = चिन्तितचेतसमिव, परितोऽदुर्मना दुर्मना इव आचरति तथाभूतं परिदुर्मनायितमिव, दुर्मनःशब्दात् 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हल' इति क्यङि सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घत्वे तदन्तात् 'क्त' प्रत्यय इडागमे च रूपम् , 'दुर्मना विमनाः' इत्यमरः । वीक्ष्य=दृष्ट्वा, कातर्यात्=भवद्दौर्मनस्यसम्भावनाजनितात् त्रासात, अरविन्दकुड्मलनिभः = कमलमुकुलसदृशः, अत एव मुग्धः = सुन्दरः, प्रणामाऽञ्जलिः = नमस्कारसूचकः करपुटः, बद्धः = विहितः । अत्रोपमाऽलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ३७ ॥

इसी लतागृहमें आप सीताके आगमन-मार्गमें दृष्टि लगाये हुए थे, और सीता हंसोंसे कौतुक कर गोदावरीके तटमें बहुत कालतक रुकी रहीं। आती हुई सीताने आपको चिन्तित-चित्तकी तरह देखकर कातरतासे कमलके मुकुलकी तरह सुन्दर प्रणामाञ्जलिको बांध लिया ॥ ३७ ॥

१. 'रोधसि' इति पाठान्तरम् ।

सीता—दालुणासि वासन्ति ! दालुणासि । जा एदेहिं हिअअमम्मुग्घाडिअसल्लसंघट्टनेहिं पुणोपुणोवि मं मन्दभाइणिं अज्जउत्तं अ सुमरावेसि ।
(दारुणासि वासन्ति ! दारुणासि । या एतैर्हृदयमर्मोद्घाटितशल्यसंघट्टनैः पुनः पुनरपि मां मन्दभागिनीमार्यपुत्रं च स्मरयसि ।)

रामः—अयि चण्डि जानकि ! इतस्ततो दृश्यसे, नानुकम्पसे !
हा हा देवि ! स्फुटति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि ।

सीतेति । हृदयमर्मोद्घाटितशल्यसंघट्टनैः = हृदयम् = वक्षःस्थलम् , एव मर्म = सन्धिस्थानम् , तस्मात् उद्घाटितम्=निष्कासितम् , यत् शल्यम्=कीलकम् , तस्य संघट्टनैः = संयोजनैः, भूयोभूयः प्राक्तनशोकवृत्तकथनैरिति भावः । पुस्तकान्तरे तु **'हृदयमर्मगूढशल्यघट्टनैः'** इति पाठस्तस्य—हृदयमर्मणि गूढं = गुप्तम् , यत् शल्यं = शोकशङ्कुरूपम् , तस्य घट्टनैः = चालनैः, **'सदृशैः'** इति पाठे तत्तुल्यैरित्यर्थः । 'स्मरयसि' इत्यस्य स्थाने **'दावयसि'** इति क्वाचित्कः पाठस्तस्य सन्तापयसि इत्यर्थः; 'टुदु उपतापे' इति धातोर्णिचि लटि रूपम् ।

राम इति । चण्डि = अत्यन्तकोपने !, 'चण्डस्त्वत्यन्तकोपने' इत्यमरः । दृश्यसे = अवलोक्यसे, न अनुकम्पसे = नो दयसे, रामस्य निरन्तरं सीताऽनुध्यानाद् भ्रान्तिवशात् 'दृश्यसे' इति कथनं बोध्यम् ।

हाहेति । हा हा देवि ! हृदयं स्फुटति । देहबन्धो ध्वंसते । जगत् शून्यं मन्ये । अतः अविरलज्वालं ज्वलामि । सीदन् विधुरः अन्तरात्मा अन्धे तमसि मज्जति इव । मोहो विष्वक् स्थगयति । मन्दभाग्यः कथं करोमि ? इत्यन्वयः । हा हा = शोकाऽतिशयद्योतकोऽयं शब्दः, देवि = सीते ! हृदयम् = उरः, स्फुटति = विदीर्यते, देहबन्धः = शरीराऽवयवानां सन्धिः 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति जातावेकवचनम् , ध्वंसते = शिथिलो भवति, जगत् =

सीता—कठोर हो वासन्ति ! तुम कठोर हो । जो इन हृदयरूप संधिस्थानोंसे निकाली-गई इन कीलोंको संयुक्त कर बार बार आर्यपुत्रको मुझ मन्दभागिनी की याद दिला रही हो ।
राम—अतिशय कोप करनेवाली हे सीते ! इधर उधर दिखाई देती हो, पर दया नहीं करती ।

हाय हाय ! देवि ! हृदय विदीर्ण होता है, शरीरका सन्धिबन्धन शिथिल पड़ रहा है, लोकको शून्य समझ रहा हूँ, शरीरके भीतर अविच्छिन्न तापसे जल रहा हूं, अवसन्न होकर

सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ? ॥

(इति मूर्च्छति ।)

सीता—हद्धी हद्धी ! पुणोवि मुद्धो अज्जउत्तो । (हा धिक्, हा धिक् ! पुनरपि मूढ आर्यपुत्रः ।)

वासन्ती—देव ! समाश्वसिहि समाश्वसिहि ।

सीता—अज्जउत्त ! मं मन्दभाइणिं उद्दिसिअ सअलजीवलोअमङ्गलिअजम्मलाहस्स दे वारंवारं संसइदजीविअदालुणो दशापरिणामो त्ति हा ? हदह्मि । (इति मूर्च्छति) (आर्यपुत्र ! मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमाङ्गलिकजन्मलाभस्य ते वारंवारं संशयितजीवितदारुणो दशापरिणाम इति हा ! हतास्मि)

लोकम्, शून्यम् = सकलप्राणिरहितम्, मन्ये = जानामि, अन्तः=शरीराऽभ्यन्तरे, अविरलज्वालम् = अविरलाः = अविच्छिन्नाः, ज्वालाः = तापाः, यस्मिन्कर्मणि तद्यथा तथेति क्रियाविशेषणम् । 'अविरतज्वालम्' इति पाठे—अविरताः = अविश्रान्ता इत्यर्थः । ज्वलामि=दीप्ये इत्यर्थः । सीदन्=अवसन्नो भवन्, विधुरः= प्रियारहितः, अन्तरात्मा = शरीराऽभ्यन्तरस्थः पुरुषः, अन्धे तमसि=गाढान्धकारे, मज्जति इव = मग्नो भवति इव, मोहः = मूर्च्छा, विष्वक् = परितः, स्थगयति = छादयति, मन्दभाग्यः=अल्पभाग्यः, अहं राम इति शेषः, कथं करोमि=किमाचरामीत्यर्थः । अस्य सीताविरहजन्यदुःखातिशयस्य कमपि निवारणोपायं न पश्यामि इति भावः । उत्प्रेक्षाऽलङ्कारः । मन्दाक्रान्ता वृत्तम् ॥ ३८ ॥

सीतेति । मूढः = मोहमुपगतः ।

सीतेति । सकलजीवलोकमाङ्गलिकजन्मलाभस्य=मङ्गलेन निर्वृत्तो माङ्गलिकः, 'तेन निर्वृत्तम्' इति ठञ्, सकलजीवलोकानां = सर्वप्राणिसमूहानाम्,

प्रियरहित अन्तरात्मा मानों गाढ अन्धकारमें डूब रहा है, मूर्च्छा चारों तरफ आवरण कर रही है; मन्दभाग्यवाला मैं क्या करूँ ? ॥ ३८ ॥

(ऐसा कहकर मूर्च्छित होते हैं ।)

सीता—हाय ! धिक्कार है, हाय ! धिक्कार है । आर्यपुत्र फिर भी मूर्च्छित हो गये हैं ।

वासन्ती—महाराज ! आश्वस्त हों, आश्वस्त हों ।

सीता—आर्यपुत्र ! आपका जन्मलाभ सम्पूर्ण जीवोंके मङ्गलके लिए हुआ है । तथापि मुझ अभागिनीको उद्देश्य कर आपका जीवन संशययुक्त होनेसे भयङ्कर अवस्थाका परिणाम

तमसा—वत्से ! समाश्वसिहि समाश्वसिहि । पुनस्ते पाणिस्पर्शो रामभद्रस्य जीवनोपायः ।

वासन्ती—कथमद्यापि नोच्छ्वसिति ? हा प्रियसखि सीते ! क्वासि ? सम्भावयात्मनो जीवितेश्वरम् ।

(सीता ससम्भ्रममुपसृत्य हृदि ललाटे च स्पृशति ।)

वासन्ती—दिष्ट्या प्रत्यापन्न-चेतनो रामभद्रः ।

रामः—

आलिम्पन्नमृतमयैरिव प्रलेपैरन्तर्वा बहिरपि वा शरीरधातून् ।

माङ्गलिको जन्मलाभो यस्य तस्य । क्वचित् **'सकलजीवलोकमङ्गलाधारस्य'** इति पाठः । वारं वारं = भूयो भूयः, संशयितजीवितदारुणः = संशयितम् = सन्देहविषयभूतम् , जीवितम् = जीवनम्, यस्मिन्सः, अत एव दारुणः = भयङ्करः, दशापरिणामः = अवस्थापरिपाकः ।

तमसेति । जीवनोपायः = जीवनस्य = चैतन्याधानस्य, उपायः = यत्नः ।

वासन्तीति । न उच्छ्वसिति = चैतन्यं नाऽऽप्नोति, आत्मनः = स्वस्य, जीवितेश्वरं = प्राणेशं, राममित्यर्थः, सम्भावय = सम्भावितं कुरु ।

वासन्तीति । दिष्ट्या = भाग्येन । प्रत्यापन्नचेतनः=प्रत्यापन्ना=पुनरागता, चेतना = संज्ञा यस्य सः ।

आलिम्पन्निति । अमृतमयैः प्रलेपैः अन्तर्वा बहिरपि वा शरीरधातून् आलिम्पन्निव जीवयन् अकस्मात् संस्पर्शः पुनरपि आनन्दात् अपरं मोहम् आदधाति इवेत्यन्वयः । अमृतमयैः = पीयूषस्वरूपैः, 'चिन्मयमि'त्यादादिव स्वार्थिको मयट्प्रत्ययः । प्रलेपैः = प्रकृष्टो लेपो यैस्तैः = लेपसाधनद्रव्यैरित्यर्थः ।

हो रहा है, हाय ! मैं हतप्राय हो रही हूँ । (ऐसा कह कर मूर्च्छित होती हैं ।)

तमसा—वत्से ! आश्वस्त हो, आश्वस्त हो । फिर तुम्हारे हाथका स्पर्श रामभद्रको होशमें लानेका उपाय है ।

वासन्ती - अभी तक भी क्यों होशमें नहीं आ रहे हैं ? हा प्रियसखि सीते ! तुम कहाँ हो ? अपने जीवनेश्वरको सम्भावित करो ।

(सीता जल्दीसे निकट जाकर हृदय और ललाटपर स्पर्श करती है ।)

वासन्ती—भाग्यसे रामभद्र फिर होशमें आ गये हैं ।

राम—अमृतस्वरूप लेपसाधन द्रव्योंसे भीतर अथवा बाहर रहनेवाले शरीर और

संस्पर्शः पुनरपि जीवयन्नकस्मादानन्दादपरमिवादधाति मोहम् ॥३९॥

(सानन्दं निमीलिताक्ष एव ।) सखि वासन्ति ! दिष्ट्या वर्धसे ।

वासन्ती—कथमिव ?

रामः—सखि ! किमन्यत् । पुनरपि प्राप्ता जानकी ।

वासन्ती—अयि देव रामभद्र ! क सा ?

रामः—(स्पर्शसुखमभिनीय ।) पश्य, नन्वियं पुरत एव ।

वासन्ती—अयि देव रामभद्र ! किमिति मर्मच्छेददारुणैरतिप्रलापैः प्रियसखीविपत्तिदुःखदग्धामपि मां पुनर्मन्दभाग्यां दहसि ?

अन्तर्वा = मध्ये स्थितान् वा, बहिरपि वा = बहिः स्थितान् वा, शरीरधातून् = शरीरं च धातवश्च, तान् = कायं त्वगादिधातूंश्चेत्यर्थः, आलिम्पन्निव = सर्वतो लिप्तान् कुर्वन्निव, जीवयन् = प्राणप्रतिष्ठामापादयन्, अकस्मात् = सहसा, जानकीदर्शनाऽभावेन निर्हेतुक इति भावः। संस्पर्शः=आमर्शनं, पुनरपि=भूयोऽपि, आनन्दात् = आनन्दमुत्पाद्य, 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी। अपरम्=अन्यं, यद्वा न परम् अपरमनन्यमित्यर्थः। सीताविषयकं प्रागनुभूतमेवेति भावः। मोहं = दुःखहेतुभिन्नमपरां मूर्च्छामिति भावः, आदधाति इव = उत्पादयति इव। अत्र **क्रियोत्प्रेक्षा। प्रहर्षिणी** वृत्तम् ॥ ३९ ॥

सानन्दमिति। सानन्दम् = आनन्देन सहितं यथा तथा। निमीलिते = मुकुलिते, अक्षिणी = नेत्रे यस्य स इत्यर्थः।

वासन्तीति। मर्मच्छेददारुणैः = मर्मच्छेदाः = हृदयाद्यवयवक्षतयः, इव दारुणाः = कठोराः, तैः, अतिप्रलापैः = अतिशयाऽनर्थकवचोभिः, सीताया अभावेऽपि सीताप्राप्तिकथनस्य मिथ्याभूतत्वादिति भावः, प्रियसखीविपत्तिदुःख-

---

धातुओंको लिप्त करते हुएकी तरह होशमें लाता हुआ अतर्कित रूपसे हुआ यह स्पर्श फिर भी आनन्दको पैदाकर मानो दूसरी तरहकी मूर्च्छाको पैदा कर रहा है ॥ ३९ ॥

(आनन्दके साथ आँखोंको बन्द किये हुए ही॰ सखि वासन्ती ! भाग्यसे बढ़ रही हो।

वासन्ती—कैसे ?

राम- सखि ! और क्या ? फिर भी सीता मिल गई हैं।

वासन्ती– हे महाराज रामभद्र ! वे कहां हैं ?

राम—(स्पर्शके सुख का अभिनय करके। देखो, वह सामने ही तो हैं।

वासन्ती– हे महाराज रामभद्र ! हृदय आदि मर्मस्थलोंके छेदनकी तरह कठोर अतिशय प्रलापोंसे प्रियसखीकी आपत्तिकी पीडासे जली हुई मुझ मन्दभागिनीको बारबार क्यों जलाते हैं ?

सीता—ओसरिदुं इच्छम्मि । एसो उण चिरप्पणअसंभारसोम्मसीअलेण अज्जउत्तप्परिसेण दीहदारुणं वि मत्ति संदावं उल्लाहअन्तेण वज्जलेहावणद्धो विअ परिअद्धवावारो आसंजिओ विअ मे अग्गहत्थो। (अपसर्तुमिच्छामि । एष पुनः चिरप्रणयसम्भारसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि झटिति सन्तापमुल्लाघयता वज्रलेपोपनद्ध इव पर्यस्तव्यापार आसञ्जित इव मेऽग्रहस्तः ।)

रामः—सखि ! कुतः प्रलापः ?

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधरः

दग्धाम् = प्रियसख्याः = सीतायाः, विपत्या = विपदा, यद् दुःखं = कष्टम् , तेन दग्धाम् = सन्तप्ताम् , मां = वासन्तीम् ।

सीतेति । अपसर्तुम् = दूरं गन्तुम् , चिरप्रणयसंभारसौम्यशीतलेन = चिरप्रणयस्य=बहुकालप्रेम्णः, संभारेण = समूहेन, सौम्यः=आह्लादकरः, तथा शीतलः= शीतः, संतापाऽपहारक इति भावः, तेन **'चिरसद्भावसौम्यशीतलेने'**ति पाठान्तरम् , तत्र—चिरं = बहुकालम् , सद्भावः = उत्तमाऽभिप्रायः, अनुरागरूप इति भावः । दीर्घदारुणमपि = दीर्घः = आयतः, निरवधिरिति भावः, अत एव दारुणः= भयङ्करस्तम् । उल्लाघयता = लघूकुर्वता, **'हरता'** इति पाठान्तरं, तत्र सुगमोऽर्थः । वज्रलेपोपनद्धः = वज्रलेपेन = दृढलेपविशेषेण, उपनद्धः = बद्धः, पर्यस्तव्यापारः = पर्यस्तः = अपगतः, व्यापारः = क्रिया यस्य सः, निष्पन्द इत्यर्थः । अग्रहस्तः = हस्ताऽग्रभागः, आसञ्जित इव = लग्न इव, वर्तते इति शेषः । 'वज्रलेपोपनद्ध इव' अत उत्तरं **'स्विद्यन्निःसहविपर्यस्तो वेपते अवश इव मे हस्त'** इति पुस्तकान्तरस्थः पाठस्तत्र-स्विद्यन् = स्वेदयुक्तो भवन्, निःसहविपर्यस्तः = निःसहम् = असमर्थः, यथा तथा विपर्यस्तः = पतितः, शिष्टं सुगमम् , इत्यर्थः ।

राम इति । 'अतिप्रलापैः' इति वासन्तीवाक्यस्योत्तरमाह—**सखीति ।**

गृहीत इति । पूर्वं परिणयविधौ कङ्कणधरो यो गृहीतः, सुधासूतेः अमृत·

सीता—मैं दूर होना चाहती हूं । क्योंकि बहुत समयके प्रेमके समूहसे हर्ष करनेवाला और ठण्डा, दीर्घ और दारुण सन्तापको भी कम करनेवाला जो आर्यपुत्रका स्पर्श है, उससे वज्रलेपसे बँधे हुएकी तरह निश्चेष्ट होकर मेरे हाथका अग्रभाग जैसे आर्यपुत्रमें जुड़ गया है ।

राम—सखि ! प्रलाप,कहाँ ?

मैंने पहले विवाहकी विधिमें कङ्कणधारी जिस हाथको पकड़ा था और चन्द्रके अमृतके

सुधासूतेः पादैरमृतशिशिरैर्यः परिचितः ।

सीता—अज्जउत्त ! सो एव्व दाणिं सि तुमम् ? (आर्यपुत्र ! स एवेदानीमसि त्वम्)

रामः—

स एवायं तस्यास्तदितरकरौपम्यसुभगो

शिशिरैः पादैः यः परिचित इति **पूर्वार्द्धान्वयः** । पूर्वं = प्राक् , परिणयविधौ = विवाहविधौ, कङ्कणधरः = विवाहसूत्रधारकः, यः = करः, गृहीतः = स्वीकृतः, सुधासूतेः = सुधायाः = अमृतस्य, सूतिः = उत्पत्तिः यस्मात्तस्य = चन्द्रमस इत्यर्थः, अमृतशिशिरैः = पीयूषशीतलैः पादैः = किरणैः 'पादा रश्म्यङ्घ्रितुर्यांऽशा' इत्यमरः, यः = करः, परिचितः=संश्लिष्टः, आसीदिति शेषः, 'सुधासूतेः पादैः' इत्यत्र '**चिरं स्वेच्छास्पर्शैः**' इति क्वाचित्कः पाठस्तत्र—चिरम् = बहुकालं यावत् , स्वेच्छास्पर्शैः = निजवाञ्छाकालोपनतैः आमर्शनैरित्यर्थः ।

रामेण सीतापाणेर्यानि विशेषणानि प्रतिपादितानि तान्येव रामपरकत्वेन संभाव्य सीता कथयति—**अज्जउत्तेत्यादि** । स एव=परिणयविधौ कङ्कणधरो मया गृहीतः, सुधासूतेः अमृतशिशिरैः पादैः यः परिचितः स एव भवान् , न मनागप्यन्तरं जातमिति भावः ।

स एवेति । ललितलवलीकन्दलनिभः तदितरकरौपम्यसुभगः स एवाऽयं तस्याः पाणिः मया लब्ध **इत्युत्तरार्द्धान्वयः** । ललितलवलीकन्दलनिभः = ललितम् = सुकुमारम् , यत् लवलीकन्दलम् = लवलीलताङ्कुरः, तेन सदृशः = तुल्यः, ललितलवलीकन्दलनिभः, 'निभसंकाशनीकाशप्रतीकाशोपमादयः' इत्यमरः । तदितरकरौपम्यसुभगः = तदितरकरेण = गृहीताऽपरहस्तेन, यत् औपम्यम्=सादृश्यम् , तेन सुभगः = सुन्दरः, वामकरसादृश्यं दक्षिणकरस्य तथा दक्षिणकरसादृश्यं सव्यकरस्य, तथा सीताकरद्वयसादृश्यं जनान्तरकरैः सह नास्तीति व्यतिरेको ध्वन्यते । स एवाऽयम् = प्राग्गृहीत एवाऽयम् , तस्याः = सीतायाः,

तुल्य किरणोंसे जो परिचित था ।

सीता—आर्यपुत्र ! अभी भी आप वही हैं ।

राम—सुन्दर लवलीके अङ्कुरकी तरह उनके दूसरे हाथकी उपमासे सुन्दर वही सीताका

मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥ ४० ॥

(इति गृह्णाति ।)

सीता—हद्धी हद्धी ! अज्जउत्तप्परिसमोहिदाए पमादो मे संवुत्तो ।
(हा धिक् हा धिक् ! आर्यपुत्रस्पर्शमोहितायाः प्रमादो मे संवृत्तः ।)

रामः—सखि वासन्ति ! आनन्दमीलितः प्रियास्पर्शसाध्वसेन परवानस्मि । तत्त्वमपि धारय माम् ।

पाणिः = करः, मया=रामेण, लब्धः = आसादितः, न तु अन्यदीय इति भावः । तदितरेत्यत्र **'तुहिनकरकौपम्यसुभग'** इति पाठान्तरं तत्र=तुहिनानाम्=हिमानाम् , करकाणाम् = वर्षोपलानाम् , औपम्यम् = तुल्यत्वम् , तेन सुभगः=सुन्दरः इत्यर्थः, 'वर्षोपलस्तु करका' इत्यमरः । अत्र पूर्वार्द्धेऽर्थश्लेषाऽलङ्कार उत्तरार्द्धे **उपमा** तथा च द्वयोरङ्गाङ्गिभावेन **सङ्करः** । **शिखरिणी** वृत्तम् ॥ ४० ॥

सीतेति । आर्यपुत्रस्पर्शमोहितायाः = आर्यपुत्रस्पर्शेन मोहितायाः, ततः कर्तव्याऽकर्तव्यविवेकशून्याया इति यावत् , प्रमादः = अनवधानता, संवृत्तः = सञ्जातः ।

राम इति । आनन्दमीलितः = आनन्देन = सुखेन, मीलितः = मुद्रितलोचनः **'आनन्दनिमीलितेन्द्रिय'** इति पाठे-आनन्देन = स्पर्शजन्यसुखेन, निमीलितानि = मुद्रितानि, स्वस्वकार्याऽसमर्थानीति भावः, इन्द्रियाणि = हस्तपादादीनि यस्य स इत्यर्थः । प्रियास्पर्शसाध्वसेन=प्रियायाः = सीतायाः, स्पर्शेन = आमर्शनेन, यत् साध्वसम् = शृङ्गारजन्यं भयम् , तेन परवान् = पराधीनः, 'परतन्त्रः पराधीनः परवान्नाथवानपि ।' इत्यमरः । तत्=तस्माद्धेतोः, त्वमपि=भवती वासन्त्यपि, मां = रामम् , धारय = गृहाण, यस्मादप्रत्याशितानन्दातिशयप्राप्तैर्मूर्च्छितो भूत्वा न पतेयमिति भावः । पुस्तकान्तरे तु **'एनां धारये'**ति पाठस्तत्र—एनाम्=सीताम् , धारय = गृहाण, येनेयं पलायितुं न शक्नुयादिति भावः ।

हाथ मैंने पाया है ॥ ४० ॥

(ऐसा कहकर पकड़ते हैं ।)

सीता—हा धिक् ! हा धिक् ! आर्यपुत्रके स्पर्शसे मोहित होनेके कारण मुझसे गलती हो गई ।

राम—सखि ! वासन्ति ! आनन्दसे आँखें मूँदकर भी प्रियाके स्पर्शसे शृङ्गारजन्य भयके कारण पराधीन हूँ । इस कारणसे तुम भी मुझको पकड़ो । (जिससे कि मैं गिर न पड़ूँ ।)

वासन्ती—कष्टमुन्माद एव ।

(सीता ससंभ्रमं हस्तमाक्षिप्यापसर्पति ।)

रामः—धिक् ! प्रमादः ।

करपल्लवः स तस्याः सहसैव जडो जडात्परिभ्रष्टः ।
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन् ॥ ४१ ॥

वासन्तीति । उन्मादः = चित्तविभ्रमः, सीताप्राप्तिसूचकरामवाक्याकर्णनोत्तरं सीताया अदर्शनाद्वासन्ती रामस्योन्मादं विचार्य कथयतीदं वाक्यमिति बोध्यम् ।

सीतेति । ससम्भ्रमम् = सत्वरम्, हस्तम् = रामकरम्, आक्षिप्य=निरस्य, अपसर्पति = दूरं गच्छति ।

रामः स्वस्याऽनवधानतां समर्थयति--**करपल्लव इति** । जडः प्रकम्पी स्विद्यन् तस्याः स करपल्लवो जडात् परिकम्पिनः स्विद्यतो मम करात् सहसा एव परिभ्रष्ट इत्यन्वयः । जडः = स्तब्धः, प्रकम्पी = कम्पयुक्तः, स्विद्यन् = स्वेदयुक्तो भवन्, अत्र करनिष्ठ अवस्थात्रयेऽपि हेतुः प्रियस्पर्शो बोध्यः, तथा चात्र उभयोरपि सात्त्विकभावोदयः सूच्यते ; एतादृशः तस्याः = सीतायाः, सः = प्रागसकृद् गृहीतः, करपल्लवः = पाणिकिसलयम्, जडात् = स्तब्धात्, परिकम्पिनः = कम्पयुक्तात्, स्विद्यतः = स्वेदयुक्तात्, मम = रामस्य, करात् = हस्तात्, सहसा एव=अतर्कित एव, परिभ्रष्टः = परिच्युतः, अभूदिति शेषः । अत्र **काव्यलिङ्गोपमयोः सङ्करः** । एवं सीतारामयोरुभयोरपि मिथःस्पर्शसंभूतस्तम्भादिसात्त्विकभाववर्णनात् पोषितो रत्याख्यः स्थायिभावः शृङ्गाररसतां प्राप्त इति रसप्राधान्येन ध्वनिरयम् । **अत्रार्या** छन्दः, तल्लक्षणं यथा वृत्तरत्नाकरे-'लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः । षष्ठोऽयं नलघुर्वा प्रथमेऽर्द्धे नियतमार्यायाः ॥ षष्ठे द्वितीयलात्परके न्ले मुखलाच सयतिपदनियमः । चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः' इति ॥ ४१ ॥

वासन्ती—कष्ट है, यह पागलपन ही है ।

(सीता जल्दीके साथ हाथ खींचकर दूर होती हैं ।)

राम—धिक्कार है, गलती हो गई ।

स्तब्ध, कम्पयुक्त और पसीजता हुआ पल्लवके तुल्य सीताका वह हाथ, उसी तरह स्तब्ध, काँपते हुए और पसीजते हुए मेरे हाथसे अकस्मात् ही छूट गया है ॥ ४१ ॥

सीता—हद्धी हद्धी ! अज्जवि अणुबद्धबहुघुम्मन्तवेअणं ण संठावेमि अत्ताणम् । (हा धिक् हा धिक् ! अद्याप्यनुबद्धबहुघूर्णमानवेदनं न संस्थापयाम्यात्मानम् ।)

तमसा—(स्नेहकौतुकस्मितं निर्वर्ण्य ।)

सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःपरिधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव ॥

सीतेति । अनुबद्धबहुघूर्णमानवेदनम् = अनुबद्धा (उत्पन्ना) बह्वी (अधिका) घूर्णमाना (उद्गच्छन्ती), वेदना (दुःखं) यस्य तम् । आत्मानम् = स्वम् , न संस्थापयामि = न स्थिरं करोमि, पुस्तकान्तरे तु 'अनवस्थितस्तिमितमूढघूर्णमाननयनः' इति पाठस्तत्र—अनवस्थिते = करपरिभ्रंशेन हेतुना अस्थिरे, स्तिमिते = इष्टाऽप्राप्त्या बाष्पार्द्रे, मूढे = मत्स्थित्यज्ञानेन व्यापाररहिते, घूर्णमाने = मद्दर्शनाशया इतस्ततः प्रचलती, नयने = नेत्रे, यस्य स इति रामविशेषणम् , 'आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ।' इत्यमरः, एतादृशो रामः आत्मानम् = स्वम् , न पर्यवस्थापयति = प्रकृतिस्थं न करोतीत्यर्थः ।

सस्वेदेति । वत्सा प्रियस्पर्शसुखेन मरुन्नवाऽम्भःपरिधूतसिक्ता स्फुटकोरका कदम्बयष्टिरिव सस्वेदरोमाञ्चितकम्पिताऽङ्गी जाता इत्यन्वयः । वत्सा=सीता, सीता तमसायाः स्नेहाऽनुबन्धेन पुत्रीसमा, तत् 'वत्सेति' कथनं संगच्छते । प्रियस्पर्शसुखेन = प्रियस्य (वल्लभस्य, रामस्येत्यर्थः), स्पर्शसुखेन (आमर्शनानन्देन) । मरुन्नवाम्भःपरिधूतसिक्ता=मरुता=वायुना, नवाऽम्भसा = नूतनजलेन, प्राथमिकवृष्टिजलेनेति भावः, यथाक्रमं परिधूता = परिकम्पिता, सिक्ता = उक्षिता च, स्फुटकोरका = प्रफुल्लकलिका, 'कलिका कोरकः पुमान्' इत्यमरः, कदम्बयष्टिरिव = कदम्बशाखेव, सस्वेदरोमाञ्चितकम्पिताऽङ्गी = रोमाञ्चाः संजाता येषां तानि रोमाञ्चितानि, 'तदस्य संजातं तारकादिभ्य इतच्' इतीतच्प्रत्ययः । सस्वेदानि = घर्मयुक्तानि, रोमाञ्चितानि = पुलकितानि, कम्पतानि = वेपथुयुक्तानि, अङ्गानि =

सीता—हा धिक् ! हा धिक् ! अभी तक अतिशय वेदनासे युक्त अपनेको स्थिर नहीं कर सकी हूँ ।

तमसा—(प्रेम, कौतुक और मुस्कराहटके साथ देखकर)

सीता पतिके स्पर्शके सुखसे वायुसे कम्पित और नये जलसे सींची गई विकसित कलियों से युक्त कदम्बकी डालकी तरह स्वेद, रोमाञ्च और कम्पसे युक्त अङ्गोंसे सम्पन्न हो गई है ॥

---

१. 'प्रविधूत—' इति पाठान्तरम् ।

सीता—(स्वागतम्) अवसेन एदेण अत्ताणएण लज्जाविदह्मि भअवदीए तमसाए। किंति किल एसा मण्णिस्सदि-'एसो परिच्चाओ, एसो अहिसङ्गो'त्ति। (अवशेनैतेनात्मना लज्जापितास्मि भगवत्या तमसया। किमिति किलैषा मंस्यत 'एष परित्याग एषोऽभिषङ्ग' इति।)

रामः—(सर्वतोऽवलोक्य।) हा! कथं नास्त्येव। नन्वकरुणे वैदेहि!

सीता—अकरुणह्मि, जा एव्वंविहं तुमं पेक्खन्दी एव्व जीवेमि। (अकरुणास्मि, यैवंविधं त्वां पश्यन्त्येव जीवामि।)

रामः—क्वासि प्रिये! देवि! प्रसीद प्रसीद। न मामेवंविधं परित्यक्तुमर्हसि।

हस्तपादादयोऽवयवाः, यस्याः सा, 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' इति संयोगोपधत्वेऽपि ङीष्। जाता = सम्पन्ना। अश्रोपमालङ्कारः, 'मरुता परिधूता, नवाम्भसा सिक्ता' इत्यत्र यथासंख्याऽलङ्कारश्च, तथा च द्वयोः सङ्करः। उपजातिवृत्तम् ॥ ४२ ॥

सीतेति। अवशेन = आनन्दाऽधीनेन, एतेन = अनेन, आत्मना = शरीरेण, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।' इत्यमरः, लज्जापिता = लज्जाम् = व्रीडाम्, आपिता = प्रापिता, अस्मि, स्वेदाद्युत्पत्तेरिति भावः। अभिषङ्गः = अनुरागः, 'हृदयासङ्ग' इति पुस्तकान्तरपाठस्तत्र—हृदयस्य = मनसः आसङ्गः = आसक्तिः। मंस्यते = विचारयिष्यति।

राम इति। अकरुणे = निर्दये।

सीतेति। या=अहम्। एवंविधम् = एतादृशं, मदीयशोकेन अतिविह्वलमिति भावः। पश्यन्त्येव, = अवलोकयन्त्येव, जीवामि = प्राणान् धारयामि, न मुञ्चाम्यतः अकरुणाऽस्म्येवेति भावः।

राम इति। प्रसीद = प्रसादं कुरु, देहि मे दर्शनमिति भावः।

सीता—(मन ही मन) विवश इस शरीरके कारण भगवती तमसासे लजवाई गई हूं। यह क्या विचार करती होंगी—'यह परित्याग और यह आसक्ति ?'।

राम—(सब ओर देखकर) हाय! कैसे नहीं ही है। अरी निर्दय सीते!

सीता—मैं निर्दय ही हू, जो ऐसे दुःखित आपको देखती हुई भी जी रही हूँ।

राम—हे प्रिये! तुम कहाँ हो? प्रसन्न होओ, प्रसन्न होओ। तुम्हे इस अवस्थामें मेरा त्याग नहीं करना चाहिए।

सीता—अयि अज्जउत्त ! विप्पदीवं विअ । (अयि आर्यपुत्र ! विप्रतीपमिव ।)

वासन्ती—देव ! प्रसीद प्रसीद । स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिं गतमात्मानम् । कुत्र मे प्रियसखी ?

रामः—व्यक्तं नास्त्येव । कथमन्यथा वासन्त्यपि न पश्येत् ? अपि खलु स्वप्न एष स्यात् ? न चास्मि सुप्तः । कुतो रामस्य निद्रा ? सर्वथापि स एवैष भगवाननेकवारपरिकल्पितो विप्रलम्भः पुनः पुनरनुबध्नाति माम् ।

सीतेति । विप्रतीपमिव = विशेषेण प्रतीपम् = अति प्रतिकूलमिव, प्राक्त्वां त्यक्त्वा साम्प्रतं 'मां त्यक्तुं नाऽर्हसी'त्याकारकं त्वदीयं कथनं विशेषेण प्रतिकूलमेव, नाऽहं त्वां त्यक्तवतीति भावः । पुस्तकान्तरेषु **विपरीतम्** इति पाठस्तत्राऽपि स एवाऽर्थः ।

वासन्तीति । स्वेनैव = आत्मीयेनैव, लोकोत्तरेण = लोकाऽतिशायिना, अतिभूमिम् = सीमाऽन्तमिति भावः, गतम् = प्राप्तम् , **'अतिभूमिगतविप्रलम्भम्'** इति पुस्तकान्तरपाठस्तत्र—अतिभूमिगतः = सीमान्तं प्राप्तः, विप्रलम्भः = प्रियावियोगः, यस्य तम् इत्यर्थः, आत्मानम् = स्वम् , संस्तम्भय = अवष्टब्धं कुरु, स्थिरीकुर्विति भावः । प्रियसखी = सीतेति भावः ।

राम इति । नाऽस्त्येव = सीता न विद्यत एव, व्यक्तम्=स्पष्टम् । अन्यथा= सीतायाः सद्भावे, वासन्त्यपि = वनदेवताऽपि, कथम् = कस्माद्धेतोः । राम एवं योग्याऽनुपलम्भेन सीताया अभावं निश्चित्य पूर्वाऽनुभूततत्स्पर्शस्य भ्रमत्वरूपत्वं मीमांसते-**अपीत्यादिना** । एषः = प्रागुपलब्धः सीतास्पर्शः, स्वप्नः स्यादपि= स्वप्नो भवेत् किम् , अपिशब्दः संभावनाद्योतकः, स्वापाऽनन्तरं स्वप्नस्य सत्त्वादाह—सुप्तः = निद्राणः, न चाऽस्मि । तदुपपादयति—कुतो रामस्य निद्रा ? सीतावियोगे 'अनिद्रः सततं राम' इति प्रसिद्धमेवेति भावः । सर्वथाऽपि = सर्वैः प्रकारैरपि, मम वासन्त्याद्याऽनुपलम्भान्निद्राभावेन स्वप्नस्याऽप्यसत्त्वादिति सर्वैरपि प्रकारैरिति भावः । भगवान् = सामर्थ्यसम्पन्नः, अनेकवारपरिकल्पितः =

सीता—हे आर्यपुत्र ! यह आप उल्टा ही कहते हैं ।

वासन्ती—महाराज ! प्रसन्न हों, प्रसन्न हों । अपने ही अलौकिक धैर्यसे बहुत दूर गये हुए अपनेको सँभालिए । मेरी प्रिय सखी सीता कहाँ हैं ?

राम—सचमुच, सीता यहाँ नहीं हैं । नहीं तो वासन्ती भी उन्हें कैसे न देखतीं ? कदाचित् यह स्वप्न हो, मैं सोया भी नहीं हूँ; रामको कहां नींद है ? सब तरहसे ही ऐश्वर्य-सम्पन्न और चिन्तासे परिकल्पित वह भ्रम ही बार-बार मेरा अनुसरण करता है ।

सीता—मए एव्व दारुणाए विप्पलद्धो अज्जउत्तो। (मयैव दारुणया विप्रलब्ध आर्यपुत्रः।)

वासन्ती—देव ! पश्य पश्य।

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथ-
स्ते चैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां चलन्तीं वह-

भूयो भूयश्चिन्तितः, विप्रलम्भः = भ्रमः, माम् = रामम्, अनुबध्नाति=अनुसरति, भ्रम एव पुनः पुनः सीतां निर्माय तया सह मदीयं समागमं संसाध्य मां प्रतारयतीति भावः।

सीतेति । दारुणया = कठिनया, विप्रलब्धः = वञ्चितः, करस्पर्शादिति भावः।

पौलस्त्यस्येति । अयं जटायुषा विघटितः पौलस्त्यस्य कार्ष्णायसो रथः। एते ते पुरतः कङ्कालशेषाः पिशाचवदनाः खराः। इतः खड्गच्छिन्नजटायुपक्षतिः अरिः चलन्तीं सीतां वहन् अन्तर्व्यापृतविद्युत् अम्बुद इव द्याम् अभ्युदस्थात् इत्यन्वयः। अयम् = दृश्यमानः, जटायुषा = तन्नामकेन गृध्रराजेन, विघटितः = प्रध्वंसितः, पौलस्त्यस्य = रावणस्य, कार्ष्णायसः = कृष्णं च तदयः कृष्णायः = कृष्णवर्णलोहम्, तेन निर्वृत्तः कार्ष्णायसः = कृष्णलोहमय इत्यर्थः, 'तेन निर्वृत्तम्' इत्यण्। रथः = स्यन्दनः। एते=इमे, ते=दृश्यमानाः, पुरतः = अग्रे, कङ्कालशेषाः= शरीराऽस्थिमात्राऽवशिष्टाः, मांसानां क्रव्याद्भिः पूर्वं भक्षितत्वादिति भावः, 'स्याच्छरीरास्थ्नि कङ्कालः' इत्यमरः। पिशाचवदनाः = पिशाचस्येव वदनं = मुखं येषा ते, खराः=गर्दभाः रावणरथवाहका इति यावत्। इतः=अत्र, खड्गच्छिन्नजटायुपक्षतिः= खड्गेन = कृपाणेन, छिन्ने=कृत्ते खड्गच्छिन्ने, जटाः=पक्षमूलम्, एव आयुर्यस्य सः, जटया सह यातीति जटायुर्वा, मृगय्वादित्वात्कुप्रत्ययः 'विद्यादायुं तथायुषा' इति द्विरूपकोषादुकारान्तः सकारान्तश्च जटायुशब्दः। जटायोः = जटायुषः, पक्षती = पक्षमूले, = जटायुपक्षती, 'स्त्री पक्षतिः पक्षमूलम्' इत्यमरः, खड्गच्छिन्ने

सीता—कठोर चित्तवाली मैंने ही आर्यपुत्रकी प्रतारणा की है।

वासन्ती—महाराज ! देखिये, देखिये।

जटायुसे तोड़ा गया लोहेका बना हुआ यह रावणका रथ है, सामने ये वे अस्थिमात्रसे अवशेष पिशाचकी तरह मुखवाले रावणका रथ ढोनेवाले गधे हैं। यहाँसे खड्गसे जटायुके पक्षमूलोंको काटकर शत्रु रावण चञ्चल (कम्पित) होती हुई सीताको लेकर भीतर चमकनेवाली

ऽन्तर्व्यापृतविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥ ४३ ॥

सीता—(सभयम्) अज्जउत्त ! तादो वावादीअदि । ता परित्ताहि परित्ताहि । अहं वि अवहरिज्जामि (आर्यपुत्र ! ततो व्यापाद्यते । तस्मात्-परित्रायस्व परित्रायस्व । अहमप्यपह्रिये ।)

रामः—(सवेगमुत्थाय ।) आः पाप ! तातप्राणसीतापहारिन् ! लङ्कापते ! क यास्यसि ?

वासन्ती—अयि देव ! राक्षसकुलप्रलयधूमकेतो ! किमद्यापि ते मन्युविषयः ?

जटायुपक्षती येन सः, एतादृशः अरिः = शत्रुः, रावण इत्यर्थः, चलन्तीम्=मुक्त्यर्थं-प्रयतमानतयाऽस्थिराम्, 'ज्वलन्तीम्' इति पाठे सतीतेजसा दीप्यमानामित्यर्थः। सीताम् = जानकीम्, वहन् = रथध्वंसाद्धस्ताभ्यामेव धारयन्, अन्तर्व्यापृतविद्युत्= अन्तर्व्यापृता = अन्तश्चलन्ती, विद्युत् = तडित् यस्य सः, एतादृशः, अम्बुद इव = मेघ इव, द्याम् = आकाशम्, 'द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम् ।' इत्यमरः। अभ्युदस्थात् = अभ्युद्गतवान्, 'उदोऽनूर्ध्वकर्मणि' इति निषेधादात्मनेपदम्। अत्रोपमाऽलङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥ ४३ ॥

सीतेति । तातः=पितृतुल्यः, जटायुरित्यर्थः, श्वशुरस्य दशरथस्य मित्रत्वाज्जटायुषि सीताया इयमुक्तिः। व्यापाद्यते=हन्यते। अयं समयविस्मृतिरूपो व्यभिचारिभावः।

राम इति । आः = 'आः स्यात्कोपप्रपीडयोः' इति कोपव्यञ्जकमव्ययम्। अत्र रोषसंभ्रमवचनरूपं तोटकं नाम सन्ध्यङ्गम्। तातप्राणसीताऽपहारिन्=तातस्य=जटायुषः प्राणान् = असून्, सीतां च = जानकीं च अपहरतीति तच्छीलस्तत्सम्बुद्धौ।

वासन्तीति । राक्षसकुलप्रलयधूमकेतो = राक्षसकुलस्य = रावणादिरक्षोवंशस्य, प्रलयः = विनाशः, तस्मिन् = तत्सूचने, धूमकेतो = धूमकेतुनामकग्रहसदृश यद्वा धूमकेतो = अग्ने, मन्युविषयः = क्रोधविषयः । त्वत्परिपन्थिनां सर्वेषां

बिजलीसे युक्त मेघकी तरह आकाशमें उड़ गया ॥ ४३ ॥

सीता—(डरके साथ) आर्यपुत्र ! पिताजी (जटायु) मारे जा रहे हैं, इस कारणसे बचाइए, बचाइए और मैं भी अपहृत हो रही हूँ ।

राम—(वेगके साथ उठकर) ओः पापी ! पिताजी (जटायु) के प्राण और सीताको हरण करनेवाला रावण ! तू कहाँ जायगा ?

वासन्ती—अरे महाराज ! राक्षसवंशके संहार करनेमें अग्नितुल्य ! क्या अभी तक आपके क्रोधका विषय है ?

सीता—अहहे ! उब्भन्तह्मि । (अहो ! उद्भ्रान्तास्मि ।)

रामः—अन्य एवायमधुना विपर्ययो वर्तते ।

उपायानां भावादविरलविनोदव्यतिकरै-
विंमर्दैर्वीराणां जनितजगदत्यद्भुतरसः ।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्

राक्षसानां विनष्टत्वात्साम्प्रतं क्रोधो न कथ्यत इति भावः ।

सीतेति । उद्भ्रान्ता = अतिशयभ्रान्तियुक्ता, पुस्तकान्तरेषु '**उन्मत्तिके**'ति पाठस्तत्र उन्मादयुक्तेत्यर्थः । इयं कामस्याऽष्टम्यवस्था ।

राम इति । अन्य एव = अपर एव, सीतापूर्ववियोगाद्विलक्षण एवेत्यर्थः । विपर्ययः = सीतावियोगरूपविपर्यासः । पुस्तकान्तरेषु तु अन्यस्थाने '**अन्वर्थ**' इति, विपर्ययस्थाने '**प्रलाप**' इति पाठस्तत्र अधुना = साम्प्रतं, प्रलापः = अनर्थकं वचः, अन्वर्थः = अर्थमनुगतः, सीताया अभावाद्रावणादीनां च नाशितत्वादिदं मदीयं वचः 'आः पापे'त्यादिरूपमनर्थकमेवेति भावः ।

उपायानामिति । उपायानां भावाद् अविरलविनोदव्यतिकरैः वीराणां विमर्दैः जनितजगदत्यद्भुतरसः मुग्धाक्ष्याः स वियोगः रिपुघाताऽवधिः अभूत् खलु । कटुः तूष्णीं सह्यः अयं तु प्रविलयः निरवधिरित्यन्वयः । उपायानाम् = वियोगनिवर्तनहेतूनां, सेनासन्नाहसेतुबन्धादिसाधनानामिति भावः । भावात्=सत्त्वात्, अविरलविनोदव्यतिकरैः=अविरलाः=सन्तताः '**अविरत**' पाठेऽपि स एवार्थः, विनोदानाम्=दुःखविस्मृतिहेतूनाम्, व्यतिकराः=सम्बन्धाः येषु तैः । तादृशैः वीराणां=शूराणां, सुग्रीवप्रभृतीनामित्यर्थः, 'शूरो वीरश्च विक्रान्त' इत्यमरः, विमर्दैः=संप्रहारैः, जनितजगदत्यद्भुतरसः=जनितः = उत्पादितः, जगति=लोके, अत्यद्भुतरसः=विस्मयस्थायिको रसविशेषः, येन सः । मुग्धाक्ष्याः=मुग्धे = सुन्दरे, अक्षिणी = नेत्रे, यस्यास्तस्याः, सीताया इति भावः, 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति समासाऽन्तः षच्, 'षिद्गौरादिभ्यश्च' इति ङीष् । सः = पूर्वाऽनुभूतः, वियोगः = विरहः, रिपुघाता-

सीता—आश्चर्य है । मुझको बहुत ही भ्रान्ति हो गई थी ।

राम—इस समय दूसरे ही प्रकारका विपर्यय हो गया है ।

उपायोंके रहनेसे निरन्तर चित्त बहलानेके सम्बन्धोंसे युक्त सुग्रीव आदि वीरोंके युद्धोंसे जगतमें अतिशय अद्भुत रसको उत्पन्न करनेवाला सीताका वह पहलेका विरह शत्रुकी हत्या-

कटुस्तूष्णीं सह्यो निरवधिरयं तु प्रविलयः ॥ ४४ ॥

सीता—बहुमाणिदह्मि पुव्वविरहे[2] । णिरवधित्ति हा ! हदह्मि । (बहुमानितास्मि पूर्वविरहे । निरवधिरिति हा ! हतास्मि ।)

रामः—कष्टं भोः !

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,

प्रज्ञा जाम्बवतो न यत्र, न गतिः पुत्रस्य वायोरपि ।

मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः,

वधिः = रिपूणां = रावणादीनाम् , घातः = वधः, अवधिः = पर्यन्तः, सीमा इत्यर्थः यस्य सः । तथाविधोऽभूत् = अभवत् । कटुः = क्रूरः, तूष्णीं सह्यः=प्रतीकाराऽभावाज्जोषंभावेन मर्षणीयः, अयं तु = साम्प्रतमनुभूयमानस्तु, प्रविलयः = प्रवियोगः, पुनर्दर्शनाऽभावाऽभिप्रायेण प्रविलयत्वोक्तिः । निरवधिः = अवधिशून्यः, यावज्जीवनभावीत्यर्थः । कटुस्थाने **'कथमि'**ति, 'तु प्रविलय' इत्यत्र **'त्वप्रतिविध'** इति पाठान्तरम्, तत्र अप्रतिविध इत्यस्य प्रतिविधानरहित इत्यर्थः । अत्र **काव्यलिङ्गाऽलङ्कारः** । **शिखरिणी** वृत्तम् ॥ ४४ ॥

सीतेति । पूर्वविरहे=प्राक्तनवियोगे, बहुमानिताऽस्मि=अधिकसम्मानवत्यस्मि मदर्थमेव सेतुनिर्माणादिदुष्करकार्याऽनुष्ठानादिति भावः । निरवधिरिति = अवधिशून्य इति कथनेन, हताऽस्मि = नष्टाऽस्मि, प्रत्याशायाश्छिन्नत्वादिति भावः ।

व्यर्थमिति । हे प्रिये ! यत्र मे कपीन्द्रसख्यमपि व्यर्थं, हरीणां वीर्यं वृथा, यत्र जाम्बवतः प्रज्ञा न, वायोः पुत्रस्य अपि गतिर्न, यत्र विश्वकर्मतनयो नलोऽपि

काल तक रहनेवाला था, परन्तु कठोर और प्रतीकार न होनेसे चुपचाप सहने योग्य इस समयका सीताका विरह तो अवधिशून्य है ॥ ४४ ॥

सीता - पहलेके विरहमें मैं बहुत सम्मानित हुई थी । 'साम्प्रतिक '(इस समयका) विरह अवधिशून्य है' इस उक्तिसे हाय ! हाय ! मैं नष्ट हो गई ।

राम—ओः ! कष्ट है ।

हे प्रिये ! जिस स्थानमें मेरी सुग्रीवके साथ की गई मित्रताभी व्यर्थ है, बन्दरोंका पराक्रम भी निरर्थक है, जहां जाम्बवान्‌की बुद्धि भी समर्थ नहीं है, हनूमान्‌की भी गति नहीं हैं, जहांपर विश्वकर्माके पुत्र नल भी मार्ग (पुल) बनानेमें समर्थ नहीं हैं, किं बहुना मेरे भाई

---

१. 'रिदानीं तु विरहः' इति पाठान्तरम् ।

२. 'इदं पूर्ववाक्यं पुस्तकान्तरेषु नोपलभ्यते । अनावश्यकञ्चैतत्, अग्रेऽस्यैव पुनरुक्तत्वात् । (सं०) ।

सौमित्रेरपि पत्रिणामविषये तत्र प्रिये ! क्वासि मे ?॥ ४५॥

सीता—बहुमाणिदह्मि पुव्वविरहे । (बहुमानितास्मि पूर्वविरहे ।)

रामः—सखि वासन्ति ! दुःखायैव सुहृदामिदानीं रामदर्शनम्। कियच्चिरं त्वां रोदयिष्यामि । तदनुजानीहि मां गमनाय ।

मार्गं कर्तुं न क्षमः, मे सौमित्रेरपि पत्रिणाम् अविषये तत्र क्व असि ? इत्यन्वयः । हे प्रिये = हेसीते ! 'यत्र=यस्मिन् स्थाने, मे=मम, कपीन्द्रसख्यम् = कपीन्द्रेण=सुग्रीवेण, सख्यम् = मैत्री, अपि, व्यर्थम्=निरर्थम्, निष्फलमित्यर्थः । हरीणां=वानराणां 'शुकाऽहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । वीर्यं = पराक्रमः; वृथा = व्यर्थम् । यत्र = यस्मिन् स्थाने, जाम्बवतः = तन्नामकस्य ऋक्षराजस्य, प्रज्ञा = बुद्धिः, युक्तायुक्तत्वनिश्चायिकेति शेषः । न = न समर्थेति भावः । यत्र = यस्मिन् स्थाने, वायोः पुत्रस्याऽपि = हनूमतोऽपि, गतिः = गमनं, न = न समर्थेति भावः । यत्र = यस्मिन् स्थाने, विश्वकर्मतनयः = विश्वपुत्रः, नलोऽपि = नलनामको वानरोऽपि, मार्गं = पन्थानं, सेतुबन्धरूपमिति भावः, कर्तुम् = विधातुम् , न क्षमः = न समर्थः । मे = मम, प्रियभ्रातुरिति शेषः, सौमित्रेरपि = लक्ष्मणस्यापि, पत्रिणाम्= बाणानाम् , 'पत्त्री रोप इषुर्द्वयोः' इत्यमरः, अविषये=अगोचरे तत्र = तादृशे, क्व = कुत्र स्थाने, असि = वर्तसे, प्राग्रावणहृतायास्तवाऽन्वेषणार्थं सुग्रीवसख्यादिकं सफलमभवत् , *साम्प्रतं तु लोकाऽपवादभीतेन मया स्वयं विजने परिहापितायास्तवाऽन्वेषणे* प्राक्तनं सर्वमपि साधनं न सार्थकमिति भावः । **शार्दूलविक्रीडितं** वृत्तम् ॥ ४५ ॥

राम इति । सुहृदाम् = मित्राणाम् , दुःखाय = पीडार्थम् , 'तादर्थ्ये चतुर्थी वाच्या' इति चतुर्थी, सर्वेऽपि सुहृदो मद्दर्शनाऽनन्तरं सीतायाः स्मरन्त्यतो 'मद्दर्शनं दुःखायैवेति भावः । रोदयिष्यामि = रुदतीं करिष्यामि, गमनाय = गन्तुम् 'तुमर्थाच्च भाववचनात्' इति चतुर्थी, अनुजानीहि = अनुज्ञां देहि ।

लक्ष्मणके भी बाणोंसे अग्राह्य ऐसे किस स्थानमें तुम विद्यमान हो ? ॥ ४५ ॥

सीता—मैं पहलेके वियोगमें बहुत मानी गई थी !

राम—सखि वासन्ति ! इस समय रामका दर्शन मित्रोंको दुःखके लिए ही है । मैं कितनी देरतक तुम्हें रुलाऊँ । इस कारणसे मुझे जानेके लिए आज्ञा दो ।

सीता—(सोद्वेगमोहं तमसामाश्लिष्य ।) हा ! भअवदि तमसे ! गच्छदि दाणि अज्जउत्तो किं करिस्सम् ? (इति मूर्च्छति ।) (हा ! भगवति तमसे ! गच्छतीदानीमार्यपुत्रः । किं करोमि ?)

तमसा—वत्से जानकि ! समाश्वसिहि समाश्वसिहि । विधिस्तवानुकूलो भविष्यति । तदायुष्मतोः कुशलवयोर्वर्षवृद्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

सीता—भअवदि ! पसीद । खणमेत्तं वि दुल्लहदंसणं पेक्खामि । (भगवति ! प्रसीद । क्षणमात्रमपि दुर्लभदर्शनं पश्यामि ।)

रामः—अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे ।

सीतेति । सोद्वेगमोहम् = उद्वेगमोहाभ्याम् = विरहजदुःखवैचित्याभ्याम् , सहितं यथा तथेति क्रियाविशेषणम् ।

तमसेति । विधिः = भाग्यम् , 'भाग्यं स्त्री नियतिर्विधिः' इत्यमरः, आयुष्मतोः = जैवातृकयोः, 'जैवातृकः स्यादायुष्मान' इत्यमरः । वर्षवृद्धिमङ्गलानि = वत्सरवृद्धिकल्याणकर्माणि, जन्मोत्सवपूजादीनीति भावः । संपादयितुम् = निष्पादयितुम् , भागीरथीपदाऽन्तिकम्—गङ्गापादनिकटम् । जन्मोत्सवपूजनीया देवता व्यवहारनिर्णये यथा—'नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् । मार्कण्डेयं नरो भक्त्या पूजयेत्प्रयतस्तथा ॥ तथा दीर्घाऽऽयुषं व्यासं रामं द्रौणिं कृपं बलिम् । प्रह्लादं च हनूमन्तं विभीषणमथाऽर्चयेत् ॥ स्वनक्षत्रं जन्मतिथिं संप्राप्य पूजयेन्नरः । षष्ठीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥' इति ।

सीतेति । प्रसीद = अनुगृहाण । दुर्लभदर्शनम् = दुष्प्राप्यविलोकनं, राममित्यर्थः । रामस्य पुनर्दर्शनस्य सम्भावनाऽभावात्कातर्यात्सीतायाः कथनमिदम् ।

राम इति । अश्वमेधसहधर्मचारिणी = अश्वमेधस्य = तदाख्यराजकर्तृक-

---

सीता—(उद्वेग और मोहके साथ तमसाको आलिङ्गन कर) हाय ! भगवति तमसे आर्यपुत्र जा रहे हैं, अब मैं क्या करूँ ? (ऐसा कहकर मूच्छित होती हैं ।)

तमसा—बेटी जानकी ! धीरज धरो, धीरज धरो । तुम्हारा भाग्य अनुकूल होगा । इस कारणसे चिरञ्जीव कुश और लवकी वर्षवृद्धि (वर्षगाँठ) के मङ्गल कर्मोंके सम्पादन करनेके लिए गङ्गाजीके चरणोंके निकट ही हमलोग चलें ।

सीता—भगवति ! अनुग्रह कीजिए । दुर्लभ दर्शनवाले आर्यपुत्रको कुछ समय और भी देख लूँ ।

राम—इस समय अश्वमेध यज्ञकी मेरी सहधर्मचारिणी (धर्मपत्नी) है ।

सीता—(साक्षेपम्) अज्जउत्त ! का ? (आर्यपुत्र ! का ?)।

वासन्ती—परिणीतमपि किम्¹ ?

रामः—नहि नहि । हिरण्मयी सीताप्रतिकृतिः ।

सीता—(सोच्छ्वासास्रम् ।) अज्जउत्त ! दाणिं सि तुमम् । अह्महे ! उक्खाइदं दाणिं मे परिच्चाअसल्लं अज्जउत्तेण । (आर्यपुत्र ! इदानीमसि त्वम् । अहो ! उत्खाततिमिदानीं मे परित्यागशल्यमार्यपुत्रेण ।)

यज्ञविशेषस्य, सहधर्मचारिणी = सहधर्माचरणशीला, श्रौते स्मार्ते च कर्मणि दम्पत्योः सहाऽधिकारादिति भावः ।

सीतेति । साऽऽक्षेपम् = आक्षेपेण = भर्त्सनेन, सहितं यथा तथा, का = का त्वदीया सहधर्मचारिणीति भावः ।

वासन्तीति । परिणीतमपि किं परिणयः कृतः किम् ? परिणीतमिति भावे क्तः । सीतापरित्यागाऽनन्तरं न केवलं शरीरधारणं, किंतु परिणयोऽपि जातः किम् ? इति भावः । एतेन सीतादुःखदुःखिताया वासन्त्या विस्मृतिर्द्योत्यते । सा च प्रकृतरसपरिपोषिका ।

राम इति । नहि नहि = न परिणीतं, न परिणीतं, परिणीतिवार्ताप्यनिष्टेति वीप्सया द्योत्यते । हिरण्मयी = हिरण्यस्य विकारः, सुवर्णनिर्मितेति भावः । सीताप्रतिकृतिः = सीतायाः प्रतिकृतिः = प्रतिमा, 'प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधिः' इत्यमरः ।

सीतेति । सोच्छ्वासाऽस्रम् = उच्छ्वासास्राभ्याम् = अन्तर्मुखश्वासाऽश्रुभ्याम् सहितं यथा तथेति क्रियाविशेषणम् । रामस्य यज्ञे सहचारिण्यर्थे परिणयस्यावश्यकत्वेऽपि तदकरणादुच्छ्वासः, रामस्य आत्मार्थं सर्वविधसुखत्यागदर्शनादश्रुपात इति ज्ञेयम् । इदानीम् = अधुनापि, त्वं = 'स्वापहेतुरनुपाश्रितोऽन्यया' इत्युक्तरीत्या एकदारव्रतवान् , असि=वर्तसे । परित्यागशल्यम्=परित्यागः=निर्वासनम् एव, शल्यम्=शङ्कुः तत् उत्खाततिम्=उद्धृतम् , **'परित्यागलज्जाशल्यम्'**

सीता—(आक्षेपके साथ) आर्यपुत्र ! वह कौन है ?

वासन्ती—विवाह भी किया क्या ?

राम— नहीं नहीं । सुवर्णनिर्मित सीताकी मूर्त्ति है ।

सीता—(निश्वासत्यागके साथ आँसू गिराकर) आर्यपुत्र ! अब आप (एकपत्नीव्रतके कारणसे) प्रकृत आर्यपुत्र है । अहो मेरे परित्यागके शल्यको इस समय आर्यपुत्रने उखाड़ डाला ।

१. अत्र 'वासन्तीकृतः 'परिणीतमपि किम्' इत्याकारकः पाठस्त्याज्यः, 'वासन्त्या आत्रेय्याश्च 'अथ स रामभद्रः किमाचार.'''''''विज्ञातुमर्हति' इति सवादे रामकर्तृकविवाहनिषेधस्य यज्ञे हिरण्मयीसीताप्रतिकृतेश्च ज्ञातत्वादित्यवधेयम्' ॥ (सं०)

रामः—तत्रापि तावद् बाष्पदिग्धं चक्षुर्विनोदयामि ।

सीता—धण्णा क्खु सा, जा एव्व अज्जउत्तेण बहुमण्णीअदि । जा एव्वं अज्जउत्तं विणोदयन्दी आसाबन्धणं क्खु जादा जीअलोअस्स। (धन्या खलु सा, यैवमार्यपुत्रेण बहु मन्यते । यैवमार्यपुत्रं विनोदयन्त्याशाबन्धनं खलु जाता जीवलोकस्य ।)

तमसा—(सस्मितस्नेहार्द्रं परिष्वज्य ।) अयि वत्से ! एवमात्मा स्तूयते ।

सीता—(सलज्जम्[1]) परिहसिदह्मि भअवदीए। (परिहसितास्मि भगवत्या)

इति पुस्तकान्तरपाठस्तत्र-परित्यागेन लज्जा सैव शल्यमिति विग्रहः, मद्विषयकलोकापवादस्याऽवास्तविकत्वख्यापनार्थमेव त्वया स्वपरिणयसौलभ्येऽपि मदीया हिरण्मयी प्रतिकृतिर्यज्ञे सहधर्मचारिणीस्थाने स्थापितेति तवानेन व्यवहारेण मम परित्यागदुःखं निर्गतप्रायमिति भावः ।

राम इति । तत्रापि = हिरण्मयसीताप्रतिकृतावपि, बाष्पदिग्धम्=अश्रुलिप्तम् , विनोदयामि = विनोदयुक्तं करोमि, एवं च सीताप्रतिकृतेरश्वमेधसहधर्मचारिणीत्वमानुषङ्गिकं मुख्यं तु चक्षुर्विनोद इति सूचितम् ।

सीतेति । सा = हिरण्मयी मत्प्रतिकृतिः धन्या = पुण्यवती, 'सुकृती पुण्यवान् धन्य' इत्यमरः । बहु मन्यते = चक्षुर्विनोदनहेतुत्वेनाऽधिकं सत्क्रियते, विनोदयन्ती= विनोदयुक्तं कुर्वती, जीवलोकस्य = प्राणिभुवनस्य, जाता = संपन्ना, जातेत्यस्य स्त्रीलिङ्गत्वमुद्देश्यभूतां सीतामुद्दिश्येति बोध्यम् ।

तमसेति । परिष्वज्य = आलिङ्गय । एवं = 'धन्या से'त्यादिवचनैः, आत्मा= स्वा, स्तूयते = स्तुतिविषयीक्रियते ।

सीतेति । भगवत्या = तमसया ।

राम—सीताकी उस मूर्तिमें भी आँसुओंसे भरे हुऐ नेत्रोंको बहलाता हूं ।

सीता—यह (मेरी मूर्त्ति) धन्य है जो आर्यपुत्रसे इस तरह मानी जाती है । जो इस तरह आर्यपुत्रका दिलबहलाव करती हुई मनुष्यलोककी आशाकी रक्षा करनेवाली हो गई है ।

तमसा—(मन्द हास्य और स्नेहपूर्ण आर्द्र भावके साथ आलिङ्गन कर) अरी बेटी ! इस तरह तुम अपनी प्रशंसा कर रही हो ।

सीता—(लज्जाके साथ) भगवतीने मेरी हंसी की ।

१. 'अधोमुखी स्वगतम्' इत्यधिकः पाठः कुत्रचित्पुस्तके ।

वासन्ती—महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्।

रामः—तथाऽस्तु।

सीता—पडिऊला दाणिं मे वासन्दी संवुत्ता। (प्रतिकूलेदानीं मे वासन्ती संवृत्ता।)

तमसा—वत्से! एहि गच्छावः।

सीता—एव्वं करम्ह। (एवं करिष्यावः।)

तमसा—कथं वा गम्यते। यस्यास्तव—

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः।

वासन्तीति। अयम् = एषः, व्यतिकरः = समागमः, प्रसादः = अनुग्रहः। यथा = येन प्रकारेण, कार्यहानिः = कर्तव्यलोपः। कार्यं = कर्तव्यम्, **'आस्ताम्'** इति पाठे भवत्वित्यर्थः।

सीतेति। प्रतिकूला = अनिष्टकारिणीस्वाद्विपरीता, संवृत्ता=जाता, आर्यपुत्र-गमनं प्रत्यनुज्ञाकरणादिति भावः।

तमसेति। गच्छावः = चलावः, भागीरथीपदान्तिकमिति शेषः।

सीतेति। एवम् = इत्थं, भवन्या यथोक्तं तथेति भावः, कुर्वः = अनुतिष्ठावः, आसन्नरामविरहेण विवशायाः सीताया इयमुक्तिः।

प्रत्युप्तस्येति। दयिते प्रत्युप्तस्य इव तृष्णादीर्घस्य (तव) चक्षुषः सन्नि-कर्षः मर्मच्छेदोपमैः यत्नैः निरुध्यत इत्यन्वयः। दयिते = प्रिये, राम इत्यर्थः। प्रत्युप्तस्य इव = निखातस्य इव तृष्णादीर्घस्य = तृष्णया = दर्शनेच्छया, दीर्घ-स्य = आयतस्य, (तव = सीतायाः), चक्षुषः = नेत्रस्य, सन्निकर्षः = दयिते

वासन्ती—यह आपका आगमन हमारे ऊपर महान् अनुग्रह है। गमनके लिये जिस तरह कार्यमें हानि न हो, वैसा करना चाहिए।

राम—ऐसा ही हो।

सीता—इस समय वासन्ती मेरेलिए प्रतिकूल हो गई।

तमसा—बेटी! आओ, चलें।

सीता—ऐसा ही करें।

तमसा—कैसे चलें, जिस तुम्हारे तो—

प्यारे राममें बोएहुएकी तरह तथा तृष्णासे दीर्घ नेत्रोंका जो सम्बन्ध है, वह

मर्मच्छेदोपमैर्यत्नैः सन्निकर्षो निरुध्यते ॥ ४६ ॥

सीता—णमो सुकिदपुण्णजणदंसणिज्जाण अज्जउत्तचलणकमलाणम् ।
(इति मूर्च्छति ।) (नमः सुकृतपुण्यजनदर्शनीयाभ्यामार्यपुत्रचरणकमलाभ्याम् ।)

तमसा—समाश्वसिहि ।

सीता—(आश्वस्य ।) केच्चिरं वा मेहान्तरेण पुण्णचन्ददंसणम् ?
(कियच्चिरं वा मेघान्तरेण पूर्णचन्द्रदर्शनम् ?)

सम्बन्धः, 'आकर्ष' इति पाठे आकर्षणमित्यर्थः, मर्मच्छेदोपमैः = हृदयादिमर्मस्थलकृन्तनसदृशैः, 'मर्मच्छेदपरैः' इति पुस्तकान्तरपाठस्तत्र = हृदयादिमर्मस्थलकृन्तनकारिभिरित्यर्थः । यत्नैः = गमनादिव्यापारैः, निरुध्यते = निवर्त्यते । अतस्तथाविधया त्वया कथं गम्यत इति पूर्वेणाऽन्वयः । पुस्तकाऽन्तरेषु तु 'आकर्षो न समाप्यते' इति पाठान्तरन्तत्र-आकर्षः = आकर्षणं, न समाप्यते = न विरामं नीयते इत्यर्थः । रामे दृष्टिपथं प्राप्ते सति त्वच्चक्षुष आकर्षणमतीव दुःशकं भवतीति भावः । अत्रोत्प्रेक्षाऽलङ्कारः । अनुष्टुब् वृत्तम् ॥

सीतति । सुकृतपुण्यजनदर्शनीयाभ्याम् = सुकृतं पुण्यं यैस्ते सुकृतपुण्याः, ते च ते जनाः सुकृतपुण्यजनाः = सुविहितधर्माचरणलोकाः, तैर्दर्शनीयाभ्याम् = विलोकनीयाभ्याम् , सेवितुं शक्याभ्यां, न तु मादृशपापकृज्जनदर्शनाऽर्हाभ्यामिति भावः । आर्यपुत्रचरणकमलाभ्याम् = आर्यपुत्रस्य = रामचन्द्रस्य, चरणौ कमले इव चरणकमले, ताभ्यां = पादपङ्कजाभ्यामित्यर्थः, नमःशब्दयोगे 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च' इति चतुर्थी, पुस्तकाऽन्तरेषु तु 'नमो नमोऽपूर्वपुण्यजनितदर्शनेभ्य आर्यपुत्रचरणकमलेभ्य' इति पाठान्तरन्तत्र-अपूर्वैः=अद्भुतैः, 'पूर्वै'रिति पाठे प्रागाचरितैरित्यर्थः, एतादृशैः पुण्यैः=सुकृतैः, जनितम्=उत्पादितं, दर्शनं = विलोकनं येषां तेभ्यः, बहुवचनं गौरवद्योतनाऽर्थम् । प्राकृते चतुर्थीस्थाने षष्ठी, द्विवचनस्य च बहुवचनं भवतीति बोध्यम् । मूर्च्छति = मूर्च्छामभिनयति ।

सीतेति । आश्वस्य = संज्ञां लब्ध्वा । मेघान्तरेण = मेघव्यवधानेन, 'अन्त-

मर्मस्थलमें छेदन करनेके सदृश गमन आदि कर्मोंसे रोका जाता है ॥ ४६ ॥

सीता—उत्तम रूपसे पुण्यका आचरण करनेवाले जनोंसे दर्शनीय आर्यपुत्रके चरण-कमलोंको नमस्कार है । (ऐसा कहकर मूर्च्छित होती हैं ।)

तमसा—बेटी ! आश्वस्त हो ।

सीता - (आश्वस्त होकर) मेघकी रुकावटके कारण पूर्ण चन्द्रका दर्शन कितनी देर तक होगा ?

तमसा—अहो ! संविधानकम् ।

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक्पृथगिव श्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान्विकारा-
नम्भो यथा, सलिलमेव हि तत्समस्तम् ॥ ४७ ॥

रमवकाशाऽवधिपरिधानाऽन्तर्द्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' ॥ इत्यमरः ॥ पूर्णचन्द्रदर्शनम् = पूर्णिमेन्दुविलोकनम् , कियच्चिरम् = कियन्तमधिककालं यावद्भवेत् , क्षणिकमेव भवेन्ममाऽपि तत्तुल्यमार्यपुत्रदर्शनमित्यतिशयोक्तिरलङ्कारः ।

'ननु एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।' इति नियममुल्लङ्घ्य कथमत्र कविः करुणमङ्गिनं रसं कृतवानित्याशङ्कां तमसामुखेन निवारयति कविः—**तमसेति ।** अहो = आश्चर्यम् , संविधानकं = निर्माणम् , अपूर्वरूपकनिर्माणं विस्मयनीयमिति भावः ।

एक इति । एकः करुणो रस एव निमित्तभेदाद् भिन्नः (सन्) पृथक् पृथक् विवर्तान् श्रयते इव, यथा अम्भः आवर्तबुद्बुदतरङ्गमयान् विकारान् श्रयते; तत् समस्तं सलिलम् एव हि इत्यन्वयः । एकः = एकाकी, करुणः = तदाख्यः शोकस्थायिकः, रस एव = काव्यास्वाद एव, निमित्तभेदात् = सीतारामाद्यालम्बनरूपकारणभेदात् , भिन्नः=विलक्षणः (सन्), पृथक्-पृथक्=भिन्नान् भिन्नान् , विवर्तान्=शृङ्गारादिपरिणामान् , श्रयत इव = अवलम्बत इव । अत्र दृष्टान्तमाह—**आवर्तेति ।** यथा=येन प्रकारेण, अम्भः = जलम् , आवर्तबुद्बुदतरङ्गमयान् = आवर्तः=जलस्य भ्रम , बुद्बुदः = अम्बुस्फोटः, कुड्मलाकारजलसंस्थानविशेषः, तरङ्गः=भङ्गः, तन्मयान् = तत्स्वरूपान् , अत्र स्वरूपाऽर्थे मयट् । विकारान् = परिणामान् , श्रयते = आश्रयते, इव । तत् = पूर्वोक्तम् , आवर्तादिकमित्यर्थः । समस्तं = समग्रं, सलिलम् एव = जलम् एव, हि = निश्चयेनेत्यर्थः । यथा जलस्यैव रूपान्तराणि आवर्तादीनि, तथा एकस्य करुणरसस्यैव परिणामाः शृङ्गारादय इति भावः । **अत्रोपमोत्प्रेक्षयोः सङ्करः । वसन्ततिलका वृत्तम्** ॥ ४७ ॥

तमसा—अहो ! कैसी रचना है ?

एक करुण रस ही निमित्तभेदसे भिन्न होता हुआ पृथक् पृथक् शृङ्गार आदि परिणामोंको आश्रय करता है, ऐसा मालूम पड़ता है; जैसे एक जल ही भँवर, बुद्बुद और तरङ्गरूप विकारोंका आश्रय करताहै; वह वास्तविकमें जल ही है ॥ ४७ ॥

रामः— विमानराज ! इत इतः । (सर्वे उत्तिष्ठन्ति ।)

तमसावासन्त्यौ—(सीतारामौ प्रति ।)

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता ।
स च मुनिरनुयातारुन्धतीको वसिष्ठ-
स्तव वितरतु भद्रं भूयसे मङ्गलाय ॥ ४८ ॥

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविभवभूतिविरचित उत्तररामचरिते छाया नाम तृतीयोऽङ्कः ॥ ३ ॥

राम इति । विमानराज=व्योमयानश्रेष्ठ ! पुष्पकेत्यर्थः ।

तमसेति । तमसा सीतां वासन्ती च रामं प्रति मङ्गलं सूचयत इति भावः ।

अवनिरिति । अवनिः, अमरसिन्धुः, अस्मद्विधाभिः सार्धं, स च कुलपतिः यः छन्दसाम् आद्यः प्रयोक्ता, स च मुनिः, अनुयातारुन्धतीको वसिष्ठश्च तव भूयसे मङ्गलाय भद्रं वितरतु इत्यन्वयः । अवनिः = पृथ्वी, अमरसिन्धुः = गङ्गा 'गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।' इत्यमरः, अस्मद्विधाभिः = तमसापक्षे-मुरला-गोदावरीप्रभृतिभिः, वासन्तीपक्षे-अन्याभिर्देवताभिरित्यर्थः, 'सार्धं' पदयोगे 'सह-युक्तेऽप्रधाने' इति तृतीया, 'सार्धं = सह, स च = श्रुतिस्मृतिपुराणादिप्रसिद्धः, कुलपतिः = कुलस्य = इक्ष्वाकुवंशस्य, पतिः = प्रवर्तकत्वेन स्वामी, सूर्य इत्यर्थः, तथा च यः, छन्दसाम् = अनुष्टुबादिपद्यानाम् , आद्यः = प्रथमः, प्रयोक्ता=प्रयोग-कर्ता, स च मुनिः = कुलपतिर्वाल्मीकिरित्यर्थः, अनुयातारुन्धतीकः = अनुयाता = अनुगता, अरुन्धती=एतन्नाम्नी तज्जाया यं सः, समासान्तः कप् , वसिष्ठश्च= इक्ष्वाकुवंशगुरुश्च, तव = तमसापक्षे-सीतायाः, वासन्तीपक्षे च—रामस्येत्यर्थः, चतुर्थ्यर्थे षष्ठी, भूयसे = प्रचुराय, मङ्गलाय = कल्याणाय, भद्रं = मङ्गलं, वितरतु = ददातु । अत्र **तुल्ययोगिता**ऽलङ्कारः । **मालिनी** वृत्तम् ॥ ४८ ॥

इति **शेषराजशर्म**विरचित**चन्द्रकला**व्याख्यायां तृतीयोऽङ्कः ॥ ३ ॥

राम—विमानराज (पुष्पक) ! इधर इधर । (सब उठते हैं ।)

तमसा और वासन्ती—(सीता और रामके प्रति)

पृथ्वी और गङ्गा, हमारी जैसे-मुरला गोदावरी आदिके अथवा वनदेवियोंके साथ प्रसिद्ध वंशपति सूर्य, जो छन्दोंके प्रथम प्रयोग करनेवाले हैं वे मुनि वाल्मीकि और अरुन्धतीसे अनुगत वसिष्ठ ऋषि भी आपके प्रचुर कल्याणके लिए मङ्गलका वितरण करें ॥ ४८ ॥

(इसके अनन्तर सब जाते हैं)

'**छाया नामक**' तीसरा अङ्क समाप्त हुआ ॥ ३ ॥

चतुर्थोऽङ्कः

(ततः प्रविशतस्तापसौ)

एकः—सौधातके ! दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य । तथा हि—

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूतप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः

एक इति । सौधातके = सुधातुरपत्यं पुमान् सौधातकिस्तत्सम्बुद्धौ, 'सुधातुरकङ् च' इति अकङादेशश्चात् इञ्प्रत्ययश्च । अद्य=अस्मिन्दिने, भूयिष्ठसन्निधापिताऽतिथिजनस्य = भूयिष्ठम् = अधिकं यथा तथा, सन्निधापिताः = उपस्थापिताः, अतिथिजनाः=आगन्तुलोकाः, यस्मिंस्तस्य । भगवतः=ज्ञानशक्त्यादिपूर्णस्य, वाल्मीकेः = प्राचेतसस्य, आश्रमपदस्य = आश्रमस्थानस्य, समधिकाऽऽरम्भरमणीयता= समधिकाऽऽरम्भैः = प्रचुरतरकर्मभिः, अतिथिसेवाऽर्थमनुष्ठीयमानैरिति भावः, रमणीयता = सौन्दर्यम् ।

नीवारौदनेति । तपोवनमृगः सद्यःप्रसूतप्रियापीतात् अभ्यधिकम् उष्णमधुरं नीवारौदनमण्डं पर्याप्तम् आचामति । सर्पिष्मतो भक्तस्य स्फुरता गन्धेन मनाक् अनुसृतः कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यत इत्यन्वयः । तपोवनमृगः = आश्रमहरिणः, सद्यःप्रसूतप्रियापीतात्=सद्यः = तत्क्षणे, प्रसूता = प्रसववती, कर्तरि क्तप्रत्ययः, या प्रिया = हरिणी, तया पीतात् = निपीतात् , भावे क्तः । अभ्यधिकम् = अवशिष्टम् , उष्णमधुरम् = उष्णं च तन्मधुरमिति विशेषणसमासः, अशीतस्वादुकमिति भावः । नीवारौदनमण्डम् = नीवारस्य = तृणधान्यस्य, य ओदनः = भक्तः, तस्य मण्डम् = घनीभूतद्रवविशेषं, पर्याप्तं = प्रचुरं यथा तथा, यावदिच्छानिवृत्तीत्यर्थः, आचामति = पिबति. 'आङि चम इति वक्तव्यमि'ति

(अनन्तर दो तपस्वी प्रवेश करते हैं)

एक—सौधातके ! आज बहुतेरे अतिथि जनोंसे युक्त भगवान् वाल्मीकिके आश्रमस्थानकी अनेक कामोंसे सुन्दरता हो रही है, देखो ! जो कि—

तपोवनका मृग उसी क्षण प्रसूता मृगीके पीनेसे बचा हुआ गरम और स्वादिष्ट मुन्यन्नके भातका मांड़ खूब पी रहा है । बहुत घी डाले गए भातके फैलते हुए सुगन्धसे कुछ अनुगत

कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते ॥ १ ॥

सौधातकिः—साअदं अणीअपिआराणं जिण्णकुच्चाणं अणज्झाअकालणाणं तपोधणाणम् । (स्वागतमनेकप्रकाराणां जीर्णकूर्चानामनध्यायकारणानां तपोधनानाम् ।)

प्रथमः—(विहस्य ।) अपूर्वः खलु बहुमानहेतुर्गुरुषु सौधातके !

सौधातकिः—भो दण्डाअण ! किंणामहेओ दाणिं एसो महत्तस्स इत्थिआसत्थस्स धुरंधरो अज्ज अदिही आअदो ? (भो दण्डायन ! किंनामधेय

दीर्घत्वम् , सर्पिष्मतः = प्रचुरघृतयुक्तस्य, भक्तस्य = ओदनस्य, 'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ।' इत्यमरः । स्फुरता = प्रसरता, गन्धेन = सौरभेण, मनाक् = ईषत् , अनुसृतः = अनुगतः, कर्कन्धूफलमिश्रशाकपचनामोदः = कर्कन्धूफलैः = बदरीफलैः, मिश्राः=संयुक्ताः, ये शाकाः=पालङ्कयादयः, तेषां पचनं = पाकः, तस्य आमोदः = सौरभ्यम् , 'कर्कन्धूर्बदरी कोलिः' इत्यमरः, परिस्तीर्यते = विस्तीर्यते, वायुनेति शेषः । अत्र शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

सौधातकिरिति । अनेकप्रकाराणाम् = बहुविधानाम् , अनध्यायकारणानाम्=अनध्ययननिमित्तानामित्यर्थः, 'शिष्टे च गृहमागते' इति वचनाऽनुसारादिति भावः । जीर्णकूर्चानाम् = जीर्णम् = शिथिलम् , कूर्चम् = भ्रूमध्यम् , येषां तेषां, 'कूर्चमस्त्री भ्रुवोर्मध्यम्' इत्यमरः, यद्वा—जीर्णाः = पलिताः, कूर्चाः = मुखलोमानि, श्मश्रूणीत्यर्थः, येषां तेषाम् , अतिशयवृद्धानामिति भावः । स्वागतम् = शोभनमागतं, प्रयुनज्मीति भावः ।

प्रथम इति । गुरुषु = आदरणीयजनेषु, अतिथिष्विति भावः । अतिथेर्गुरुत्वमाह चाणक्यस्तद्यथा—'गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां सर्वस्याऽभ्यागतो गुरुः ॥' इति । अपूर्वः = अद्भुतः, बहुमानहेतुः = बहुमानस्य = संमानस्य, हेतुः = कारणम् , जीर्णकूर्चानामिति प्रयोग इति भावः ।

सौधातकिरिति । दण्डायनेति नामधेयं, तत्सम्बुद्धौ, पुस्तकान्तरे 'भाण्डा-

बदरीफलों से संयुक्त शाकके पकानेकी सुगन्धि हवासे फैल रही है ॥ १ ॥

सौधातकि—सफेद डाढी और मूँछवाले अनध्यायके कारणभूत अनेक प्रकारोंके इन तपस्वियोंका स्वागत है ।

प्रथम—(हंसकर) हे सौधातके ! गुरु (अतिथि) जनोंमें तुम्हारा यह बहुत सम्मानका सूचक अद्भुत वाक्य है ।

सौधातकि—हे दण्डायन ! बहुत स्त्रियोंमें अग्रसर होकर आज जो अतिथि;

इदानीमेष महतः स्त्रीसार्थस्य धुरन्धरोऽद्यातिथिरागतः ?)

दण्डायनः—धिक्प्रहसनम् ! नन्वयमृष्यशृङ्गाश्रमादरुन्धतीं पुरस्कृत्य महाराजदशरथस्य दारानधिष्ठाय भगवान् वसिष्ठः प्राप्तः। तत्किमेवं प्रलपसि ?

सौधातकिः—हुं वसिट्ठो ? (हुं वसिष्ठः ?)

दण्डायनः—अथ किम् ?

सौधातकिः—मए उण जाणिदं कोवि वग्घो विअ एसोत्ति । (मया पुनर्ज्ञातं कोऽपि व्याघ्र इव एष इति ।)

येने'ति पाठान्तरं, तत्र—भाण्डस्य युवाऽपत्यं पुमानिति विग्रहे 'गर्गादिभ्यो यञ्' इति यञन्तात् 'यञञोश्चे'ति फक्, तत्सम्बुद्धौ । महतः = प्रचुरस्य, स्त्रीसार्थस्य = नारीसमूहस्य । धुरन्धरः = धुर्यः, अग्रसर इति भावः ।

दण्डायन इति । प्रहसनम् = उपहासम् , धिग्योगे 'धिगुपर्यादिषु त्रिषु' । इति द्वितीया, परिहासहेतुभूतं त्वदीयं वचो निन्दनीयमिति भावः । दारान्=पत्नीः 'भार्या जायाथ पुंभूम्नि दाराः' इत्यमरः ।' अधिष्ठाय = गृहीत्वा, तन्नियामको भूत्वेत्यर्थः । प्रलपसि = उपहासरूपमनर्थकं वचो ब्रवीषि, महतामवमाननमनुचितमिति भावः ।

सौधातकिरिति । हुं = प्रश्नद्योतकोऽयं निपातः ।

दण्डायन इति । अथ किम् = अङ्गीकारद्योतकं पदद्वयमिदम् । वसिष्ठ एवेति भावः ।

सौधातकिरिति । व्याघ्र इव = शार्दूल इव । पुस्तकान्तरे **'वृको वा'** इत्यधिकः पाठस्तस्य-ईहामृग इत्यर्थः, 'भेड़िया' इति हिन्दी भाषा । **'स्थविरसार्थस्ये'**ति पाठे वृद्धसमूहस्येत्यर्थः ।

आये हुवे हैं, उनका क्या नाम है ?

दण्डायन—तुम्हारे इस उपहास (दिल्लगी) को धिक्कार है। ऋष्यशृङ्गके आश्रमसे अरुन्धतीको आगेकर महाराज दशरथकी महारानियोंको लेकर ये भगवान् वसिष्ठजी आये हैं। इसलिए क्यों ऐसा बकवाद करते हो ?

सौधातकि—हूँ, वसिष्ठ हैं ?

दण्डायन—और क्या ?

सौधातकि—मैंने समझा कि यह कोई व्याघ्र जैसा है।

दण्डायनः—आः, किमुक्तं भवति ?

सौधातकिः—जेण परावडिदेण एव्व सा वराई कविला कल्लाणी बला-मोडिअ मडमडाइआ । (येन परापतितेनैव सा वराकी कपिला कल्याणी बला-त्कृत्य मडमडायिता ।)

दण्डायनः—समांसो मधुपर्क इत्याम्नायं बहु मन्यमानाः श्रोत्रियाया-भ्यागताय वत्सतरीं महोक्षं वा पचन्ति गृहमेधिनः । तं हि धर्मं धर्म-सूत्रकाराः समामनन्ति ।

सौधातकिः—भो ! णिगिहीदोसि । (भोः ! निगृहीतोऽसि) ।

दण्डायन इति । किमुक्तं भवति = कस्माद्धेतोरेवमुच्यत इति भावः ।

सौधातकिरिति । येन = कारणेन, 'हेतौ' इति तृतीया, परापतितेन = संप्राप्तेन, कपिला = सुवर्णवर्णविशिष्टा गौः । कल्याणी = वत्सतरी, द्विहायनीत्यर्थः । मडमडायिता, = मडमडशब्दयुक्ता कृता, आलब्धेति यावत् , तेन 'व्याघ्र' इति ज्ञातमिति पूर्वेण सम्बन्धः ।

दण्डायन इति । मधुपर्कः = दधि मधु घृतं च, आम्नायं = वेदं, बहु मन्य-मानाः = प्रमाणीकुर्वन्तः, गृहमेधिनः = गृहस्थाः, श्रोत्रियाय=वेदविदे, अभ्यागताय= अतिथये, वत्सतरीम्=द्विहायनीम् , महोक्षम्=महावृषभम् , अत्र 'अचतुरे' त्यादि-नाऽच्प्रत्ययान्तो निपातितः । **'महाजं वा'** इति पुस्तकान्तरस्थोऽधिकः पाठस्तस्य महाछागं वेत्यर्थः, पचन्ति = श्रपयन्ति, पुस्तकान्तरेषु **'निर्वपन्ति'** इति पाठस्तस्य—ददतीत्यर्थः । अत्राऽर्थे = 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्प-येत् ।, इति याज्ञवल्क्यस्मृतिवचनं प्रमाणम् । समामनन्ति = उपदिशन्ति । अतो वसिष्ठागमनेन कपिलाया आलम्भने सौधातक्युद्भाटितो दोषो निराक्रियत इति भावः ।

सौधातकिरिति । निगृहीतोऽसि=पराजितोऽसि ।

दण्डायन—ओः ! यह क्या कहते हो ?

सौधातकि—जिनके आनेके बाद ही कपिल वर्णवाली बेचारी बछिया बलात्कारसे मड़मड़ शब्दवाली की गई (मारी गई) ।

दण्डायन—'मधुपर्क मांसके साथ देना चाहिये' इस देववाक्यका विशेष सम्मान करनेवाले गृहस्थलोग वैदिक अतिथिके लिए दो सालकी बछियाको या बड़े बैलको पकाते हैं । धर्मसूत्रकार इस धर्मकी आज्ञा देते हैं ।

सौधातकि—तुम पराजित हो गये ।

दण्डायनः—कथमिव ?

सौधातकिः—जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा। अज्ज एव्व पच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीइणा दहिमहूहिं एव्व णिव्वत्तिदो महुवक्को। वच्छतरी उण विसज्जिदा। (येनागतेषु वसिष्ठमिश्रेषु वत्सतरी विशसिता। अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना दधिमधुभ्यामेव निर्वर्तितो मधुपर्कः। वत्सतरी पुनर्विसर्जिता।

दण्डायनः—अनिवृत्तमांसानामेवं कल्पं व्याहरन्ति केचित्। निवृत्तमांसस्तु तत्रभवान् जनकः।

सौधातकिः—किंणिमित्तम् ? (किंनिमित्तम् ?)

दण्डायनः—यद्देव्याः सीतायास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः

दण्डायन इति। कथमिव = केन प्रकारेण ?

सौधातकिरिति। वसिष्ठमिश्रेषु = पूजनीयवसिष्ठेषु, विशसिता = हता। दधिमधुभ्यामेव = केवलेन दध्ना मधुना, न तु मांससहितेनेति भावः। निर्वर्तितः = निष्पादितः। विसर्जिता = मुक्ता, न त्वालब्धेत्यर्थः, अतः, 'समांसो मधुपर्क' इति त्वदीयं वचनं परास्तमिति भावः।

दण्डायन इति। अनिवृत्तमांसानाम् = अवर्जितमांसानाम्, एवं कल्पम् = एतादृशं 'समांसो मधुपर्क' इति विधिं, केचित् = आपस्तम्बादयो धर्मशास्त्रकाराः। व्याहरन्ति = प्रतिपादयन्ति। तत्र भवान् = पूजनीयः, निवृत्तमांसः = वर्जितमांसः।

सौधातकिरिति। किंनिमित्तम् = किमस्ति कारणम्, यज्जनको निवृत्तमांसो जात इति भावः।

दण्डायन इति। दैवदुर्विपाकम् = भाग्यदुष्परिणामम्, निर्वासनरूपमित्यर्थः।

दण्डायन—कैसे !

सौधातकि—क्योंकि वसिष्ठजीके आनेपर बछिया मारी गई, परन्तु भगवान् वाल्मीकिने आज ही आये हुए राजर्षि जनकका मधुपर्क दही और मधु (शहद) से ही संपन्न किया और बछियाको छोड़ दिया।

दण्डायन—कुछ धर्मशास्त्रकार मांसका परित्याग न करनेवालोंको ऐसी (मधुपर्क मांससहित होना चाहिए) विधि बतलाते हैं, परन्तु पूजनीय जनक महाराजने तो मांसका परित्याग कर दिया है ?

सौधातकि—किस कारणसे ?

दण्डायन—महारानी सीताका वैसा भाग्यका दुष्परिणाम सुनकर जनक वानप्रस्थाश्रमी

संवृत्तः, तस्य कतिपयसंवत्सरश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य ।

सौधातकिः—तदो किंति आअदो ? (ततः किमित्यागतः ?)

दण्डायनः—संप्रति च प्रियसुहृदं भगवन्तं प्राचेतसं द्रष्टुम् ।

सौधातकिः—अवि अज्ज संबन्धिणीहिं समं णिउत्तं दंसणं से ण वेत्ति ? (अप्यद्य सम्बन्धिनीभिः समं निर्वृत्तं दर्शनमस्य न वेति ?) ।

दण्डायनः—संप्रत्येव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता । यथा 'स्वयमुपेत्य स्नेहादयं द्रष्टव्य' इति ।

सौधातकिः—जह एदे ठुविरा परप्परं एत्थ मिलिदा, तह अह्मे वि वडुहिस्सह मिलअ अणज्झाअमूसवं खेलन्तो मणोम्ह । अह कुत्थ सो

वैखानसः = वानप्रस्थः, तप्यमानस्य = आचरतः, कतिपयसंवत्सरः = कतिपयहायनः, व्यतीत इति शेषः ।

सौधातकिरिति । ततः = चन्द्रद्वीपतपोवनात् , किमिति = केन हेतुना ।

दण्डायन इति । सम्प्रति = अधुना, प्रियसुहृदम् = अभीष्टमित्रं, **'चिरन्तनप्रियसुहृदम्'** इति पुस्तकान्तरपाठस्तत्र—चिरन्तनं=प्राचीनमित्यर्थः । प्राचेतसं= वाल्मीकिम् ।

सौधातकिरिति । अपि = शब्दोऽयं प्रश्नार्थकः, सम्बन्धिनीभिः = जामातृमातृभिः, कौसल्यादिभिरित्यर्थः, समं = सह, अस्य=जनकस्य, दर्शनम्=साक्षात्कारः, निर्वृत्तं = निष्पन्नम् ।

दण्डायन इति । सकाशम् = समीपम् , 'सदेशाऽभ्याशसविधसमर्यादसवेशवत् ।' इत्यमरः, प्रहिता = प्रेषिता, स्वयम् = आत्मना, अयम् = जनकः ।

सौधातकिरिति । स्थविराः = वृद्धाः, 'प्रवयाः स्थविरो वृद्धो जीनो जीर्णो

हो गये हैं और चन्द्रद्वीप नामक तपोवनमें तपस्या करते हुए उनके कई साल बीत गये हैं ।

सौधातकि—तब यहां क्यों आये हुए हैं ?

दण्डायन—इस समय प्रिय मित्र भगवान् वाल्मीकिको देखनेके लिए आये हुए हैं ।

सौधातकि—आज सम्बन्धिनियों (कौसल्यादिकों) के साथ इनका साक्षात्कार हुआ कि नहीं ?

दण्डायन—अभी ही भगवान् वसिष्ठने कौसल्याके समीप भगवती अरुन्धतीको भेजा है कि—'वे (कौसल्या) स्वयं आकर स्नेहपूर्वक जनकका साक्षात्कार करें' ।

सौधातकि—जिस तरह ये बुड्ढे परस्पर मिल गये है, उसीतरह हम दोनों भी बालकोंके

जणओ ? (यथैते स्थविराः परस्परमेव मिलिताः, तथावामपि वटुभिः सह मिलित्वाऽनध्यायमहोत्सवं खेलन्तौ मानयावः । अथ कुत्र स जनकः ?)

दण्डायनः—तथायं प्राचेतसवसिष्ठावुपास्य संप्रत्याश्रमस्य बहिर्वृक्षमूलमधितिष्ठति । य एषः—

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते ।
अन्तःप्रसृप्तदहनो जरन्निव वनस्पतिः ॥ २ ॥

(इति निष्क्रान्तौ ।)

इति मिश्रविष्कम्भकः ।

जरन्नपि' । इत्यमरः, वटुभिः = अन्यैः बालकैः, अनध्यायमहोत्सवम्=अनध्यायः= अध्ययनाऽभावः एव महोत्सवः = महाक्षणः, तम् ; अनध्यायस्य आनन्दहेतुत्वादुत्सवरूपत्वम् । खेलन्तः = क्रीडन्तः, 'लक्षणहेत्वोः क्रियायाः' इति हेत्वर्थे शतृप्रत्ययः, खेलनेनेत्यर्थः । मानयावः = सम्भावयावः । कुत्र=क्व ।

दण्डायन इति । अयम्=जनकः । पुस्तकान्तरेषु तु **'ब्रह्मवादी पुराणराजर्षिर्जनकः'** इति पाठान्तरन्तत्र—ब्रह्मवादी=वेदव्याख्यातेत्यर्थः । प्राचेतसवसिष्ठौ, उपास्य = सेवित्वा, सविनयदर्शनाऽभिवादनादिभिः परिचर्येति भावः । वृक्षमूलम् = तरुमूलम् , 'अधिशीङ्स्थाऽऽसां कर्म' इति आधारस्य कर्मत्वम् ।

हृदीति । हृदि नित्याऽनुषक्तेन सीताशोकेन (य एषः) अन्तःप्रसृप्तदहनः जरन् वनस्पतिरिव तप्यत इत्यन्वयः । हृदि = हृदये, चित्त इत्यर्थः । नित्याऽनुषक्तेन = निरन्तरलग्नेन, सीताशोकेन=सीताविषयकदुःखेन । (य एषः = जनकः) अन्तःप्रसृप्तदहनः = अन्तः = अभ्यन्तरे, प्रसृप्तः = व्याप्तः, दहनः = अग्निः, यस्य सः, जरन् = जीर्णः, अन्यत्र **'ज्वलन्'** इति पाठस्तस्य दहन्नित्यर्थः, वनस्पतिरिव = वृक्ष इव, तप्यते = तापमनुभवति । अत्रोपमाऽलङ्कारः । **अनुष्टुब् वृत्तम्** ॥ २ ॥

मिश्रेति । मिश्रविष्कम्भकः = संस्कृतप्राकृतात्मकविष्कम्भक इत्यर्थः । साहित्य-

---

साथ मिलकर खेलते हुए अनध्यायके महोत्सवका संमान करें । तो वे जनक अभी कहां हैं ?

दण्डायन—वे (जनक) महर्षि वाल्मीकि और वसिष्ठका अभिवादन कर इस समय आश्रमके बाहर पेड़के नीचे बैठे हुए हैं । जो ये—

हृदयमें निरन्तर विद्यमान सीताके शोकसे—जिसके भीतर आग फैली हुई है, ऐसे जीर्ण वृक्षकी तरह सन्तापका अनुभव कर रहे हैं ॥ २ ॥ (दोनों चले जाते हैं)

मिश्रविष्कम्भक समाप्त ।

(ततः प्रविशति जनकः ।)

जनकः—

अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति ॥ ३ ॥

दर्पणकारमते तु मध्यमपात्राभ्यां दण्डायनसौधातकिभ्यां प्रयुज्यमानत्वादयं शुद्ध-विष्कम्भकस्तल्लक्षणं यथा—'मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात्' इति ।

अपत्य इति । अपत्ये यत् तादृक् दुरितम् अभवत्, महता तीव्रेण व्रणित-हृदयेन व्यथयता तेन विषक्तः पटुः धारावाही चिरेण अपि नव इव मे मन्युः क्रकच इव मर्माणि निकृन्तन् न विरमति इत्यन्वयः । अपत्ये = सीतायामित्यर्थः, यत्, तादृक् = तादृशं दुरितं = लोकाऽपवादरूपं पापं निर्वासनं वा, अभवत् = सञ्जातं, महता=दुरन्तेन, तीव्रेण = अतिकठोरेण, व्रणितहृदयेन=व्रणितं = व्रणयुक्तम्, हृदयं = वक्षःस्थलं येन तेन, अत एव व्यथयता = व्यथां कुर्वता, तेन = पूर्वोक्तेन सीताऽपवादरूपेण पापेन, विषक्तः = विशेषेण सम्बद्धः, पटुः = समर्थः, निकृन्तन-समर्थ इत्यर्थः । धारावाही = धारया=निरन्तरसन्तत्या वहतीति तच्छीलः, निरन्तर-मवस्थित इत्यर्थः । चिरेणाऽपि = बहुकालेनाऽपि, नव इव = नूतन इव, मे = मम, जनकस्येत्यर्थः । मन्युः = सीताविषयकः शोकः कोपो वा, क्रकच इव=करपत्रमिव, मर्माणि = हृदयादिमर्मस्थलानि, निकृन्तन्=छिन्दन्, न विरमति = न शाम्यति, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । करपत्रं यथा मर्मस्थलानि विदारयति, बहुकालाऽनन्तरमपि तथैव सीताविषयकः शोको मदीयमर्मस्थलानि निकृन्ततीति भावः । अत्र **उपमोत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः । शिखरिणी** वृत्तम् ॥ ३ ॥

(उसके बाद जनक प्रवेश करते हैं ।)

जनक—सन्तान (सीता) में जो उस तरहका लोकाऽपवादरूप दुःख हुआ; दुरन्त अति कठोर, हृदयको क्षत और दुःखित करनेवाले उस दुःखसे विशेषतः सम्बद्ध, हृदयका छेदन करनेमें समर्थ, निरन्तर रहनेवाला और बहुत काल बीतने पर भी नूतनके तुल्य अवस्थित मेरा शोक मर्मस्थलोंको आरेकी तरह विदारण करता (चीरता) हुआ शान्त नहीं होता है ॥ ३ ॥

कष्टम् ! एवं नाम जरया दुःखेन च दुरासदेन भूयः पराकसान्तपनप्रभृतिभिस्तपोभिः शोषितान्तःशरीरधातोरवष्टम्भ एव ! महानद्यापि मम दग्धदेहो न पतति । 'अन्धतामिस्रा ह्यसूर्या नाम ते लोकाः प्रेत्य तेभ्यः

कष्टमिति । कष्टं = दुःखम् , जरया = वार्धकेन, दुरासदेन = दुःसहेन, सीतावियोगोत्पन्नेनेति भावः । भूयः = पुनरपि पराकसान्तपनप्रभृतिभिः=पराकः=द्वादशदिनोपवाससाध्यो व्रतविशेषः, सान्तपनम्=दिनद्वयसाध्यो व्रतविशेषः, तौ प्रभृती= आदी येषां तैः । पराकलक्षणं यथाऽऽह भगवान्मनुः—'यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको नाम कृच्छ्रोऽयं सर्वपापाऽपनोदनः ॥' इति । सान्तपनलक्षणमपि—'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥' इति । तादृशैस्तपोभिः = व्रतादिभिः, शोषिताऽन्तःशरीरधातोः = शोषिताः=नीरसीकृताः, अन्तःशरीरधातवः = अन्तर्देहधातवो यस्य तस्य तादृशस्य मम, अवष्टम्भ एव=प्राणाऽवलम्बनमेव, कथमहं जीवामीति भावः । पुस्तकान्तरेषु तु तपोभिरित्यनन्तरम् **'आत्तरसधातुरनुपयुज्यमान'** इति पाठान्तरम्तत्र आत्तरसधातुः=आत्ता =गृहीताः, रसाः=शरीरस्थाश्शोणितादयो द्रवाः, धातवः = मांसादयो यस्य सः । अनुपयुज्यमानः = अक्रियमाणोपयोगः, अन्नादिपुष्टिमप्राप्नुवन्नित्यर्थः, दग्धदेहः=निन्दितशरीरं, हतहृदयमितीव निन्दायां दग्धशब्दः । अद्याऽपि = अस्मिन्दिवसेऽपि न पतति = न विनश्यति । यदि जीवनं भारभूतं तर्हि क्रियतामात्महत्येत्यत्राह- **अन्धतामिस्रा इति** । अन्धतामिस्राः=तमिस्रमेव तामिस्रं स्वार्थे अण् । अन्धम् = अन्धकरणम् , तामिस्रं=तिमिरं येषु ते, सूर्यादिना तमोनाशकेनाऽपि तत्र भाव्यमित्यत आह—असूर्याः = सूर्यरहिताः, भगवत्पादैस्तु ईशावास्योपनिषद्भाष्ये 'असुर्या' इति पाठोऽभ्युपगतस्तत्र असुरसम्बन्धिन इत्यर्थः । ते = प्रसिद्धाः, आत्मघातिनः = आत्मानं घ्नन्तीति तच्छीलाः=आत्महत्याकारिणः, प्रेत्य= मृत्वा, तेभ्यः = अन्धतामिस्रादिलक्षणयुक्तेभ्यो लोकेभ्यः, तादर्थ्ये चतुर्थी । प्रतिविधीयन्ते = पापफलभोगाऽर्थं नियुज्यन्त इति भावः । 'असुर्या नाम ते लोका

कष्ट है ! इस तरह बुढ़ापा, दुःसह दुःख और फिर पराक तथा सान्तपन आदि तपस्याओंसे शरीरके भीतर रही हुई धातुओंके शोषण होनेपर भी प्राणका अवलम्बन ही हो रहा है। महान् और दग्धप्राय मेरा शरीर अभी भी नहीं गिरता है । 'जो आत्महत्या करनेवाले हैं, मरनेपर उनको अन्धा करनेवाले, अन्धकारसे युक्त सूर्यरहित लोक मिलते हैं, ऋषिलोग ऐसा

प्रतिविधीयन्ते, य आत्मघातिन' इत्येवमृषयो मन्यन्ते । अनेकसंवत्सरातिक्रमेऽपि प्रतिक्षणपरिभावनास्पष्टनिर्भासः प्रत्यग्र इव न मे दारुणो दुःखसंवेगः प्रशाम्यति । अयि मातर्देवयजनसंभवे ! ईदृशस्ते निर्माणभागः परिणतः ! येन लज्जया स्वच्छन्दमप्याक्रन्दितुं न शक्यते । हा पुत्रि !

अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि स्खलदसमञ्जसमञ्जुजल्पितं ते ॥

अन्धेन तमसा वृताः । तांस्ते प्रेत्याऽभिगच्छन्ति ये के चात्महनो जनाः ॥' इति श्रुतेः, अत आत्मघात्यपि नैव भवामीति तात्पर्यम् । अनेकसंवत्सराऽतिक्रमेऽपि = बहुकालयापनेऽपि, प्रतिक्षणपरिभावनास्पष्टनिर्भासः = प्रतिक्षणं=सन्ततम्, परिभावनया=सीताविषयिण्या चिन्तया, स्पष्टः=स्फुटः, निर्भासः=प्रकाशो यस्य सः । प्रत्यग्र इव = नूतन इव, 'प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ।' इत्यमरः । दारुणः = कठोरः, दुःखसंवेगः = कष्टप्रवाहः, न प्रशाम्यति = न नश्यति । ईदृशः = एतादृशः, निर्वासनदुःखभोगात्मक इति भावः, निर्माणभागः = सृष्टिफलम् । येन = निर्माणभागेन, आक्रन्दितुं = रोदितुम् , न शक्यते = नो पार्यते ।

अनियतेति । अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुड्मलाग्रं स्खलदसमञ्जसमञ्जुजल्पितं शिशोः ते वदनकमलकं स्मरामि इत्यन्वयः । अनियतरुदितस्मितम् = अनियते = नियमरहिते, निर्हेतुकत्वादिति भावः, रुदितस्मिते = रोदनहासौ यस्मिंस्तत । विराजत्कतिपयकोमलदन्तकुड्मलाऽग्रम् = विराजन्ति = शोभमानानि, कतिपयानि = कियन्ति, कोमलानि = मृदूनि, दन्तकुड्मलाग्राणि = दशनमुकुलाऽग्राणि यस्मिंस्तत् । दन्तकुड्मलाऽग्राणीत्यत्र-दन्ताः कुड्मलाग्राणीवेत्युपमितसमासः । एवं च स्खलदसमञ्जसमञ्जुजल्पितं—स्खलत् = गद्गदीभवत् , असमञ्जसं = पूर्वाऽपरसंगतिरहितम् , मञ्जु = सुन्दरम् , **'मुग्धम्'** इति पाठे मधुरम् इत्यर्थः, एतादृशं जल्पितं = वचनम् यस्मिंस्तत् । जल्पितमित्यत्र 'नपुंसके भावे क्त' इति क्तः । शिशोः = बालिकायाः, ते = तव, सीताया इत्यर्थः । वदनकम-

मानते हैं। अनेक वर्षोंके बीतनेपर भी निरन्तरकी चिन्तासे स्पष्ट प्रकाशवाला अत एव नया-सा होकर मेरा कठोर दुःखसंवेग शान्त नहीं होता है। हे मातः! यज्ञभूमिमें उत्पन्न सीते! तुम्हारा सृष्टिफल ऐसा परिणत हुआ, जिससे लज्जाके कारण स्वच्छन्दताके साथ रोना भी कठिन है। हा पुत्रि!—

कारणके बिना भी रोने और हंसनेवाले, कलियोंके अग्रभागोंके तुल्य कुछ दांतोंसे

भगवति वसुन्धरे ! सत्यमतिदृढासि ।

त्वं वह्निर्मुनयो वसिष्ठगृहिणी, गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवतीं, शुद्धिं गतायाः पुन-

लकं = वदनं कमलमिव वदनकमलम्, 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इत्युपमितकर्मधारयः । अनुकम्पितं वदनकमलमिति वदनकमलकं=मुखपद्मकमित्यर्थः, 'अनुकम्पायाम्' इत्यनुकम्पाया कन्, स्मरामि = चिन्तयामि । आरब्धस्य स्मरणस्य निरन्तरं प्रवर्तमानत्वेन समाप्त्यभावाद्वर्तमानकालनिर्देशः । अत्र **स्वभावोक्त्युपमयोरङ्गाङ्गिभावेन सङ्करः । पुष्पिताग्रा वृत्तम्** ॥ ४ ॥

भगवतीति । अतिदृढा = अतिकठिना ।

त्वमिति । हे दारुणे ! यस्या माहात्म्यं त्वं वह्निः मुनयो वसिष्ठगृहिणी गङ्गा रघोः कुलगुरुः यदि वा देवः भास्करः स्वयं विदुः । वाक् विद्यामिव भवती याम् असूत, शुद्धिं गतायाः त्वद्दुहितुः पुनः तथा विशसनं किं मृष्यथा इत्यन्वयः । हे दारुणे = हे कठिने !, यस्याः = सीतायाः माहात्म्यं = महिमानं, पातिव्रत्यमित्यर्थः । त्वं = पृथिवी, वेत्सीति शेषः, एवं च वह्निः = अग्निः, मुनयः = वाल्मीक्यादय ऋषयः, वसिष्ठगृहिणी = वसिष्ठपत्नी, अरुन्धतीत्यर्थः । गङ्गा=भागीरथी, = रघोः = दिलीपपुत्रस्य, राज्ञः, कुलगुरुः = वंशाचार्यः, वसिष्ठ इत्यर्थः । यदि वा = अथ वा, देवो भास्करः = सूर्यः, स्वयम् = आत्मना, न तु परोपदेशद्वारेति भावः । यस्याः = माहात्म्यं विदुरिति संबन्धो योज्यः । वाक् = सरस्वती, 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।' इत्यमरः, विद्याम् इव = शास्त्रम् इव, भवती = त्वं, यां = सीताम्, असूत = सूतवती, शुद्धिं=वह्निशुद्धिं पवित्रतामित्यर्थः । गतायाः=प्राप्तायाः, त्वद्दुहितुः = त्वत्पुत्र्याः, सीताया इत्यर्थः, पुनः = भूयः, रावणहननाऽनन्तरमिति

शोभित, अधूरे अक्षरोंवाले, असम्बद्ध और सुन्दर वचनोंसे युक्त शैशवावस्थाके तुम्हारे कमल-तुल्य मुखको याद करता हूं ॥ ४ ॥

भगवति पृथिवि ! सचमुच, तुम बहुत कठोर हो ।

हे कठिन चित्तवाली पृथिवि ! जिसकी महिमा तुम, अग्निदेव, ऋषिलोग, वसिष्ठपत्नी अरुन्धती, गङ्गा, रघुवंशगुरु वसिष्ठ अथवा प्रकाशशील भगवान् सूर्य स्वयं जानते हैं । जैसे सरस्वती विद्याको उत्पन्न करती हैं, वैसेही तुमने जिसको उत्पन्न किया; अग्निशुद्धिसे सम्पन्न उस पुत्री

स्तस्यास्त्वद्दुहितुस्तथा विशसनं किं दारुणे मृष्यथाः ? ॥ ६ ॥

(नेपथ्ये)

इत इतो भगवती-महादेव्यौ ।

जनकः[1]—अये ? गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती (उत्थाय ।) कां पुनर्महादेवीत्याह ? (निरूप्य) हा हा ! कथमियं महाराजस्य दशरथस्य धर्मदाराः प्रियसखी मे कौसल्या ? क एतां प्रत्येति सैवेयमिति नाम ? ।

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।

भावः । तथा=तेन रूपेण, भीषणप्रकारेणेति भावः । विशसनं=हिंसनं, सीतापरित्यागरूपमित्यर्थः । किं मृष्यथाः = कथं सोढवती, स्वपुत्र्यां तथाविधक्रूरव्यापारे जातेऽपि यत्तव सहनं यदेव त्वदीयमतिदारुणत्वं सूचयतीति भावः । अत्रोपमा तुल्ययोगिता च, द्वयोर्मिथोऽनपेक्षया स्थितेः संसृष्टिः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

इत इत इति । इतः इतः = अस्मिन्नस्मिन्मार्गे ।

जनक इति । गृष्टिना = तन्नाम्ना दशरथकञ्चुकिना, उपदिश्यमानमार्गा = उपदिश्यमानः = निर्दिश्यमानः,मार्गः=पन्थाः, यस्याः सा । निरूप्य=हेतुभिर्विचार्य, सम्यग्दृष्ट्वेत्यर्थः । महादेवी=महाराज्ञी, इयं=दृश्यमाना, सैव=प्रागदृष्टैव, प्रत्येति = प्रत्यभिजानाति ।

आसीदिति । इयं दशरथस्य गृहे श्रीर्यथा आसीत् , वा श्रीरेव । उपमानपदेन किम् ? कष्टं बत ! दैववशेन अन्यत् किमपि दुःखात्मकं भूतम् इव जाता, अहो ! विकार इत्यन्वयः । इयं = पुरःस्थिता, कौसल्येत्यर्थः । दशरथस्य=मत्सम्ब-

---

सीताका उस तरहसे परित्यागरूप हिंसाको मनमें कैसे सह लिया ? ॥ ५ ॥

(नेपथ्यमें)

भगवती और महारानी यहांसे पधारें, यहांसे पधारें ।

जनक - अरे ! भगवती अरुन्धती हैं, जिनको गृष्टि नामक कञ्चुकी मार्ग दिखा रहे हैं । (उठकर) फिर महारानी किसको कहा है ? (अच्छी तरह देखकर) हाय हाय ! कैसे ये महाराज दशरथकी धर्मपत्नी और मेरी प्रिय सखी कौसल्या आ गई ? ये वही हैं, ऐसे कौन इनको पहचानेगा ? !

ये दशरथके भवनमें लक्ष्मीके सदृश थीं, अथवा लक्ष्मी ही थीं, औपम्यबोधक शब्दसे क्या

---

१. '(दृष्ट्वा)' इति पुस्तकान्तरेऽधिकः पाठः ।

कष्टं बतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो विकारः ॥ ६ ॥[1]
य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः ।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् ॥ ७ ॥
(ततः प्रविशत्यरुन्धती कौसल्या कञ्चुकी च ।)

अरुन्धती—ननु ब्रवीमि 'द्रष्टव्यः स्वयमुपेत्यैव वैदेह' इत्येवं वः कुल-

न्धिनः, गृहे=भवने, श्रीर्यथा=लक्ष्मीरिव, आसीत्=अभवत्, वा=अथवा, श्रीरेव = लक्ष्मीरेव, आसीदिति शेषः । उपमानपदेन = औपम्यबोधकशब्देन, 'इव' पदे-नेत्यर्थः, किं = न किञ्चित्प्रयोजनमिति भावः । कष्टं = दुःख, बत = हा !' सा = प्राग्लक्ष्मीरूपा, एषा = पुरःस्थिता कौसल्या, दैववशेन = भाग्यवशेन, अन्यत् = अपरं, किमपि = वाचामनिर्वाच्यं, दुःखात्मकं = दुःखस्वरूपं, भूतं = प्राणिविशेषः, साक्षादलक्ष्मीरिति भावः, जाता = संवृत्ता, उद्देश्यप्राधान्यात्स्त्रीलिङ्गनिर्देशः । अहो=आश्चर्यम् , विकारः=विकृतिः, दुष्परिणाम इति भावः । अत्रोपमाऽतिशयो-क्त्युत्प्रेक्षाणां मिथोऽनपेक्षया संसृष्टिः । वसन्ततिलका वृत्तम् ॥ ६ ॥

य एवेति । य एव जनः पूर्वं मे मूर्तो महोत्सव आसीत् । (अद्य) तस्यैव दर्शनं क्षते क्षारम् इव असह्यं जातम् इत्यन्वयः । य एव जनः = कौसल्यारूपो नाऽन्य इति भावः, पूर्वं = प्राक् , दशरथजीवनस्य सीताया गृहाऽवस्थानस्य च समय इति भावः । मे = मम, सम्बन्धिन इति भावः । मूर्तः = मूर्तिमान् , महोत्सवः= आनन्दप्रकर्षहेतुः, आसीत् = अभवत् । (अद्य = अस्मिन्दिने) तस्यैव = कौस-ल्यारूपस्य जनस्यैव, दर्शनं = विलोकनं, क्षते = शस्त्रादिच्छिन्ने व्रणे वा, क्षारमिव= लवणमिव, असह्यं = सोढुमशक्यं, जातं = संवृत्तम् । अत्रोपमाऽलङ्कारः ॥ ७ ॥

अरुन्धतीति । ननु = सम्बोधनाऽर्थोयं शब्दः, उपेत्य = समीपं गत्वा,

प्रयोजन है ! कष्ट है, हाय ! ये वे ही भाग्यवश दूसरे कोई दुःखस्वरूप प्राणीके सदृश हो गई । आश्चर्य है ! यह विकार है ॥ ६ ॥

ये ही कौसल्या पहले मेरे लिए मूर्तिमान् महोत्सवस्वरूप होती थीं, आज इन्हींका दर्शन कटे हुएपर नमकको तरह असह्य हो रहा है ॥ ७ ॥

(तब अरुन्धती, कौसल्या और कञ्चुकी प्रवेश करते हैं ।)

अरुन्धती—अरे ! मैं कहती हूँ कि 'स्वयम् समीप जाकर ही महाराज जनकका दर्शन

१. इतोऽग्रे 'अयमपरः पापो दशाविपर्यासः' इति पाठान्तरम् ।

गुरोरादेशः । अत एव चाहं प्रेषिता । तत्कोऽयं पदे पदे महानध्यवसायः ?

कञ्चुकी—देवि ! संस्तभ्यात्मानमनुरुध्यस्व भगवतो वसिष्ठस्यादेशमिति विज्ञापयामि ।

कौसल्या—ईरिसे काले मिहिलाहिवो मए दिट्ठव्वो त्ति समं एव्व सव्वदुःखाइं ओदरन्ति । ता ण सक्कणोमि उव्वट्टमाणमूलबन्धणं हिअअं पज्जवत्थाविदुम् (ईदृशे काले मिथिलाधिपो मया द्रष्टव्य इति सममेव सर्वदुःखान्यवतरन्ति । तस्मान्न शक्नोम्युद्वर्तमानमूलबन्धनं हृदयं पर्यवस्थापयितुम् ।)

अरुन्धती—अत्र कः सन्देहः ?

सन्तानवाहीन्यपि मानुषाणां दुःखानि सम्बन्धिवियोगजानि ।

वैदेहः = विदेहराजः, जनक इत्यर्थः । वः = युष्माकं, कुलगुरोः=वसिष्ठस्य, आदेशः आज्ञा । पदे पदे = प्रतिपदम्, प्रतिपादन्यासमिति भावः । महाऽनध्यवसायः = महती अप्रवृत्तिः, जनकदर्शन इति शेषः ।

कञ्चुकीति । आत्मानं = धृतिम्, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' । इत्यमरः, संस्तभ्य = स्थिरीकृत्य, अनुरुध्यस्व = अनुसर ।

कौसल्येति । ईदृशे = एतादृशे, सीतावियुक्त इति भावः । समं = युगपत्, अवतरन्ति=प्राप्नुवन्ति, **'समुद्भवन्ति'** इति पाठे-उत्पद्यन्त इत्यर्थः । उद्वर्तमानमूलबन्धनम् = उद्वर्तमानम् = उद्गच्छत्, मूलबन्धनं=मूलनियन्त्रणम्, यस्य तत्, शिथिलबन्धनमिति भावः । एतादृशं हृदयं, पर्यवस्थापयितुं = प्रकृतिस्थं कर्तुम् ।

सन्तानेति । मानुषाणां सन्तानवाहीन्यपि सम्बन्धिवियोगजानि दुःखानि प्रेयसि जने दृष्टे दुःसहानि (सन्ति) स्रोतःसहस्रैः संप्लवन्त इव इत्यन्वयः ।

करना चाहिए' ऐसा आपके कुलगुरु (वसिष्ठजी) की आज्ञा है । इस कारणसे मैं भेजी गई हूं ! तब पग पगपर यह कैसी आपकी भारी अप्रवृत्ति है ?

कञ्चुकी महारानी ! मैं निवेदन करता हूं कि धैर्यधारण कर भगवान् वसिष्ठकी आज्ञाका अनुसरण करें ।

कौसल्या—ऐसे समयमें मिथिलाऽधीश्वरका दर्शन करना होगा, इसलिए सब दुःख एक साथ प्राप्त होते हैं । इस कारणसे शिथिल बन्धनवाले हृदयको मैं सँभाल नहीं सकती हूं ।

अरुन्धती—इसमें क्या सन्देह है ?

मनुष्योंके अविच्छिन्न भावसे बहनेवाले बन्धुवियोगसे उत्पन्न दुःख, प्रियजनके देखे-

दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्ते ॥ ८ ॥

कौसल्या—कहं णु खु बच्छाए मे वहूए वनगदाए तस्सा पिदुणो राएसिणो मुहं दंसम्ह ? (कथं नु खलु वत्साया मे वध्वा वनगतायास्तस्याः पितृराजर्षेर्मुखं दर्शयामः ?)

अरुन्धती—

एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥ ९ ॥

कौसल्या—एसो सो महाराअस्स हिअअणिव्विसेसो बच्छाए मे वहूए

मानुषाणां = मनुष्याणां, सन्तानवाहीन्यपि=अविच्छेदेन वहनशीलान्यपि, सम्बन्धिवियोगजानि = सम्बन्धिनः = बन्धोः, वियोगात् = विरहात , जायन्त इति, बन्धुविरहोत्पन्नानीति भावः । एतादृशानि कष्टानि = दुःखानि, प्रेयसि = प्रियतरे, जने= मनुष्ये, दृष्टे = साक्षात्कृते, दुःसहानि = सोढुमशक्यानि (सन्ति), स्रोतःसहस्रैः = अनन्तप्रवाहैः, संप्लवन्त इव = उद्गच्छन्ति इव । अत्र क्रियोत्प्रेक्षालङ्कारः । इन्द्रवज्रा वृत्तम् ॥ ८ ॥

कौसल्येति । वत्सायाः = वात्सल्यभाजः, वध्वाः = स्नुषायाः, सीताया इत्यर्थः, पितुः = जनकस्य, सम्बन्धमात्रविवक्षायां षष्ठी, जनकेनेत्यर्थः ।

एष इति । एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः (अस्ति) । यस्मै याज्ञवल्क्यो मुनिः ब्रह्मपारायणं जगौ इत्यन्वयः । एषः = पुरःस्थितः, वः = युष्माकं, श्लाघ्यसम्बन्धी = श्लाघ्यः = प्रशसनीयश्चासौ सम्बन्धी = पुत्रश्वशुरः, जनकानां = जनकवंशोत्पन्नानां राज्ञां, कुलोद्वहः = कुलस्य = वंशस्य, उद्वहः = श्रेष्ठः, अस्तीति शेषः । यस्मै = जनकाय, याज्ञवल्क्यः = तन्नामकः, मुनिः = ऋषिः, ब्रह्मपारायणं = ब्रह्मणः = वेदस्य, पारायणम् = साकल्यवचनम् , उपनिषत्प्रमाणं वेदान्तमित्यर्थः । जगौ=गीतवान , उपदिदेशेत्यर्थः । याज्ञवल्क्यमहर्षिरपि यं जनकं वेदान्तमध्यापयदिति भावः ॥ ९ ॥

कौसल्येति । महाराजस्य = दशरथस्य, हृदयनिर्विशेषः = हृदयात्=चित्तात्

जानेपर दुःसह होते हुए अनन्तप्रवाहोंसे बहनेवालेकी तरह प्रतीत होते हैं ॥ ८ ॥

कौसल्या—वात्सल्यभागिनी मेरी बहू (सीता) के वनमें जानेपर उसके पिता राजर्षि जनकको कैसे मुख दिखलाऊं ?

अरुन्धती—ये आपके प्रशंसनीय सम्बन्धी जनकवंशमें श्रेष्ठ हैं, जिनको याज्ञवल्क्य मुनिने वेदान्तका उपदेश किया था ॥ ९ ॥

कौसल्या—महाराज (दशरथ) के ये वे अभिन्नहृदय और वात्सल्यभागिनी मेरी बहूके

पिदा विदेहराओ सीरद्धओ । सुमरिदह्मि अणिव्वेदरमणीए दिवहे । हा देव्व ! सव्वं तं णत्थि । (एष स महाराजस्य हृदयनिर्विशेषो वत्साया मे वध्वाः पिता विदेहराजः सीरध्वजः । स्मारितास्मि अनिर्वेदरमणीयान्दिवसान । हा देव ! सर्वं तन्नास्ति ।)

जनक.–(उपसृत्य ।) भगवत्यरुन्धति ! वैदेहः सीरध्वजोऽभिवादयते ।

यया पूतंमन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः ।

निर्विशेषः = निर्भेदः, अभिन्नहृदय इत्यर्थः, सीरः = सूर्यो हलं वा, ध्वजे । पताकायां, यस्य सः चिह्नरूपेणेत्यर्थः । अनिर्वेदरमणीयान् = अविद्यमानः अवर्तमानः निर्वेदः=चित्तग्लानिः, येषु ते । अनिर्वेदाश्च ते रमणीयाः=आनन्दहेतवः, तान् दिवसान्=दिनानि, स्मारिता=कारितस्मरणा, अस्मि=भवामि, सुखमयदिवसविषयकस्मरणवती कृतास्मीति भावः । पुस्तकान्तरेषु तु **'सम्भाविताऽस्मि अनुपस्थितमहोत्सवे दिवसे'** इति पाठस्तत्र अनुपस्थितमहोत्सवे=सीतापरित्यागेन अनुपस्थितः = नाशं गतः, महोत्सवः=महाऽऽनन्दहेतुः, यस्मिंस्तस्मिन् । दिवसे=दिने सम्भाविता = सत्कृता, अस्मि=भवामि, आगमनेनेति भावः । हा = दुःखं, देव = महाराज, तत् = प्रागनुभूतं, संयोगाऽवस्थायामिति भावः । सर्वं = सकलं, सुखमिति शेषः ।

जनक इति । अभिवादयते = नमस्करोति भवतीमिति शेषः ।

ययेति । पवित्रस्य महसो निधिरपि पूर्वेषां गुरूणां गुरुतमः (अपि) ते पतिः यया पूतंमन्यः खलु, त्रिलोकीमङ्गल्यां जगद्वन्द्यां देवीम् उषसम् इव भवतीम् अवनितललीनेन शिरसा वन्दे इत्यन्वयः । पवित्रस्य = पूतस्य, 'पवित्रः प्रयतः पूत' इत्यमरः । महसः = तेजसः, निधिरपि = आधारोऽपि, पूर्वेषां = प्राचीनानां, गुरूणाम् = आचार्याणां, गुरुतमः = श्रेष्ठ आचार्योऽपि, ते = तव, अरुन्धत्या इत्यर्थः ।

पिता सीरध्वज हैं । चित्तग्लानिरहित और आनन्दके कारणभूत उन दिनोंकी याद हो आई है । हा देव ! अब वे सब कुछ भी नहीं हैं ।

जनक—(समीप जाकर) भगवति अरुन्धति ! विदेहवंशीय सीरध्वज आपको नमस्कार करता है ।

पवित्र तेजके आधारस्वरूप और प्राचीन आचार्योंमें श्रेष्ठ होते हुए भी आपके पति (वसिष्ठ जी) जिस (आप) से अपनेको पवित्र मानते हैं, लोकत्रयके मङ्गलके कारणस्वरूप,

त्रिलोकीमङ्गल्यामवनितललीनेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ १० ॥

अरुन्धती—अक्षरं ते ज्योतिः प्रकाशताम् । स त्वां पुनातु देवः परो रजसा य एष तपति ।

जनकः—आर्ये गृष्टि ! अप्यनामयमस्याः[1] प्रजापालकस्य मातुः ?

पतिः=भर्ता, यया=त्वया, पूतंमन्यः=आत्मानं पूतं मन्यते इति 'आत्ममाने खश्' इति खश् प्रत्ययः 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमश्च । खलु = निश्चयेन । त्रिलोकीमङ्गल्यां=त्रयाणां लोकानां समाहारस्त्रिलोकी । मङ्गलाय हिता मङ्गल्या, 'तस्मै हितम्' इति यत् । त्रिलोक्या मङ्गल्या तान् = लोकत्रयमङ्गलहेतुभूतामित्यर्थः । जगद्वन्द्यां = लोकनमस्कार्यां, देवीं = द्योतमानाम् , उषसमिव = प्रातःकालदेवतामिव भगवतीं = माहात्म्यसम्पन्नां, भवतीमिति शेषः । अवनितललीनेन = भूतलसम्बद्धेन, 'अवनितललोलेन' इति पाठे भूतलचञ्चलेनेत्यर्थः, शिरसा = मूर्ध्ना, वन्दे = नमामि । पूर्णोपमाऽलङ्कारः । शिखरिणी वृत्तम् ॥ १० ॥

अरुन्धतीति । अक्षरम् = अविनाशि, कूटस्थमित्यर्थः । पुस्तकान्तरे **'परम्'** इति पाठस्तत्र प्रधानमित्यर्थः, अनितरापेक्षमिति यावत् । ज्योतिः = प्रकाशः, ब्रह्मेत्यर्थः, प्रकाशताम् = आविर्भवतु । रजसा = रजआदिसमस्तदोषाणां, सम्बन्धसामान्ये षष्ठी, परः = दूरवर्ती । रजआदिदोषैरसंस्पृष्ट इति भावः, पुनातु = पवित्रं करोतु, **'परोरजा'** इति पाठे-रजसः पर इति विग्रहः, 'राजदन्तादिषु परम्' इति रजसः परनिपातः, 'पारस्करप्रभृतीनि च' इति सुट् , तपति = तापं करोति, तपनेन सर्वं लोकं जीवयतीति भावः । अत्र ब्रह्मणः प्रतीकत्वेन सविता लक्ष्यते ।

जनक इति । प्रजापालकस्य = जनरक्षकस्य, एतेन विशेषणेन न तु पत्नीरक्षकस्येत्यर्थो व्यज्यते, रामस्येति भावः । मातुः = जनन्याः, कौसल्याया इत्यर्थः, अनामयम् अपि = आरोग्यमस्ति किं, 'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम्' । इति स्मृतेरनामयप्रश्नः संगच्छते ।

लोकसे वन्दनीय, प्रातःकालकी अधिष्ठात्री देवीकी तरह माहात्म्यसम्पन्न आपको मैं पृथ्वीमें झुके हुए शिरसे नमस्कार करता हूँ ॥ १० ॥

अरुन्धती—आपको अविनाशी ज्योति स्वरूप ब्रह्म प्रकाशित हो । जो ये देवता प्रकाश करते हैं, रज आदि दोषोंसे असंस्पृष्ट, वे सूर्यदेव आपको पवित्र करें ।

जनक—आर्य गृष्टे ! प्रजापालक (राम) की माता आरोग्यवती हैं ?

१. 'अपि कुशलमस्याः' इति पाठान्तरम् ।

कञ्चुकी—(स्वगतम्।) निरवशेषमतिनिष्ठुरमुपालब्धाः स्म । (प्रकाशम्) राजर्षे ! अनेनैव मन्युना चिरपरित्यक्तरामभद्रदर्शनां नार्हसि दुःखयितुमतिदुःखितां देवीम् । रामभद्रस्यापि दैवदुर्योगः कोऽपि । यत्किल समन्ततः प्रवृत्तबीभत्सकिंवदन्तीकाः पौराः । न चाग्निशुद्धिमनल्पकाः प्रतियन्तीति दारुणमनुष्ठितं देवेन ।

जनकः—(सरोषम् ।) आः ! कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने ?

कञ्चुकीति । निरवशेषं = निःशेषं, 'निर्विशेषम्' इति पाठे निरतिशयमित्यर्थः । अतिनिष्ठुरम् = अतिशयकठोरम् , उपालब्धाः = कृतोपालम्भाः, 'प्रजापालकस्य मातुः' इति कथनेनेति भावः । अनेनैव=सीतानिर्वासनरूपहेतुनैव, मन्युना= कोपेन, चिरपरित्यक्तरामभद्रदर्शनां=चिरं=बहुकालम् , परित्यक्तं=परिमुक्तम् , रामभद्रदर्शनं=रामचन्द्रविलोकनम् , यया ताम् । अतिदुःखितां=सीताविरहेण तदुत्पन्नकोपकारितरामचन्द्रादर्शनेन चातिदुःखितामिति भावः । देवीं=महाराज्ञीं, दुःखयितुं=दुःखितां कर्तुम् । कोऽपि = अनिर्वाच्यः, दैवदुर्योगः = भाग्यदुःसम्बन्धः । यत् = यस्माद्धेतोः, किल = निश्चयेन, समन्ततः = सर्वतः, प्रवृत्तबीभत्सकिंवदन्तीकाः = प्रवृत्ता = प्रसृता, बीभत्सा=जुगुप्सिता, किंवदन्ती=जनश्रुतिः, यैस्ते, 'नद्यृतश्च' इति समासान्तः कप् , 'किंवदन्ती जनश्रुतिः' इत्यमरः । अनल्पकाः=अविद्यमानोऽल्पो येभ्यस्ते अन्यल्पाः क्षुद्रचित्ता इति भावः । अग्निशुद्धिम् = हुताशनकृतां सीतापरिशुद्धिं, न प्रतियन्ति = न विश्वसन्ति, इति = अस्माद्धेतोः, देवेन = रामभद्रेण, दारुणं = सीतानिर्वासनात्मकं भयानकं कर्म, अनुष्ठितम् = आचरितम् ।

जनक इति । आः = कोपव्यञ्जकमव्ययपदमिदम् , अस्मत्प्रसूतिपरिशोधने= अस्मत्प्रसूतेः = अस्मत्सन्ततेः, सीताया इत्यर्थः, परिशोधने = पवित्रीकरणे, मद्दुहितुः सीतायाः परिशोधनेऽनलो न समर्थस्तस्याः स्वतः शुद्धत्वादिति भावः ।

कञ्चुकी—(मन ही मन) इन्होंने कहनेमें कुछ बाकी न रखकर बड़ी निष्ठुरताके साथ हमलोगोंका उपालम्भ किया । (सुनाकर) राजर्षे ! इसी कोपसे रामभद्रका दर्शन छोड़नेवाली अतिशय दुःखित महारानी (कौसल्या) को और भी दुःखित करना आपको उचित नहीं है । रामभद्रका भी अनिर्वचनीय भाग्यका दुःसम्बन्ध है । जो कि चारों ओरसे बीभत्स किंवदन्ती कहनेवाले अतिशय क्षुद्र चित्तवाले नागरिक सीताजीका अग्निशुद्धिका विश्वास नहीं करते हैं, इसलिए महाराजने ऐसा कठोर कर्म किया ।

जनक -(क्रोधपूर्वक) ओह ! हमारी सन्तान (सीता) को शुद्ध करनेमें 'अग्नि' नाम-

कष्टम् ! एवंवादिना जनेन रामभद्रपरिभूता अपि पुनः परिभूयामहे ।

अरुन्धती—(निःश्वस्य ।) एवमेतत् । अग्निरिति वत्सां प्रति लघून्यक्षराणि । सीतेत्येव पर्याप्तम् । हा वत्से !

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति ।

एवंवादिना = सीताया अग्निशुद्धिरितिवादिना, जनेन = लोकेन, रामभद्रपरिभूता-अपि = सीताचारित्र्यसंशयजन्यनिर्वासनरूपव्यापारेण रामभद्रतिरस्कृता अपि, वयमिति शेषः । पुनः=भूयः, परिभूयामहे=अवमन्यामहे, अवमानिताः स्म इति भावः ।

अरुन्धतीति । एतत् = परिभूयामहे इति भवत्कथनम् , एवं = सत्यं, तत्र विप्रतिपत्तिर्नास्तीति भावः । वत्सां प्रति = सीतां प्रति, लघूनि = लाघवोपेतानि, अक्षराणि = वर्णाः, पदमिति भावः । अग्निरिव सा स्वतः शुद्धा, अग्निस्तस्याः शुद्धिं किं करिष्यतीति भावः । पर्याप्तं = निकामम् , 'कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।' इत्यमरः ।

शिशुरिति । त्वं मम शिशुर्वा शिष्या वा यत् असि, तत् तथा तिष्ठतु, त्वयि विशुद्धेः उत्कर्षस्तु मम भक्तिं दृढयति । ननु शिशुत्वं स्त्रैणं वा भवतु, जगतां वन्द्या असि, गुणिषु गुणाः पूजास्थानं, लिङ्गं न, वयश्च न इत्यन्वयः । त्वं = सीता, मम = अरुन्धत्याः, शिशुर्वा = बालिका वा, शिष्या वा = शासनीया वा, असि = भवसि, यत् = शिशुत्वं शिष्यात्वं वा, अस्तीति शेषः । तत्=पूर्वोक्तं शिशुत्वं शिष्यात्वं वा, तथा = तेनैव प्रकारेण, तिष्ठतु = आस्तां, तेन नाऽत्र किमपि कृत्यमिति भावः । परं—त्वयि = सीतायां, विशुद्धेः = निर्दोषतायाः, उत्कर्षस्तु=अतिशयस्तु, मम = अरुन्धत्याः, भक्तिं = पूज्यत्वबुद्धिं, द्रढयति = दृढीकरोति, '**जनयती**'ति पुस्तकान्तरपाठस्तत्र—उत्पादयतीत्यर्थः । ननु = अवधारणाऽर्थकोऽयं

वाला यह कौन है ? कष्ट है कि ऐसा कहनेवाले मनुष्यके द्वारा, रामभद्रसे तिरस्कृत होतेहुए भी हमलोग फिर तिरस्कृत किये जारहे हैं ।

अरुन्धती—(लम्बी साँस लेकर) यह ठीक है । 'अग्नि' ये अक्षर सीताके लिए क्षुद्र हैं, 'सीता' यह कहना ही पर्याप्त (काफी) है । हाय बेटी !

तुम मेरी बेटी हो वा शिष्या हो, जो सम्बन्ध है वह वैसा ही रहे; परन्तु तुममें जो पवित्रताका आधिक्य है, वह मेरी भक्तिको दृढ करता है । तुममें बालभाव हो वा स्त्रीभाव, तुम

शिशुत्वं वा स्त्रैणं वा भवतु, ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु, न च लिङ्गं, न च वयः ॥ ११ ॥

कौसल्या—अहो ! समुम्मूलअन्ति विअ वेअणाओ । (इति मूर्च्छति ।)
(अहो ! समुन्मूलयन्तीव वेदनाः ।)

जनकः—हन्त ! किमेतत् ?

अरुन्धती—राजर्षे ! किमन्यत् ?

स राजा, तत्सौख्यं, स च शिशुजनस्ते च दिवसाः

शब्दः, शिशुत्वं = बाल्यं, 'शिशुत्वं शैशवं बाल्यम्' इत्यमरः, स्त्रैणं वा = स्त्रीत्वं वा, 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति नञ्प्रत्ययः । भवतु = स्यात्, परं जगतां = लोकानां, वन्द्या = नमस्करणीया, असि=वर्तसे, त्वन्निष्ठेन शिशुत्वेन स्त्रीत्वेन वा न वन्द्यात्वहानिः । उक्तं विशेषमर्थं सामान्येन समर्थयति—**गुणा** इति । गुणिषु=गुणवत्सु, गुणाः = सदाचरणसत्यादयः, पूजास्थानं = सत्कारस्थानं, वर्तते इति शेषः । लिङ्गं=पुंस्त्वादिकं जटोपवीतादिकं वा, न=न पूजास्थानं, वयश्च= वृद्धत्वादिरवस्था च, न = न पूजास्थानम् । लोकोत्तरपातिव्रत्यादिगुणैस्त्वं सर्वेषामपि पूजनीयाऽसीति भावः । अत्राऽर्थान्तरन्यासोऽलङ्कारः । **शिखरिणी** वृत्तम् ॥ ११ ॥

कौसल्येति । वेदनाः = दुःखानि । समुन्मूलयन्ति इव = मूलमुत्पाटयन्ति इव । मूर्च्छति = मूर्च्छामभिनयति ।

जनक इति । एतत् = कौसल्यायाः मूर्च्छनं, किं = किंविधम् ।

अरुन्धतीति । अन्यत् = अपरं, किं = किं भवेत्, ईदृश्यां दशायां मूर्च्छाया ऋते किं भवेदिति भावः ।

स इति । स राजा, तत् सौख्यं, स च शिशुजनः, ते च दिवसाः; सुहृदि

संसारकी वन्दनीया हो । गुणियों में गुण ही पूजा के स्थान होते हैं, स्त्रीत्व, पुंस्त्व व जटा, कषाय वस्त्र आदि चिह्न-विशेष और वय (उम्र) पूजाके स्थान नहीं होते हैं ॥ ११ ॥

कौसल्या—अहो ! दुःख मानों मूलको उखाड़ रहे हैं (ऐसा कहकर मूर्च्छित होती हैं)

जनक—हा ! ! यह क्या ?

अरुन्धती—राजर्षे ! और क्या होता ?

वे राजा (दशरथ), वह सौख्य, रामभद्र आदि वे बालजन, वे दिन, सम्बन्धी आपको

स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम् ।
विपाके घोरेऽस्मिन्न खलु न विमूढा तव सखी
पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥ १२ ॥

जनकः—हन्त ! सर्वथा नृशंसोऽस्मि । यच्चिरस्य दृष्टान्प्रियसुहृदः प्रियदारानस्निग्ध इव पश्यामि ।

त्वयि दृष्टे तत् अखिलं स्मृतौ आविर्भूतम् । अथ अस्मिन् घोरे विपाके तव सखी न विमूढा (इति) न खलु, हि पुरन्ध्रीणां चित्तं कुसुमसुकुमारं भवति इत्यन्वयः । सः = प्रसिद्धः, सौख्यसम्पादकत्वेन अनुभूतो वा, एवमन्यत्रापि । तत्, सौख्यं = भर्तृपुत्रादिसन्निधानादिजनित आनन्दः, स च शिशुजनः = सीतारामाऽऽदिः, ते च दिवसाः = दिनानि, उत्सवोत्तराणीति भावः । सुहृदि = सम्बन्धिनि, त्वयि = भवति, दृष्टे = विलोकिते सति, तत = पूर्वाऽनुभूतम्, अखिलं = समस्तं, स्मृतौ = स्मरणपथे, आविर्भूतम्=संप्राप्तम् । अथ=स्मरणाऽनन्तरम्, अस्मिन्=सन्निहिते, घोरे=दारुणे, विपाके = परिणामे, रामकर्तृकसीतापरित्यागरूप इति भावः । तव= भवतः । सखी = सम्बन्धिनी, कौसल्येत्यर्थः । न विमूढा (इति) न = न विमोहं गता इति न, अपि तु 'द्वौ नञौ एकं प्रकृताऽर्थं द्योतयत' इति न्यायेन विमूढा एव । उक्तमर्थमर्थान्तरन्यासेन द्रढयति—**पुरन्ध्रीणामिति** । हि = यतः, पुरन्ध्रीणां = कुलस्त्रीणां, चित्तं = मनः, कुसुमसुकुमारं = पुष्पसदृशं कोमलं, भवति = जायते, अतः पूर्वाऽवस्थायाः स्मृतिमात्रेण मूर्च्छिताऽभूदिति भावः । अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, कुसुमसुकुमारमित्यत्र लुप्तोपमा चेति द्वयोः सङ्करः । शिखरिणी वृत्तम् ॥ १२ ॥

जनक इति । हन्त=खेदसूचकमव्ययमिदम् । नृशंसः=क्रूरः, 'नृशंसो घातुकः क्रूर' इत्यमरः । चिरस्य दृष्टाद् = बहुकालानन्तरमवलोकितान, प्रियसुहृदः=सम्बन्धिनो दशरथस्येत्यर्थः, प्रियदारान्=दयितपत्नीं, कौसल्यामित्यर्थः । अस्निग्ध इव= स्नेहरहित इव, शत्रुरिवेति भावः ।

देखनेपर वे सब स्मरणपथमें आविर्भूत हो गये, स्मरणके अनन्तर इस घोर परिणाममें आपकी सम्बन्धिनी (कौसल्या) मूर्च्छित हो गईं, क्योंकि उत्तम कुलकी स्त्रियोंका चित्त फूलके सदृश सुकुमार (कोमल) होता है ॥ १२ ॥

जनक—हाय ! मैं सर्वथा क्रूर हूं; जो बहुत समयके अनन्तर देखी गई प्रिय मित्र- (दशरथ) की पत्नी (कौसल्या) को स्नेहके साथ नहीं देख रहा हूं ।

स संबन्धी श्लाघ्यः, प्रियसुहृदसौ, तच्च हृदयं,
स चानन्दः साक्षादपि च निखिलं जीवितफलम् ।
शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं
महाराजः श्रीमान् किमपि[1]मम नासीद्दशरथः ॥ १० ॥

कष्टमियमेव सा कौसल्या—

यदस्याः पत्युर्वा रहसि परमन्त्रायितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः ।

स इति । स श्लाघ्यः सम्बन्धी, असौ प्रियसुहृत्, तच्च हृदयं, स च साक्षात् आनन्दः, अपि च निखिलं जीवितफलं, शरीरं जीवो वा, अतः अधिकम् अन्यत् प्रियतरं, श्रीमान् महाराजो दशरथो मम किमपि न आसीत् ? इत्यन्वयः । सः= दशरथः, श्लाघ्यः = प्रशसनीयः, सम्बन्धी = वैवाहिको जामातृपितेत्यर्थः । असौ= दशरथः, प्रियसुहृत् = प्रीतिमान् शोभनहृदयः, तच्च = स च, दशरथ इति भावः, हृदयस्वरूपस्य विधेयपदस्य प्राधान्यान्नपुंसकलिङ्गनिर्देशः । हृदयं = हृदयस्वरूपं, भेदरहितम् अभिन्नचित्तमिति यावत् । स च = दशरथश्च, साक्षात् = मूर्तिमान्, आनन्दः = हर्षः । अपि च = अन्यच्च, निखिलं = सर्वं, जीवितफलं = जीवनफलं, कर्मज्ञानभक्तिरूपं जीवनप्रयोजनं वेति भावः । शरीरं = देहः, जीवो वा = आत्मा वा, किं बहुना—अतः = अस्मात्, आत्मन इत्यर्थः, अधिकं = परमप्रेमाऽऽस्पदत्वे-नाऽतिरिक्तम्, अन्यत् = अपरं, प्रियतरम्=अभीष्टतरं, ब्रह्मेत्यर्थः, अभूदिति शेषः । श्रीमान् = लक्ष्मीवान्, महाराजः = सार्वभौमः, दशरथः = रामजनकः, मम = जनकस्य, किमपि=किमिव, न आसीत्=न अभूत्, अपि तु सर्वमप्यभूदिति भावः । अत्राऽतिशयोक्तिरूपकाऽर्थापत्तीनां सङ्करः । शिखरिणी वृत्तम् ॥ १३ ॥

यदस्या इति । अस्याः पत्युर्वा रहसि यत् परमन्त्रायितम्, (तत्र) अहं दम्पत्योः पृथक् उपालम्भविषयः अभूवम् । तदनु प्रसादे कोपे वा मदधीनो

वे [दशरथ] प्रशंसनीय सम्बन्धी, वे प्रिय मित्र, हृदयस्वरूप, मूर्तिमान हर्ष और सम्पूर्ण जीवनके फलस्वरूप थे; वे मेरे शरीर वा आत्मस्वरूप थे, किं बहुना—आत्मासे अधिक प्रियतर ब्रह्मरूप थे । श्रीमान् महाराज दशरथ मेरे क्या नहीं थे ? ॥ १६ ॥

कष्ट है, यही वे कौसल्या—

इन (कौसल्या) का वा इनके पति (दशरथ) का एकान्तमें जो गुप्तरूपसे भाषण या विचार होता था, उसमें मैं इन दोनोंका अलग अलग उपालम्भ (उलहना) का पात्र

१. 'कमिव' इति पाठान्तरम् ।

प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत्स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥ ४ ॥

अरुन्धती—हा ! कष्टम् ! अतिचिरनिरुद्धनिःश्वासनिष्पन्दहृदयमस्याः ।

जनकः—हा प्रियसखि ! (इति कमण्डलूदकेन सिञ्चति ।)

विधिः अभूत् , तत् स्मृत्वा अलं; यत् हृदयम् अवस्कन्द्य दहति इत्यन्वयः । अस्याः= कौसल्यायाः, पत्युर्वा = भर्तुर्वा, दशरथस्य वेत्यर्थः । रहसि = एकान्ते, यत्परमन्त्रायितं = यद् गुप्तभाषणं विचारो वा, आचारणिजन्तात्कर्तरि क्तप्रत्ययः । **'परमं दूषितम्'** इति पुस्तकान्तरपाठस्तत्र—अतिशयः प्रणयाऽपराध इत्यर्थः, अभूत् = अभवत् , (तत्र) अहं = जनकः, दम्पत्योः = जायापत्योः, कौसल्यादशरथयोरित्यर्थः । पृथक् = विभिन्नं यथा तथा, उपालम्भविषयः = दुर्वाक्यकथनपात्रम् , अभूवम्=अभवम् , दशरथकृतापराधे कौशल्या 'त्वदीयोऽयं सखा मह्यमीदृशमपराध्यति' इत्यब्रवीत् , कौसल्याकृताऽपराधे च दशरथः 'त्वदीयेयं सखी मह्यमीदृशमपराध्यति' इत्यवोचत् , इत्थं च द्वावपि सख्यप्रबोधनरूपेण दोषेण मामुपालब्धवन्ताविति भावः । तदनु = उपालम्भाऽनन्तरं, प्रसादे = प्रसन्नतायां, कोपे वा = क्रोधे वा, दम्पत्योरिति शेषः । मदधीनः = मदायत्तः, विधिः = व्यापारः, अभूत् , उपालम्भानन्तरं तौ मिथः कोपयितुं प्रसादयितुं वा अहमेव समर्थोऽभूवमिति भावः । तत् = अतीतं वृत्तम् , स्मृत्वा = स्मरणं कृत्वा, अलं = पर्याप्तं, तत्स्मरणेन किमपि साध्यं नाऽस्तीत्यर्थः, 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः । यत्= अतीतं वृत्तं स्मृतं सदिति भावः, हृदयं = वक्षःस्थलम् , अवस्कन्द्य = आक्रम्य, दहति = तापयति । **शिखरिणी** वृत्तम् ॥ १४ ॥

अरुन्धतीति । अस्याः = कौसल्यायाः, अतिचिरनिरुद्धनिःश्वासनिष्पन्दहृदयम् = अतिचिरं = बहुकालपर्यन्तम् , निरुद्धाः = संचाररहिताः, निःश्वासाः = प्राणवायवः, यस्मिंस्तत् । अतएव निष्पन्दं = निश्चेष्टम् , क्वचित् **'निष्ठुरम्'** इति पाठस्तत्र—अतिनिरुद्धनिःश्वासैः—निष्ठुरम् = कठोरम् इति योजना कार्या ।

होता था । उसके बाद प्रसन्न वा कुपित करनेका काम मेरे हाथमें रहता था । अब वह सब याद करनेसे कोई प्रयोजन नहीं; जो कि हृदयको आक्रमण करके जलाता है ॥ १४ ॥

अरुन्धती—हाय ! कष्ट है । बहुत कालतक श्वास रोकनेसे इनका हृदय चेष्टासे रहित हो गया है ।

जनक—हाय प्रियसखि ! (ऐसा कहकर कमण्डलुके जलसे सींचते हैं) ।

कञ्चुकी—

सुहृदिव प्रकटय्य सुखप्रदां प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्तनदारुणः परिशिनष्टि विधिर्मनसो रुजम् ॥ १५ ॥

कौसल्या—(आश्वस्य ।) हा वच्छे जाणइ ! कहिं सि ? सुमरामि दे णवविवाहलच्छीपरिग्गहेक्कमङ्गलं संफुल्लमुद्धमुहपुण्डरीअं आरुहन्तीकौमुदीचन्दसुन्दरम् । एहि मे पुणो वि जादे ! उज्जोएहि उच्छङ्गम् । सव्वहा महाराज एव्वं भणदि-'एसा रहुउलमहत्तराणं बहु, अह्माणंदु जणअसुदा दुहिदेव्व' । (हा वत्से जानकि ! कुत्रासि ? स्मरामि ते नवविवाहलक्ष्मीपरिग्रहैकमङ्गलं संफुल्लमुग्धमुखपुण्डरीकमारोहत्कौमुदीचन्द्रसुन्दरम् । एहि मे पुनरपि जाते ! उद्द्योतयो-

सुहृदिति । विधिः प्रथमं सुहृत् इव सुखप्रदाम् एकरसाम् अनुकूलतां प्रकटय्य पुनः अकाण्डविवर्तनदारुणः (सन्) मनसो रुजं परिशिनष्टि इत्यन्वयः । विधिः = भाग्यं, प्रथमं = पूर्वं, सुहृत् इव = मित्रम् इव, सुखप्रदाम् = आनन्दप्रदां, **'सुखप्रद'** इति विधिविशेषणरूपः पुस्तकान्तरपाठः । एकरसाम् = एकः (एककः, रसान्तरेण अमिश्र इत्यर्थः) रसः (प्रेम), यस्यां ताम् , अनुकूलताम् = आनुकूल्यम् , योगक्षेमरूपमिति भावः । प्रकटय्य = प्रकाश्य, पुनः = अनन्तरम् , अकाण्डविवर्तनदारुणः = अकाण्डे = अनवसरे यत् विवर्तनं=परिवर्तनम् , तेन दारुणः= क्रूरः सन् । मनसः = चेतसः, रुजं = पीडां, परिशिनष्टि = परिशिष्टां करोति । भाग्ये प्राक् सुहृदिव अनुकूलीभूय सुखमुत्पादयति, पश्चादकाण्डे दुःखानि जनयतीति भावः । अत्र **विषमोपमाऽलङ्कारयोः सङ्करः** । **द्रुतविलम्बितं वृत्तम्**- 'द्रुतविलम्बितमाह नभौ भरौ' इति तल्लक्षणम् ॥ १० ॥

कौसल्येति । आश्वस्य = आश्वासं कृत्वा, संज्ञां लब्ध्वेत्यर्थः । नवविवाहलक्ष्मीपरिग्रहैकमङ्गलं = नवविवाहलक्ष्म्याः = नूतनोद्वाहशोभायाः, परिग्रहः = धारणम् , तेन एकम् = अद्वितीयम् । मङ्गलं = शुभम् , यस्य तत् । **'मण्डनम्'** इति पाठे—परिग्रह एव एकं मण्डनं = भूषणं यस्य तदित्यर्थः । आरोहत्कौमुदी-

कञ्चुकी—भाग्य पहले मित्रकी तरह सुख देनेवाली केवल प्रेमयुक्त अनुकूलताको प्रकाशित करके पीछेसे अनवसरमें परिवर्तन कर कठोर होता हुआ मनकी पीड़ाको परिशिष्ट करता (बढ़ाता) है ॥ ५ ॥

कौसल्या—(होशमें आकर) हाय बेटी जानकि ! तुम कहाँ हो ? नूतन विवाहकी शोभाके धारणसे अद्वितीय मङ्गल-सम्पन्न, चन्द्रिका (चांदनी) में प्रकाशमान चन्द्रकी तरह

त्सङ्गम् । सर्वदा महाराज एवं भणति—'एषा रघुकुलमहत्तराणां वधूरस्माकं तु जनकसुता दुहितैव' ।)

कञ्चुकी—यथाह देवी ।

पञ्चप्रसूतेरपि तस्य राज्ञः प्रियो विशेषेण सुबाहुशत्रुः ।

चन्द्रसुन्दरम् = कौमुद्याश्चन्द्रः कौमुदीचन्द्रः । आरोहंश्चाऽसौ कौमुदीचन्द्र आरोहत्कौमुदीचन्द्रः = प्रादुर्भवन् चन्द्रिकायां द्योतमानश्चन्द्र इत्यर्थः, स इव सुन्दरम् = रुचिरम् ; एतादृशं ते = तव, सीताया इत्यर्थः । संफुल्लमुग्धमुखपुण्डरीकम्=संफुल्लं = विकसितं हास्येनेति भावः, मुग्धं = सुन्दरम् , मुखपुण्डरीकम् = मुखकमलम् , स्मरामीत्यत्रान्वयः । पुस्तकान्तरेषु तु **'प्रस्फुरच्छुद्धहसितमुग्धमुखपुण्डरीकम्'** इति पाठस्तत्र प्रस्फुरता = विकसिता, शुद्धेन = निर्दोषेण, हसितेन = हासेन, शेषं पूर्ववद्व्याख्येयम् । अत उत्तरम् **'आस्फुरत्कौमुदचन्द्रचन्द्रिकासुन्दरैरङ्गैरुल्लासय'** इत्यधिकः पुस्तकान्तरपाठस्तत्र-आस्फुरन् = प्रकाशमानः, यः कौमुदश्चन्द्रः, कार्तिकापूर्णिमाचन्द्रः, तस्य चन्द्रिकाः = ज्योत्स्नाः, ता इव सुन्दराणि, तैरेतादृशैः अङ्गैः = अवयवैः, उल्लासय = शोभितं कुर्वित्यर्थः । जाते = हे दुहितः । कौसल्या सीतायां दुहितृवत्स्निह्यति स्म, अतो 'जाते' इति सम्बोधनं संगच्छते । एहि = आगच्छ, उत्सङ्गम् = अङ्कम् , उद्द्योतय = उपवेशनेन प्रकाशयेति भावः । सर्वदा = सर्वस्मिन्काले, 'सर्वैकान्यकियत्तदः काले दा' इति दाप्रत्ययः । महाराजः = दशरथः, भणति = कथयति, स्मेत्यध्याहार्यम् । एषा = इयम् , जनकसुता = सीता, रघुकुलमहत्तराणां = रघुकुले = रघुवंशे, ये महत्तराः = महीयांसः, माननीयमनुप्रभृतय इत्यर्थः, तेषाम् , वधूः = स्नुषा । अस्माकं तु = मम तु, दशरथस्य त्विति भावः, दुहिता एव = पुत्री एव, स्वसखजनकस्य दुहितृत्वादिति भावः ।

कञ्चुकीति—देवी = कौसल्या, आह = कथयति, तथैवेति शेषः ।

पञ्चेति । पञ्चप्रसूतेरपि तस्य राज्ञः सुबाहुशत्रुः विशेषेण प्रियः । तथैव अस्य वधूचतुष्केऽपि सीता एव तनूजा यथा प्रिया, अन्या न इत्यन्वयः । पञ्चप्रसूतेरपि=

सुन्दर-तुम्हारे विकसित और मनोहर मुखकमलकी याद करती हूं । बेटी ! आओ, बैठकर मेरी गोदको फिर प्रकाशित करो । महाराज बराबर ऐसा कहते थे-यह जानकी रघुकुलके माननीय पुरुषोंकी (इक्ष्वाकु, सूर्य आदिकी) पुत्रवधू है, पर हमारी तो पुत्री ही है ।

कञ्चुकी—महारानी ठीक कहती हैं ।

महाराज दशरथके पांच सन्तानोंके रहनेपर भी श्रीरामभद्र विशेष प्यारे थे, उसी तरह

वधूचतुष्केऽपि तथैव नान्या प्रिया तनूजाऽस्य यथैव सीता ॥ १६ ॥

जनकः—हा प्रियसख महाराज दशरथ ! एवमसि सर्वप्रकारहृदयङ्गमः । कथं विस्मर्यते ?

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
संबन्धे विपरीतमेव तदभूदाराधनं ते मयि ।

पञ्च=पञ्चसंख्याकाः, प्रसूतयः = सन्ततयः, यस्य तस्य, शान्ताख्या कन्या रामादयश्चत्वारः पुत्राश्चेत्यपत्यपञ्चकयुक्तस्येति भावः । तस्य = दशरथस्य, राज्ञः = भूपतेः, सुबाहुशत्रुः = सुबाहोः = मारीचसहचरराक्षसस्य, शत्रुः = अरिः, राम इत्यर्थः । विशेषेण = अधिकरूपेण, प्रियः = अभीष्टः, आसीदिति शेषः । तथैव = तेन प्रकारेणैव, अस्य = राज्ञः, दशरथस्येत्यर्थः, वधूचतुष्केऽपि = चत्वारि परिमाणानि अस्य चतुष्कः 'संख्याया अतिशदन्तायाः कन्' इति कन् । वधूनां चतुष्के = सीतादिस्नुषाचतुष्टयेऽपि, सीता एव = जनकनन्दिनी एव, तनूजा यथा = पुत्री इव, शान्तेवेत्यर्थः, प्रिया = अभीष्टा, अन्या=अपरा, माण्डव्यादिरित्यर्थः, न=न अभीष्टा । **अत्रोपमालङ्कारः** । इन्द्रवज्रोपेन्द्रवज्रयोः संमिश्रणा**दुपजातिर्वृत्तम्** ॥ १६ ॥

जनक इति । सर्वप्रकारहृदयङ्गमः = सर्वैः = सकलैः, प्रकारैः = धर्मैः, हृदयङ्गमः = मनोहारी । कथं = केन प्रकारेण, विस्मर्यते = विस्मर्तुं शक्यते ।

कन्याया इति । कन्यायाः पितरः जामातुः आप्तं जनं पूजयन्ति किल, सम्बन्धे मयि ते तत् आराधनं विपरीतम् एव अभूत् । तथाविधोऽपि त्वं कालेन अपहृतः, तत् सम्बन्धबीजं च (अपहृतम्), घोरे अस्मिन् जीवलोकनरके पापस्य मम जीवितं धिक् ! इत्यन्वयः । कन्यायाः=दुहितुः, पितरः=मातापितृपक्षीयाः, जामातुः= वरस्य, आप्तं जनं=बन्धुजनं, पूजयन्ति = सत्कुर्वन्ति, किल=प्रसिद्धम् , परं, सम्बन्धे = अस्मदपत्ययोर्वैवाहिकसम्बन्धे जाते, मयि = कन्यापितृत्वेन पूजकेऽपि मयि जनके, ते = तव, तत् = पूर्वाचरितम् , आराधनं = पूजनं, विपरीतं=लोकप्रसिद्धि-

---

उनके चार बहुओंके रहने पर भी सीता ही पुत्री (शान्ता) की तरह प्यारी थी, और कोई वैसी प्यारी नहीं थी ॥ १६ ॥

जनक—हाय ! प्रिय मित्र महाराज दशरथ ! इस तरह आप सब प्रकारोंसे प्रिय थे, आपको हम कैसे भूल सकते हैं ? ।

कन्याके पितृवर्ग जामाता (दामाद) के बन्धुजनकी पूजा करते हैं, परन्तु सम्बन्ध होनेपर भी मुझमें आपकी वह पूजा उलटी ही रही । ऐसे भोलेभाले आपको तथा उस सम्बन्धकी

त्वं कालेन तथाविधोऽप्यपहृतः संबन्धबीजं च तद्
घोरेऽस्मिन्मम जीवलोकनरके पापस्य धिग् जीवितम् ॥

कौसल्या—जादे जाणइ ! किं करोमि ? दिढवज्जलेवपडिबद्धणिच्चलं हदजीविदं मं मन्दभाइणीं ण परिच्चअदि । (जाते जानकि ! किं करोमि ? दृढवज्रलेपप्रतिबन्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति ।)

अरुन्धती—आश्वसिहि राज्ञि ! बाष्पविश्रामोऽप्यन्तरेषु कर्तव्य एव । अन्यच्च किं न स्मरसि ? यदवोचदृष्यशृङ्गाश्रमे युष्माकं कुलगुरुः—'भवि-

---

विरुद्धम् , एव, अभूत् = जातम् । तथाविधोऽपि=तादृशोऽपि, लोकप्रसिद्धिविरुद्धरूपेण सरलतया कन्यापितुर्मम पूजकोऽपीति भावः, त्वं=दशरथः, कालेन=समयेन, अपहृतः = नाशितः, तत् = प्रसिद्धम्, सम्बन्धबीजं च = आवयोर्मिथः सम्बन्धित्वहेतुश्च, सीता चेति भावः, अपहृतमिति शेषः । घोरे = दारुणे, अस्मिन् = विद्यमाने, जीवलोकनरके=जीवलोकः = मनुष्यलोकः, नरक इव = दुःखहेतुत्वान्निरय इव, इति जीवलोकनरकस्तस्मिन् । पापस्य = पापात्मकस्य, मम = जनकस्य, जीवितं धिक् = प्राणधारणं धिक् , मज्जीवनं निष्फलमिति भावः । अत्रोपमालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ १७ ॥

कौसल्येति । जाते = पुत्रि ! । दृढवज्रलेपप्रतिबन्धनिश्चलम् = दृढेन = दुरपनेयेन, वज्रलेपेन = बन्धकद्रव्यलेपनेन, यः प्रतिबन्धः = विश्लेषाऽनुत्पादः, तेन निश्चलं = स्थिरम् , तादृशं हतजीवितं = निन्द्यजीवितम् ।

अरुन्धतीति । राज्ञि = हे कौशल्ये !, आश्वसिहि—आश्वासं = दुःखलघूकरणं प्राप्नुहि । अन्तरेषु = मध्ये मध्ये, **'अन्तराले'** इति पाठे मध्य इत्यर्थः, बाष्पविश्रामोऽपि=बाष्पस्य = दुखाश्रुणः, विश्रामोऽपि = विच्छेदोऽपि । अन्यच्च = बाष्पविश्रामादपरं च, कुलगुरुः = वसिष्ठः, भवितव्यं तथा = भाव्यं तथा, परि

बीजभूत सीताको भी कालने अपहरण कर लिया । भयङ्कर इस नरकसदृश नरलोकमें मेरे सदृश पापीके जीवनको धिक्कार है ॥ १७ ॥

कौसल्या—बेटी जानकि ! मैं क्या करूँ ? दृढ वज्रलेपसे रुकावट होनेसे निश्चल निन्दनीय जीवन मुझ मन्दभागिनी को नहीं छोड़ता है ।

अरुन्धती-महारानी ! आप धैर्यधारण करें । बीच-बीचमें आँसुओंको रोकना भी चाहिये । और भी, क्या आप याद नहीं करती हैं ? जो कि आपके कुलगुरु (वसिष्ठ) ने ऋष्यशृङ्गके आश्रममें कहा था कि—जैसी होनेवाली बात (होनहार) थी वैसी ही हो गई, परन्तु 'परि-

तथ्यं तथेत्युपजातमेव । किंतु कल्याणोदर्कं भविष्यतीति ।

कौसल्या—कुदो अदिक्कन्दमणोरहाये मह एदम्? (कुतोऽतिक्रान्त-मनोरथाया ममैतत्?)

अरुन्धती—तत्किं मन्यसे राजपत्नि! मृषोद्यं तदिति। न हीदं क्षत्रिये! मन्तव्यम्।

आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहारास्तेषु मा संशयो भूत्।

त्यागरूपेण भवनीयमित्यर्थः। उपजातमेव = संजातमेव। कल्याणोदर्कं = कल्याणम् = मङ्गलम्, उदर्कः=उत्तरं फलम्, यस्य तत्, 'उदर्कः फलमुत्तरम्'इत्यमरः। परिणामे संयोग एव भविष्यतीति भावः।

कौसल्येति। अतिक्रान्तमनोरथायाः = अतिक्रान्तः = व्यतीतः, मनोरथः = अभिलाषः, यस्यास्तस्याः असम्भाव्याऽभिलाषविषयाया इति भावः, हिंस्रजन्तु-पूर्णे विपिने सीताया विनाशस्यैव संभाव्यत्वात्कुतः संयोगाशंसेति भावः।

अरुन्धतीति। राजपत्नि = कौसल्ये, तत्=कुलगुरूक्तं 'पश्चात् संयोगो भविष्यती' त्यादिरूपं वचनमित्यर्थः। मृषोद्यं = मृषा = अनृतम्, उद्यते = उच्यते, इति तत्, मिथ्यावचनमित्यर्थः, 'राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याऽव्यथ्या' इति मृषोपपदाद्वदेः क्यप्प्रत्ययान्तो निपातः। क्षत्रिये = हे बाहुजे!, तत = गुरूक्तं वचनम्, इदं = मिथ्यावचनं = न ज्ञातव्यम्।

आविर्भूतेति। आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहाराः तेषु संशयो मा भूत्, हि एषां वाचि भद्रा लक्ष्मीः निषक्ता। एते विप्लुताऽर्थां वाचं न वदन्ति इत्यन्वयः। आविर्भूतज्योतिषाम् = आविर्भूतं = प्रकाशितम्। ज्योतिः = ब्रह्मतत्त्वम्, येषां तेषां कृतब्रह्मसाक्षात्काराणाम्। ब्राह्मणानां = विप्राणां, ये व्याहाराः= उक्तयः, तेषु = व्याहारेषु, संशयः=सन्देहः, प्रामाण्यविषयक इति शेषः। मा भूत्=

णाममें कल्याण होगा'।

कौसल्या—मनोरथको लाँघनेवाली मेरा ऐसा होना कैसे सम्भव है?

अरुन्धती—महारानी! 'तब उनका कहना झूठ है' यह आप मानती हैं? क्षत्रिये! ऐसा नहीं मानना चाहिए।

ब्रह्मसाक्षात्कार करनेवाले ब्राह्मणोंकी जो उक्तियां हैं, उनमें आपको संशय न हो, क्योंकि

भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता नैते वाचं विप्लुतार्थां वदन्ति ॥

(नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।)

जनकः—अये, शिष्टानध्याय इत्यस्खलितं खेलतां वटूनां कोलाहलः ।

कौसल्या—सुलहसोक्खं दाणि बालत्तणं होदि । (निरूप्य) अह्मो ! एदाणं मज्झे को एसो रामभद्दस्स कोमारलच्छीसावट्टम्भेहिं मुद्धललिदेहिं अङ्गेहिं दारओ अह्माणं लोअणे शीअलावेदि ? (सुलभसौख्यमिदानीं बालत्वं भवति । अहो ! एतेषां मध्ये क एष रामभद्रस्य कौमारलक्ष्मीसावष्टम्भैर्मुग्धललितै-रङ्गैर्दारकोऽस्माकं लोचने शीतलयति ?)

न भवेत्, तथेति शेषः, 'माङि लुङ्' इति लुङ् । हि = यतः, एषां = कृतब्रह्मसाक्षात्काराणां ब्राह्मणानाम्, वाचि = वचने, भद्रा = मङ्गलरूपा, लक्ष्मीः = सिद्धिः, निषक्ता = नित्यसङ्गिनी, भवतीति शेषः । एते = कृतब्रह्मसाक्षात्कारा ब्राह्मणाः, विप्लुतार्थां = मिथ्याभूताऽर्थां, वाचं = वाणीं, न वदन्ति = न उच्चारयन्ति । अर्थान्तरन्यासोऽलङ्कारः । शालिनी वृत्तम् ॥ १८ ॥

नेपथ्य इति । कलकलः = कोलाहलः ।

जनक इति । शिष्टाऽनध्यायः = शिष्टागमनेन सञ्जातः अनध्यायः, 'शिष्टे च गृहमागत' इति स्मृतिमनुरुध्य सञ्जात इति भावः । अस्खलितम् = अप्रतिबन्धनम्, **'उद्धतम्'** इति पाठेऽप्ययमेवाऽर्थः । वटूनां = माणवकानाम् ।

कौसल्येति । बालत्वं = शिशुत्वं 'शिशुत्वं शैशवं बाल्यम्' इत्यमरः । सुलभसौख्यम् = सुलभं=सुप्राप्यम् । सौख्यं=सुखम्, यस्मिंस्तत् । कौमारलक्ष्मीसावष्टम्भैः = कौमारलक्ष्म्याः = बाल्यशोभायाः, साऽवष्टम्भैः = अवलम्बनसहितैः, मुग्धललितैः = सुन्दरसुकुमारैः, अङ्गैः = हस्तपादाद्यवयवैः, शीतलयति = शीतलं करोति, शीतलशब्दात्करोत्यर्थे णिच् ।

इनकी वाणीमें मङ्गलकारिणी सिद्धि नित्य सम्बद्ध रहती है । ये (ब्रह्मसाक्षात्कार करनेवाले) ब्राह्मण झूठी बात नहीं बोलते हैं ॥ १८ ॥

(नेपथ्यमें कोलाहल होता है । सब सुनते हैं ।)

जनक—अरे ! शिष्टोंके आगमनसे अनध्याय होनेके कारण विना रुकावटके खेलनेवाले बालकोंका यह कोलाहल है ।

कौसल्या—बचपनमें सुख सुलभ होता है । (निरूपण कर) अरे ! इन (बालकों) के बीचमें यह कौन बालक रामभद्रकी बाल्य-शोभासे सम्पन्न-सुन्दर और सुकुमार अङ्गोंसे हमारे नेत्रोंको ठण्डा कर रहा है ?

अरुन्धती—(स्वगतम् । सहर्षोत्कण्ठम् ।) इदं नाम भागीरथीनिवेदितं रहस्यकर्णामृतम् । न त्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति । (प्रकाशम्)

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
बटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन् ।
पुनरपि शिशुर्भूतो वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ? ॥१९॥

अरुन्धतीति । सहर्षोत्कण्ठम् = हर्षेण = इष्टागमात्प्रीत्या, उत्कण्ठया = आकाराऽऽदिविषयाऽभिलाषेण, च सहितं यथा तथा । भागीरथीनिवेदितम् = भागीरथ्या = गङ्गया, निवेदितं = कथितम् , रहस्यकर्णाऽमृतम् = रहस्यं = गुह्यम् , च तत् कर्णाऽमृतम् = श्रोत्रयोः पीयूषवद्भोग्यम् । आयुष्मतोः = दीर्घायुषोः, न विद्मः = न जानामि, 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् ।

कुवलयेति । कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनः पुण्यश्रीकः श्रिया बटुपरिषदं सभाजयन् एव पुनः शिशुः भूतः स मे वत्सो रघुनन्दन इव कोऽयं दृष्टः झटिति दृशोः अमृताऽञ्जनं कुरुते इत्यन्वयः । कुवलयदलस्निग्धश्यामः = कुवलयस्य = नीलकमलस्य, दलमिव=पत्रमिव, स्निग्धः=कोमलः, श्यामः = नीलः । शिखण्डकमण्डनः = शिखण्डकः = काकपक्षः, मण्डनं = भूषणम् , यस्य सः । पुण्यश्रीकः=पुण्या = पवित्रा श्रीः=शोभा, यस्य सः, 'शेषाद्विभाषा' इतिकप् , 'संपत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः । श्रिया=शरीरकान्त्या, बटुपरिषदं=कुमारसमूहं, सभाजयन् एव=सेवमान एव, अलङ्कुर्वाण एव इति भावः । पुनः=भूयः, शिशुः=बालः, भूतः=सञ्जातः, सः, मे= मम, वत्सः=वात्सल्यमात्रं, रघुनन्दन इव=रामचन्द्र इव, कः, अयं=सन्निहितः, दृष्टः= अवलोकितः (सन्), झटिति=सत्वरं, दृशोः=नेत्रयोः, अमृताञ्जनम्=सुधामयं नेत्राञ्जनं कुरुते = रचयति । अत्रोत्प्रेक्षोपमयोः सङ्करः । हरिणी वृत्तम् ॥ १९ ॥

अरुन्धती—(मनही मन हर्ष और उत्कण्ठाके साथ) यह गङ्गाजीसे कहा गया तथा गोपनीय और कानके लिये अमृततुल्य आनन्दकारक वचन है । परन्तु यह नहीं जानती हूँ कि चिरञ्जीव कुश और लवके बीचमें यह कौन है ? (सुनाकर) ।

नील कमलके पत्तेकी तरह स्निग्ध और श्यामवर्ण वाला, काकपक्षसे शोभित, पवित्र शोभासे सम्पन्न, शरीरकी कान्तिसे ब्रह्मचारियोंके समूह (सभा) को अलंकृत करता हुआ फिर बाल्यावस्थामें विद्यमान वात्सल्य-भाजन मेरे रामभद्रके समान देखा गया यह कौन बालक झटपट दृष्टिमें अमृतमय अञ्जन का लेप कर रहा है ? ॥ १९ ॥

कञ्चुकी—नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये ।

जनकः—एवमेतत् । अस्य हि—

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ॥ २० ॥

कञ्चुकीति । दारकः = बालकः, मन्ये = अनुमिनोमि ।

चूडेति । पृष्ठतः अभितः चूडाचुम्बितकङ्कपत्रं तूणीद्वयं, भस्मस्तोकपवित्रलांछनम् उरः रौरवीं त्वचं धत्ते, अधः मौर्व्या मेखलया नियन्त्रितं माञ्जिष्ठकं वासः, पाणौ कार्मुकम् , अक्षसूत्रवलयम् , अपरः पैप्पलो दण्डः अस्ति) इत्यन्वयः । (अयम् = बालकः) पृष्ठतः = पृष्ठदेशे, आद्यादित्वात्तसिः । अभितः = उभयतः, 'पर्यभिभ्यां च' 'सर्वोभयाऽर्थाभ्यामेव' इति तसिल् । चूडाचुम्बितकङ्कपत्रम् = चूडाभिः = शिखाभिः, चुम्बितानि = संस्पृष्टानि, कङ्कपत्राणि = बाणपुङ्खवर्तिनः कङ्कपक्षिपक्षाः, यस्मिंस्तत् , एतादृशं तूणीद्वयम् = इषुधियुग्मम् । भस्मस्तोकपवित्रलाञ्छनम् = भस्मनः = भूतेः, स्तोकम् = अल्पम् , पवित्रं = पावनम् , लाञ्छनं = चिह्नम् , यस्मिंस्तत् , एतादृशम् उरः = वक्षःस्थलं, रौरवीं = रुरुमृगस्य, त्वचं = चर्म, धत्ते = धारयति । अधः = उरसोऽधस्तात् , मौर्व्या = मूर्वाऽऽख्यलतागुणनिर्मितया, मेखलया = कटिसूत्रेण, नियन्त्रितं = बद्धं, माञ्जिष्ठकं = मञ्जिष्ठाऽऽख्येन रागद्रव्येण रक्तं, 'तेन रक्तं रागात्' इत्यण् , तदन्तात् स्वार्थे कन् । वासः = वस्त्रं, पाणौ = हस्ते, कार्मुकं = धनुः, अक्षसूत्रवलयम् = रुद्राक्षमाला, अपरः = अन्यः, धनुर्दण्डादिति शेषः । पैप्पलः = अश्वत्थस्य, दण्डः = लगुडश्च । अस्तीति शेषः । तथा चैतैर्लक्षणैः क्षत्रियब्रह्मचार्ययमिति निश्चीयत इति भावः । अत्र **तुल्ययोगिताऽलङ्कारः** । **शार्दूलविक्रीडितं** वृत्तम् ॥ २० ॥

कञ्चुकी—'यह बालक क्षत्रिय ब्रह्मचारी है' मैं ऐसा विचार करता हूं ।

जनक—ऐसा ही है। इसके—

'कङ्कपत्रोंसे युक्त पीठ के दोनों ओर चोटीको छूनेवाले दो तरकशोंको, थोड़ेसे भस्मसे पवित्र चिह्नवाली छातीको और रुरु नामक मृगसे चमड़े को भी धारण कर रहा है। इसकी छातीके नीचे मौर्वी मेखलासे बांधी गई मजीठकी रंगवाली धोती, हाथमें धनु, रुद्राक्षमाला और पीपलका दण्ड भी है ॥ २० ॥

भगवत्यरुन्धति ! किमित्युत्प्रेक्षसे कुतस्त्योऽयम् ? इति ।

अरुन्धती—अद्यैव वयमागताः ।

जनकः—आर्ये गृष्टे ! अतिकौतुकं वर्तते । तद्भगवन्तं वाल्मीकिमेव गत्वापृच्छ । इमं च दारकं ब्रूहि 'वत्स ! केऽप्येते प्रवयसस्त्वां दिदृक्षव' इति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

कौसल्या—किं मण्णेध । एव्वं भणिदो आअमिस्सदि वा ण वेत्ति । (किं मन्यध्वे ! एवं भणित आगमिष्यति वा न वेति ?)

जनकः—भिद्यते वा सद्वृत्तमीदृशस्य निर्माणस्य ?

भगवतीति । अयं = बालकः, कुतस्त्यः = कस्माद्भवः काभ्यां मातापितृभ्यामुत्पन्न इति भावः । 'अव्ययात्त्यप्'-'अमेहक्वतसित्रेभ्य एव' इति त्यप्, उत्प्रेक्षसे = तर्कयसि ।

अरुन्धतीति । अद्यैव = अस्मिन्दिन एव । यथा भवानिमं बालकं न जानाति तथैवाऽहमपि अद्यैवागतत्वान्न जानामीति भावः । भागीरथ्यनुरोधेनाऽरुन्धत्याऽयं निह्नवः कृत इत्यवसेयम् ।

जनक इति । पृच्छ = अनुयुङ्क्ष्व, कुतस्त्योऽयं माणवकः ? इत्यस्य परिचयं पृच्छेति भावः । केऽपि = अपरिचिताः, प्रवयसः = प्रकृष्टम् = अधिकम्, वयः = अवस्था, येषां ते, वृद्धा इत्यर्थः । दिदृक्षवः = द्रष्टुमिच्छवः ।

कञ्चुकीति । आज्ञापयति = आदिशति, तदनुतिष्ठामीति भावः ।

कौसल्येति । एवम् = 'केऽपि प्रवयसस्त्वां दिदृक्षव' इत्येवं प्रकारेण, भणितः = कथितः ।

जनक इति । ईदृशस्य = लोकोत्तरस्य, सर्वाऽतिशायिरूपसंपन्नस्येति भावः । निर्माणस्य=आकारस्य, सद्वृत्तं=सदाचारः, 'वृत्तं पद्ये चरित्रे च' इत्यमरः, भिद्यते

भगवति अरुन्धति ! यह बालक कहाँ से आया है ? आप क्या विचार करती हैं ।

अरुन्धती—हमलोग आज ही आये हैं ।

जनक—आर्य गृष्टिजी ! मुझे बहुत कुतूहल हो रहा है । इस कारण भगवान् वाल्मीकिजीके पास जाकर पूछिए । इस बालकको भी कहिए—'बेटा ! कुछ अपरिचित वृद्ध तुमको देखना चाहते हैं' ।

कञ्चुकी—महाराजकी जो आज्ञा (ऐसा कहकर जाता है) ।

कौसल्या—आपलोग क्या विचार करते हैं ? ऐसा कहनेपर आ जायगा वा नहीं ?

जनक—ऐसे लोकोत्तर आकारका भी सच्चरित्र छूट सकता है ?

कौसल्या—(निरूप्य ।) कहं सविणअणिसमिदगिट्ठवअणो विसज्जिदासेससरिसदारओ एत्तोमुहुं अवसरिदो एव्व स वच्छो । (कथं सविनयनिशमितगृष्टिवचनो विसर्जिताशेषसदृशदारक इतोमुखमपसरित एव स वत्सः ।)

जनकः—(चिरं निर्वर्ण्य ।) भोः ! किमप्येतत् ।

महिम्नामेतस्मिन्विनयशिशिरो मौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः ।
मनो मे संमोहस्थिरमपि हरत्येष बलवा-

वा = भिन्नं भवति किम् ? 'यत्राकृतिस्तत्र गुणा वसन्ति' इति न्यायात् एतादृशाकारस्य सदाचारो न कदाऽपि विलुप्यत इति भावः, 'कर्मवत्कर्मणा तुल्यक्रियः' इति यगात्मनेपदे ।

कौसल्येति । निरूप्य = दृष्ट्वा, सविनयनिशमितगृष्टिवचनः = सविनयं = नम्रतापूर्वकम्, निशमितं = श्रुतम् , गृष्टिवचनं = कञ्चुकिवाक्यम्, येन सः । विसर्जिताशेषसदृशदारकः=विसर्जिताः=वियोजिताः, अशेषाः=समस्ताः, सदृशाः=तुल्याः, समवयस्का इत्यर्थः, दारकाः = बालकाः, येन सः ।

जनक इति । एतत्=वक्ष्यमाणं, किमपि = अपूर्वमित्यर्थः । तदाह—

महिम्नामिति । एतस्मिन् विनयशिशिरो मौग्ध्यमसृणो महिम्नाम् अतिशयो विदग्धैः निर्ग्राह्यः, अविदग्धैः न पुनः (निर्ग्राह्यः) । बलवान् एषः संमोहस्थिरम् अपि मे मनः परिलघुः अयस्कान्तशकलः अयोधातुं यद्वत् हरति इत्यन्वयः । एतस्मिन्=बाले, विनयशिशिरः = विनयेन=नम्रतया, शिशिरः = शीतलः । पुस्तकान्तरेषु तु शिशिरस्थाने '**शिशुते**' त्याकारकमुत्तरपदेन समस्तं पदं वर्तते । मौग्ध्येन=बाल्येन, सौन्दर्येण वा । मसृणः = कोमलः, महिम्नां = माहात्म्यानां, विनयार्जवादिगुणानामित्यर्थः, अतिशयः = उत्कर्षः, विदग्धैः = निपुणैः, निर्ग्राह्यः = निःशेषेण ग्रहीतुं शक्यो निर्णेय इत्यर्थः, 'ऋहलोर्ण्यत्' इति ण्यत् । अविदग्धैः = अनि-

---

कौसल्या—नम्रताके साथ गृष्टि (कञ्चुकी) का वचन सुनकर और अपने सरीखे सब बालकोंको छोड़कर किस तरह वह बालक इसी ओर आ रहा है ।

जनक—(बहुत देर तक देखकर) ओह ! यह अपूर्व है ।

इस बालकमें नम्रतासे शीतल, बचपन वा सुन्दरतासे कोमल महिमाका उत्कर्ष, निपुण पुरुषोंसे ही पूर्णरूपसे ग्राह्य होसकता है, अनिपुण पुरुषों से नहीं । शक्तिसम्पन्न यह (बालक) परिचय न होनेसे स्थिर हुए मेरे चित्तको भी जैसे छोटा-सा चुम्बकका टुकड़ा लोहेको अपनी

नयोधातुं यद्वत्परिलघुरयस्कान्तशकलः ॥ २१ ॥

लवः—(प्रविश्य स्वगतम् ।) अविज्ञातवयःक्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य[1] ।) एष वो लवस्य शिरसा प्रणामपर्यायः ।

पुणैः, न पुनः = न निर्माह्यः, बलवान् = शक्तिसम्पन्नः, एषः = बालः, संमोहस्थिरम् अपि, संमोहेन = बालपरिचयाऽज्ञानेन, स्थिरम् अपि=अचञ्चलमपि, पुस्तकान्तरेषु संमोहस्थाने '**संमोद**' इत्यसमस्तपदपाठस्तत्र = संमोदः = हर्ष इत्यर्थः । मे = मम, मनः = चित्तं, परिलघुः = अल्पः, अयस्कान्तशकलः = चुम्बकखण्डः, 'भित्तं शकल-खण्डे वा पुंसि' इत्यमरः, चुम्बको नाम लौहाकर्षकपाषाणविशेषः । अयोधातुं = लौहधातुं, यद्वत् = इव, हरति = आकर्षति । अत्र **परिसंख्योपमयोः** मिथोऽन-पेक्षया स्थितेः **संसृष्टिरलङ्कारः** । **शिखरिणी** वृत्तम् ॥ २१ ॥

लव इति । अज्ञातवयःक्रमौचित्यात् = वयः = अवस्था, च क्रमः = सत्का-रायानुपूर्व्यम् , च वयःक्रमौ, तयोरौचित्यम् = औचिती, वयःक्रमौचित्यं, ज्ञातं = विदितम् च तद्वयःक्रमौचित्यं ज्ञातवयःक्रमौचित्यं, तस्याऽभावः अज्ञातवयः-क्रमौचित्यं, तस्मात = वयःक्रमौचित्यज्ञानाऽभावादित्यर्थः, अर्थाऽभावेऽव्ययीभावः, 'नाऽव्ययीभावादतोऽम्त्वपञ्चम्या' इत्यमोऽभावः । पुस्तकान्तरेषु तु '**अज्ञातनाम-क्रमाऽभिजनान्**' इति पाठस्तत्र-अज्ञाताः = अविदिताः, नामक्रमाऽभिजनाः = अभिधानपौर्वापर्यवंशाः, येषां, तान् इत्यर्थः कार्यः । पूज्यान् = प्रतीद्यान् । कथं = केन = प्रकारेण, अभिवादयिष्ये = नमस्करोमि । अयं = मद्बुद्धिस्थः, अविरुद्ध-प्रकारः=अविपरीता नमस्काररीतिः । वः = युष्माकं, प्रणामपर्यायः = प्रणामानां = नमस्काराणाम् , पर्यायः = परम्परा, पूज्याऽनुक्रमेण नमस्कारा इति भावः । 'सभायां प्रत्येकं न नमस्कुर्यात्' इति गौतमस्मरणमिहाऽभिप्रेतम् ।

ओर खींचता है, उसी तरह आकृष्ट करता है ॥ २१ ॥

लव— प्रवेश कर, मन ही मन) अवस्था और क्रमके औचित्यके अज्ञानके कारण यहांपर स्थित इन पूजनीयोंको कैसे प्रणाम करूँ ? (विचार कर) 'यह विरोधरहित नम-स्कारपद्धति है' ऐसा वृद्ध जनोंसे सुना जाता है । (नम्रताके साथ निकट जाकर) आप लोगोंको पूज्याऽनुक्रमसे लवका शिरसे ये नमस्कार हैं ।

१. अतोऽग्रे 'प्रकाशम्' इत्यपि वक्तुं योग्यम्, 'अविज्ञात''''''श्रूयते' इत्यंशस्य 'स्वगत' त्वेनोक्त्या 'एष वो''''''पर्यायः' इत्यंशस्य 'प्रकाश' (सर्वश्राव्य) त्वेन कथनौचित्यात् । [सं.]

अरुन्धतीजनकौ—कल्याणिन् ! आयुष्मान्भूयाः ।

कौसल्या—जाद ! चिरं जीव । (जात ! चिरं जीव ।)

अरुन्धती—एहि वत्स ! (लवमुत्सङ्गे गृहीत्वा आत्मगतम् ।) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

कौसल्या—जाद ! इदो वि दाव एहि । (उत्सङ्गे गृहीत्वा । अह्मद्दे ! ण केवलं दरविप्फट्टकन्दोट्टमंसलुज्जलेण देहबन्धणेण, कवलिदारविन्दकेसरकसाअकण्ठकलहंसघोसघग्घराणुणादिणा सरेण अ रामभद्दं अणुसरेदि णं कठोरकमलगब्भप्फम्भलसरीरप्फस्सो वि तारिसो एव्व । जाद ! पेक्खामि दे मुहपुण्डरीअम् । (चिबुकमुन्नमय्य निरूप्य सबाष्पाकूतम् ।) राएसि ! किं ण पेक्खसि ? णिउणं णिरूवअन्तो वच्छाए मे वहूए मुहचन्देण विसंवददि एव्व । जात ! इतोऽपि तावदेहि । 'अहो ! न केवलं दरविस्पष्टकुवलयमांसलोज्ज्वलेन देहबन्धनेन, कवलितारविन्दकेसरकषायकण्ठकलहंसघोषघर्घरानुनादिना स्वरेण च

अरुन्धतीति । आयुष्मान्=चिरजीवः । भूयाः = भवतात् , 'आशिषि लिङ्' ।

कौसल्येति । जात = पुत्र ।

अरुन्धतीति । उत्सङ्गे = अङ्के । दिष्ट्या=भाग्येन । मनोरथोऽपि = अभिलाषोऽपि, 'सीतापुत्रमुत्सङ्गे स्थापयिष्यामी' त्याकारिकेच्छापीति भावः ।

कौसल्येति । इतोऽपि = ममोत्सङ्गेऽपि । दरविस्पष्टकुवलयमांसलोज्ज्वलेन = दरम् = ईषत् , विस्पष्टं = विकसितम् , यत् कुवलयं = नीलोत्पलम् , तदिव मांसलम्=पुष्टम् , उज्ज्वलं = निर्मलम् , तेन एतादृशेन देहबन्धनेन = शरीररचनया । कवलिताऽरविन्दकेसरकषायकण्ठकलहंसघोषघर्घराऽनुनादिना = कवलिताः = भक्षिताः, ये अरविन्दकेसराः = कमलकिञ्जल्काः, तैः कषायः = मधुरः, कण्ठः = गलः, लक्षणया स्वर इत्यर्थः, यस्य सः, एतादृशो यः कलहंसः = अव्यक्तमधुर-

अरुन्धती और जनक—हे कल्याण सम्पन्न ! तुम चिरञ्जीव होओ ।

कौसल्या—बेटा ! बहुत समय तक जीओ ।

अरुन्धती—आओ बेटा ! [लवको गोदमें लेकर मन ही मन] भाग्यसे गोद ही नहीं, बहुत कालका मेरा अभिलाष भी पूर्ण हुआ ।

कौसल्या—बेटा ! यहां भी आओ । [गोदमें लेकर] आश्चर्य है, यह बालक अधखिले नीलकमलकी तरह पुष्ट और उज्ज्वल शरीरकी गठनसे ही नहीं, बल्कि खाये हुए कमल केसरोंसे मधुर स्वरवाले हंसके स्वरके सदृशस्वरसे भी रामभद्रका अनुसरण करता है । ओह

रामभद्रमनुसरति । ननु कठोरकमलगर्भपक्ष्मलशरीरस्पर्शोऽपि तादृश एव । जात ! पश्यामि ते मुखपुण्डरीकम् । राजर्षे ! किं न पश्यसि ? निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव ।)

जनकः—पश्यामि सखि ! पश्यामि ।

कौसल्या—अह्महे ! उन्मत्तीभूदं विअ मे हिअअं कुदोमुहं विलवदि ।
(अहो, उन्मत्तीभूतमिव मे हृदयं कुतोमुखं विलपति ।)

स्वरो राजहंसः, तस्य घोषः = शब्दः, स एव घर्घरः = घर्घरेत्यनुकृतिशब्दः, तमनुनदतीति = अनुवदतीति, तेन । स्वरेण = कण्ठध्वनिना, अनुसरति = अनुकरोति, **'अनुहरते'** इति पाठेऽप्ययमेवार्थः, किन्तु **'अनुहरती'**त्ययमपपाठः 'हरतेर्गतताच्छील्ये' इत्यात्मनेपदित्वात् । कठोरस्य = सम्प्रस्य, विकसितत्वात्पूर्णस्येति भावः । कमलस्य = पद्मस्य, गर्भस्य इव = आन्तरपत्रस्य इव, पक्ष्मलः = सुकुमारः, शरीरस्पर्शः=देहस्पर्शः, तादृश एव = रामसदृश एव । चिबुकम् = अधरस्य अधोभागम् , उन्नमय्य = उन्नतं कृत्वा, सबाष्पाकूतम्=बाष्पेण अश्रुणा, आकूतेन = अभिप्रायेण, च सहितं यथा तथा । निपुणं निरूप्यमाणः = पटुतरं निरीक्ष्यमाणः, अयं बालक इति शेषः । वत्सायाः = वात्सल्यभाजः, मे = मम, वध्वाः = स्नुषायाः, सीताया इति भावः । संवदति = उपमामारोहति, अस्य बालस्य मुखं सीतामुखसदृशं वर्तत इति भावः ।

जनक इति । पश्यामि सखि ! पश्यामि = आदराद् द्विरुक्तिः ।

कौसल्येति । उन्मत्तीभूतमिव = विक्षिप्तीभूतमिव, कुतोमुखं = कुतः स्थितं मुखं यस्य तत् , यत्र क्वाप्यसंभाव्यविषये लग्नमिति भावः । विलपति = परिदेवयति ।

खिले हुए कमलके भीतरवाले पत्रकी तरह सुकुमार (मुलायम) इसका शरीरस्पर्श भी रामचन्द्रके शरीरस्पर्शके ही सदृश है । बेटा मैं तेरे मुखकमलको देखती हूँ । (ठुड्डीको ऊँचाकर आँसू गिराकर और अभिप्रायके साथ निहारकर) राजर्षिजी ! आप क्या नहीं देख रहे हैं कि अच्छी तरहसे देखे जानेपर यह बालक मेरी वात्सल्यभागिनी बहू सीताके मुखचन्द्रके साथ भी उपमाका पात्र होता है ।

जनक—देख रहा हूँ, सखि ! देख रहा हूँ ।

कौसल्या—अरे ! पागल हुए मनुष्यकी तरह मेरा हृदय असंभाव्य विषयमें लगता हुआ विलाप कर रहा है ।

जनकः—(निरूप्य ।)

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
संवृत्तिः प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा देवि किमुत्पथैर्मम मनः पारिप्लवं धावति ॥ २२ ॥

वत्साया इति । अस्मिन शिशौ वत्साया रघूद्वहस्य च संवृत्तिः प्रतिबिम्बिता इव अभिव्यज्यते, सा एव निखिला आकृतिः, सा द्युतिः, सा वाणी, स एव सहजो विनयः, (स एव) असौ पुण्याऽनुभावः अपि; हा हा देवि ! मम मनः पारिप्लवम् (सत्) उत्पथैः किं धावति ? इत्यन्वयः । अस्मिन्=पुरोवर्तिनि, शिशौ= बालके, लव इत्यर्थः । वत्सायाः = सीतायाः, रघूद्वहस्य च = रघुवंशश्रेष्ठस्य रामचन्द्रस्य चेत्यर्थः, संवृत्तिः=सम्पर्कः, सम्बन्ध इत्यर्थः । प्रतिबिम्बिता इव=सङ्क्रान्ता। इव, अभिव्यजते = अभिव्यक्ता भवति, दर्पणादौ बिम्बवद् दृश्यत इति भावः । सा एव=तादृशी एव, सीतारामसदृश्येवेत्यर्थः । निखिला=समस्ता, आकृतिः=आकारः, सा = तादृशी, द्युतिः = कान्तिः, सा = तादृशी, वाणी = वाक्, स एव = तादृश एव, सहजः = स्वाभाविकः, विनयः = नम्रता, (स एव = तादृश एव) असौ = अयं, पुण्याऽनुभावोऽपि = पवित्रसामर्थ्यमपि । श्वापदसङ्कुलेऽरण्ये परित्यक्तायाः सीताया मरणमेव निश्चप्रचमतः कुतोऽयं बालस्तस्याः पुत्रः संभाव्य इति नैराश्येनाऽऽह—**हा हेति ।** हा हा देवि = सीते ! देवीति पदेन सीताया लोकान्तरगतत्वं व्यज्यते, मम = जनकस्य, मनः = चित्तं, पारिप्लवं = चञ्चलं (सत्) 'चञ्चलं तरलं चैव पारिप्लवपरिप्लवे ।' इत्यमरः, उत्पथैः=उन्मार्गैः, किं=किमर्थं, धावति= अनवस्थितं भवति, असम्भाव्यविषयाऽभिलाषेणेति भावः । अत्र **तुल्ययोगिता—** ऽलङ्कारः । **शार्दूलविक्रीडितं** वृत्तम् ॥ २२ ॥

जनक—(देखकर) ।

इस बालकमें बेटी सीताका और रामचन्द्रका सम्बन्ध प्रतिबिम्बकी तरह अभिव्यक्त हो रहा है । उसी तरह (सीता और रामके ही सदृश) सम्पूर्ण आकार, कान्ति, वाणी; उसी तरह स्वाभाविक नम्रता और उसी तरह पवित्र सामर्थ्य भी है । हाय हाय ! देवि ! मन चञ्चल होकर क्यों उन्मार्गोंसे दौड़ रहा है ॥ २२ ॥

१. 'दैव' इति पाठान्तरम् ।

कौसल्या—जाद ! अत्थि दे मादा ? सुमरसि वा तादम् ? (जात ! अस्ति ते माता ? स्मरसि वा तातम् ?)

लवः—नहि !

कौसल्या—तदो कस्स तुमम् ? (ततः कस्य त्वम् ?)

लवः—भगवतः सुगृहीतनामधेयस्य वाल्मीकेः ।

कौसल्या-अयि जाद ! कहिदव्वं कहेहि ।(अयि जात ! कथयितव्यं कथय।)

लवः—एतावदेव जानामि !

(नेपथ्ये ।)

भो भोः सैनिकाः ! एष खलु कुमारश्चन्द्रकेतुराज्ञापयति-'न केनचिदाश्रमाभ्यर्णभूमय आक्रमितव्या' इति ।

कौसल्येति । तदा = मातापित्रोरविद्यमानत्वे, कस्य त्वम् = केन पुष्टस्त्वमिति भावः ।

लव इति । सुगृहीतनामधेयस्य = सुगृहीतं = सुष्ठु प्रतिपादितम्, नामधेयं = नाम यस्य तस्य ।

कौसल्येति । कथयितव्यं = स्वसम्बन्धे अन्यदपि कथनीयमिति भावः ।

लव इति । एतावदेव = एतत्परिमाणमेव, कथनीयमिति शेषः ।

भो भो इति । सैनिकाः—सेनासमवायिनः । आश्रमाऽभ्यर्णभूमयः = आश्रमस्य = तपोवनस्य, अभ्यर्णभूमयः = समीपदेशा इत्यर्थः, 'उपकण्ठाऽन्तिकाऽभ्यर्णाऽभ्यमा अप्यभितोऽभ्ययम् ।' इत्यमरः । न आक्रमितव्याः = न आक्रमणीयाः, न पीडनीया इति भावः ।

कौसल्या—बेटा ! तुम्हारी माँ है ! तुम पिताजीको याद करते हो ?

लव—नहीं ।

कौसल्या—तब तुम किसके हो ?

लव—सुगृहीत नामवाले भगवान् वाल्मीकिके ।

कौसल्या—बेटा ! अपने विषयमें कहने योग्य और भी कुछ बात कहो ।

लव—इतना ही जानता हूँ ।

(नेपथ्यमें ।)

अरे सैनिको ! कुमार चन्द्रकेतु आज्ञा देते हैं कि 'कोई भी आश्रमके निकटवर्ती प्रदेशोंमें आक्रमण न करे' ।

अरुन्धतीजनकौ—अये ! मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुर्द्रष्टव्योऽसौ सुदिवसः।

कौसल्या—वच्छलक्खणस्स पुत्तओ आणवेदित्ति अमिदबिन्दुसुन्दराइं अक्खराइं सुणीअन्दि। (वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते।)

लवः—आर्य ! क एष चन्द्रकेतुर्नाम ?

जनकः—जानासि रामलक्ष्मणौ दाशरथी ?

लवः—एतावेव रामायणकथापुरुषौ ?

जनकः—अथ किम् ?

अरुन्धतीति। मेध्याऽश्वरक्षाप्रसङ्गात्—मेध्याऽश्वस्य = यज्ञाऽङ्गभूतस्य हयस्य, रक्षाप्रसङ्गात् = रक्षणाऽवसरात्, रक्षणस्याऽवसरं गृहीत्वेति भावः, 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी। द्रष्टव्यः = विलोकनीयः, अस्माभिरिति शेषः।

कौसल्येति। अमृतबिन्दुसुन्दराणि = अमृतस्य = पीयूषस्य, बिन्दव इव = विप्रुष इव सुन्दराणि मधुराणीति भावः।

जनक इति। दाशरथी = दशरथस्याऽपत्ये पुमांसौ 'अत इञ्' इति इञ् प्रत्ययः।

लव इति। एतावेव = रामलक्ष्मणावेव, रामायणकथापुरुषौ = रामायणकथायाः = रामायणाऽऽख्यमहाकाव्यकथायाः, पुरुषौ = मुख्यत्वेन प्रतिपाद्याविर्त्यर्थः। अत्र काका प्रश्नो व्यज्यते।

जनक इति। अथ किम् = एवमेव, अङ्गीकारद्योतकमेतत्।

अरुन्धती और जनक—अरे ! अश्वमेध यज्ञके पवित्र अश्वकी रक्षाके प्रसङ्गसे आये-हुए कुमार चन्द्रकेतुका दर्शन होगा, इस लिए आज सुदिन है।

कौसल्या—'बेटा लक्ष्मणका पुत्र आज्ञा देता है' ये अमृत-बिन्दुओंके सदृश सुन्दर अक्षर सुने जा रहे हैं।

लव—आर्य ! ये चन्द्रकेतु कौन हैं ?

जनक—दशरथके पुत्र राम और लक्ष्मणको जानते हो ?

लव—क्या ये ही रामायणकथाके मुख्य पुरुष हैं ?

जनक—और क्या !

लवः—तत्कथं न जानामि ?

जनकः—तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः।

लवः—ऊर्मिलायाः पुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः।

अरुन्धती—आविष्कृतं कथाप्रावीण्यं वत्सेन।

जनकः—(विचिन्त्य।) यदि त्वमीदृशः कथयामभिज्ञस्तद् ब्रूहि तावत्पश्यामस्तेषां दशरथस्य पुत्राणां कियन्ति किंनामधेयान्यपत्यानि केषु दारेषु प्रसूतानि ?

लवः—नाऽयं कथाविभागोऽस्माभिरन्येन वा श्रुतपूर्वः।

जनकः—किं न प्रणीतः कविना ?

लव इति। तत् = तर्हि।

जनक इति। तस्य = प्रसिद्धस्य, आत्मजः = पुत्रः।

लव इति। मैथिलस्य = मिथिलाऽधिपतेः, दौहित्रः = दुहितुरनन्तराऽपत्यं पुमान्, 'अनृष्यानन्तर्ये बिदादिभ्योऽञ्' इत्यञ्, राजर्षेः = जनकस्येति भावः।

अरुन्धतीति। वत्सेन = लवेन, कथाप्रावीण्यम् = रामायणकथानैपुण्यम्, आविष्कृतं = प्रकाशितम्।

जनक इति। अभिज्ञः = विज्ञः। पश्यामः = अवलोकयामः, जानीमस्तव कीदृशं ज्ञानमिति भावः। कियन्ति = किंपरिमाणानि, कतिसंख्यकानीति भावः। किन्नामधेयानि-किं नामधेयं = नाम येषां तानि किमाख्यानीत्यर्थः, दारेषु = पत्नीषु प्रसूतानि = उत्पन्नानि।

लव इति। अयं = भवत्पृष्टो रामाऽद्यपत्यवर्णनात्मकः, कथाप्रविभागः = कथाया एकदेशः, श्रुतपूर्वः = पूर्वं श्रुतः, 'सुप्सुपा' इति समासः।

जनक इति। कविना = वाल्मीकिना, किं न प्रणीतः = किं न रचितः।

लव—तब मैं क्यों उन्हें नहीं जानूंगा ?

जनक—यह चन्द्रकेतु उन्हीं लक्ष्मणका पुत्र है।

लव—तब ये चन्द्रकेतु, ऊर्मिलाके पुत्र और मिथिलाके महाराज राजर्षि जनकके दौहित्र हैं।

अरुन्धती—कुमारने रामायणकी कथामें निपुणता दिखलाई है।

जनक—(विचार कर) तुम रामायणकी कथामें ऐसे जानकार हो तो हम भी तुम्हारे ज्ञानको जान लें। बतलाओ—दशरथके उन पुत्रोंके कितने और किस २ नामवाले पुत्र किन किन पत्नियोंमें उत्पन्न हुए हैं ?

लव—यह कथाका भाग हमने वा और किसीने भी नहीं सुना है।

जनक—क्या कविने नहीं बनाया ?

लवः—प्रणीतः, न तु प्रकाशितः। तस्यैव कोऽप्येकदेशः प्रबन्धान्तरेण रसवानभिनेयार्थः कृतः। तं च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजद्भगवतो भरतस्य तौर्यत्रिकसूत्रधारस्य।

जनकः—किमर्थम्?

लवः—स किल भगवान् भरतस्तमप्सरोभिः प्रयोजयिष्यतीति।

जनकः—सर्वमिदमाकूततरमस्माकम्।

लवः—महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था। ततः केषाञ्चिदन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम्। तेषामनुयात्रिकश्चाप-

---

लव इति। न प्रकाशितः = न प्रकाशं नीतः। तस्यैव = रामायणस्यैवर्णनात्मकस्यैव, कोऽपि = अनिर्धारितः, एकदेशः = अंशः। स चांऽशः सप्तमेऽङ्के प्रदर्शयिष्यत इति बोध्यम्। प्रबन्धान्तरेण = अन्येन प्रबन्धविशेषेण, सहेति शेषः। रसवान् = करुणविप्रलम्भादिरसयुक्तः, अभिनेयाऽर्थः = अभिनेयः (अभिनेतुं = दृश्यतामापादयितुं योग्यः) अर्थः (वस्तु) यस्य सः, मुनिः = वाल्मीकिः तौर्यत्रिकसूत्रधारस्य = तौर्यत्रिकस्य (नृत्यगीतवादित्रस्य) सूत्रधारस्य (प्रयोजकाचार्यस्य) समीप इति शेषः।

जनक इति। किमर्थम् = कस्मै प्रयोजनाय, व्यसृजदिति शेषः।

लव इति। तं = रामायणैकदेशम्, अप्सरोभिः = स्वर्वेश्याभिः प्रयोज्यकर्त्रीभिः, प्रयोजयिष्यति = प्रयोगं कारयिष्यति।

जनक इति। आकूततरम् = अतिशयगूढाऽभिप्रायम्।

लव इति। तस्मिन् = रामायणैकदेशे, आस्था = आदरः अन्तेवासिनां = छात्राणाम्, प्रेषितं = प्रहितम्, अनुयात्रिकः अनुचरः, चापपाणिः धनुर्हस्तः,

---

लव—बनाया है, परन्तु प्रकाशित नहीं किया है। उसीका एक भाग दूसरे प्रबन्धके साथ करुणविप्रलम्भ आदि रससे युक्त और अभिनय करने योग्य बनाया है। अपने हाथके लिखे हुए उस अंशको भगवान् वाल्मीकि मुनिने तौर्यत्रिक (नृत्य, गीत और वाद्य के) प्रयोग करनेवाले आचार्य भगवान् भरतजीके पास भेजा है।

जनक - किस लिए?

लव—वे भगवान् भरत अप्सराओंसे उसका अभिनय करावेंगे।

जनक—हमलोगोंके लिए यह सब अत्यन्त गूढ अभिप्रायवाला है।

लव—उस भागमें भगवान् वाल्मीकिका बड़ा आदर है। उन्होंने कई विद्यार्थियोंके द्वारा उस पुस्तकको भरत मुनिके आश्रममें भेजा है। प्रमादसे होनेवाले विघ्नोंको हटानेके

पाणिः प्रमादच्छेदनार्थमस्मद्भ्राता प्रेषितः ।

कौसल्या—भादावि दे अत्थि ? (भ्रातापि तेऽस्ति ?)

लवः—अस्त्यार्यः कुशो नाम ।

कौसल्या—जेट्ठोत्ति भणिदं होदि । (ज्येष्ठ इति भणितं भवति ।)

लवः—एवमेतत् । प्रसवानुक्रमेण स किल ज्यायान् ।

जनकः—किं यमावायुष्मन्तौ ?

लवः—अथ किम् ?

जनकः—वत्स ! कथय, कथाप्रपञ्चकस्य कियान्पर्यन्तः ?

लवः—अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवीं देवयजन-

'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति चापपदस्य पूर्वप्रयोगः । प्रमादच्छेदनाऽर्थम् = अनवधानताऽपनयनार्थम् ।

लव इति । आर्यः = पूज्यः, ज्येष्ठभ्रातेत्यर्थः ।

लव इति । प्रसवाऽनुक्रमेण = उत्पत्तिक्रमेण, ज्यायान् = ज्येष्ठः ।

जनक इति । यमौ = यमजौ ।

जनक इति । कथाप्रपञ्चस्य = कथाविस्तरस्य, कियान् = किम्परिमाणः, पर्यन्तः = अवसानमवधिर्वा, कुत्र कथासमाप्तिरिति भावः ।

लव इति । अलीकपौराऽपवादोद्विग्नेन = अलीकः = मिथ्याभूतो यः, पौराऽपवादः = नागरिककर्तृकदोषकथनम् , तेन उद्विग्नेन = भीतेन, राज्ञा = रामेण, निर्वासितां=परित्यक्ताम् , देवयजनसम्भवां=यागभूमिजाताम् , आसन्नप्रसववेदनां= सन्निहितप्रसूतिदुःखाम् , एकाकिनीम् = असहायाम् , प्रतिनिवृत्तः = अयोध्यां

लिए उनका अनुयायी बनाकर हाथमें धनुष लिए हुए हमारे भाईको भी भेजा है ।

कौसल्या—तुम्हारा भाई भी है ?

लव—पूजनीय वे 'कुश' नामक हैं ।

कौसल्या—तब वे बड़े भाई हैं ?

लव - जी हाँ, जन्मक्रमसे वे बड़े हैं ।

जनक—तुम दोनों क्या जुड़वे भाई हो ?

लव—और क्या ?

जनक—बेटा ! कथाभागकी अवधि कहाँ तक है ?

लव—नागरिकोंके मिथ्या अपवादसे डरे हुए राजा रामके द्वारा छोड़ी गई यज्ञभूमिमें उत्पन्न प्रसववेदनासे दुःखित होनेवाली महारानी सीताको जङ्गलमें छोड़कर लक्ष्मणजी

सम्भग्नां सीतामासन्नप्रसववेदनामेकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति ।

कौसल्या—हा वच्छे मुद्धमुहि ! को दाणिं दे सरीरकुसुमस्स झत्ति देव्वदुव्विलासपरिणामो एक्काइणीए निवडिदो ? (हा वत्से मुग्धमुखि ! क इदानीं ते शरीरकुसुमस्य झटिति दैवदुर्विलासपरिणाम एकाकिन्या निपतितः ?)

जनकः—हा वत्से !

> नूनं त्वया परिभवं च वनं[1] च घोरं
> तां च व्यथां प्रसवकालकृतामवाप्य ।
> क्रव्याद्गणेषु परितः परिवारयत्सु
> संत्रस्तया शरणमित्यसकृत्स्मृतोऽहम् ॥ २३ ॥

प्रतियातः । एप कथैकदेशस्य पर्यन्त इति योजना ।

कौसल्येति । मुग्धमुखि = मुग्धं (सुन्दरम्) मुखम् (आननं) यस्याः सा तत्सम्बुद्धौ । शरीरकुसुमस्य = पुष्पसदृशदेहस्येत्यर्थः, दैवदुर्विलासपरिणामः = दैव-दुर्विलासस्य = भाग्यदुष्टचेष्टितस्य, परिणामः = परिपाकः ।

नूनमिति । परितः क्रव्याद्गणेषु परिवारयत्सु संत्रस्तया त्वया परिभवं, घोरं वनं, प्रसवकालकृतां तां व्यथां च अवाप्य अहं शरणम् इति असकृत् स्मृतः नूनम् इत्यन्वयः । परितः=समन्तात् , क्रव्याद्गणेषु=मांसभक्षकेषु व्याघ्रादिवर्गेषु; परिवार-यत्सु=मण्डलीकृत्याप्नुवत्सु (सत्सु), संत्रस्तया=अतिशयभीतया, त्वया = सीतया, परिभवं = तिरस्कारं, पतिकर्तृकपरित्यागरूपमिति भावः । घोरं = भयङ्करं, वनम्= अरण्यम् , प्रसवकालकृतां = प्रसूतिसमयोत्पन्नां, तां = प्रसिद्धां, व्यथां च = वेदनां च, अवाप्य = प्राप्य, अहं = पिता, शरणं=रक्षकः, 'शरणं गृहरक्षित्रोः' इत्यमरः, यद्यत्र पिताऽभविष्यत्तर्हि मद्रक्षकोऽभविष्यदिति भावः, इति = एवम् , असकृत् = मुहुर्मुहुः, स्मृतः=चिन्तितः, अभवमिति शेपः । नूनं = निश्चयेन । अत्र **तुल्ययोगिताऽलङ्कारः । वसन्ततिलका वृत्तम्** ॥ २३ ॥

लौट गये हैं । (यहीं तक कथाकी अवधि है ।)

कौसल्या—हाय ! सुन्दर मुखवाली बेटी ! अकेली तुम्हारे फूलके सदृश शरीरका झटपट ऐसा भाग्यसम्बन्धी दुर्विलासका क्या परिणाम हो गया ?

जनक—हाय बेटी !

चारों तरफ व्याघ्र आदि हिंसक जन्तुओंके व्याप्त होनेपर डरी हुई तुमने पतिकृत परित्यागरूप तिरस्कार, भयङ्कर वन और प्रसवके समयमें होनेवाली उस वेदनाको भी पाकर मुझको रक्षक समझकर निश्चय ही बारंबार याद किया होगा ॥ २३ ॥

---

१. 'नवम्' इति पाठान्तरम् ।

लवः—आर्ये ! कावेतौ ?

अरुन्धती—इयं कौसल्या । अयं जनकः । (लवः सबहुमानखेदकौतुकं पश्यति ।)

जनकः—अहो निर्दयता दुरात्मनां पौराणाम् ! अहो रामभद्रस्य क्षिप्रकारिता ।

एतद्वैशसवज्रघोरपतनं शश्वन्ममोत्पश्यतः
क्रोधस्य ज्वलितुं झटित्यवसरश्चापेन शापेन वा ।

सबहुमानेति । सबहुमानखेदकौतुकम्=बहुमानेन (कौसल्याजनकयोः पूज्यत्वादतिशयसंमानेन) खेदेन (तद्दुःखदर्शनोत्पन्नदुःखेन) कौतुकेन (असम्भवदर्शनजकुतूहलेन) च सहितं यथा तथा ।

जनक इति । दुरात्मनाम् = दुष्टः (असन्) आत्मा (बुद्धिः) येषां तेषां दुर्बुद्धीनामित्यर्थः, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च ।' इत्यमरः, पौराणां = नागरिकाणाम् , निर्दयता = निष्करुणत्वम् , **'दुर्मर्यादत्वम्'** इति पाठे मर्यादालङ्घनमित्यर्थः । क्षिप्रकारिता = असमीक्ष्यकारिता, युक्ताऽयुक्तत्वमविचार्यैव कार्याऽनुष्ठातृत्वमिति भावः ।

एतदिति । एतत् वैशसवज्रघोरपतनं शश्वत् उत्पश्यतो मम क्रोधस्य चापेन शापेन वा झटिति ज्वलितुम् अवसर इति **श्लोकपूर्वार्द्धान्वयः** । एतत् = समीपवर्ति, वैशसवज्रघोरपतनं = वैशसम् = सीताहननरूपमेव, वज्रस्य = कुलिशस्य, घोरं = भयङ्करम् , यत् पतनं = पातः, तत् । शश्वत् = सदा, उत्पश्यतः = चिन्तयतः, मम=जनकस्य, क्रोधस्य,=कोपस्य, चापेन = धनुषा, शापेन वा=शपनेन वा, अनिष्टोपधायकसंकल्पेन वेति भावः । झटिति = सत्वरम् , **'धगिति'** ईदृशे पाठे 'धक्' इति ज्वलनशब्दाऽनुकरणम् , तद्यथा स्यात्तथा, ज्वलितुं = दाहमितुं, 'कालसमयवेलासु तुमुन्' इति तुमुन् , अवसरः = प्रसङ्गः 'प्रसङ्गः स्यादवसर' इत्यमरः, उपस्थित इति शेषः, । रामकर्तृकस्येदृशस्याऽन्यायाऽऽचरणस्य प्रतीकारं

लव—आर्ये ! ये दोनों कौन हैं ?

अरुन्धती—ये कौसल्या हैं और ये जनक हैं । (लव बहुत सम्मान, विषाद और कौतूहलके साथ देखते हैं ।)

जनक—ओह दुष्ट नागरिकोंकी निर्दयता ! ओह ! रामभद्रकी शीघ्रता (जल्दबाजी) ! सीताके हत्यारूप इस घोर वज्रपातकी निरन्तर चिन्ता करनेवाले मेरे क्रोधके धनुषसे या चापसे शीघ्र प्रज्वलित होनेका यह अवसर है—

कौसल्या—(सभयकम्पम् ।) भअवदि ! परित्ताअदु । पसादेहि कुविदं राएसिम् । (भगवति ! परित्रायताम् । प्रसादय, कुपितं राजर्षिम्)

लवः—

पतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम् ।

अरुन्धती—

राजन्नपत्यं रामस्ते पाल्याश्च कृपणा जनाः[1] ॥ २४ ॥

चापेन राजर्षित्वाच्छापेन वा करोमीति भावः । अत्र 'वैशसवज्रघोरपतनम्' इत्यत्र रूपकाऽलङ्कारः ।

कौसल्येति । परित्रायतां = रक्षतु, कुपितराजर्षिजनकाद्रामो रक्षणीय इत्याशयः । राजर्षिम् = जनकम् , प्रसादय = प्रसन्नं कुरु, अनुनयेनाऽस्य कोपं दूरीकुर्विति भावः ।

लव इति । परिभूतानां मनस्विनां प्रायश्चित्तम् एतत् हि इति **श्लोकपूर्वार्द्धान्वयः** । पुस्तकान्तरेषु इत्युक्तिरपि **अरुन्धत्या** एव । परिभूतानाम् = अवमतानां, मनस्विनां = प्रशस्तचित्तानां पुरुषाणां, प्रायश्चित्तं = कोपप्रतीकार इत्यर्थः । एतत् = प्रसादनं, हि = निश्चयेन—

अरुन्धतीति । हे राजन् ! रामः अपत्यं, कृपणा जनाश्च (ते) पाल्या इति **श्लोकोत्तरार्द्धान्वय** । हे राजन् = जनक !' रामः = रामचन्द्रः, ते=तव, अपत्यं = सन्ततिः, सन्ततेः सीतायाः परिणेतृत्वात्स्वमित्रस्य दशरथस्य पुत्रत्वाच्च सन्ततिरेवेति भावः । कृपणाः = दीनाः, जनाश्च = प्रजाश्च, ते=तव, त्वयेति भावः । 'पाल्या' इति पदेन योगे 'कृत्यानां कर्तरि वा' इति षष्ठी । पाल्याः = पालनीयाः, प्रजारक्षके रामचन्द्रे त्वया विनाशिते सति प्रजा अरक्षिताः स्युरतोऽपि त्वया कोपोऽपनेय इति भावः । **अनुष्टुब्वृत्तम्** । ॥ २४ ॥

कौसल्या—(डरसे काँपकर) भगवति ! रक्षा कीजिये । कुपित राजर्षिको प्रसन्न कीजिए ।

लव—तिरस्कार किये गये मनस्वियोंके कोपका प्रतिकार प्रसादन ही है—

अरुन्धती—हे राजन् ! राम आपके पुत्रतुल्य हैं और आपको दीन प्रजाओंका भी पालन करना चाहिए ॥ २४ ।

---

१. 'प्रजाः' इति पाठान्तरम् ।

जनकः—

शान्तं वा रघुनन्दने तदुभयं तत्पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः ॥ २५ ॥

(प्रविश्य सम्भ्रान्ताः ।)

वटवः—कुमार ! कुमार !! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः ।

शान्तमिति । हि यत् मे पुत्रभाण्डं, पौरो जनश्च भूयिष्ठद्विजबालवृद्धविकलस्त्रैणः । तस्मिन् रघुनन्दने तत् उभयं शान्तं वा, इति 'एतद्वैशसे'ति **पूर्वोक्तश्लोकोत्तरार्द्धोऽन्वयः** । हि = यतः, यत् = रघुनन्दनपुत्रभाण्डस्वरूपस्य विधेयस्य प्राधान्यात् नपुंसकलिङ्गनिर्देशः, मे = मम, जनकस्येत्यर्थः, पुत्रभाण्डं = तनयरूपं मूलधनं, पौरः = नागरिकः, जनश्च = लोकश्च, भूयिष्ठद्विजबालवृद्धविकलस्त्रैणः—भूयिष्ठानि = बहूनि, द्विजाः=ब्राह्मणाः, बालाः = शिशवः, वृद्धाः=स्थविराः, विकलाः = भग्नाङ्गाः, अन्धबधिरादय इत्यर्थः, स्त्रैणानि = स्त्रीसमूहाः, यस्मिन् तादृशोऽस्ति । अतः, (तस्मिन् = पूर्वोक्ते) रघुनन्दने = रामचन्द्रे, तत् = पूर्वोक्तम्, उभयं = चापशापरूपं द्वितयमपि, शान्तं = निवृत्तं, भवत्विति शेषः । यस्माद्धेतोः रामो मत्पुत्रस्थानीयस्तत्पाल्यासु प्रजासु बहवो ब्राह्मणादयश्च सन्ति, रामे विनष्टे सति तेऽपि पालकाऽभावाद्विनष्टाः स्युरतो रामो मदीयश्चापः शापश्चोभयमपि शान्तं भवत्विति भावः । अत्र 'भूयिष्ठद्विजबाले'त्यादौ पदार्थहेतुकः **काव्यलिङ्गाऽलङ्कारः** । **शार्दूलविक्रीडितं वृत्तम्** ॥ २५ ॥

वटव इति । संभ्रान्ताः = संभ्रमयुक्ताः, कृतत्वरा इति यावत् । कोऽपि = अदृष्टः, भूतविशेषः = प्राणिविशेषः, जनपदेषु = कोसलादिदेशेषु, बहुनामारण्यकत्वादियमुक्तिः, श्रूयते = श्रोत्रेन्द्रियेण प्रत्यक्षीक्रियते । प्रत्यक्षीकृतः = चक्षुर्विषयीकृतः ।

जनक—अथवा जो राम मेरे पुत्ररूपमूलधन हैं और नागरिक लोग भी—बहुतेरे ब्राह्मण बालक, वृद्ध, बधिरादि भग्न अङ्गवाले और स्त्रीसमूहसे युक्त हैं, इस कारण उन राममें वे दोनों (धनु और शापके प्रयोग) निवृत्त हों ॥ २५ ॥

(घबड़ाहटके साथ प्रवेश कर)

ब्राह्मण-कुमारगण—कुमार ! कुमार !! देशोंमें जो 'घोड़ा' नामका प्राणिविशेष सुना जाता है, अभी हमने उसको देख लिया है ।

लवः—अश्वोऽश्व इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते, तद् ब्रूत कीदृशः ?

बटवः—अये ! श्रूयताम्—

पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं,
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति, प्रकिरति शकृत्पिण्डकानाम्रमात्रान्

लव इति । पशुसमाम्नाये = पशुनामसंग्राहके शास्त्रे, निघण्टोरेकदेश इति भावः, सांग्रामिके च = युद्धरीतिप्रतिपादकशास्त्रे, धनुर्वेदे चेत्यर्थः । ब्रूत=कथयत । कीदृशः = किंलक्षणः ?

पश्चादिति । (सः) पश्चात् विपुलं पुच्छं वहति, तच्च अजस्रं धूनोति । स दीर्घग्रीवो भवति । तस्य चत्वार एव खुराः । (सः) शष्पाणि अत्ति, आम्रमात्रान् शकृत्पिण्डकान् प्रकिरति । व्याख्यानैः किं ? स पुनः दूरं व्रजति, एहि एहि, याम इत्यन्वयः । (सः = अश्व इत्युच्यमानः) पश्चात् = शरीरपश्चिमे भागे, विपुलं = विशालं, पुच्छं = लाङ्गूलं वहति = धारयति, 'वनमहिषः कोऽयमुभयतः पुच्छ' इत्यारण्यवासनाव्यावृत्त्यर्थं पश्चात्पदम् । तच्च = पुच्छञ्च, अजस्रं = निरन्तरं, धूनोति = चालयति । सः = अश्वः, दीर्घग्रीवो भवति = आयतकन्धरो भवति । तस्य = अश्वस्य, चत्वार एव = चतुःसंख्यका एव, खुराः = शफानि, 'शफं क्लीबे खुरः पुमान्' इत्यमरः, भवन्तीति शेषः । सः=अश्वः, शष्पाणि=बालतृणानि, अत्ति = भक्षयति, आम्रमात्रान् = आम्रफलं प्रमाणं येषां तान् , आम्रफलप्रमाणानित्यर्थः 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' इति मात्रच्प्रत्ययः, एतादृशान् शकृत्पिण्डकान् = पुरीषपिण्डकान् , प्रकिरति = विक्षिपति । व्याख्यानैः किं = विशेषकथनैः किं, सः = अश्वः, पुनः = भूयः, दूरं = विप्रकृष्टं, व्रजति = गच्छति; एहि एहि = आगच्छ आगच्छ, यामः = गच्छामः, सर्वे वयमिति शेषः । अत्रोपमास्वभा-

---

लव—'घोड़ा' यह नाम पशुनामसंग्राहक शास्त्रमें और धनुर्वेदमें भी पढ़ा जाता है, सो बतलाओ—'वह कैसा है ?'

ब्राह्मण-कुमारगण अजी ! सुनो—

यह शरीरके पीछे बड़ी पूँछ धारण करता है और उसे निरन्तर हिलाता रहता है । उसकी लम्बी गर्दन होती है और उसके चार ही खुर होते हैं । वह घास खाता है और आमके फलोंके बराबर लीदके टुकड़ोंको छोड़ता है । बहुत कहनेसे क्या ? वह फिर दूर जा रहा है, आओ

किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥ २६ ॥

(इत्यजिने हस्तयोश्चाकर्षयन्ति ।)

लवः—(सकौतुकोपरोधविनयम् ।) आर्याः ! पश्यत । एभिर्नीतोऽस्मि । (इति त्वरितं परिक्रामति ।)

अरुन्धतीजनकौ—महत्कौतुकं वत्सस्य[1]

कौसल्या—अरण्णगब्भरूवालावेहिं तुह्मे तोसिदा अह्मे अ। भअवदि ! जाणामि तं पेक्खन्ती वञ्चिदा विअ। ता इदो अण्णदो भविअ पेक्खम्ह दाव पलायन्तं दीहाउम्। (अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति ! जानामि तं पश्यन्ती वञ्चितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत्पलायमानं दीर्घायुषम्।)[2]

छेकिलञ्छोर्णो दीपकालङ्कारः। मन्दाक्रान्ता वृत्तम् ॥ २६ ॥

इतीति। अजिने = मृगचर्मणि।

लव इति। सकौतुकोपरोधविनयम् = कौतुकम् = अश्वदर्शनाऽभिलाषः, तस्य उपरोधेन = नियमेन, विनयेन = नम्रतया च सहितं यथा तथा। एभिः = वयस्यैः, नीतोऽस्मि=प्रापितोऽस्मि, भवद्दर्शनपथं परिहृत्य स्वेच्छया न खलु गच्छामीति भावः।

कौसल्येति। अरण्यगर्भरूपालापैः = अरण्यगर्भाणां = वनचरशिशूनाम्, रूपैः = आकारैः, आलापैः=आभाषणैः। जानामि=विमृशामि, तं = लवम्, पश्यन्ती=प्रेक्षमाणा, वञ्चिता इव = प्रतारिता इव, रामभद्रसंवादेन प्रलोभिताऽहमिति भावः। अन्यतो भूत्वा=अन्यत्रोपविश्येति भावः। दीर्घायुषं=जैवातृकं, लवमित्यर्थः।

आओ, हम जाते हैं ॥ २६ ॥

(ऐसा कहकर निकट जाकर मृगचर्म और हाथोंको पकड़कर लवको खींचते हैं।)

लव—(अश्वदर्शनकी उत्कण्ठा, ब्राह्मणबालकोंके आग्रह और नम्रताके साथ) आर्यगण ! देखिए। ये लोग मुझे ले जारहे हैं। (ऐसा कहकर जल्दीसे जाते हैं।)

अरुन्धती और जनक—वत्सको बड़ी उत्कण्ठा है।

कौसल्या—वनमें चलनेवाले लड़कोंके आकारोंसे और आभाषणोंसे आपलोग और हमलोग प्रसन्न किये गये हैं। भगवति ! मैं विचार करती हूँ कि उस (लव) को देखती हुई (रामके रूप-सादृश्यसे) मैं ठगी-सी गई। अतः यहांसे दूसरी जगह चलकर दौड़ते हुए चिरञ्जीवको देखें।

---

१. पूरयतु कुतूहलं वत्सः' इति पाठान्तरम्।

२. क्वचित् 'भअवदि! जाणामि, एदं अणालोअअन्तीण जीअमि विअ। अदो अण्णदो भविअ पेक्खह्म दावगच्छमाणं दीहाउम्'इति कौसल्योक्तं पाठान्तरम्। तस्य 'भगवति! जानामि, एतमनालोकयन्ती न जीवामीव। अतोऽन्यतो भूत्वा पश्यामस्तावद्गच्छन्तं दीर्घायुषम्' इतिच्छाया।

अरुन्धती—अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते ?

कञ्चुकी—(प्रविश्य) भगवान् वाल्मीकिराह—'ज्ञातव्यमेतदवसरे भवद्भि'रिति ।

जनकः—अतिगम्भीरमेतत्किमपि । भगवत्यरुन्धति ! सखि कौसल्ये ! आर्य गृष्टे ! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः ।

(इति निष्क्रान्तो वृद्धवर्गः ।)

(प्रविश्य ।)

वटवः—पश्यतु कुमारस्तावदाश्चर्यम् ।

लवः—दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

अरुन्धतीति । चपलः = चञ्चलः, अतिजवेन = वेगाऽतिशयेन, अतिक्रान्तः= अतिक्रम्य गतः ।

कञ्चुकीति । एतत् = इदम् 'कुतस्त्योऽयं माणवक' इति पृष्टं वृत्तम् इति भावः । अवसरे = उचितकाले, ज्ञातव्यं = वेदनीयम् । साम्प्रतं न कथ्यत इति भावः ।

जनक इति । एतत् = वाल्मीकिवाक्यम्, किमपि=अपूर्वम् , अतिगम्भीरम्= अतिशयगूढाशयम् । स्वयमेव = आत्मनैव, प्राचेतसं = वाल्मीकिम् ।

वटव इति । कुमारः = भवान् ।

लव इति । दृष्टं = प्रत्यक्षीकृतम् , अवगतं च = ज्ञातं च, मयेति शेषः । आश्वमेधिकः = अश्वमेधः प्रयोजनमस्य इति, अश्वमेधाऽर्थक इत्यर्थः । नूनं = निश्चयेन ।

अरुन्धती—अत्यन्त वेगसे दूर चला गया वह चञ्चल लड़का कैसे देखा जा सकता है ?

कञ्चुकी—(प्रवेश कर) भगवान् वाल्मीकि कहते हैं कि—'यह (लवका वृत्तान्त) मौकेपर आप लोगोंको ज्ञातव्य है अर्थात् मालूम हो जायगा' ।

जनक—यह महर्षिका वचन कोई गूढ आशयवाला है ।

भगवति अरुन्धति ! सखि कौसल्ये ! आर्य गृष्टिजी ! स्वयम् ही जाकर भगवान् वाल्मीकिका दर्शन करें ।

(इसके अनन्तर वृद्धलोग चले जाते हैं ।)

(प्रवेश कर)

ब्राह्मणकुमारगण – कुमार इस आश्चर्यको देखें ।

लव—देखा और जान भी लिया । निश्चय यह अश्वमेध यज्ञका घोड़ा है ।

वटवः—कथं ज्ञायते ?

लवः—ननु मूर्खाः ! पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः । तत्प्रायमेवान्यदपि[1] दृश्यते । यदि च विप्रत्ययस्तत्पृच्छथ[2] ।

वटवः—भो भोः ! किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति ?

लवः—(सस्पृहमात्मगतम् ।) अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः ।

वटव इति । कथं = केन प्रकारेण, ज्ञायते = बुद्ध्यते, त्वयेति शेषः ।

लव इति । तत्काण्डम् = अश्वमेधप्रतिपादकवेदभागः, शतसंख्याः = शतं संख्या येषां ते । कवचिनः = कवचवन्तः, दण्डिनः = दण्डवन्तः, निषङ्गिणश्च = तूणीरवन्तश्च, रक्षितारः = रक्षकाः, सन्तीति शेषः । तत्प्रायमेव = कवच्यादिबहुलमेव, अन्यदपि = अनीकमपि । विप्रत्ययः = विरुद्धप्रत्ययः, अविश्वास इत्यर्थः ।

वटव इति । भो भोः = सम्बोधनार्थको निपातः, किंप्रयोजनः = किं प्रयोजनं यस्य सः, किंफलक इत्यर्थः । परिवृतः=परिवेष्टितः, बलैरिति शेषः । पर्यटति= परिभ्रमति ।

लव इति । सस्पृहम् = स्पृहया (अश्वमेधाऽनुष्ठानेच्छया) सहितं यथा तथा । विश्वविजयिनाम् = विश्वं (संसारम्) विजयन्ते तच्छीलास्तेषाम् । ऊर्जस्वलः = प्रशस्तम् ऊर्जोऽस्ति यस्य सः, अतिशयबल इत्यर्थः 'ज्योत्स्नातमिस्रे'-त्यादिना निपातः । सर्वक्षत्रपरिभावी=सर्वान् क्षत्रान् परिभवतीति तच्छीलः=सकलक्षत्रियतिरस्करणशील इति भावः । उत्कर्षनिकषः = शाणसमः प्रकर्षज्ञापक इति भावः, 'शाणस्तु निकषः कष' इत्यमरः, '**निष्कर्ष**' इति पाठे=निष्कर्षः = सारः ।

ब्राह्मणकुमारगण—आप कैसे जानते हैं ?

लव—अरे मूर्खो ! तुम लोगोंने भी वह काण्ड (अध्याय, प्रकरण) पढ़ा ही है । क्या नहीं देखते हो ? सैकड़ों कवचधारी, सैकड़ों दण्डधारी और सैकड़ों तरकशवाले रक्षक हैं । उसी तरहकी सेना भी दिखाई पड़ती है । अविश्वास हो तो पूछ लो ।

ब्राह्मणकुमारगण—अरे ! सेनाओंसे घिरा हुआ यह घोड़ा क्यों घूम रहा है ?

लव—(अभिलाषपूर्वक मन ही मन) 'अश्वमेध यज्ञ' संसारको जीतनेवाले क्षत्रियोंकी अतिशय शक्तियुक्त और संपूर्ण क्षत्रियोंका तिरस्कार करनेवाली बड़ी भारी उत्कर्षकी कसौटी है।

१. 'सैन्यमपि' इति पाठान्तरम् । २. 'पृच्छत' इति पाठान्तरम् ।

(नेपथ्ये ।)

योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २७ ॥

लवः—(सगर्वम् ।) अहो संदीपनान्यक्षराणि ।

वटवः—किमुच्यते ? प्राज्ञः खलु कुमारः ।

लवः—भो भोः तत्किमक्षत्रिया पृथिवी ? यदेवमुद्घोष्यते ।

योऽयमिति, अयं यः अश्वः, इयं सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः पताका अथवा वीरघोषणा (अस्ति) इत्यन्वयः । अयं = संनिकृष्टस्थः, यः, अश्वः= हयः, इयम् = एषा, विधेयभूतायाः पताकाया अथवा वीरघोषणायाः प्राधान्यात् स्त्रीलिङ्गनिर्देशः । सप्तलोकैकवीरस्य=सप्तसु (भूरादिषु) लोकेषु = (भुवनेषु) एकवीरस्य (मुख्यशूरस्य) उत्तरपदसमासः; 'एके मुख्यान्यकेवलाः' इत्यमरः । दशकण्ठकुलद्विषः = रावणवंशनाशकस्य, रामस्येत्यर्थः । पताका = विजयध्वजः, 'पताका वैजयन्ती स्यात्सौभाग्येऽङ्के ध्वजेऽपि च ।' इति विश्वः । अथवा = आहोस्वित्, वीरघोषणा = पराक्रमसूचको डिण्डिमध्वनिरिति भावः । लोकसप्तकेऽपि रामसमः कोऽपि वीरो नाऽस्तीति भावः । अत्र पताकावीरघोषणाभ्यामश्वस्य भेदेऽपि अभेदाऽध्यवसायेनाऽतिशयोक्तिरलङ्कारः ॥ २७ ॥

लव इति । सगर्वम्=गर्वेण (परोत्कर्षाऽनादरेण) सहितं यथा तथा, **'सव्यथ'**-मिति पाठे स्वस्याऽनादरेण सदुःखमित्यर्थः । अक्षराणि = वर्णाः, **'योऽयमश्व'** इत्याद्याकारका इति भावः, संदीपनानि = क्रोधोद्दीपकानीति भावः ।

वटव इति । किमुच्यते = किमभिधीयते, एभिर्बलैरिति शेषः । कुमारः = भवान्, प्राज्ञः = ज्ञाता, अस्मासु विज्ञतम इति भावः । अश्वमेधीयोऽयमश्व इति भवता ज्ञातं, सैनिककथनतात्पर्यमपि भवानेव जानातीति भावः ।

लव इति । तत् = तर्हि, अक्षत्रिया = क्षत्रियरहिता, एवं = **'योऽयमश्व'** इत्यादि, उद्घोष्यते = उच्चैर्घोषणा क्रियते, युष्माभिरिति शेषः ।

(नेपथ्यमें)

यह जो घोड़ा है, यह सात लोकोंमें मुख्य वीर और रावणवंशके शत्रु रामचन्द्रजीकी विजयपताका अथवा वीरघोषणा है ॥ २७ ॥

लव—(गर्वके साथ) अहो ! ये अक्षर क्रोधके उद्दीपक हैं ।

ब्राह्मणकुमारगण—क्या कहा जाता है ? कुमार समझदार हैं ।

लव—अरे सैनिको ! तब क्या पृथिवी क्षत्रियशून्य हो गई । जो कि इस तरह से उद्घोषणा कर रहे हो ।

(नेपथ्ये)

रे रे ! महाराजं प्रति कुतः क्षत्रियः ?

लवः—धिग्जाल्मान् !

यदि नो सन्ति ? सन्त्येव, केयमद्य विभीषिका ?
किमुक्तैरेभिरधुना तां पताकां हरामि वः ॥ २८ ॥

हे बटवः ! परिवृत्य लोष्टैरभिघ्नन्त उपनयतैनमश्वम् । एष रोहितानां मध्येचरो भवतु ।

रे रे इति । रे रे = पदमिदमनादरद्योतके सम्बोधने । महाराजं = रामचन्द्रम्, कुतः=कस्माद्धेतोः क्व वा, क्षत्रियः=क्षत्रः, सर्वेषामपि क्षत्राणां परमप्रीत्या रामवश्यत्वादिति भावः ।

लव इति । जाल्मान् धिक् = असमीक्ष्यकारिणो युष्मान् धिक्, 'जाल्मोऽसमीक्ष्यकारी स्यात्' इत्यमरः ।

यदीति । नो सन्ति यदि ? सन्ति एव, अद्य इयं का विभीषिका ? अधुना एभिः उक्तैः किम् ? वः तां पताकां हरामि इत्यन्वयः । नो सन्ति यदि = वीरक्षत्रिया न वर्तन्ते चेत्, सन्ति एव = वर्तन्त एव, पुस्तकान्तरेषु **'यदि ते सन्ति सन्त्येव'** इति पाठस्तत्र=ते=रामाः, सन्ति यदि = तादृशा वीरा वर्तन्ते चेत, सन्ति एव=वर्तन्त एव इत्यर्थः । अद्य = अस्मिन्दिने, इयम्=एषा, का विभीषिका = किमर्थं भयोत्पादनम् ? एभिः = एतैः, उक्तैः = कथितैर्वचनैः, किं = किं भवति, न किमपीत्यर्थः, 'एभिरधुना' इति स्थाने **'सन्निपत्यैव'** इति पुस्तकान्तरपाठस्तत्र-संमुखं गत्वैवेत्यर्थः, वः = युष्माकं, तां = पूर्वोक्तां, पताकां = विजयध्वजरूपमश्वमिति भावः, हरामि = अन्यत्र प्रापयामि ॥ २८ ॥

हे बटव इति । परिवृत्य = वेष्टयित्वा, लोष्टैः = मृत्पिण्डैः, अभिघ्नन्तः = ताडयन्तः, उपनयत = उटजसमीपं प्रापयत । एषः = अश्वः, रोहितानां = मृगविशेषाणां **'वराक'** इति पाठे-तुच्छ इत्यर्थः ।

(नेपथ्यमें)

क्यों रे ! महाराज रामचन्द्रके प्रति क्षत्रिय कहाँ ?

लव—विना विचारके काम करनेवालोंको धिक्कार है और क्षत्रिय नहीं हैं, क्या ? हैं ही । आज यह डर किसलिए दिखला रहे हो ? इस समय इन बातोंसे क्या ? तुमलोगोंकी उस विजयपताका (अश्व) का हरण कर लेता हूँ ॥ २८ ॥

हे ब्राह्मणकुमारो ! घेरकर ढेलोंसे मारते हुए तुम लोग इस घोड़ेको पर्णशालाके समीप पहुँचाओ । यह (घोड़ा) मृगोंके बीचमें विचरण करे ।

(प्रविश्य सक्रोधः)

पुरुषः—धिक्चपल ! किमुक्तवानसि ? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति, तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

बटवः—कुमार ! कृतं कृतमश्वेन । तर्जयन्ति विस्फारितशरासनाः कुमारमायुधीयश्रेणयः। दूरे चाश्रमपदम्। इतस्तदेहि । हरिणप्लुतैः पलायामहे !

पुरुष इति । आयुधश्रेणयः = आयुधपदस्य असहनक्रियायामन्वयाऽनुपपत्तेः आयुधीये = आयुधधारिणि लक्षणा, ततः आयुधधारिपङ्क्तय इत्यर्थ । शिशोरपि = बालकस्यापि, दृप्तां = दर्पयुक्तां, वाचं = वाणीं, न सहन्ते = न मर्षयन्ति, अतस्त्वां दण्डयिष्यन्तीति भावः । चन्द्रकेतुः = लक्ष्मणपुत्रः, दुर्दान्तः = अमर्षशीलः, **'अरिविमर्दन'** इति पाठे--अरीणां = शत्रूणाम् , विमर्दनः = नाशकः, इत्यर्थः । अपूर्वारण्यदर्शनाक्षिप्तहृदयः = अपूर्वारण्यस्य (पूर्वादृष्टविपिनस्य) दर्शनेन (विलोकनेन) आक्षिप्तहृदयः (आकृष्टचित्तः) अनेन=निकटवर्तिना, तरुगहनेन=तरुभिः= वृक्षैः, गहनेन=दुःखावगाहेन, वनेन, इति शेषः । अपसर्पत=पलायध्वं यूयमिति शेषः ।

बटव इति । अश्वेन = हयेन, कृतम् = अलम् , अश्वेन साध्यं किमपि नाऽस्तीत्यर्थः, गर्हायां द्विरुक्तिः । विस्फारितशरासनाः = विस्फारितानि (प्रकाशितानि) शरासनानि (धनूंषि) यैस्ते प्रकाशितकार्मुका इत्यर्थः । आयुधीयाः=शस्त्रप्रहरणाः 'आयुधाच्छ च' इति छप्रत्ययः, तेषां श्रेणयः = पङ्क्तयः, शस्त्रधारिपङ्क्तय इत्यर्थः । कुमारं = भवन्तं, तर्जयन्ति = भर्त्सयन्ति, भयमुत्पादयन्तीत्यर्थः । आश्रमपदम्=आश्रमस्थानं, दूरे=विप्रकृष्टे । तत्=तस्माद्धेतोः, इतः=अस्मात्स्थानात् , एहि = आगच्छ, हरिणप्लुतैः=हरिणानाम् (मृगाणाम्) इव (प्लुतैः) तीव्रगमनैः । पलायामहे = पलायनं कुर्मः, परापूर्वस्य 'अय गतौ' इति धातोः 'उपसर्गस्या-

(प्रवेश कर क्रोधके साथ)

पुरुष—रे चञ्चल ! तुम्हें धिक्कार है । तुमने क्या कहा है ? प्रचण्ड शस्त्रधारी पुरुषलोग बालककी भी घमण्डसे भरी हुई वाणी को नहीं सहते हैं । असहनशील वे राजकुमार चन्द्रकेतु अपूर्व जङ्गलके देखनेमें आकृष्टचित्त होनेसे जब तक नहीं आते हैं, तब तक वृक्षोंके झुण्डसे दुष्प्रवेश्य इस वनमें तुम सब भाग जाओ ।

ब्राह्मणकुमारगण—कुमार ! घोड़े की आवश्यकता नहीं है, नहीं है । धनुषको चमकाने वाले शस्त्रधारियोंके समूह कुमारोंको डरा (धुड़क) रहे हैं और आश्रमस्थान दूर है, इस

लवः—किं नाम विस्फुरन्ति शस्त्राणि ? (इति धनुरारोपयन् ।)

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्भूरिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बि विकटोदरमस्तु चापम् ॥ २९ ॥

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति महाकविभवभूतिविरचित उत्तररामचरिते कौसल्याजनकयोगो नाम चतुर्थोऽङ्कः ॥ ४ ॥

यतो' इति लत्वम् ।

ज्येति । ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्रम् उद्भूरिघोरघनघर्घरघोषम् एतत् चापं ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बि विकटोदरम् अस्तु इत्यन्वयः । ज्याजिह्वया=ज्या (मौर्वी) सैव जिह्वा (रसना) तया । वलयितोत्कटकोटिदंष्ट्रम्=वलयिते (वेष्टिते) उत्कटकोटी (उन्नताऽग्रभागौ, एव दंष्ट्रे) (पृथुदन्तौ) यस्य तत् । उद्भूरिघोरघनघर्घरघोषम् = उद्भूरयः (असंख्याताः) घोराः (भयङ्कराः) घनाः (सान्द्राः) घर्घरघोषाः (घर्घरेत्याकारकशब्दाः) यस्य तत्, उद्भूरीत्यत्र **'उद्गारी'**ति पाठे—उद्गारिणः = उद्गच्छन्त इत्यर्थः । एतत् = समीपतरवर्ति, चापं = धनुः, ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बि = ग्रासे (कवलने) प्रसक्तम् (उद्युक्तम्) हसत् (हासं कुर्वत्) अन्तकवक्त्रम् (कृतान्तमुखम्) एव यन्त्रं, तस्य जृम्भां (व्यादानम्) विडम्बयति (अनुकरोति) इति तच्छीलमत एव विकटोदरम्= विकटम् (भयङ्करम्) उदरं (मध्यम्) यस्य तत् तादृशम्, अस्तु = भवतु । **अत्र रूपकेण सङ्कीर्णोपमा । वसन्ततिलका वृत्तम् ॥ २९ ॥**

इति श्रीशेषराजशर्मप्रणीतव्याख्यायां चतुर्थोऽङ्कः ॥ ४ ॥

कारणसे आओ । मृगोंकी तरह कूदकर भाग चले ।

लव—क्या शस्त्र चमक रहे हैं ? (ऐसा कहकर धनुषपर डोरी चढ़ाते हुए)

मौर्वीरूप जीभसे वेष्टित, उन्नतकोटिरूप दो दंष्ट्राओंसे युक्त और असंख्य भयङ्कर तथा घने घर्घर शब्दोंवाला यह धनुष, निगलनेमें तत्पर, हँसता हुआ, यमराजके यन्त्ररूप मुखकी जमुहाईकी नकल करनेवाला, अत एव भयङ्कर उदर (मध्य भाग) वाला हो जाय ॥२९॥

(तब यथायोग्य टहलकर सब चले जाते हैं ।)

यह **'कौसल्याजनकयोग'** नामक चतुर्थ अङ्क समाप्त हुआ ॥ ४ ॥

---

१. '(स्मितं कृत्वा)' इति अधिकः पाठः पुस्तकान्तरेषु ।

पञ्चमोऽङ्कः

(नेपथ्ये ।)

भो भोः सैनिकाः ! जातमवलम्बनमस्माकम् ।
नन्वेष त्वरितसुमन्त्रनुद्यमानप्रोद्वल्गत्प्रजवितवाजिना रथेन ।
उत्खातप्रचलितकोविदारकेतुः श्रुत्वा [1]वः प्रधनमुपैति चन्द्रकेतुः ॥१॥

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुतहर्षसंभ्रमश्चन्द्रकेतुः ।)

भो भोरिति । सैनिकाः=सेनासमवायिनः । अवलम्बनं जातम्=आश्रयो जातः ।

नन्वेष इति । ननु त्वरितसुमन्त्रनुद्यमानप्रोद्वल्गत्प्रजवितवाजिना रथेन उत्खातप्रचलितकोविदारकेतुः एष चन्द्रकेतुः वः प्रधनं श्रुत्वा उपैति इत्यन्वयः । नन्विति अवधारणे । त्वरितसुमन्त्रनुद्यमानप्रोद्वल्गत्प्रजवितवाजिना = त्वरितेन = त्वरायुक्तेन, सुमन्त्रेण = तदाख्येन सारथिना, नुद्यमानाः=प्रेर्यमाणाः, प्रोद्वल्गन्तः=प्रचलन्तः, प्रजविताः = अतिशयवेगयुक्ताः, वाजिनः = अश्वाः, यस्मिंस्तेन, रथेन = स्यन्दनेन, उत्खातप्रचलितकोविदारकेतुः=उत्खातेषु=निम्नोन्नतप्रदेशेषु, प्रचलितः= कम्पितः, कोविदारकेतुः = चमरिकतरुनिर्मितरथध्वजो यस्य सः, 'कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।' इत्यमरः, एषः = सन्निहितः, चन्द्रकेतुः = लक्ष्मणात्मजः, वः = युष्माकं, प्रधनं = युद्धं, 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।' इत्यमरः, श्रुत्वा=आकर्ण्य, उपैति = आगच्छति । **इयं चूलिका**, 'नेपथ्याऽन्तःस्थितैः पात्रैश्चूलिकाऽङ्कस्य सूचनम् ।' इत्युक्तेः । अत्रोत्तरार्द्धे केतुपदावृत्तेः **पादान्तयमकम्** । **प्रहर्षिणी वृत्तम्** ॥ १ ॥

तत इति । धनुष्पाणिः = कार्मुकहस्तः, 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' इति धनुःपदस्य पूर्वनिपातः । साद्भुतहर्षसंभ्रमः = अद्भुतेन = एकाकिबालकपरा-

---

(नेपथ्यमें)

हे सैनिको ! हम लोगोंको सहारा मिल गया है ।

वेगवाले सुमन्त्रकी प्रेरणासे चलनेवाले वेगसम्पन्न घोड़ोंसे युक्त रथमें चढ़कर ऊँची-नीची जमीनमें चलनेसे कचनारके काष्ठमें आश्रित जिनकी रथध्वजा हिल रही है, ऐसे ये कुमार चन्द्रकेतु तुम लोगोंका युद्ध सुनकर सामने आ रहे हैं ॥ १ ॥

(अनन्तर सारथि सुमन्त्रसे युक्त रथपर चढ़े हुए और हाथमें धनुष लिये हुए तथा आश्चर्य, हर्ष और शीघ्रतासे युक्त चन्द्रकेतु प्रवेश करते हैं ।)

---

१. 'नः' इति पाठान्तरम् ।

चन्द्रकेतुः—आर्य सुमन्त्र ! पश्य पश्य !

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-
रविरतगुणगुञ्जत्कोटिना कार्मुकेण ।
समरशिरसि चञ्चत्पञ्चचूडश्चमूना-
मुपरि शरतुषारं कोऽप्ययं वीरपोतः ॥ २ ॥

(साश्चर्यम् ।)

क्रमदर्शनोत्पन्नेन आश्चर्येण, हर्षेण=स्वसमवीरदर्शनोत्पन्नेन आनन्देन, संभ्रमेण = लवकृतस्वसैनिकसंहारदर्शनोत्पन्नया त्वरया, च सहितं यथा तथा ।

चन्द्रकेतुरिति । आर्य = हे पूज्य, सुमन्त्रस्य दशरथमन्त्रित्वादार्यपदेन सम्बोधनम् ।

किरतीति । कलितकिञ्चित्कोपरज्यन्मुखश्रीः चञ्चत्पञ्चचूडः कोऽपि अयं वीरपोतः समरशिरसि अविरतगुणगुञ्जत्कोटिना कार्मुकेण चमूनाम् उपरि शरतुषारं किरति इत्यन्वयः । कलितकिञ्चित्कोपरज्यन्मुखश्रीः = कलितेन = कृतेन, किञ्चित्कोपेन=ईषन्मन्युना, रज्यन्ती=रक्तीभवन्ती, मुखश्रीः=आननशोभा, यस्य सः । चञ्चत्पञ्चचूडः = चञ्चन्त्यः = चलन्त्यः, पञ्च = पञ्चसंख्यकाः, चूडाः = शिखाः यस्य सः । एतादृशः, कोऽपि = अविदितः, अयं = निकटस्थः, वीरपोतः=शूरशिशुः, समरशिरसि = युद्धाग्रे, रणभूमावित्यर्थः । अविरतगुणगुञ्जत्कोटिना = अविरतं = विश्रान्तिरहितं यथा तथा गुणे=ज्यायाम् , गुञ्जन्त्यौ=शब्दायमाने, कोटी=अटन्यौ, धनुरग्रभागावित्यर्थः, यस्य तेन; एतादृशेन कार्मुकेण = धनुषा, चमूनां=सेनानां, 'पृतनाऽनीकिनी चमूः' इत्यमरः; उपरि=ऊर्ध्वम् 'शरतुषारम् = शरः = बाणः, तुषारः = हिमम् इव, तम् 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः, 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामि'ति जातावेकवद्भावः, किरति=विक्षिपति । अत्र 'शरतुषारम्' इत्यत्र लुप्तोपमाऽलङ्कारः । मालिनी वृत्तम् ॥ २ ॥

चन्द्रकेतु—आर्य सुमन्त्र ! देखिए, देखिए !

कुछ क्रोध करनेसे जिसकी मुखश्री लाल हो गई है और जिसकी पाँचों शिखायें हिल रही हैं, ऐसा कोई यह वीरबालक युद्धभूमिमें मौर्वीमें लगातार गूंजनेवाली कोटियोंसे युक्त धनुषसे सेनाओंके ऊपर बाणरूप ओलोंको फेंक रहा है ॥ २ ॥

आश्चर्यके साथ—

मुनिजनशिशुरेकः सर्वतः संप्रकोपा-
नव इव रघुवंशस्याप्रसिद्धिप्ररोहः
दलितकरिकपोलग्रन्थिटङ्कारघोर-
ज्वलितशरसहस्रः कौतुकं मे करोति ॥ ६ ॥

सुमन्त्रः—आयुष्मन् !
अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरूपम् ।

मुनिजनेति । रघुवंशस्य नवः अप्रसिद्धिप्ररोहः इव एको मुनिजनशिशुः संप्रकोपात सर्वतः दलितकरिकपोलग्रन्थिटङ्कारघोरज्वलितशरसहस्रः (सन) मे कौतुकं करोति इत्यन्वयः । रघुवंशस्य = रघुकुलस्य, नवः = नूतनः, अप्रसिद्धि-प्ररोह इव = ख्यातिरहिताऽङ्कुर इव, एकः = एकाकी, 'एकाकी त्वेक एकक' इत्यमरः । मुनिजनशिशुः = ऋषिबालः, संप्रकोपात् = प्रकृष्टकोधात्, सर्वतः = समन्तात्, दलितकरिकपोलग्रन्थिटङ्कारघोरज्वलितशरसहस्रः = दलितानां=विमर्दितानाम्, करिकपोलग्रन्थीनां = गजगण्डसन्धीनाम्, टङ्कारेण = टमितिरूपेण दलनशब्देन, घोरं = भयङ्करम्, ज्वलितं = प्रदीप्तम्, शराणां = बाणानाम्, सहस्रं = दशशती, यस्य सः, तादृशः सन्, मे = मम, कौतुकं = कौतूहलं करोति = विदधाति । अयमेकाकी बालको यदेतैर्हस्त्यश्वरथाऽऽरूढैः पदातिभिश्च सैनिकैः सह निर्भयं संग्रामं कुरुते, एतेन मे महदाश्चर्यमुत्पद्यत इति भावः । अत्रोपमाऽलङ्कारः । मालिनी वृत्तम् ॥ ३ ॥

अतिशयितेति । तथा एव तुल्यरूपम् अतिशयितसुराऽसुरप्रभावं शिशुम् अवलोक्य कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि इत्यन्वयः । तथा एव = तेन प्रकारेणैव, तुल्यरूपं = समानरूपं, रामसमरूपमित्यर्थः । अतिशयितसुराऽसुरप्रभावम्=अतिशयितः = अतिक्रान्तः, सुराऽसुराणां=देवदैत्यानाम्, प्रभावः = वीर्यं येन तम्, एतादृशं शिशुम् = इमं मुनिबालकम्, अवलोक्य =

रघुकुलका नया अप्रख्यात अङ्कुरके सदृश, जिसके भयंकर हजारों बाण जल रहे हैं ऐसा यह एक मुनिकुमार अत्यन्त क्रोधसे चारों तरफ विमर्दित हाथियोंकी कपोलग्रन्थियोंके टङ्कारसे मेरे कौतुकको उत्पन्न कर रहा है ॥ ३ ॥
सुमन्त्र—चिरंजीव !

उसी तरहसे समान रूपवाले और देवता तथा दैत्योंके पराक्रमको लङ्घन करनेवाले इस

१. 'प्रसिद्ध' इति पाठान्तरम् । २. 'तथैव' इति पाठान्तरम् ।

कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥ ४ ॥

चन्द्रकेतुः—मम त्वेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते ।

अयं हि शिशुरेकको[1] मदभरेण भूरिस्फुरत्-

करालकरकन्दलीजटिलशस्त्रजालैर्बलैः ।

दृष्ट्वा, कुशिकसुतमखद्विषाम् = कुशिकसुतस्य = कौशिकस्य, विश्वामित्रस्येत्यर्थः, मखद्विषां = यज्ञदूषकाणां,सुबाहुप्रभृतीनां राक्षसानामित्यर्थः । प्रमाथे = विनाशे, धृतधनुषं = गृहीतकार्मुकं, रघुनन्दनं = रामचन्द्रं, स्मरामि = चिन्तयामि । न केवलं प्रभावतो रूपतोऽपि रामसममिमं बालकमवलोकयामीति भावः । अत्र प्रथम-चरणेऽतिशयोक्तिः, द्वितीयचरण उपमा, सदृशाऽनुभवाद्रामरूपवस्तुस्मृतेः स्मर-णालङ्कारश्च, त्रयाणामपि अङ्गाङ्गिभावेन संकरः । पुष्पिताग्रा वृत्तम् ॥ ४ ॥

चन्द्रकेतुरिति । एकम् = एकाकिनमिमं बालकमित्यर्थः, उद्दिश्य = लक्ष्यी-कृत्य, भूयसां = बहूनाम् , आरम्भः = व्यापारो, युद्धात्मक इति भाव । हृदयं = चित्तम् , अपत्रपते = लज्जते । अस्यैकस्य मुनिकुमारस्य कृते समवेतानां बहु-संख्यकानामस्माकं युद्धात्मको व्यापारोऽनुचित इति मत्वा मदीयं चित्तं जिह्रे-तीति भावः ।

अयमिति । हि अयम् एककः शिशुः मदभरेण भूरिस्फुरत्करालकरक-न्दलीजटिलशस्त्रजालैः क्वणत्कनककिङ्किणीझणझणायितस्यन्दनैः अमन्दमददुर्दिन-द्विरदडामरैः बलैः आवृत इत्यन्वयः । हि = यतः, अयं = निकटस्थः, एककः = एक एव, एकाक्येवेत्यर्थः 'एकादाकिनिच्चाऽसहाये' इत्यत्र चाश्कन् , 'एकाकी त्वेक एककः' इत्यमरः । चाल्लुकि 'एक' इत्यपि । मदभरेण = मदाऽतिशयेन' वीरमानजनितेनेति शेषः । भूरिस्फुरत्करालकरकन्दलीजटिलशस्त्रजालैः = भूरि = अधिकं यथा तथा, स्फुरन्ति=दीप्यमानानि, करालानि=क्रूराणि, करकन्दलीषु=

बालकको देखकर विश्वामित्रके यज्ञमें विघ्न करनेवाले सुबाहु आदि राक्षसोंको नष्ट करनेके वास्ते धनुष लिएहुए रामचन्द्रकी याद कर रहा हूँ ॥ ४ ॥

चन्द्रकेतु—एकको लक्ष्य करके बहुतोंका युद्धारम्भ है, इसलिए मेरा हृदय तो लज्जित हो रहा है ।

यह अकेला बालक अतिशय मदसे अत्यन्त स्फुरित होती हुई भयङ्कर हस्तशाखाके अग्रभागोंके सदृश हाथोंमें अधिक शोभित होनेवाले कठोर और घने अस्त्रोंसे युक्त,

१. 'कः समरभार' इति पाठान्तरम् ।

क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदडामरैरावृतः ॥ ५ ॥

सुमन्त्रः—वत्स ! एभिः समस्तैरपि नालमस्य, किं पुनर्व्यस्तैः ?

चन्द्रकेतुः—आर्य ! त्वर्यतां त्वर्यताम् । अनेन हि महानाश्रितजन-प्रमारोऽस्माकमारब्धः । तथा हि—

हस्तशाखाऽग्रेषु, जटिलानि = निबिडानि, 'कलित' इति पाठे—कलितानि = धृतानीत्यर्थः, एतादृशानि शस्त्रजालानि = आयुधसमूहाः, येषां तैः, एवं क्वणत्कनककिङ्किणीझणझणायितस्यन्दनैः = क्वणन्तीभिः = शब्दवतीभिः, कनककिङ्किणीभिः = सुवर्णक्षुद्रघण्टिकाभिः, झणझणायिताः = झणझणंति शब्दं कुर्वन्तः, स्यन्दनाः = रथाः येषां तैः, 'किङ्किणी क्षुद्रघण्टिका' इत्यमरः । अमन्दमददुर्दिनद्विरदडामरैः = अमन्दः = अनल्पः, अधिक इत्यर्थः, मदः=दानवारि, एव दुर्दिनं=वृष्टिः, येषां ते, ते च ते द्विरदाः = हस्तिनः, तैः डामरैः = भयङ्करैः, एतादृशैर्बलैः = अस्मत्सैन्यैः, आवृतः = परिवृतः, अतो मे लज्जेति भावः । अत्रोपमालङ्कारः । पृथ्वी वृत्तं—'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति तल्लक्षणम् ॥ ५ ॥

सुमन्त्र इति । एभिः = पुरःस्थितैः, समस्तैरपि = संपूर्णैरपि, अस्मत्सैन्यैरिति शेषः, अस्य = मुनिकुमारस्य, न अलम् = न पर्याप्तिः । व्यस्तैः = पृथक्स्थितैः । अस्य मुनिकुमारस्य कृते सर्वेऽपीमे सैनिकास्तुच्छा इति भावः ।

चन्द्रकेतुरिति । त्वर्यतां=त्वरा क्रियताम् , अहमेतेन युध्यामीति भावः, संभ्रमे द्विरुक्तिः । आश्रितजनप्रमारः = आश्रितजनानाम् = उपजीविनराणाम् , प्रमारः = बहुमारणम् ।

बजनेवाली सुवर्णमयी क्षुद्रघंटिकाओं (घुँघुरुओं) से 'झण झण' शब्द करनेवाले रथों से सम्पन्न और अधिक मदजलकी वृष्टि करनेवाले हाथियोंसे भयङ्कर, हमारी सेनाओं के द्वारा घिरा हुआ है ॥ ५ ॥

सुमन्त्र—वत्स ! इकट्ठी हुई ये सब सेनायें भी इसको पर्याप्त (काफी) नहीं हैं तो विभक्त सेनाओंका क्या कहना ?

चन्द्रकेतु—आर्य ! जल्दी कीजिए, जल्दी कीजिए । इसने हमारे आश्रितजनोंका भारी विनाश आरम्भ कर दिया है । जैसे—

१. 'वारिदैः' इति पाठान्तरम् ।

२. 'प्रमाथो' इति पाठान्तरम् ।

आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वर-
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन् ।
वेल्लन्द्भैरवरुण्डखण्डनिकरैर्वीरो विधत्ते भुवं
तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव ॥ ६ ॥

सुमन्त्रः—(स्वगतम् ।) **कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसंप्र-**

आगर्जदिति । (अयम्) वीरः अमन्ददुन्दुभिरवैः आध्मातम् आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरज्यानिर्घोषम् उज्जृम्भयन् वेल्लद्भैरवरुण्डखण्डनिकरैः भुवं तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणाम् इव विधत्त इत्यन्वयः । अयं वीरः = शूरः, मुनिकुमारः 'शूरो वीरश्च विक्रान्त' इत्यमरः । अमन्ददुन्दुभिरवैः = अमन्दैः = अतिशयितैः, दुन्दुभिरवैः = भेरीशब्दैः, आध्मातम् = प्रवृद्धम्, आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरज्यानिर्घोषम् = आगर्जतां = भयवशाद्गाढगर्जनं कुर्वताम्, गिरिकुञ्जकुञ्जराणां = पर्वतनिकुञ्जहस्तिनाम्, घटायै = पङ्क्तये, निस्तीर्णः = दत्तः, **'विस्तीर्ण'** इति पाठे घटासु विस्तीर्णः = प्रसारित इत्यर्थः, एतादृशः कर्णज्वरः = श्रोत्रपीडा, येन तं, तथाविधं ज्यानिर्घोषम् = **मौर्वीशब्दम्**, उज्जृम्भयन् = उत्पादयन् । वेल्लद्भैरवरुण्डखण्डनिकरैः = वेल्लद्भिः लुठद्भिः = भैरवाणां = भयङ्कराणाम्, रुण्डखण्डानां = कबन्धानां तच्छिरसां च, निकरैः = समूहैः, खण्डस्थाने **'मुण्ड'**पदस्य पाठेऽप्ययमेवार्थः । भुवं = पृथिवीं, तृष्यत्कालकरालवक्त्रविघसव्याकीर्यमाणाम् इव = तृष्यतः = पिपासतः, कालस्य = मृत्योः, यत् करालवक्त्रं = भयङ्करमुखम्, तस्य विघसैः = भुक्तशिष्टैः, व्याकीर्यमाणाम् इव = संस्तीर्यमाणाम् इव, 'अमृतं विघसो यज्ञशेषयोः' इत्यमरः । विधत्ते = करोति । यथा मृत्युभुक्तावशिष्टैः प्राण्यवयवैः भूमिं समाच्छादयति, तथैवाऽयं वीरोऽपि अस्मत्सैनिकानां कबन्धैस्तच्छिरोभिश्च भूमिं समन्तादास्तृणाति, अतः सत्वरमस्य प्रतीकारः कर्तव्य इति भावः । अत्राऽतिशयोक्त्युत्प्रेक्षयोर्मिथो नैरपेक्ष्यात्संसृष्टिः । **शार्दूलविक्रीडितं** वृत्तम् ॥ ६ ॥

सुमन्त्र इति । ईदृशेन = एतादृशेन, वीरवरेणेत्यर्थः, द्वन्द्वसम्प्रहारं = द्वन्द्व-

यह वीर बालक अधिक भेरीके शब्दोंसे बढ़े हुए, पर्वतीय लताकुञ्जके. बहुत गर्जनेवाले हाथियोंकी पङ्क्तिके कानोंको पीड़ित करनेवाले मौर्वीशब्दको उत्पन्न करता हुआ—छटपटाते हुए कबन्ध और उनके शिरोंके समूहोंसे पृथ्वीको, प्यासे मृत्युके भयङ्कर मुखके भुक्तावशिष्ट पदार्थोंसे आच्छादितकी तरह कर रहा है ॥ ६ ॥

सुमन्त्र—(मन ही मन) इस योद्धाके साथ वत्स चन्द्रकेतुको द्वन्द्वयुद्धकी आज्ञा कैसे

द्वारमनुजानीमः। (विचिन्त्य।) अथवा इक्ष्वाकुकुलवृद्धाः खलु वयम्। प्रत्युपस्थिते रणे का गतिः ?

चन्द्रकेतुः—(सविस्मयलज्जासम्भ्रमम्।) हन्त धिक्! अपावृत्तान्येव सर्वतः सैन्यानि मम।

सुमन्त्रः-(रथवेगं निरूप्य।) आयुष्मन्! एष ते वाग्विषयीभूतः स वीरः।

चन्द्रकेतुः—(विस्मृतिमभिनीय।) आर्य किं नामधेयमाख्यातमाह्वायकैः ?

युद्धम्, अनुजानीमः = अनुज्ञां कुर्मः। विचिन्त्य = विचार्य। इक्ष्वाकुकुलवृद्धाः = इक्ष्वाकुकुलस्य = इक्ष्वाकुवंशस्य, वृद्धाः = स्थविराः, मर्यादाऽभिज्ञा इत्यर्थः, 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम्। रणे = युद्धे, उपस्थिते = सम्प्राप्ते, का गतिः = क उपायः ? समर उपस्थित इक्ष्वाकुकुलोत्पन्नानामनिवर्तित्वेनाऽऽभिमुख्यमेव कर्तव्यमिति भावः।

चन्द्रकेतुरिति। सविस्मयलज्जासंभ्रमं = विस्मयेन = लवपराक्रमदर्शनोत्पन्नेन आश्चर्येण, लज्जया = स्वसैन्यपराजयोत्पन्नया व्रीडया, संभ्रमेण = स्वसैन्यरक्षणप्रयोजनया त्वरया च सहितं यथा तथा। सर्वतः = समन्तात्, अपावृत्तानि = पराङ्मुखीभूतानि।

सुमन्त्र इति। निरूप्य = दर्शयित्वा, अभिनीयेत्यर्थः। एषः = समीपस्थितः, सः = प्रसिद्धः, वीरः = शूरः, लव इत्यर्थः। ते = तव, वाग्विषयीभूतः = वार्चा = वाणीनाम्, विषयीभूतः = गोचरीभूतः, प्राग्दूरवर्तित्वादयमसम्भाष्योऽभूत्साम्प्रतं निकटस्थत्वात् संभाषणीयो जात इति भावः।

चन्द्रकेतुरिति। विस्मृतिं = विस्मरणम्, अभिनीय = अभिनयं कृत्वा। आह्वायकैः = स्पर्द्धाशीलैः, 'आख्यायकैः' इति पाठे वार्ताहरैरित्यर्थः। नामधेयं = नाम, अस्येति शेषः। आख्यातं=कथितम्।

दूँ ? (विचार कर) अथवा हमलोग इक्ष्वाकुवंशमें सेवा कर बूढ़े हुए हैं ? युद्धके उपस्थित होनेपर क्या उपाय है ?

चन्द्रकेतु—(आश्चर्य, लज्जा और शीघ्रताके साथ) हाय ! धिक्कार है। मेरी सेनायें चारों ओरसे ही भाग रही हैं।

सुमन्त्र—(रथके वेगका अभिनय करके) चिरञ्जीव ! यह वही वीर आपके वचनका विषय हो गया है (अब आपकी बात सुन सकता है)।

चन्द्रकेतु—(भूलनेका अभिनय करके) आर्य ! स्पर्धा करनेवालोंने (इसका) क्या नाम कहा था ?

सुमन्त्रः—'लव' इति ।

चन्द्रकेतुः—

भो भो लव ! महाबाहो ! किमेभिस्तव सैनिकैः ? ।
एषोऽहमेहि मामेव, तेजस्तेजसि शाम्यतु ॥ ७ ॥

सुमन्त्रः—कुमार ! पश्य पश्य ।

विनिवर्तित एष वीरपोतः पृतनानिर्मथनात्त्वयोपहूतः ।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः ॥ ८ ॥

भो भो इति । भो भो महाबाहो ! लव ! एभिः सैनिकैः तव किम् ? एषः अहम् । माम् एव एहि, तेजः तेजसि शाम्यतु इत्यन्वयः । भो भो महाबाहो लव = हे दीर्घभुज ! हे लव !, एभिः = त्वत्समीपस्थैः, सैनिकैः = सैन्यैः, अस्मदीयैरिति शेषः । तव = भवतः, किं = कोऽर्थ इत्यर्थः । एषः = तव निकटस्थः, अहं = चन्द्रकेतुः, अस्मीति शेषः । अतो मामेव एहि = आगच्छ, संग्रामायेति शेषः । तेजः = शौर्यं, तेजसि = शौर्ये, शाम्यतु = शान्तं भवतु, निर्वाणं भवत्विति भावः । वाक्यार्थहेतुकं **काव्यलिङ्ग**मलङ्कारः ॥ ७ ॥

विनिवर्तित इति । एष वीरपोतः त्वया उपहूतः (सन्) दृप्तसिंहशावः स्तनयित्नुरवात् इभाऽऽवलीनाम् अवमर्दात् इव पृतनानिर्मथनात् विनिवर्तितं इत्यन्वयः । एषः = समीपस्थः, वीरपोतः = शूरशिशुः 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः ।' इत्यमरः । **'बालवीर'** इति पाठे **'शिशुशूर'** इत्यर्थः । त्वया = भवता, उपहूतः आहूतः = सन् , द्वन्द्वयुद्धायेति शेषः । दृप्तसिंहशावः = दृप्तः = दर्पयुक्तः, चासौ सिंहशावः = मृगेन्द्रशिशुः, स्तनयित्नुरवात् = मेघशब्दात् , इभावलीनाम् = हस्तिपङ्क्तीनाम् , अवमर्दात् इव = मर्दनात् इव, पृतनानिर्मथनात् = सेनाप्रहारात् , विनिवर्तितः = निवृत्तव्यापारः, अस्तीति शेषः । 'व्यप-

---

सुमन्त्रः—'लव' ।

चन्द्रकेतु—हे दीर्घबाहु लव ! इन सैनिकोंसे तुम्हें क्या मतलब है । तुम्हारे लिए यह मैं हूँ । मेरे ही पास आओ । तेज तेजमें शान्त हो जाय ॥ ७ ॥

सुमन्त्रः—कुमार ! देखिये, देखिये ।

'यह वीर बालक' आपके चुनौती देनेपर, दर्पयुक्त सिंहका बच्चा मेघ का शब्द सुनकर हाथियोंके समूहके मर्दनसे जैसे विरत होता है, उसी तरह सेनाओंके विनाशसे विरत हो गया है ॥ ८ ॥

(ततः प्रविशति धीरोद्धतपराक्रमो लवः ।)

लवः—साधु राजपुत्र ! साधु ! सत्यमैक्ष्वाकः खल्वसि । तदहं परागत एवास्मि ।

(नेपथ्ये महान् कलकलः ।)

लवः—(सावष्टम्भं परावृत्य) कथमिदानीं भग्ना अपि पुनः प्रतिनिवृत्ताः पृष्ठानुसारिणः पर्यवष्टम्भयन्ति मां चमूपतयः धिग्जाल्मान् !

वर्तेत' इति पाठे परावर्तेत इत्यर्थः । **उपमाऽलङ्कारः । मालभारिणी** वृत्तम् । 'विषमे ससजा यदा गुरू चेत्, सभरा येन तु मालभारिणीयम्' । इति तल्लक्षणम् ॥ ८ ॥

तत इति । धीरोद्धतपराक्रमः = धीरोद्धतः = युद्धोद्भटः, पराक्रमः = शौर्यं= यस्य सः, **'त्वरितोद्धतक्रम'** इति पाठे-त्वरितः = त्वरायुक्तः, चन्द्रकेतोराह्वानादिति शेषः, उद्धतः = गर्वयुक्तः, क्रमः = पादविक्षेपः, यस्य स इत्यर्थः ।

लव इति । ऐक्ष्वाकः = इक्ष्वाकुकुलोत्पन्नः । परागतः = सम्प्राप्तः ।

नेपथ्य इति । कलकलः = कोलाहलः, सैन्यानामिति शेषः ।

लव इति । साऽवष्टम्भम् = अवष्टम्भेन (स्थित्या, न तु सैन्यकर्तृकाक्रमणोत्पन्नयाऽधीरतया इति भावः) सहितं यथा तथा । परावृत्य = विवृत्तवदनीभूयेत्यर्थः, **'सावेगम्'** इति पाठे-आवेगेन = त्वरया, सहितं यथा तथा, भग्नाः = पलायिताः, प्रतिनिवृत्ताः = सन्निवृत्ताः, पृष्ठाऽनुसारिणः = मत्पृष्ठाऽनुसरणशीलाः, **'युद्धाऽभिसारिण'** इति पाठे रणोपस्थायिन इत्यर्थः । चमूपतयः = सेनापतयः, पर्यवष्टम्भयन्ति = समीपस्थिता भवन्ति, 'अवाच्चालम्बनाविदूर्ययोः' इति षत्वम् । पलायमाना अपि मां चन्द्रकेतुसकाशं गच्छन्तं दृष्ट्वा प्रहर्तुकामा एत इति भावः ।

(अनन्तर युद्धमें उद्भट पराक्रमवाले लव प्रवेश करते हैं ।)

लव—वाह राजपुत्र ! वाह ! सचमुच तुम इक्ष्वाकुवंशी हो । इसलिए मैं तुम्हारे सम्मुख ही आ गया हूँ ।

(नेपथ्यमें बड़ा कोलाहल होता है ।)

लव—(लौटकर ठहरावके साथ) अभी भागे हुए भी सेनापति लौटकर मेरे पीछे अनुसरण करते हुए किस तरह समीपवर्ती हो रहे हैं ? अविचारसे काम करनेवालोंको धिक्कार है !

अयं शैलाघातक्षुभितवडवावक्त्रहुतभुक्-
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे ।
समन्तादुत्सर्पद्घनतुमुलहेलाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ९ ॥

(सवेगं परिक्रामति)

चन्द्रकेतुः—भो भोः कुमारः !

अयमिति । अयं समन्तात् उत्सर्पद्घनतुमुलहेलाकलकलः प्रलयपवनास्फालितः पयोराशेः ओघः इव मे शैलाघातक्षुभितवडवावक्त्रहुतभुक्प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु इत्यन्वयः । अयं = निकटोत्पन्नः, समन्तात् = सर्वतः, उत्सर्पद्घनतुमुलहेलाकलकलः = उत्सर्पन् = प्रसरन् , घनः = निबिडः, तुमुलः = सङ्कुलः, यो हेलायाः = रणक्रीडायाः, कलकलः = कोलाहलः, सः, प्रलयपवनास्फालितः = प्रलयपवनेन = संवर्तवायुना, आस्फालितः = ताडितः, पयोराशेः = समुद्रस्य, ओघ इव = प्रवाह इव, मे = मम, शैलाऽऽघातक्षुभितवडवावक्त्रहुतभुक्प्रचण्डक्रोधाऽर्चिर्निचयकवलत्वम् = शैलानाम् = पर्वतानाम् , समुद्राऽभ्यन्तरस्थानामिति भावः, आघातेन = ताडनेन, क्षुभितः = संचलितः, यो वडवावक्त्रहुतभुक् = वडवानलः, स इव प्रचण्डः = कठोरः, यः क्रोधः = कोपः, स एव अर्चिषां = ज्वालानाम् , निचयः = समूहः, तस्य कवलत्वम् = ग्रासत्वं, भक्ष्यत्वमित्यर्थः । व्रजतु = गच्छतु । समुद्रस्य महाप्रवाहो यथा वाडवाऽग्निं प्राप्य नश्यति तथैवाऽयं सेनासमूहो मत्कोपाऽग्निं प्राप्य नश्यत्विति भावः । **अत्रोपमारूपकयोरङ्गाङ्गिभावेन सङ्करः । शिखरिणी** वृत्तम् ॥ ९ ॥

प्रलयकालके वायुसे ताडित समुद्रका प्रवाह जैसे पर्वतके आघातसे संचलित वाडवाऽग्निके प्रचण्ड कोपज्वालाओंके समूहके ग्रासभावको प्राप्त करता है, वैसे ही यह चारों तरफसे फैलता हुआ घना और तुमुल रणक्रीडाका कोलाहल प्रचण्ड कोपज्वाला-समूहके ग्रासभावको प्राप्त करे॥ ९ ॥

(वेगके साथ चलते हैं ।)

चन्द्रकेतु—कुमार जी !

---

१. सेना इति पाठान्तरम् ।

अत्यद्भुतादपि गुणातिशयात्प्रियो मे
तस्मात्सखा त्वमसि, यन्मम तत्तवैव ।
तत्किं निजे परिजने कदनं करोषि ?
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

लवः—(सहर्षसंभ्रमं परावृत्य ।) अहो महानुभावस्य प्रसन्नकर्कशा वीर-

अत्यद्भुतादिति । अत्यद्भुतात् गुणाऽतिशयात् अपि त्वं मे प्रियः सखा असि, तस्मात् यत् मम, तत् तव एव । तत् निजे परिजने किं कदनं करोषि ? ननु एष चन्द्रकेतुः तव दर्पनिकष इत्यन्वयः । अत्यद्भुतात् = अतिशयाश्चर्यजनकात्, गुणाऽतिशयात् अपि = शौर्याऽऽदिगुणप्रकर्षात् अपि, न केवलमाकारेण, गुणोत्कर्षादपीति भावः । त्वं = लवः, मे = मम, प्रियः = अभीष्टः, सखा = मित्रम्, असि = वर्तसे । तस्मात् = हेतोः, यत् = वस्तु, मम = मदीयं, तत् = वस्तु, तव एव = त्वदीयमेव, मित्रयोर्मिथो भेदाऽभावादिति भावः । तत् = तस्मात्, निजे = आत्मीये, परिजने = पोष्यवर्गे, मत्सैन्यरूप इति भावः, किं किमर्थं, कदनं = पीडनं, करोषि = विदधासि, मित्रपोष्यवर्गस्य पीडनमनुचितमिति भावः । तर्हि संग्रामाद्विरम्यतामित्याशङ्कायामाह-नन्विति । ननु = सम्बोधनार्थकमेतदव्ययम्, हे लव इत्यर्थः । एषः = तवाऽन्तिकस्थः, चन्द्रकेतुः = अहं, तव = भवतः, दर्पनिकषः = गर्वपरीक्षानिकषरूप इत्यर्थः । एतान् वराकान् सैनिकान् विहाय त्वं मया सह योद्धुमर्हसीति भावः । अत्र चन्द्रकेतौ निकषत्वारोपे दर्पपरीक्षाया उपयोगित्वेन परिणामाऽलङ्कारः । वसन्ततिलका वृत्तम् ॥ १० ॥

लव इति । सहर्षसंभ्रमं = हर्षेण = आत्मसमवीरलाभजन्येन आनन्देन, संभ्रमेण = युद्धनिमित्तया त्वरया, च सहितं यथा तथा । परावृत्य=निवृत्य, सेनायाः पराङ्मुखीभूयेति भावः । महाऽनुभावस्य = प्रकृष्टप्रभावस्य, विकर्तनकुलकुमारस्य = सूर्यवंशराजपुत्रस्य, प्रसन्नकर्कशा = प्रसन्ना = प्रसादयुक्ता, त्वं मे सखेति कथनादिति भावः = कर्कशा = कठोरा, एष चन्द्रकेतुस्तव दर्पनिकष इति च कथनादिति भावः,

अतिशय आश्चर्यकारक गुणोंके उत्कर्षसे भी तुम मेरे प्यारे मित्र हो, इसलिए जो पदार्थ मेरा है, वह तुम्हारा ही है। अतः अपने पोष्यवर्ग (मेरे सैन्यों) को क्यों पीडित कर रहे हो ? यह चन्द्रकेतु तुम्हारे गर्वकी कसौटी (परीक्षाका स्थान) है ॥ १० ॥

लव—(हर्ष और शीघ्रतासे लौटकर) अहो ! महाप्रभावशाली उन्नत सूर्यवंशीय कुमारके

वचनप्रयुक्तिर्विकर्तनकुलकुमारस्य । तत्किमेभिः ? एनमेव तावत्संभावयामि ।

(पुनर्नेपथ्ये कलकलः)

लवः—(सक्रोधनिर्वेदम्) आः ! कदर्थीकृतोऽहमेभिर्वीरसंवादविघ्नकारिभिः पापैः । (इति तदभिमुखं परिक्रामति ।)

चन्द्रकेतुः—आर्य ! दृश्यतां द्रष्टव्यमेतत् ।

दर्पेण कौतुकवता मयि बद्धलक्ष्यः

पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा ।

विशेषणवाचकपदयोर्मिथः समासे विशेष्यविशेषणभाव ऐच्छिको भवति । वीरवचनप्रयुक्तिः = वीरवाक्यप्रयोगः । एभिः = सैनिकैः, एनमेव = चन्द्रकेतुमेव, संभावयामि = युद्धेन सत्करोमि ।

लव इति । सक्रोधनिर्वेदम् = कोपेन = पलायितसैन्यप्रहारजनितेन कोपेनेति भावः, निर्वेदेन = मत्तः पलायिता अप्येते चन्द्रकेतुं प्रत्यभिमुखीभूतं मां मुहुर्मुहुरनुसरन्तीति खेदेन च सहितं यथा तथा । वीरसंवादविघ्नकारिभिः = वीरेण =चन्द्रकेतुना, सह यः संवादः=युद्धार्थसंभाषणम् , तत्र विघ्नं=प्रतिबन्धं कुर्वन्तीति तच्छीलास्तैः, एभिः = सैनिकैः, कदर्थीकृतः = अवमानितः । तदभिमुखं = सैन्यसंमुखम् ।

चन्द्रकेतुरिति । द्रष्टव्यं = द्रष्टुं योग्यं, विलोकनीयमित्यर्थः ।

दर्पेणेति । कौतुकवता दर्पेण मयि बद्धलक्ष्यः पश्चात् बलैः अनुसृतः उदीर्णधन्वा अयं द्वेधा समुद्धतमरुत्तरलस्य माघवतचापधरस्य मेघस्य लक्ष्मीं धत्त इत्यन्वयः । कौतुकवता = उत्कण्ठायुक्तेन, मत्पराक्रमज्ञान इति शेषः । दर्पेण = गर्वेण, मयि = चन्द्रकेतौ, बद्धलक्ष्यः = दत्तचक्षुः, पश्चात् = पृष्ठदेशे, बलैः = अस्मत्सैन्यैः अनुसृतः = अनुगतः उदीर्णधन्वा = उदीर्णम् = उत्थापितम्, धनुः =

वीरवाक्यका प्रयोग, प्रसाद और कठोरतासे युक्त है। इस लिए इन सैनिकोंसे क्या ? (युद्धसे) इन्हींका सत्कार करता हूँ ।

(फिर नेपथ्यमें कोलाहल होता है ।)

लव—(क्रोध और खेदके साथ) ओह ! वीरके साथ संवाद (बातचीत) करनेमें विघ्न करनेवाले इन पापियोंसे मैं अपमानित हुआ हूं । (ऐसा कहकर उन्हींके सम्मुख होते हैं)

चन्द्रकेतु—आर्य ! दर्शनीय इस विषयको देखिए ।

कौतुकयुक्त गर्वसे मुझे लक्ष्य करनेवाले और पीछेसे सेनाओंसे अनुगत धनुर्धारी ये लव,

द्वेधा समुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥ ११ ॥

सुमन्त्रः—कुमार एवैनं द्रष्टुमपि जानाति । वयं तु केवलं परवन्तो विस्मयेन ।

चन्द्रकेतुः—भो भो राजानः !

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वत्रैकस्मिन् कवचनिचितैर्नद्धचर्मोत्तरीये ।

चापः, येन सः, 'धनुषश्च' इति समासान्तोऽनङ् । अयं = वीरो लवः, द्वेधा=द्वाभ्यां प्रकाराभ्यां, समुद्धतमरुत्तरलस्य=समुद्धतेन = सञ्चलितेन, मरुता=वायुना, तरलस्य= चञ्चलस्य, माघवतचापधरस्य = मघवतः (इन्द्रस्य) अयं माघवतः=ऐन्द्र इत्यर्थः, एतादृशो यश्चापः = धनुः, तद्धरस्य=तद्धारकस्य, एतादृशस्य, मेघस्य, = जलदस्य, वर्षाकालभवस्येति भावः, लक्ष्मीं = शोभां, धत्ते = धारयति । कदाचित्प्राच्यवायु- ताडितस्य जातुचिच्च पाश्चात्यवायुताडितस्य इन्द्रायुधधरस्य मेघस्य यादृशी शोभा भवति, तथैव कदाचिन्मयि, जातुचिच्च मत्सैन्येषु अभिमुखीभूतोऽयं वीरशिशुस्तादृ- शीमेव शोभां बिभर्तीति भावः । अत्र मेघशोभां कथं लवो धारयतीत्यसम्भवद्वस्तु- सम्बन्धा निदर्शना, छेकाऽनुप्रासश्च । वसन्ततिलका वृत्तम् ॥ ११ ॥

सुमन्त्र इति । एनम् = इमं, लवमित्यर्थः, 'द्वितीयाटौस्स्वेन' इति अन्वा- देशे एनः, विस्मयेन = आश्चर्येण, परवन्तः = पराधीनाः, 'परतन्त्रः पराऽधीनः परवान्नाथवानपि ।' इत्यमरः, वीर एव वीरं द्रष्टुं जानाति, वयं तु केवलं विस्मय- रसाऽऽविष्टा इति भावः ।

संख्यातीतैरिति । संख्यातीतैः द्विरदतुरगस्यन्दनस्थैः कवचनिचितैः काल- ज्येष्ठैः अपरवयसि ख्यातिकामैः भवद्भिः एकस्मिन् पदातौ नद्धचर्मोत्तरीये अत्र

दोनों ओरसे चलनेवाले वायुसे चञ्चल इन्द्रधनुषसे युक्त मेघकी शोभाको धारण कर रहे हैं ॥११॥

सुमन्त्र—कुमार ही इनको देखना भी जानते हैं। हम तो केवल आश्चर्यके अधीन हो गये हैं।

चन्द्रकेतु—हे राजाओ।

अगणित हाथी, घोड़े और रथपर चढ़े हुए, कवचधारण किये हुए, वयमें ज्येष्ठ और वृद्धावस्थामें प्रसिद्धिकी इच्छा रखनेवाले आप लोगोंने—अकेले, पैदल, मृगचर्मको ही उत्तरीय

कालज्येष्ठैरपरवयसि ख्यातिकामैर्भवद्भि-
र्योऽयं बद्धो युधि समभरस्तेन धिग्वो धिगस्मान् ॥ १२ ॥

युधि यः अयं समभरः बद्धः, तेन वो धिक्, अस्मान् (च) धिक् इत्यन्वयः। संख्यातीतैः = संख्यामतीताः संख्यातीतास्तैः, असंख्येयैरित्यर्थः, 'द्वितीया श्रिते'—त्यादिना द्वितीयातत्पुरुषः। द्विरदतुरगस्यन्दनस्थैः = द्विरदाः = गजाः, तुरगाः = अश्वाः। स्यन्दनाः = रथाः, इति द्विरदतुरगस्यन्दनं 'द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम्' इति सेनाङ्गत्वात्समाहारद्वन्द्वः, तस्मिंस्तिष्ठन्तीति तैः। कवचनिचितैः = कवचैः = वर्मभिः, निचिताः = व्याप्ताः, तैः बद्धकवचैरित्यर्थः। कालज्येष्ठैः = वयोऽधिकैः, पुनश्च अपरवयसि = वार्धके[1] ख्यातिकामैः = विजयप्रसिद्ध्यभिलाषुकैः, भवद्भिः = युष्माभिः, राजभिरित्यर्थः। एकस्मिन् = एकाकिनि, असहाय इत्यर्थः। पदातौ = पादाभ्यां अतति गच्छतीति पदातिस्तस्मिन् = पादचारिणि, 'पादे च' इतीण्प्रत्ययः, "पादस्य पदाज्यातिगोपहतेषु" इति पदादेशः। नद्धचर्मोत्तरीये = नद्धं = बद्धम्, चर्म = मृगाजिनम्, एव उत्तरीयं = प्रावारः, येन तस्मिन्, नद्धस्थाने 'मेध्य' इति पाठे—मेध्यं = पवित्रम्, चर्मैव उत्तरीयं यस्य तस्मिन्निति विग्रहः, 'अपरवयसि ख्यातिकामैः' इत्यत्र **'अभिनववयःकाम्यकाये'** इति पुस्तकान्तरपाठस्तत्र—अभिनवेन = नूतनेन, वयसा = अवस्थया, किशोराऽवस्थयेत्यर्थः, काम्यः = कमनीयः, इच्छाविषय इत्यर्थः, कायः = शरीरं यस्य तस्मिन् इत्यर्थः कार्यः। अत्र = अस्मिन्, लव इत्यर्थः, युधि = संग्रामे, यः अयम् = एषः, समभरः = समेषां = सर्वेषाम्, भरः=भारः, लवस्य पराजयाय सर्वैर्बद्धो भार इति भावः, बद्धः = गृहीतः। 'समभर' इत्यत्र **'परिकर'** इति पुस्तकान्तरपाठस्तत्र यत्न आरम्भो वेत्यर्थः, 'यत्नाऽऽरम्भौ परिकरौ' इति त्रिकाण्डशेषः। तेन = कारणेन, वः = युष्मान्, धिक् = निन्दामि, अस्मांश्च=मां च, धिक् = निन्दामि। असहायस्य (एकस्य) पदातेः परिहितमृगचर्मणः शिशोर्हननार्थं बहुसंख्यकानां हस्त्यादिवाहनारूढानां कवचधारिणां वयोवृद्धानां युष्माकं कृत्यमिदमनुचितमिति

बनाकर बाँधे हुए इन (लव) पर जो यह मिलकर लड़ाई की है, इस लिए आप लोगोंको धिक्कार है और हमको भी धिक्कार है॥ १२॥

१. 'अपरवयसि' इति कवेनैव सम्बध्य 'वार्धक्ये' इति तदर्थः कार्यः, तस्य राजभि' भद्द सम्बन्धे लवस्य बालत्वाऽनुपपत्तेः, पाठान्तरं तु समीचीनतममिति बोध्यम् (सं०)।

लवः—(सोन्माथम्) आः ! कथमनुकम्पते नाम ? (ससंभ्रमं विचिन्त्य ।) भवतु । कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत्ससैन्यानि संस्तम्भयामि । (इति ध्यानं नाटयति ।)

सुमन्त्रः—तत्किमकस्मादुल्लोलाः सैन्यघोषाः प्रशाम्यन्ति ?

लवः—पश्याम्येनमधुना प्रगल्भम् ।

सुमन्त्रः—(ससंभ्रमम् ।) वत्स ! मन्ये कुमारकेणानेन जृम्भकास्त्रमामन्त्रितमिति ।

भावः । एतेन 'न केवलं युष्माकमेव, किन्त्वध्यक्षत्वान्ममाऽपि महती निन्दा भविष्यती'ति तात्पर्यम् । अत्र श्लोके **विषमाऽलंकारः** । **मन्दाक्रान्ता** वृत्तम् ॥ १२ ॥

लव इति । सोन्माथम् = उन्माथेन = पीडया, सहितं यथा तथा, **'सक्षोभम्'** इति पाठे—क्षोभेण = चित्तसञ्चलनेन, सहितं यथा तथेत्यर्थः, अनुकम्पते = दयां करोति, एकाकित्वादिना मद्दौर्बल्यमाशङ्क्य मद्दुःखं परिजिहीर्षतीति भावः । कालहरणप्रतिषेधाय=समययापनवारणाय, एभिः सह युद्धे बहुकालातिपातो भविष्यतीत्येतन्निवारणार्थमिति भावः, संस्तम्भयामि = मोहोत्पादनेन निवृत्तव्यापाराणि करोमीति भावः । नाटयति=अभिनयति ।

सुमन्त्र इति । तत्=तदा, भवत्कर्तृकग्रहणाऽनन्तरमेवेति भावः, अकस्मात् = सहसा, उल्लोलाः = अतिचञ्चलाः, अतिशयप्रसारिण इति भावः । सैन्यघोषाः = सैनिककोलाहलाः, प्रशाम्यन्ति = विरमन्ति ।

लव इति । प्रगल्भम् = अतिशयधृष्टम् , अस्य कियद् बलमस्तीति परीक्ष इति भावः ।

सुमन्त्र इति । ससंभ्रमं = सत्वरम् , आमन्त्रितम्=आहूतम् ।

लव—(पीडाके साथ) ओह ! क्यों वे दया कर रहे हैं ? (जल्दीसे विचार कर) अच्छा, कालक्षेप न करनेके लिए जृम्भकास्त्रसे इन सैनिकोंको स्तब्ध कर देता हूँ । (ध्यान करनेका अभिनय करते हैं) ।

सुमन्त्र—तब क्यों अकस्मात् अतिशय चञ्चल सैनिकोंका कोलाहल शान्त होता जाता है ।

लव—अब मैं इस धृष्ट (ढीठ) को देखता हूँ ।

सुमन्त्र—(जल्दीके साथ) वत्स ! मैं समझता हूँ कि इस कुमारने जृम्भक अस्त्रका प्रयोग किया है ।

चन्द्रकेतुः—अत्र कः सन्देहः ?

व्यतिकर इव भीमस्तामसो वैद्युतश्च
　　प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति ।
अथ लिखितमिवैतत्सैन्यमस्पन्दमास्ते
　　नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम् ॥ १३ ॥

आश्चर्यमाश्चर्यम् !

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-

व्यतिकर इति । तामसो वैद्युतश्च भीमो व्यतिकर इव प्रणिहितमपि ग्रस्तमुक्तं चक्षुः हिनस्ति, अथ एतत् सैन्यं लिखितम् इव अस्पन्दम् आस्ते । नियतम् अजितवीर्यं जृम्भकाऽस्त्रं जृम्भत इत्यन्वयः । तामसः = तमःसम्बन्धी, वैद्युतश्च = विद्युत्सम्बन्धी च, भीमः = भयङ्करः, व्यतिकर इव = सम्पर्क इव, प्रणिहितम् अपि = प्रयत्नेन निक्षिप्तम् अपि, ग्रस्तमुक्तं = तमसा प्राग्ग्रस्तं ज्योतिषा पश्चान्मुक्तं, चक्षुः=नेत्रं, हिनस्ति = बाधते, विषयज्ञानाऽसमर्थं करोतीति तात्पर्यम् । अथ = अनन्तरम् , एतत् = दृश्यमानं, सैन्यं = बलम् , लिखितम् इव = चित्रार्पितम् इव, अस्पन्दम् = चेष्टारहितम्, आस्ते = अवतिष्ठते । नियतं = निश्चितम् , अजितवीर्यम् = अपराजितपराक्रमम् , 'अमितवीर्यम्' इति पाठे अपरिमितपराक्रममित्यर्थः । जृम्भकाऽस्त्रं ॥ जृम्भकाख्यशस्त्रं, जृम्भते = आविर्भवति । अत्रोपमाऽनुमानाऽलङ्कारयोरङ्गाङ्गिभावेन सङ्करः । मालिनी वृत्तम् ॥ १३ ॥

पातालोदरेति । पातालोदरकुञ्जपुञ्जिततमःश्यामैः उत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः जृम्भकैः कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैः लीनाऽम्भोदतडित्कडारकुहरैः विन्ध्याद्रिकूटैः इव नभः अभिस्तीर्यत इत्यन्वयः । पातालोदरकुञ्जपुञ्जिततमःश्यामैः = पातालस्य = रसातलस्य, उदरेषु = अभ्यन्तरेषु, ये

चन्द्रकेतु—इसमें क्या सन्देह है ?

अन्धकार और बिजलीके भयंकर सम्पर्ककी तरह प्रयत्नसे निक्षेप करनेपर भी पहले अन्धकारसे ग्रस्त पीछे प्रकाशमें छूटे हुए नेत्रको विषयके ज्ञानमें असमर्थ कर देता है । अब यह हमारी सेना लिखी हुईकी सदृश निश्चेष्ट हो गई । निश्चय ही जिसका पराक्रम नहीं जीता गया है, ऐसा जृम्भक अस्त्र आविर्भूत हो रहा है ॥ १३ ॥

आश्चर्य है ! आश्चर्य है !

पातालके भीतरके लतागृहोंमें इकट्ठे हुए अन्धकारोंके सदृश श्यामवर्णवाले, चमकतेहुए

उत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः ।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरभि[1] स्तीर्यते
लीनाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥ १४ ॥

सुमन्त्रः—कुतः पुनरस्य जृम्भकाणामागमः स्यात् ?
चन्द्रकेतुः—भगवतः प्राचेतसादिति मन्यामहे ।

कुञ्जाः = लतागृहाणि, तेषु पुञ्जितानि = राशीभूतानि, यानि तमांसि = अन्धकाराः, तानि इव श्यामानि = कृष्णवर्णानि तैः । उत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः = उत्तप्तम् = सन्तप्तम् , स्फुरत=दीप्यमानम् , यत् आरकूटं=रीतिः, पित्तलमित्यर्थः, 'रीतिः स्त्रियामारकूटम्' इत्यमरः, तस्य कपिलं=पिशङ्गम्, ज्योतिः= तेजः, इव ज्वलन्ती=दीप्यमाना, दीप्तिः = प्रभा, येषां तानि तैः, एतादृशैर्जृम्भकैः = तन्नामाऽस्त्रैः, कल्पाऽऽक्षेपकठोरभैरवमरुद्व्यस्तैः = कल्पस्य = ब्रह्मणो दिनस्य, आक्षेपे = अवसाने, कठोराः = दृढाः, भैरवाः = भयङ्कराः, ये मरुतः = वायवः, तैर्व्यस्तैः = वियोजितैः । लीनाऽम्भोदतडित्कडारकुहरैः = लीनाः = श्लिष्टाः, अम्भोदाः = मेघाः, येषु तानि, 'लीनाम्भोद' स्थाने **'मीलन्मेघ'** इति पाठे मीलन्तः = संयुज्यमाना इत्यर्थः, तथा तडिद्भिः = विद्युद्भिः कडाराणि = पिङ्गलानि, 'कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ।' इत्यमरः, एतादृशानि कुहराणि = गुहाः, येषां तानि तैः । विन्ध्याद्रिकूटैः इव = विन्ध्याद्रेः = विन्ध्यपर्वतस्य, कूटैः इव = शृङ्गैः इव, नभः = आकाशम् , अभिस्तीर्यते = आच्छाद्यते । अत्रोत्प्रेक्षाऽलङ्कारः ।

शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

सुमन्त्र इति । कुतः = कस्मात्पुरुषात् । अस्य=लवस्य । आगमः=प्राप्तिः ।

चन्द्रकेतुरिति । प्राचेतसात् = वाल्मीकेः ।

पीतलके तेजके तुल्य प्रकाशित कान्तिसे सम्पन्न जृम्भक अस्त्र, प्रलयकालमें कठोर और भयङ्कर वायुसे वियोजित, छिपे मेघवाले और बिजलीसे पीले गुफाओंसे युक्त विन्ध्यपर्वतके शिखरोंकी तरह आकाशको व्याप्त कर रहे हैं ॥ १४ ॥

सुमन्त्र—इन्हें किससे जृम्भक अस्त्रोंकी प्राप्ति हुई होगी ?

चन्द्रकेतु—भगवान् वाल्मीकिसे हुई होगी, ऐसा हम मानते हैं ।

---

१. 'वाभीर्यते' इति पाठान्तरम् ।

सुमन्त्रः—वत्स ! नैतदेवमस्त्रेषु विशेषतो जृम्भकेषु । यतः—

कृशाश्वतनया ह्येते कृशाश्वात्कौशिकं गताः ।
अथ तत्संप्रदायेन रामभद्रे स्थिता इति ॥ १५ ॥

चन्द्रकेतुः—अपरेऽपि प्रचीयमानसत्त्वप्रकाशाः स्वयं सर्वे मन्त्रदृशः पश्यन्ति ।

सुमन्त्रः—वत्स ! सावधानो भव । परागतस्ते प्रतिवीरः ।

सुमन्त्र इति । एतत् = आगमनम् ।

कृशाश्वेति । एते कृशाश्वतनया हि, कृशाश्वात् कौशिकं गताः । अथ तत्सम्प्रदायेन रामभद्रे स्थिता इति इत्यन्वयः । एते = जृम्भकास्त्ररूपपदार्थाः, कृशाश्वतनयाः = कृशाश्वोत्पन्नाः, कृशाश्वेन प्राप्ता इति भावः । हि = निश्चयेन । कृशाश्वस्थाने पुस्तकान्तरेषु भृशाश्व इति पाठः । कृशाश्वात् = कृशाश्वनामकपुरुषात् , कौशिकं = विश्वामित्रं, गताः=प्राप्ताः । अथ=अनन्तरं, तत्सम्प्रदायेन=विश्वामित्रोपदेशेन '**तत्सम्प्रदानेने**'ति पाठे—तस्य = विश्वामित्रस्य, सम्प्रदानेन = वितरणेन, रामभद्रे=वत्से रामभद्रे, स्थिताः = विद्यमाना, जाता इति शेषः । '**व्यवस्थिता**' इति पाठे नियता इत्यर्थः । अत्र जृम्भकास्त्राणामनेकगतत्वात्**पर्यायाऽ**लङ्कारः तल्लक्षणं यथा—'क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् । भवति क्रियते वा चेत्तदा पर्याय इष्यते ॥' इति ॥ **चन्द्रकेतुरिति** । अपरेऽपि = भवदुक्तेभ्योऽन्येऽपि, प्रचीयमानसत्त्वप्रकाशाः = प्रचीयमानः = उपचीयमानः, सत्त्वस्य = सत्त्वगुणस्य, प्रकाशः = आविर्भावः, येषु ते, मन्त्रदृशः = वेदमन्त्राणां साक्षात्कर्तारः, स्वयं = सम्प्रदायेन विनाऽपि ।

सुमन्त्र इति । सावधानः = अनन्यमनाः, प्रतिवीरः = प्रतिद्वन्द्वी वीरः ।

सुमन्त्र—वत्स ! अस्त्रोंके विषयमें वाल्मीकि ऋषिसे आगमनकी बात ठीक नहीं है । विशेष कर जृम्भक अस्त्रोंके विषयमें । क्योंकि—

जृम्भक अस्त्र कृशाश्वको प्राप्त हुए हैं, उनसे विश्वामित्र ऋषिने प्राप्त किया । अनन्तर विश्वामित्रके उपदेशसे ये अस्त्र रामभद्रमें स्थित हुए हैं ॥ १५ ॥

चन्द्रकेतु—आपने जिनका नाम लिया, उनसे भिन्न और मन्त्रद्रष्टा भी सत्त्व गुणके आविर्भावकी वृद्धिसे सम्प्रदायके बिना भी शस्त्राऽस्त्र प्राप्त कर सकते हैं ।

सुमन्त्र—वत्स ! सावधान (होशियार) हो जाओ, तुम्हारा प्रतिद्वन्दी वीर आ गया है ।

---

१. 'नास्य व्यवहारोऽस्त्रेषु' पाठान्तरम् ।

कुमारौ—(अन्योन्यं प्रति ।) अहो ! प्रियदर्शनः कुमारः । (सस्नेहानुरागं निर्वर्ण्य ।)

यदृच्छासंवादः किमु गुणगणानामतिशयः
पुराणो वा जन्मान्तरनिबिडबद्धः परिचयः ।
निजो वा संबन्धः किमु विधिवशात्कोऽप्यविदितो
ममैतस्मिन्दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

कुमाराविति । कुमारौ = लवचन्द्रकेतू , प्रियदर्शनः = प्रियम् = अभीष्टम् , दर्शनम् = अवलोकनं यस्य सः ।

यदृच्छेति । एतस्मिन् दृष्टे यदृच्छासंवादः किमु, गुणगणानाम् अतिशयः किमु, जन्मान्तरनिबिडबद्धः पुराणः परिचयो वा, विधिवशात् अविदितः कोऽपि निजः सम्बन्धो वा किमु, मम हृदयम् अवधानं रचयति इत्यन्वयः । एतस्मिन्=लवे चन्द्रकेतौ वा, दृष्टे = अवलोकिते सति, यदृच्छासंवादः = यदृच्छया = दैवेन, संवादः = समागमः, किमु = किम् , गुणगणानां = शौर्यौदार्यादिगुणसमूहानाम् , अतिशयः = उत्कर्षः, किमु = किम् , जन्मान्तरनिबिडबद्धः = जन्मान्तरेषु= अन्येषु जन्मसु, निबिडबद्धः=दृढारूढः, पुराणः=प्राचीनः, परिचयो वा=वासना किमु, विधिवशात् = दैवेच्छायाः, अविदितः = अज्ञातः, कोऽपि = प्रतिपादयितुमशक्यः, निजः = आत्मीयः, सम्बन्धो वा=भ्रातृत्वादिर्वा, किमु = किम् , मम=लवस्य चन्द्रकेतोर्वा, हृदयं = चित्तम् , अवधानम् = एकाग्रतां, रचयति = करोति । अस्य दर्शनाऽनन्तरं यन्मदीयं हृदयं प्रणयैकप्रवणं जातं तत्र हेतुरावयोः शुभक्षणे सम्मेलनकृद्दैवं किं वा एतन्निष्ठशौर्यादिगुणोत्कर्षोऽथवा जन्मान्तरजातः परिचय आहोस्विदपरिज्ञातः कोऽपि भ्रातृत्वादिरूपः सम्बन्धोऽस्तीति परिच्छेत्तुं न प्रभवामीति भावः । अत्र पादत्रये **शुद्धसंदेहालङ्कारश्चतुर्थपादे** च **काव्यलिङ्गम्** , इति तयोरङ्गाङ्गितया **सङ्करः** । **शिखरिणी** वृत्तम् ॥ १६ ॥

दोनों कुमार—(एक दूसरेको) अहो ! कुमार प्रियदर्शन हैं । (स्नेह और अनुरागके साथ देखकर)

इनको देखनेपर भाग्य-समागम, वा शौर्य आदि गुणोंका उत्कर्ष, अथवा जन्मान्तरीण दृढ आरूढ प्राचीन परिचय, किंवा भाग्यवश अज्ञात कोई निजी सम्बन्ध मेरे चित्तको एकाग्र कर रहा है ॥ १६ ॥

सुमन्त्रः—भूयसां जीविनामेव धर्म एषः, यत्र स्वरसमयी कस्यचित्कचित्प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं चक्षूराग इति । तद्प्रतिसङ्ख्येयनिबन्धनं प्रमाणमामनन्ति ।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥ १७ ॥

कुमारौ—(अन्योन्यमुद्दिश्य ।)

सुमन्त्र इति । भूयसां = बहूनां, जीविनामेव=प्राणिनामेव, धर्मः = स्वभावः, स्वरसमयी = आत्मानन्दमयी, यत्र = यस्यां प्रीतौ, उपचारः = परम्पराप्रवादः, तारामैत्रकं = तारयोः = कनीनिकयोः, मैत्रकं = सख्यम् , चक्षूरागः = नेत्रप्रीतिः । अप्रतिसंख्येयनिबन्धनम् = अप्रतिसंख्येयम् = अविचारणीयम् , निबन्धनं = मूलं, यस्य तत् , प्रमाणं = यथार्थाऽनुभवविषयं **'प्रेमाणम्'** इति पाठे प्रणयमित्यर्थः, एतत्पाठे सर्वनामशब्देऽपि तमिति निर्देशः कार्यः, आमनन्ति = असकृद्वदन्ति, 'म्ना अभ्यासे' इति धातोर्लट् ।

अहेतुरिति । यः अहेतुः पक्षपातः, तस्य प्रतिक्रिया न अस्ति, हि स स्नेहात्मकः तन्तुः भूतानि अन्तः सीव्यति इत्यन्वयः । यः, अहेतुः = निष्कारणकः, पक्षपातः = पक्षाश्रयणं, तस्य = अहेतुकपक्षपातस्य, प्रतिक्रिया = प्रतिकारः, निवर्तकव्यापार इति यावत् । न अस्ति = न सम्भवति, कृत्रिमस्यैव स्नेहस्य प्रतीकारः सम्भवति, न तु स्वाभाविकस्येति भावः । तदेव प्रतिपादयति—**स इति** । हि = यतः, सः = अहेतुपक्षपातः, स्नेहात्मकः = प्रेममयः, तन्तुः = सूत्रं, भूतानि = प्राणिनः, अन्तः = अभ्यन्तरे, **'अन्तर्मर्माणि'** इति पाठे आभ्यन्तराणि सन्धिस्थानानीत्यर्थः । सीव्यति = स्यूतानि करोति । तादृक्सूत्रप्रणयनाशे देहोच्छेदप्रसङ्ग इति भावः । अत्रार्थान्तरन्यासरूपकयोरङ्गाङ्गिभावेन सङ्करः ॥ १७ ॥

सुमन्त्र—बहुतेरे प्राणियोंका यह स्वभाव है, जिसमें किसीका किसीमें अपनी आनन्दमयी प्रीति होती है। जिसमें लौकिकोंका कहना है कि—तारामैत्रक (आँखोंकी पुतलियोंकी मैत्री) वा चक्षूराग (नेत्रोंकी प्रीति) होता है। उस प्रेमको कारणका विचार नहीं किया जा सकनेवाला प्रमाणभूत (यथार्थ ज्ञानका विषय) मानते हैं।

जो बिना कारणका पक्षपात है, उसका प्रतीकार नहीं है, क्योंकि वह प्रेममय सूत्र प्राणियोंको हृदयमें सी देता है ॥ १७ ॥

दोनों कुमार—(एक दूसरेको उद्देश्य करके)

एतस्मिन्मसृणितराजपट्टकान्ते मोक्तव्याः कथमिव सायकाः शरीरे ?
यत्प्राप्तौ मम परिरम्भणाभिलाषादुन्मीलत्पुलककदम्बमङ्गमास्ते ॥१८॥
किं चा[1]क्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना ?
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः ।

एतस्मिन्निति । मसृणितराजपट्टकान्ते एतस्मिन् शरीरे सायकाः कथमिव मोक्तव्याः ? यत्प्राप्तौ परिरम्भणाऽभिलाषात् मम अङ्गम् उन्मीलत्पुलककदम्बम् आस्ते इत्यन्वयः । मसृणितराजपट्टकान्ते = मसृणितः = मसृणः, कृतः, संस्कार-विशेषेण संघट्टित इत्यर्थः, यो राजपट्टः = राजकीयो वस्त्रविशेषः, स इव कान्तं = कमनीयम् , तस्मिन् । एतस्मिन् = अस्मिन् , शरीरे = देहे, सायकाः = बाणाः, कथमिव = केन प्रकारेण, मोक्तव्याः = मोक्तुं योग्याः । एतादृशे देहे बाणप्रहारोऽनुचित इति भावः । यत्प्राप्तौ = यस्य = शरीरस्य, प्राप्तौ = आसादने सति, परिरम्भणाऽभिलाषात् = परिरम्भणस्य = आलिङ्गनस्य, अभिलाषात् = मनोरथात् , मम = मामकम् , अङ्गम् = देहावयवः, उन्मीलत्पुलककदम्बम् = उन्मीलत् = उद्यत् , पुलकानां = रोमाञ्चानाम् , कदम्बं = समूहः, यस्मिंस्तत् , आस्ते = विद्यते । 'मसृणितराजपट्टकान्त' इत्यत्र **लुप्तोपमा,** वाक्यार्थहेतुकं **काव्यलिङ्गं च,** तथा च द्वयोरङ्गाङ्गिभावेन **सङ्करः** । **प्रहर्षिणी** वृत्तम् ॥१८॥

किञ्चेति । किं च आक्रान्तकठोरतेजसि शस्त्रं विना का नाम गतिः ? यस्य ईदृशो विषयो न जायेत, तेन शस्त्रेण अपि किम् ? आयुधे उद्यते अपि युद्ध-विमुखं माम् अयम् एव किं वक्ष्यति ? हि दारुणरसो वीराणां समयः स्नेहक्रमं बाधत इत्यन्वयः । किं च = अपरं च, पूर्वोक्तादन्यच्चेति भावः । आक्रान्तकठोर-तेजसि = आक्रान्तं = प्राप्तम् , कठोरं = पूर्णम् , तेजः = वीर्यं येन तस्मिन् , एतादृशे विषये, शस्त्रं विना = आयुधप्रहारात् ऋते, का नाम गतिः = को नामोपायः ? एतादृशे महावीरे शस्त्रप्रहारमन्तरेण नाऽन्य उपाय इति भावः । यस्य = शस्त्रस्य,

महीन राजकीय वस्त्रके सदृश सुन्दर इस शरीरपर बाणोंको कैसे छोड़ूँ ? जिसको पाने पर आलिङ्गनके अभिलाषसे मेरा अङ्ग रोमाञ्चोंसे युक्त हो रहा है ॥ १८ ॥

और, कठोर तेजको प्राप्त किये हुए पुरुषमें शस्त्रके विना क्या उपाय है ? जिस शस्त्रको छोड़नेके लिए ऐसा पात्र न होगा (वीर नहीं मिलेगा) तो उस शस्त्रसे भी क्या काम ? शस्त्र

१. किन्त्वा-'इति पाठान्तरम् ।

किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे ।
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ १९ ॥

सुमन्त्रः—(लवं निर्वर्ण्य साम्रमात्मगतम् ।) हृदय ! किमन्यथा परिप्लवसे ?

मनोरथस्य यद्बीजं तद् दैवेनादितो हृतम् ।

ईदृशः = एतादृशः, एतद्वीरसदृश इति भावः । विषयः = गोचरः, प्रयोगपात्रमिति भावः । न जायेत = न भवेत् , तेन = तादृशेन, शस्त्रेणापि = आयुधेनाऽपि किं = किं प्रयोजनम् ? वीरपुरुषाऽलाभे शस्त्रस्याऽपि वैफल्यमेव प्रसज्येतेति भावः । आयुधे = शस्त्रे, उद्यतेऽपि=प्रहर्तुमुत्तोलितेऽपि, युद्धविमुखं=रणपराङ्मुखं, स्नेहाद्धेतो-रिति शेषः । मां=लवं चन्द्रकेतुं वा, अयम् एव=चन्द्रकेतुर्लव एव वा, किं वक्ष्यति= किं कथयिष्यति ? मदीयं भीरुत्वमेव सम्भावयिष्यति न तु प्रणयप्रवणत्वमिति भावः । हि = यतः, दारुणरसः = दारुणः = कठोरः, रसः = वीररसः, यस्मिन् सः, एतादृशो वीराणां = शूराणाम् , समयः = आचारः, 'समयाः शपथाचारकालसिद्धान्तसंविदः' । इत्यमरः । स्नेहक्रमं = प्रणयव्यापारपरिपाटीम् , बाधते=निवर्तयति, त्यक्त्वा प्रणयबन्धनं केनाऽपि प्रकारेण संग्राम एव कर्तव्य इति भावः । अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। **शार्दूलविक्रीडितं** वृत्तम्॥१९॥

सुमन्त्र इति । अन्यथा=असंभाव्यविषयानुसारेण, न तु निश्चयात्मकविषयाऽनुसारेणेति भावः । परिप्लवसे = चञ्चलीभवसि ? रामसादृश्यात्तदपत्यं लव इति किं शङ्कस इति भावः । **'परिकल्पस'** इति पाठे तर्कयसीत्यर्थः ।

मनोरथस्येति । मनोरथस्य यत् बीजं, तत् दैवेन आदितो हृतम् । लतायां पूर्वलूनायां प्रसवस्य कुत उद्भवः ? इत्यन्वयः । मनोरथस्य = 'अयं लवो रामतनयो भविष्यति' इत्यभिलाषस्य, यत् , बीजं = सीतारूपं कारणं, तत् = कारणं, दैवेन = भाग्येन, आदितः = पूर्वमेव, हृतम् = अपहृतं, गर्भिण्यवस्थायामेव हिंस्रश्वापद-

उठानेपर भी युद्धसे पराङ्मुख होनेवाले मुझको ये ही क्या कहेंगे ? क्योंकि वीररससे सम्पन्न वीरपुरुषोंका आचार प्रेमके क्रम को रोक देता है ॥ १९ ॥

सुमन्त्र—(लवको देखकर, आँखोंमें आँसू भरकर मन ही मन) हृदय ! तू क्यों अन्यथा (असम्भाव्य विषयके अनुसार) चञ्चल हो रहा है ?

मनोरथका जो कारण था उसको भाग्यने पहले ही हरण कर लिया, पहले ही काटी गई

लतायां पूर्वलूनायां प्रसवस्योद्भवः कुतः ? ॥ २० ॥

चन्द्रकेतुः—अवतराम्यार्य सुमन्त्र ! स्यन्दनात् ।

सुमन्त्रः—कस्य हेतोः ?

चन्द्रकेतुः—एकस्तावदयं वीरपुरुषः पूजितो भवति, अपि च खल्वार्य ! क्षत्रधर्मः परिपालितो भवति । 'न रथिनः पादचारमभियुञ्जन्ती'ति शास्त्रविदः परिभाषन्ते ।

सुमन्त्रः—(स्वगतम् ।) आः ! कष्टां दशामनुप्रपन्नोऽस्मि ।
कथं हीदमनुष्ठानं मादृशः प्रतिषेधतु ।

सङ्कुले विजने वने सीतायास्त्यागात् तस्या नाशस्यैव सम्भाव्यमानत्वान्नाऽयं लवो रामतनयो भवेदिति भावः । अत्र दृष्टान्तः—लतायां = व्रततौ, पूर्वलूनायां = प्रागेव छिन्नायां सत्यां, प्रसवस्य = पुष्पस्य, कुतः=कथम् , उद्भवः=उत्पत्तिः, यथा प्रागेव छिन्नायां लतायां कुसुमस्योत्पत्तिर्न सम्भाव्यते, तथैव प्रसवात्प्रागेव हिंस्रश्वापदसङ्कुले वने त्यक्तायाः सीताया लवरूपाऽपत्योत्पत्तिर्न सम्भाव्यत इति भावः । अत्र दृष्टान्तालङ्कारः ॥ २० ॥

चन्द्रकेतुरिति । स्यन्दनात् = रथात् ।

सुमन्त्र इति । कस्य हेतोः = अत्र 'षष्ठी हेतुप्रयोगे' इति षष्ठी ।

चन्द्रकेतुरिति । वीरपुरुषः = लवः, पूजितः = सत्कृतः । परिपालितः = अनुष्ठितः । रथिनः = रथारूढाः, पादचारं = पदातिं, न अभियुञ्जन्ति = न युध्यन्ति, शास्त्रविदः = मनुप्रभृतयो धर्मशास्त्रप्रवर्तकाः, 'न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम् ।' इति स्मरणादिति भावः ।

सुमन्त्र इति । कष्टां = दुःखमयीं, दशाम्=अवस्थाम् , अनुप्रपन्नः = प्राप्तः ।

कथमिति । हि मादृशः इदम् अनुष्ठानं कथं प्रतिषेधतु, साहसैकरसो

लतामें फूलकी कैसे उत्पत्ति होगी ? ॥ २० ॥

चन्द्रकेतु—आर्य सुमन्त्र ! मैं रथसे उतरता हूँ ।

सुमन्त्र—किस कारणसे ?

चन्द्रकेतु—एक तो इन वीर पुरुषका सत्कार होता है और आर्य ! क्षत्रिय-धर्मका परिपालन होता है । 'रथारूढ पैदलसे नहीं लड़ते हैं' शास्त्रवेत्तालोग ऐसा कहते हैं ।

सुमन्त्र—(मन ही मन) ओह ! कष्टजनक अवस्थाको प्राप्त हुआ हूँ । क्योंकि—
मेरे ऐसा पुरुष इस अनुष्ठान (योग्य कार्य) का कैसे निवारण करे ? और एकमात्र

कथं वाऽभ्यनुजानातु साहसैकरसां क्रियाम् ॥ २१ ॥

चन्द्रकेतुः—यदा तातमिश्रा अपि पितुः प्रियसखं त्वामर्थसंशयेषु पृच्छन्ति, तत्किमार्यो विमृशति ?

सुमन्त्रः—आयुष्मन् ! एवं यथाधर्ममभिमन्यसे ।

एष सांग्रामिको न्याय एष धर्मः सनातनः ।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

क्रियां कथं वा अभ्यनुजानातु इत्यन्वयः । हि = यतः, मादृशः = मत्सदृशः, वीराचाराऽभिज्ञ इति भावः । इदं = रथादवतरणरूपं, '**न्याय्य**' मिति पुस्तकान्तरपाठस्तत्र = न्यायादनपेतं, समुचितमित्यर्थः, 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । अनुष्ठानम् = आचरणं, कथं = केन प्रकारेण, प्रतिषेधतु=निवारयतु ? निवारणाऽभावे तु—साहसैकरसां=साहसम्=सहसा प्रवृत्तिः एव, एकः=मुख्यः, रसः= रागः, यस्यां तां, 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः । एतादृशीं क्रियां = कार्यं, कथं वा = केन प्रकारेण वा, अभ्यनुजानातु = अनुज्ञां ददातु, अत उभयतः पाशारज्जुन्यायेन कष्टां दशामनुप्रपन्नोऽस्मीति भावः ॥ २१ ॥

चन्द्रकेतुरिति । तातमिश्राः = पूज्यपितरो रामादय इति भावः, पितुः = जनकस्य, दशरथस्येत्यर्थः, प्रियसखं = प्रियमित्रं, "राजाऽहःसखिभ्यष्टच्" इति समासान्तष्टच् , अर्थसंशयेषु = कर्तव्याऽकर्तव्यसन्देहेषु, आर्यः = पूज्यः, विमृशति=विचारयति । न्याय्ये कर्मणि प्रवर्तनायां विमर्शस्याऽनावश्यकत्वादिति भावः।

सुमन्त्र इति । एवं=रथादवतरणं, यथाधर्मं=क्षत्रधर्माऽनतिक्रमेणेति भावः ।

एष इति । एष सांग्रामिकः न्यायः, एष सनातनो धर्मः, हि इयं रघुसिंहानां वीरचारित्रपद्धतिः इत्यन्वयः । एषः = वीरपूजारूप आचारः, सांग्रामिकः = संग्रामे भवः, 'तत्र भव' इति ठञ् । न्यायः = समुचितो नियम इति भावः । एषः=वीरपूजारूपो व्यवहारः, सनातनः = चिरन्तनः, धर्मः = आचारः । हि = यतः, इयं = त्वदाचरिता कृतिः, रघुसिंहानां = रघुवंश्यानां श्रेष्ठभूपालानां,

---

साहसमें अनुराग करनेवाले ऐसे कामकी भी कैसे अनुमति दे ? ॥ २१ ॥

चन्द्रकेतु—जब कि पूजनीय पितालोग (राम, लक्ष्मण आदि) भी अपने पिता (दशरथ)-के प्रिय मित्र आपको कार्य-संशयोंमें पूछते हैं, तब क्यों आप विचार कर रहे हैं ?

सुमन्त्र—चिरजीव ! आप इस तरहके धर्मके अनुसार कर्तव्यको जानते हैं ।

संग्रामके अवसरमें उत्तम यह (वीरसत्कार) न्याययुक्त है, यह सनातन धर्म है, क्योंकि यह रघुवंशके वीरोंकी आचारपद्धति है ॥ २२ ॥

द्रकेतुः—अप्रतिरूपं वचनमार्यस्य ।
इतिहासं पुराणं च धर्मप्रवचनानि च ।
भवन्त एव जानन्ति रघूणां च कुलस्थितिम् ॥ २३ ॥

सुमन्त्रः—(सस्नेहास्रं परिष्वज्य ।)
जातस्य ते पितुरपीन्द्रजितो निहन्तु-
र्वत्सस्य वत्स ! कति नाम दिनान्यमूनि ?

वीरचारित्रपद्धतिः=वीरव्यापारपरिपाटी, तव पूर्वजा अप्येतादृशमेवाचारमन्वपालयन्निति भावः ॥ २२ ॥

चन्द्रकेतुरिति । अप्रतिरूपं = निरुपममिति भाव', **'प्रतिरूपम्'** इति पाठे—अनुरूपं, योग्यमिति भावः ।

इतिहासमिति । भवन्त एव इतिहासं पुराणं धर्मप्रवचनानि रघूणां कुलस्थितिं च जानन्ति इत्यन्वयः । भवन्त एव = आर्या एव, नाऽन्ये इति भावः । इतिहासं = पुरावृत्तं, पुराणं = पञ्चलक्षणं, ब्राह्मादिकमिति भावः, धर्मप्रवचनानि = धर्माः = नित्यनैमित्तिकादयः, प्रोच्यन्ते = प्रकाश्यन्ते एभिस्तानि, मन्वादीनि धर्मशास्त्राणीत्यर्थः, 'करणाऽधिकरणयोश्च' इति करणे ल्युट् । रघूणां = रघुवंशोद्भवानां राज्ञां, कुलस्थितिं च = वंशमर्यादां च, जानन्ति = विदन्ति, अत एव भवदीयं वचनमप्रतिरूपमिति भावः । अत्रैकस्यां ज्ञानरूपक्रियायामितिहासादीनां पदार्थानां सम्बन्धेन **तुल्ययोगिताऽलङ्कारः** ॥ २३ ॥

सुमन्त्र इति । सस्नेहास्रं = स्नेहेन = प्रेम्णा, अस्रेण = आनन्दाश्रुणा च सहितं यथा तथेति क्रियाविशेषणं, परिष्वज्य = आलिङ्ग्य ।

जातस्येति । हे वत्स ! इन्द्रजितः निहन्तुः, वत्सस्य ते पितुरपि जातस्य अमूनि कति नाम दिनानि ? तस्य अपत्यमपि वीरधर्मम् अनुतिष्ठति; दिष्ट्या दशरथस्य कुलं प्रतिष्ठाम् आगतम् इत्यन्वयः । हे वत्स = हे चन्द्रकेतो ! इन्द्रजितः = रावणपुत्रस्य मेघनादस्य, 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी, निहन्तुः = नाशकस्य, वत्सस्य = वात्सल्यभाजनस्य, ते तव, पितुरपि = जनकस्याऽपि,

चन्द्रकेतु—आपका वचन अनुपम (बेजोड़) है ।
आप ही इतिहास, पुराण, धर्मशास्त्र और रघुवंशके राजाओंकी वंशमर्यादा भी जानते हैं ॥
सुमन्त्र—(स्नेहके साथ आनन्दाश्रुको गिराकर और आलिङ्गन कर ।)
हे वत्स ! इन्द्रजितको मारनेवाले वात्सल्यभाजन आपके पिता लक्ष्मणकी भी उत्पत्तिके

तस्याप्यपत्यमनुतिष्ठति वीरधर्मं
दिष्ट्यागतं[1] दशरथस्य कुलं प्रतिष्ठाम् ॥ २४ ॥

चन्द्रकेतुः—(सकष्टम् ।)

'अप्रतिष्ठे कुलज्येष्ठे का प्रतिष्ठा कुलस्य नः' ?
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥ २५ ॥

लक्ष्मणस्याऽपीति भावः, जातस्य = उत्पन्नस्य सतः, अमूनि = अतिक्रान्तानि, कति नाम = कियन्ति नाम, दिनानि = वासराः ? जातस्य त्वत्पितुरपि वर्षमानं मत्पुरतो नाऽधिकमिति भावः । तस्य = तादृशस्य, मदपेक्षयाऽल्पवयसो लक्ष्मणस्येति भावः, अपत्यमपि=त्वद्रूपः पुत्रोऽपि, वीरधर्मं=शूराचारम्, **'वीरवृत्तम्'** इति पाठे शूरचरित्रमित्यर्थः, 'वृत्तं पद्ये चरित्रे चे'त्यमरः, अनुतिष्ठति=करोति **'अनुगच्छति'** इति पाठे-अनुसरतीत्यर्थः । अतो दिष्ट्या=भाग्येन, दशरथस्य = त्वत्पितामहस्य, कुलं = वंशः, प्रतिष्ठां = वंशस्थितिं माहात्म्यं वा, 'प्रतिष्ठा स्थितिमाहात्म्ये' इति यादवः । आगतं = प्राप्तम् । अत्र वाक्यार्थहेतुकं **काव्यलिङ्गमलङ्कारः** । **वसन्ततिलका वृत्तम्** ॥ २४ ॥

अप्रतिष्ठ इति । 'कुलज्येष्ठे अप्रतिष्ठे (सति) नः कुलस्य का प्रतिष्ठा ?' इति दुःखेन न अपरे त्रयः पितरः तप्यन्ते इत्यन्वयः । कुलज्येष्ठे=वंशश्रेष्ठे, ज्येष्ठे भ्रातरि राम इति भावः, अप्रतिष्ठे = प्रतिष्ठारहिते सति, सन्तानाऽभावेनेति भावः । नः = अस्माकं, कुलस्य, = वंशस्य, का प्रतिष्ठा = का स्थितिः ? इति = ईदृशेन, दुःखेन = कष्टेन, नः = अस्माकम् , अपरे = अन्ये, त्रयः = त्रिसंख्यकाः, पितरः = ताताः, भरतलक्ष्मणशत्रुघ्ना इति भावः, तप्यन्ते = तापमनुभवन्ति । कुलश्रेष्ठस्य ज्येष्ठभ्रातुः पुत्राभावेन भरतलक्ष्मणशत्रुघ्नाः स्वपुत्राणां सत्त्वेऽपि न नन्दन्तीति भावः, अत्र **करुणो रसः** ॥ २५ ॥

ये कितने दिन हुए हैं ? उनके पुत्र (आप) भी वीरधर्मका अनुष्ठान कर रहे हैं । भाग्यसे दशरथका वंश प्रतिष्ठाको प्राप्त हो गया है ॥ २४ ॥

चन्द्रकेतु—(कष्टके साथ)

'कुलमें ज्येष्ठ रामचन्द्रजीके सन्तानहीन होनेपर हमारे कुलकी क्या प्रतिष्ठा है ? इस दुःखसे हमारे और तीन पिता (भरत, लक्ष्मण और शत्रुघ्न) तापका अनुभव करते हैं॥२५॥

---

१. 'दिष्ट्या अतम्' इति पाठान्तरम् ।

सुमन्त्रः—हृदयमर्मदारणान्येव चन्द्रकेतोर्वचनानि ।
लवः—हन्त ! मिश्रीकृतक्रमो रसो वर्तते ।

यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनी
तथैवास्मिन्दृष्टिर्मम, कलहकामः पुनरयम् ।
रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालव्रणमुखः ॥ २६ ॥

सुमन्त्र इति । हृदयमर्मदारणानि = हृदयमर्मणां = हृदयसन्धिस्थानानाम् , दारणानि = छेदकानि, अतिशयदुःखोत्पादकानीति भावः ।

लव इति । हन्तेति हर्षद्योतकमव्ययम् , रसः = अनुरागः, मिश्रीकृतक्रमः = मिश्रीकृतः = संयोजितः, वीररसेनेति शेषः, क्रमः = परिपाटी यस्य सः । तदेव प्रतिपादयति—

यथेति । इन्दौ समुपोढे कुमुदिनी यथा आनन्दं व्रजति, तथा एव अस्मिन् मम दृष्टिः (आनन्दं व्रजति) । रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनुर्धृतप्रेमा विकचविकरालव्रणमुखः अयं (मम) बाहुः पुनः कलहकाम इत्यन्वयः । इन्दौ = चन्द्रे, समुपोढे = उदिते सति, कुमुदिनी = कुमुद्वती, यथा = येन प्रकारेण, आनन्दं = विकासं, व्रजति = प्राप्नोति, तथा एव = तेन प्रकारेण एव, अस्मिन् = चन्द्रकेतौ, मम = लवस्य, दृष्टिः = नेत्रम् , आनन्दं = प्रफुल्लतां, व्रजति=प्राप्नोति । रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनुर्धृतप्रेमा-रणत्कारेण=रणदिति-शब्देन, क्रूरं=भयङ्करं यथा तथा, क्वणितः=शब्दितः, गुणः=ज्या, तया, गुञ्जत्=शब्दं कुर्वत् गुरु=महत् , यत् धनुः=कार्मुकम्, तस्मिन् धृतं=बद्धम् , प्रेम=प्रणयः, येन सः, तथा विकचविकरालव्रणमुखः = विकचानि=विस्तृतानि, विकरालानि=अतिशयविशालानि, व्रणानि=क्षतचिह्नानि, मुखे = अग्रे, यस्य सः एतादृशः, अयम् = एषः मम= लवस्य, बाहुः पुनः = भुजस्तु, कलहकामः = युद्धाकाङ्क्षी, भवतीति शेषः । 'व्रण-मुख' इत्यत्र 'उल्बणरस' इति पाठस्तत्र-उल्बणः = अत्युद्धतः, रसः = वीररसः,

सुमन्त्र—चन्द्रकेतुके वचन हृदयके मर्मस्थलोंको विदारण करनेवाले ही हैं ।

लव—वाह ! वीर रससे मिश्रित स्थितिसे युक्त रस हो रहा है ।

चन्द्रके उदित होनेपर कुमुदिनी जिस तरह विकासको प्राप्त होती है, उसी तरह इनमें मेरी दृष्टि भी प्रफुल्लताको प्राप्त होती है । 'रणत्' ऐसे शब्दसे भयङ्कर शब्द करनेवाली मौर्वीसे गूजते हुए बड़े धनुषमें प्रेम करनेवाला और अग्रभागमें विस्तृत तथा अतिशय विशाल घावके चिह्नोंसे युक्त यह मेरा बाहु फिर युद्ध करनेकी इच्छा रखता है ॥ २६ ॥

चन्द्रकेतुः—(अवतरणं निरूपयन् ।) आर्य ! अयमसावैक्ष्वाकश्चन्द्रकेतुरभिवादयते ।

सुमन्त्रः—अहितस्यैव पुनः पराभवाय महानादिवराहः कल्पताम् । अपि च ।

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पति-

यस्य स इत्यर्थः । अत्र पूर्वार्द्धे रत्याख्यः स्थायिभावः, प्रसादो गुणः, कैशिकी रीतिः, उत्तरार्द्धे तु वीरो रस ओजो गुण आरभटी रीतिरिति मिश्रितो रस इति ज्ञेयम् । अत्र विरूपयो रागोत्साहयोः सङ्घटनया विषमालङ्कारस्योपमायाश्च सङ्करः । शिखरिणी वृत्तम् ॥ २६ ॥

चन्द्रकेतुरिति । ऐक्ष्वाकः = इक्ष्वाकुवंशोत्पन्नः, 'सावित्र' इति पाठे सूर्यवंशोत्पन्न इत्यर्थः ।

सुमन्त्र इति । अहितस्यैव = शत्रोरेव, पराभवाय = अवमानाय, 'क्लृपि संपद्यमाने च' इति चतुर्थी । आदिवराह एव = पृथिव्या उद्धर्ता वराहरूपेणाऽवतीर्णो भगवान् एव, कल्पताम् = आविर्भवतु । पुस्तकान्तरे तु एतत्स्थाने—

'अजितं पुण्यमूर्जस्वि ककुत्स्थस्येव ते महः ।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् ॥'

इति पाठस्तत्र—शाश्वतो देवो वराहः ते श्रेयसे ककुत्स्थस्य इव अजितं पुण्यम् ऊर्जस्वि महः परिकल्पताम् इत्यन्वयः । शाश्वतः=सनातनः, देवः = द्योतनशीलः, वराहः = वराहरूपेणाऽवतीर्णो भगवान्विष्णुः, ते = तव, श्रेयसे=कल्याणाय, 'तादर्थ्ये चतुर्थी वाच्या' इति चतुर्थी, ककुत्स्थस्य इव = पुरञ्जयस्य इव, अजितम्= अनभिभूतम्, अन्यैरिति शेषः । पुण्यं = पवित्रम् , ऊर्जस्वि = बलयुक्तं, महः = तेजः, परिकल्पताम् = विधत्ताम् । अत्रोपमाऽलंकारः । पुरा पुरञ्जयाख्य इक्ष्वाकुवंश्यो राजा वृषभरूपधारिण इन्द्रस्य स्कन्धं समारुह्य भगवतो विष्णोस्तेजसा दैत्यारीन्दैत्याञ्जित्वा 'ककुत्स्थ' इति नाम लेभ इति रामायणीया कथाऽनुसन्धेया ॥

देव इति । देवः सविता समरे त्वां धिनोतु, यः ते गोत्रस्य पतिः । मैत्रा-

चन्द्रकेतु—(उतरनेका अभिनय करते हुए) आर्य ! इक्ष्वाकु वंशमें उत्पन्न यह चन्द्रकेतु आपको अभिवादन करता है ।

सुमन्त्र—शत्रुके पराजयके लिए महान् आदिवराह फिर आविर्भूत हों और भी—प्रकाशमान सूर्य संग्राममें आपको प्रसन्न करें, जो आपके वंशके प्रवर्तक हैं । वसिष्ठजी

स्त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि ।
ऐन्द्रावैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते
देयाद्देव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥ २७ ॥

लवः—अतीव नाम शोभते रथस्थ एव । कृतं कृतमत्यादरेण ।

वरुणः त्वाम् अभिनन्दतु, यः ते गुरूणाम् अपि गुरुः, अथो ऐन्द्रावैष्णवम् आग्निमारुतं सौपर्णम् ओजः ते अस्तु, रामलक्ष्मणधनुर्ज्याघोषमन्त्रः जयं देयात् एव इत्यन्वयः । देवः = द्योतमानः, सविता = सूर्यः, समरे = संग्रामे, त्वां = चन्द्रकेतुं, धिनोतु = प्रीणयतु, 'धिवि प्रीणने' इति धातोर्लोट् । यः = सूर्यः, ते = तव, गोत्रस्य = वंशस्य, पतिः = स्वामी, प्रवर्तकत्वेनेति भावः । मैत्रावरुणः = वसिष्ठः, त्वां = चन्द्रकेतुम्, अभिनन्दतु=प्रशंसतु, यः=मैत्रावरुणः, ते=तव गुरूणाम् अपि = मातापित्रादिपूज्यजनानाम् अपि, गुरुः = आचार्यः, वर्तते इति शेषः । अथो = अनन्तरम्, ऐन्द्रावैष्णवम् = इन्द्रश्च विष्णुश्च इन्द्राविष्णू, 'देवताद्वन्द्वे च' इत्यानङ्, इन्द्राविष्ण्वोरिदम्, इन्द्रस्य विष्णोश्चेत्यर्थः । आग्निमारुतम् = अग्निश्च मरुच्च अग्नामरुतौ, 'देवताद्वन्द्वे च' इत्यानङ्, अग्नामरुतोरिदमिति अग्निमारुतम्, अण्प्रत्ययः, 'इद्वृद्धौ' इति इत् 'देवताद्वन्द्वे च' इत्युभयपदवृद्धिः, अग्नेर्मरुतश्चेत्यर्थः । सौपर्णं = सुपर्णस्य इदम्, गरुडसम्बन्धि चेत्यर्थः, एतादृशम् ओजः=पराक्रमः, ते=तव, अस्तु=भवतु । रामलक्ष्मणधनुर्ज्याघोषमन्त्रः=रामलक्ष्मणयोर्धनुषः=कार्मुकस्य, ज्यायाः=मौर्व्याः, घोषः=शब्दः, स एव मन्त्रः, जयं = विजयं, देयात् एव=दत्तात् एव, 'एर्लिङि' इत्येत्त्वम् । अत्र असम्भवद्वस्तुसम्बन्धरूपो निदर्शनालङ्कारः रूपकं च' तथा च द्वयोर्मिथोऽनपेक्षया स्थितेः संसृष्टिः । शार्दूलविक्रीडितं वृत्तम् ॥ २७ ॥

लव इति । अतीव = अत्यर्थम्, शोभसे = शोभितो भवसि । अत्यादरेण = अतिशयसंमानेन, कृतं कृतम्=अलम् अलम्, अत्यादरस्य प्रयोजनं नाऽस्तीत्यर्थः,

---

आपका अभिनन्दन करें, जो आपके माता-पिता आदि गुरुओंके भी गुरु हैं। इन्द्र और विष्णुका, अग्नि और वायुका पवम् गरुडका तेज आपको प्राप्त हो, राम और लक्ष्मणके धनुषके मौर्वीका शब्द (टङ्कार) रूप मन्त्र निश्चय आपको जय दे ॥ २७ ॥

लव—आप रथमें रहते हुए ही अत्यधिक शोभित हो रहे हैं। बहुत संमान करनेकी आवश्यकता नहीं है।

चन्द्रकेतुः—तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु ।

लवः—आर्य ! प्रत्यारोपय रथोपरि राजपुत्रम् ।

सुमन्त्रः—त्वमप्यनुरुध्यस्व वत्सस्य चन्द्रकेतोर्वचनम् ।

लवः—को विचारः स्वेषूपकरणेषु ? किं त्वरण्यसदो वयमनभ्यस्तरथचर्याः ।

सुमन्त्रः–जानासि वत्स ? दर्पसौजन्ययोर्यदाचरितम् । यदि पुनस्त्वामीदृशमैक्ष्वाको राजा रामभद्रः पश्येत्तदायमस्य स्नेहेन हृदयमभिष्यन्दयेत्[१]।

गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिका' इति करणत्वात् तृतीया, रथादवतरणं न कार्यमिति भावः ।

चन्द्रकेतुरिति । तर्हि = यदि मम रथादवतरणमनिष्टं तदेति भावः । महाभावः = महान् = श्रेष्ठः, भागः = भाग्यम् , यस्य सः, भवानपीति भावः, अलङ्करोतु = उपवेशनेन भूषयतु ।

लव इति । आर्य=पूज्य, सुमन्त्रं प्रत्युक्तिरियम् । राजपुत्रं = राजकुमारं चन्द्रकेतुमित्यर्थः, प्रत्यारोपय = आरोपय ।

सुमन्त्र इति । अनुरुध्यस्व = अनुसर, रथान्तरारोहणेन चन्द्रकेतुवचनं स्वीकुर्विति भावः ।

लव इति । स्वेषु = स्वीयेषु, आत्मीयेष्विति भावः । उपकरणेषु = रथाद्युपयोगिपदार्थेष्विति तात्पर्यम् । अरण्यसदः=अरण्ये सीदन्तीति, 'सत्सूद्विषे' इत्यादिना क्विप् वनवासिन इत्यर्थः । अनभ्यस्तरथचर्याः=अ[illegible] शिक्षिता, रथचर्या= रथचरणव्यवहारः, यैस्ते, अत एव स्थलस्थेनैव मया युद्धं कर्त्तुं पार्यत इति भावः ।

सुमन्त्र इति । दर्पसौजन्ययोः = अभिमानविनययोः, यत् आचरितम् = आचारः, तत् = आचरितमिति शेषः, जानासि = वेत्सि, त्वया रथप्रत्याख्या-

चन्द्रकेतु—तब आप भी दूसरे रथको अलङ्कृत करें ।

लव—आर्य ! राजकुमारको रथपर चढ़ाइये ।

सुमन्त्र—आप भी वात्सल्यभाजन चन्द्रकेतुके वचनका अनुसरण करें ।

लव—अपने उपयोगके पदार्थोंमें क्या विचार ? परन्तु वनमें चलनेवाले हमलोग रथके व्यवहारमें अभ्यस्त नहीं हैं ।

सुमन्त्र—वत्स ! अभिमान और विनयका जो आचार है, उसे जानते हो । ऐसे तुम्हें इक्ष्वाकुवंशीय राजा रामभद्र देखेंगे तो उनका हृदय स्नेहसे पिघल जायगा ।

१. 'तदाऽस्य······मभिष्यन्देति इति पाठान्तरम् ।

लवः—अन्यच्च चन्द्रकेतो ! सुजनः स राजर्षिः श्रूयते । (सलज्जमिव ।)

यदि च वयमप्येवंप्रायाः क्रतुद्विषतामरौ[1]
क इव न[2] गुणैस्तं राजानं जनो[3] बहु मन्यते ।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां

नेनाऽभिमानः, सम्भाषणमार्दवेन च विनयोऽपि प्रदर्शित इति भावः । अयं = लवः, अस्य = रामभद्रस्य, अभिष्यन्दयेत् = प्रस्तुतं कारयेत् ।

लव इति । राजर्षिः = राजा चाऽसौ ऋषिः, राजत्वे सत्यपि ऋष्याचारपरिग्रहाद्राजर्षिरिति भावः, सुजनः = सज्जनः । सलज्जमिव = सव्रीडमिव, सलज्जत्वं च महापुरुषरामस्य यज्ञकर्मणि प्रतिबन्धकत्वाज्ज्ञेयम् ।

यदि चेति । यदि च क्रतुद्विषताम् अरौ वयम् अपि एवंप्रायाः, क इव जनः गुणैः तं राजानं न बहु मन्यते ? तदपि तुरङ्गमरक्षिणां स व्याहारः अखिलक्षत्राक्षेपप्रचण्डतया मे विकृतिम् अकरोत् खलु इत्यन्वयः । यदि च = यद्यपि क्रतुद्विषताम्=यज्ञघातुकानां, राक्षसादीनामित्यर्थः, अरौ = शत्रौ, शासक इति भावः, वयम् अपि = अहमपीत्यर्थः, 'अस्मदो द्वयोश्च' इति बहुवचनम् । एवंप्रायाः = एतादृशाः प्रेमपात्रभूता इति भावः । पुस्तकान्तरेषु तु 'क्रतुद्विषतामरौ' इत्यत्र **'क्रतुप्रविघातिन'** इति पाठस्तत्र—वयमपि न खलु एवंप्रायाः क्रतुप्रविघातिन इत्यन्वयः, क्रतुघातिनः = यज्ञनाशका इत्यर्थः । क इव जनः = को वा नरः, गुणैः = दयादाक्षिण्यादिभिः, तं = पूर्वोक्तं, राजानं = रामचन्द्रं, न बहु मन्यते = न अधिकम् आद्रियते, सर्वे जना रामचन्द्रमाद्रियन्त इति भावः । यद्येवं तर्हि कथं श्रीमता रामस्याऽश्वो गृहीत इत्यत्राह—**तदपीति** । तदपि = तथाऽपि, रामस्य सर्वादृतत्वेऽपीति भावः, तुरङ्गमरक्षिणाम् = अश्वरक्षकाणां, सः=पूर्वोक्तः, व्याहारः,

लव – और भी चन्द्रकेतो ! 'वे राजर्षि (रामचन्द्र) सज्जन हैं' ऐसा सुना जाता है (लज्जितकी तरह होकर) ।

यद्यपि यज्ञद्वेषियों (दैत्यों) के शत्रु रामचन्द्रजीमें हमलोग भी प्रीति करनेवाले हैं । कौन पुरुष गुणोंके कारण उन राजाको अधिक आदर नहीं करता है, तथाऽपि घोड़ेके रक्षकोंकी

१. 'वयमपि न खल्वेवंप्रायाः क्रतुप्रविघातिनः' इति पाठान्तरम् । अयमेव पाठः साधीयान् , (सं०)

२. 'इह च' इति पाठान्तरम् । ३. 'नवा' इति पाठान्तरम् ।

विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाऽकरोत् ॥ २८ ॥

चन्द्रकेतुः—किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ?

लवः—अस्त्विहामर्षो मा भूद्वा । अन्यदेतत्पृच्छामि । दान्तं हि राजानं राघवं शृणुमः । स किल नात्मना दृप्यति, नाप्यस्य प्रजा वा दृप्ता जायन्ते । तत्किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति ?

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।

वचनं 'योऽयमश्वः पताका वा' इत्याकारकमिति (२५४ तमे पृष्ठे) भावः, अखिल-क्षत्राक्षेपप्रचण्डतया = अखिलाः=संपूर्णाः, ये क्षत्राः = क्षत्रियाः, तेषाम् आक्षेपः = तिरस्कारः, तेन हेतुना, प्रचण्डतया = क्रूरतया, मे = मम, विकृतिं=विकारं, मन्यु-मित्यर्थः । अकरोत् = अजीजनत् । समस्तानां क्षत्रियाणां तिरस्कारस्याऽसह्यत्वेनैव मयाऽऽत्मीयमपहृतो न तु कारणान्तरेणेति भावः । अत्राऽर्थापत्त्यलङ्कारः । हरिणी वृत्तम् ॥ २८ ॥

चन्द्रकेतुरिति । तातप्रतापोत्कर्षे = तातस्य = पितुः, रामचन्द्रस्येत्यर्थः, प्रतापस्य = तेजसः, उत्कर्षे = प्रकर्षे, अमर्षः = असहिष्णुता ।

लव इति । इह=अस्मिन्, रामचन्द्र इत्यर्थः, मा भूद्वा = न भवेद्वा, 'माङि लुङ्' इति लुङ्, 'न माङ्योगे' इत्यडभावः । अन्यत्=अपरम् । राघवं=रामचन्द्रं, दान्तम्=निरहङ्कारमित्यर्थः, शृणुमः=आकर्णयामः । सः=राघवः, आत्मना=स्वयम्, न दृप्यति = न दर्पं करोति, दृप्ताः=दर्पयुक्ताः । तस्य = राघवस्य, राक्षसीं = रक्षः-सम्बन्धिनीं, वाचं, = वाणीं दर्पयुक्तां वाणीमिति भावः । उदीरयन्ति = उच्चारयन्ति ।

ऋषय इति । ऋषय उन्मत्तदृप्तयोः वाचं राक्षसीम् आहुः, सा सर्ववैराणां योनिः, सा लोकस्य निष्कृतिः हि इत्यन्वयः । ऋषयः = मुनयः, उन्मत्तदृप्तयोः = विक्षिप्तगर्वितयोः, वाचं = वाणीं, राक्षसीं = रक्षःसम्बन्धिनीम्, आहुः = कथयन्ति ।

उस उक्तिने संपूर्ण क्षत्रियोंके तिरस्कारसे क्रूरताके कारण मेरे विकारको उत्पन्न कर दिया है ॥

चन्द्रकेतु—क्या पिताजीके प्रतापके उत्कर्षमें भी आपको असहनीयता है ?

लव—उनमें असहनीयता हो या न हो। और यह पूछता हूँ—'राजा रामचन्द्र निरहङ्कार हैं' ऐसा हम सुनते हैं। वे स्वयम् अहङ्कार नहीं करते हैं और न उनकी प्रजायें ही अहङ्कारयुक्त होती हैं; तब क्यों उनके मनुष्य राक्षसी वाणी बोलते हैं ?

ऋषिलोग उन्मत्त और अहङ्कारी पुरुषकी वाणीको 'राक्षसी' कहते हैं वह सम्पूर्ण

सा योनिः सर्ववैराणां सा हि लोकस्य निष्कृतिः ॥ २९ ॥

इति ह स्म तां निन्दन्ति इतरामभिष्टुवन्ति ।

कामं दुग्धे, विप्रकर्षत्यलक्ष्मीं, कीर्तिं सूते, दुर्हृदो निष्प्रलाति ।

शुद्धां शान्तां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः ॥३०॥

सा=राक्षसी वाक्, सर्ववैराणां = सकलविरोधानां, योनिः = कारणं, सा = राक्षसी वाक्, लोकस्य = जनस्य, 'लोकस्तु भुवने जने' इत्यमरः, निष्कृतिः = परिभवहेतुः, **'निर्ऋतिः'** इति पाठे अलक्ष्मीरित्यर्थः, 'स्यादलक्ष्मीस्तु निर्ऋतिः' इत्यमरः । अत्र **रूपकाऽलङ्कारः** ॥ २९ ॥

इतीति । इति ह स्मेति प्रसिद्धिद्योतकोऽव्ययसमूहः । तां = राक्षसीं वाचम् । इतरां = राक्षस्या वाचोऽन्यां, वक्ष्यमाणस्वरूपामिति भावः । अभिष्टुवन्ति = प्रशंसन्तीति भावः ।

काममिति । (इतरा वाक्) कामं दुग्धे, अलक्ष्मीं विप्रकर्षति, कीर्तिं सूते, दुर्हृदो निष्प्रलाति, (अतः) धीराः सूनृतां वाचं शुद्धां शान्तां मङ्गलानां मातरं धेनुम् आहुः इत्यन्वयः । (इतरा = सूनृता वाक्), कामम् = अभिलाषं, दुग्धे = प्रपूरयति, अलक्ष्मीं = निर्ऋतिं, विप्रकर्षति = दूरीकरोति, कीर्तिम् = यशः, सूते = जनयति, दुर्हृदः = दुष्टं हृदयं येषां तान् = शत्रूनित्यर्थः, 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति हृदयस्य हृद्भावः, निष्प्रलाति = अतिशयेन नाशयति, पुस्तकान्तरेषु तु **'दुष्कृतं या हिनस्ति'** इति पाठस्तत्र—या = सूनृता वाक्, दुष्कृतं = पापं, हिनस्ति = नाशयतीत्यर्थः । (अतः) धीराः = विद्वांसः, सूनृतां = सत्यप्रियां, 'सूनृतं प्रिये सत्ये' इत्यमरः, वाचं = वाणीं, शुद्धां = दोषशून्यां, शान्तां = पारुष्यरहितां, मङ्गलानां = कल्याणानां, मातरम् = उत्पादयित्रीं, धेनुं = कामधेनुं, तत्तुल्यामिति भावः । आहुः = कथयन्ति । सूनृता वाक् कामधेनुवत् सर्वान् कामान् पूरयतीति भावः । अत्र दोहनाद्यनेकक्रियाणामेककारकत्वाद्-

विरोधोंका कारण है और वही (राक्षसी वाणी) लोकके तिरस्कारका कारण है ॥ २९ ॥

इससे उसकी निन्दा करते हैं और दूसरी वाणीकी प्रशंसा करते हैं ।

दूसरी (सत्य और प्रिय) वाणी अभिलाषको पूर्ण करती है, अलक्ष्मीको दूर करती है, प्रसिद्धिको पैदा करती है और शत्रुओंको विनष्ट करती है । इस कारणसे विद्वान् पुरुष सूनृता (सत्य और प्रिय) वाणीको दोषशून्य, कठोरता रहित और कल्याणोंकी उत्पत्ति करनेवाली कामधेनुके तुल्य कहते हैं ॥ ३० ॥

सुमन्त्रः—परिभूतोऽयं बत कुमारः प्राचेतसान्तेवासी । वदत्यय-मभ्युपपन्नामर्षेण संस्कारेण ।

लवः—यत्पुनश्चन्द्रकेतो ! वदसि 'किन्तु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष' इति, तत्पृच्छामि 'किं व्यवस्थितविषयः क्षात्रधर्म' ? इति ।

सुमन्त्रः—नैव खलु जानासि दैवमैक्ष्वाकम् ! तद्विरमातिप्रसङ्गात् ।

दीपकाऽलङ्कारः । धेनुमित्यत्र कामधेनुसादृश्येन चाऽसम्भवद्वस्तुसम्बन्धा **निदर्शना**, तथा च द्वयोरलङ्कारयोर्मिथो नैरपेक्ष्येण स्थितेः **संसृष्टिः** । **शालिनी वृत्तम्** ॥३०॥

सुमन्त्र इति । प्राचेतसाऽन्तेवासी = प्राचेतसस्य = वाल्मीकेः, अन्तेवासी= छात्रः, परिभूतः = तिरस्कृतः, **'परिपूतस्वभाव'** इति पुस्तकान्तरपाठस्तत्र—परिपूतः = पवित्रः, स्वभावः = शीलं, यस्य स इत्यर्थः । अभ्युपपन्नाऽमर्षेण = अभ्युपपन्नः = उत्पन्नः, अमर्षः = कोपो यस्य तेन, एतादृशेन संस्कारेण = वासनया, वदति = परिभाषते, **'अभिसंपन्नमार्षेण संस्कारेण'** इति पुस्तकान्तरपाठस्तत्र—आर्षेण = ऋषिसम्बन्धिना, संस्कारेण = संस्कृत्या, अनुभूत्येति यावत् , वदति = प्रतिपादयति 'कामान्दुग्धे' इत्यादीति शेषः ।

लव इति । तत्=तत्र, क्षात्रधर्मः=शौर्यादिः, व्यवस्थितविषयः=व्यवस्थितः = नियतः, विषयः = आश्रयः, यस्य सः, शौर्यादिः क्षात्रधर्मो **रामचन्द्र** एव नियतः किमिति भावः ।

सुमन्त्र इति । ऐक्ष्वाकम् = इक्ष्वाकुवंशोत्पन्नं, देवं = महाराजं, रामचन्द्रमित्यर्थः । तत् = तस्माद्धेतोः, अतिप्रसङ्गात् = अनिष्टप्रसञ्जनात् , महावीरे रामेऽपि सावज्ञमसहिष्णुत्वाधिक्यादिति भावः, 'विरमे'तिपदेन योगे 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति पञ्चमी, विरम = विरतो भव ।

सुमन्त्र—खेद है, वाल्मीकि ऋषिके शिष्य ये कुमार तिरस्कृत हुए हैं, इसलिए ये क्रोधपूर्ण वासनासे बोल रहे हैं ।

लव—चन्द्रकेतुजी ! जो आप कहते हैं कि 'पिताजीके प्रतापके उत्कर्षमें भी आपको असहनीयता है ?' तो मैं पूछता हूँ कि क्षत्रियका धर्म (शूरता आदि) क्या एकमें ही रहनेवाला है ?

सुमन्त्र—तुम इक्ष्वाकुवंशोत्पन्न रामभद्रको नहीं जानते हो, इसलिए अनिष्ट प्रसङ्गको छोड़ो ।

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया ।
जामदग्न्यस्य दमने न हि निर्बन्धमर्हसि ॥ ३१ ॥

लवः—(सहासम् ।) आर्य ! जामदग्नस्य दमनः स राजेति कोऽयमुच्चैर्वादः ?

सिद्धं ह्येतद्वाचि वीर्यं द्विजानां बाह्वोर्वीर्यं यत्तु तत्क्षत्रियाणाम् ।

सैनिकानामिति । सैनिकानां प्रमाथेन त्वया ओजायितं सत्यम् । जामदग्न्यस्य दमने निर्बन्धं न अर्हसि हि इत्यन्वयः । सैनिकानां = सैन्यानां, प्रमाथेन = हिंसनेन, त्वया=लवेन, ओजायितम्=ओजस्विनेव आचरितम् , ओजः शब्दो वृत्तिविषये तद्वति, ततः 'कर्तुः क्यङ् सलोपश्च' इति क्यङ् सलोपश्च, 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घत्वं, ततः क्तः । सत्यम् = एतत्तथ्यमेव, परं जामदग्न्यस्य= जमदग्नेरपत्यस्य, परशुरामस्येत्यर्थः, 'दमन' इति पदेन योगे 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी, दमने = दमयतीति दमनस्तस्मिन् 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणात् कर्तरि ल्युट् , जेतरि रामचन्द्र इत्यर्थः । निर्बन्धं = रूक्षवादं, कथयितुमिति शेषः, न अर्हसि = न योग्यो भवसि, हि = निश्चयेन । 'न हि निर्बन्ध' मित्यत्र **'नैवं निर्वक्तु'**मिति पुस्तकान्तरपाठस्तत्र—एवं = व्यवस्थितविषयः क्षात्रधर्मः इत्येवंरूपेण, निर्वक्तुम् = प्रतिपादयितुम् , शेषं प्राग्वत् । महावीरे रामचन्द्रे तवैतत्कथनं नोचितमिति भावः ॥ ३१ ॥

लव इति । सहासं = हाससहितं, 'जामदग्नस्य दमन' इति रामविशेषणश्रवणादिति शेषः, स राजा=रामचन्द्रः, उच्चैर्वादः=महावीरत्वद्योतिकोक्तिः ।

सिद्धमिति । द्विजानां वाचि वीर्यं, यत् बाह्वोः वीर्यं तत्तु क्षत्रियाणाम् ; एतत् सिद्धं हि । जामदग्न्यः शस्त्रग्राही ब्राह्मणः, तस्मिन् दान्ते तस्य राज्ञः का स्तुतिः ? इत्यन्वयः । द्विजानां = ब्राह्मणानां, वाचि=वचने, वीर्यं=पराक्रमः, पराभिभाविरूप इति भावः, भवतीति शेषः । यत् , बाह्वोः = भुजयोः, वीर्यं = पराक्रमः, तत्तु, क्षत्रियाणां = राजन्यानां, न तु द्विजानामित्यर्थः, ब्राह्मणा मन्त्रबलाः, क्षत्रिया-

सैनिकोंको मारनेसे तुमने तेजस्वीकी तरह आचरण किया है, यह सत्य है; परन्तु परशुरामजीको दमन करनेवाले रामभद्रके विषयमें (कठोर वाणी) बोलना तुम्हें उचित नहीं है ॥ ३१ ॥

लव—(हास्यके साथ) आर्य ! वे राजा (रामचन्द्र) परशुरामजीको दमन करने वाले हैं, तो इसमें वीरताकी कौन बड़ी बात हुई ?

ब्राह्मणोंका पराक्रम वचनमें होता है, जो भुजाओंका बल है वह तो क्षत्रियोंका है ।

शस्त्रग्राही ब्राह्मणो जामदग्न्यस्तस्मिन्दान्ते का स्तुतिस्तस्य राज्ञः ? ॥

चन्द्रकेतुः—(सोन्माथमिव ।) आर्य सुमन्त्र ! कृतमुत्तरोत्तरेण ।

कोऽप्येष संप्रति नवः पुरुषावतारो वीरो न यस्य भगवान्भृगुनन्दनोऽपि ।
पर्याप्तसप्तभुवनाभयदक्षिणानि पुण्यानि तात चरितान्यपि यो न वेद ॥

एव बाहुबला भवन्तीति भावः, एतत् = द्विजानां वाग्बलत्वं क्षत्रियाणां बाहुबलत्वं च, सिद्धं = प्रसिद्धं, हि = निश्चयेन जामदग्न्यः = परशुरामः, शस्त्रग्राही = आयुधधारी, ब्राह्मणः = द्विजः, वाग्बलत्वेन शस्त्रग्रहणाऽनधिकारीति भावः । तस्मिन्=तादृशे ब्राह्मणे परशुराम इति भावः, दान्ते = पराजिते सति, तस्य=पूर्वोक्तस्य, राज्ञः = विजेतुः रामचन्द्रस्य, का स्तुतिः = कः स्तवः, वाग्बलस्य शस्त्रग्रहणानधिकारिणः परशुरामस्य ब्राह्मणस्य विजये का नाम रामप्रशंसेति भावः । अत्र आर्थी **परिसंख्याऽलङ्कारः** । **शालिनी** वृत्तम् ॥ ३२ ॥

चन्द्रकेतुरिति । सोन्माथमिव = पीडासहितमिव, रामचन्द्रं प्रत्याक्षेपादितिशेषः । उत्तरोत्तरेण = उत्तरं प्रत्युत्तरप्रदानेनेत्यर्थः । कृतम् = अलम् , अनेन दुर्विनीतेन बालकेन सह उक्तिप्रत्युक्तिविस्तररूपः संलापो न कर्तव्य इति भावः ।

कोऽप्येष इति । सम्प्रति एषः कोऽपि नवः पुरुषावतारः, यस्य भगवान् भृगुनन्दनः अपि न वीरः । यः पर्याप्तसप्तभुवनाऽभयदक्षिणानि पुण्यानि तातचरितानि अपि न वेद इत्यन्वयः । सम्प्रति = अधुना, एषः = अतिसमीपस्थोऽयं जनः, कोऽपि=अनिर्वचनीयरूपः, नवः=नूतनः, अपूर्व इति भावः, पुरुषाऽवतारः=पुरुषस्य =नारायणस्य, अवतारः=अवतारविशेषः, अस्तीति शेषः । यस्य = जनस्य, मतइति शेषः, भगवान् = ऐश्वर्यसम्पन्नः, भृगुनन्दनोऽपि = परशुरामोऽपि, न वीरः= न शूरः, यः त्रिःसप्तकृत्वो बाहुवीर्याणां क्षत्राणां विनाशकं परशुराममपि वीरं न जानाति, स कोऽपि नवः पुरुषाऽवतार इति भावः । यः = अपूर्वः पुरुषः, पर्याप्तसप्तभुवनाऽभयदक्षिणानि = पर्याप्ता = पूर्णा, सप्तानां = सप्तसङ्ख्यानाम् , भुवनानाम्=

परशुरामजी शस्त्रग्रहण करनेवाले ब्राह्मण हैं, तब उनके पराजित होनेपर उन राजा (रामचन्द्र) की क्या बड़ाई है ? ॥ ३२ ॥

चन्द्रकेतु—(पीडितकी तरह) आर्य सुमन्त्र ! अब उत्तर-प्रत्युत्तरकी आवश्यकता नहीं है । इस समय ये कोई अपूर्व पुरुषावतार (नारायणके अवतार-विशेष) आविर्भूत हो गये हैं, जिनके मतमें भगवान् परशुराम भी वीर नहीं हैं । जो सात लोकोंको पूर्ण अभयदान करनेवाले पिताजी (रामचन्द्र) के पवित्र चरित्रोंको भी नहीं जानते हैं ॥ ३३ ॥

लवः—को हि रघुपतेश्चरितं महिमानं च न जानाति ? यदि नाम किंचिदस्ति वक्तव्यम् । अथवा शान्तम् ।

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते[1]
सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते ।

भूरादिलोकानाम् , अभयम् = भयाभावः, एव दक्षिणा = देयपदार्थः, येषु तानि, पुण्यानि = पवित्राणि, तातचरितानि अपि = पितृचरणरामचन्द्रचरित्राणि अपि, न वेद = न जानाति, लोकसप्तकायापि अभयं वितरतः पितृचरणस्य रामचन्द्रस्या-साधारणशौर्यसमन्वितं पुण्यचरित्रमपि यो लोकोत्तरत्वेन न संभावयत्यतोऽयं कोऽप्यपूर्वः पुरुषाऽवतार इति भावः । अत्र **रूपकाऽऽलङ्कारस्य च्छेकाऽनुप्रासस्य च संसृष्टिः । वसन्ततिलका** वृत्तम् ॥ ३३ ॥

लव इति । रघुपतेः = रामचन्द्रस्य, महिमानं = महतो भावो महिमा तं महत्त्वमित्यर्थः, 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्प्रत्ययः । 'यदि नामे'ति संभावनायाम् । वक्तव्यं = वाच्यम् । शान्तं = पर्याप्तं, न वाच्यमिति भावः । शान्तमिति कथयित्वापि किञ्चिद्विवृणोति ।

वृद्धा इति । हुं वर्तते, वृद्धाः विचारणीयचरिताः न तिष्ठन्तु, सुन्दस्त्रीमथनेऽपि अकुण्ठयशसः ते लोके महान्तो हि, खरायोधने यानि त्रीणि कृतोमुखानि पदानि अपि आसन्, वा इन्द्रसूनुनिधने यत् कौशलं, तत्र अपि जनः अभिज्ञः इत्यन्वयः । हुमिति वितर्के, वर्तते = विद्यते, रघुपतेश्चरिते महिम्नि च किंचिद्वक्तव्यमिति शेषः । वृद्धाः = वयोज्येष्ठाः, ते = रामादयः, विचारणीयचरिताः = आलोचनीयचरित्राः, न तिष्ठन्तु=न वर्तन्ताम् , संभावनायां लोट् । एतेषां वयोमात्रं गौरवहेतुर्न चरित्रमिति भावः । सुन्दस्त्रीमथनेऽपि = सुन्दस्त्रियाः = सुन्ददैत्यपत्न्याः, ताडकाया इत्यर्थः, मथनेऽपि = वधेऽपि, अकुण्ठयशसः = अकुण्ठम् = अप्रतिहतम् , **'अखण्ड'** मिति पाठे पूर्णमित्यर्थः, तादृशं यशः = कीर्तिः, येषां ते । ते = रामचन्द्राः, लोके = भुवने, महान्तः = श्रेष्ठाः, हि = निश्चयेन, शास्त्रनिषिद्धे स्त्रीवधाचरणेऽपि लोकस्तान् प्रशंसत्येवेति अहो ! तेषां महत्त्वमिति भावः । खरा-

लव—रामचन्द्रके चरित्र और महिमाको कौन नहीं जानता ? कुछ कहनेके योग्य भी हो, अथवा नहीं कहना चाहिए । (रामचन्द्रजीके चरित्रमें कुछ वक्तव्य) हाँ है ।

बूढ़े ये (रामचन्द्र) आलोचनीय चरित्रवाले नहीं ! सुन्दकी स्त्री (ताडका) को

१. 'किं वर्ण्यते' इति पाठान्तरम् ।

यानि त्रीणि कुतोमुखान्यपि पदान्यासन्खरायोधने ।
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥ ३४ ॥

चन्द्रकेतुः–आः तातापवादिन् ! भिन्नमर्याद ! अति हि नाम प्रगल्भसे ।

योधने = खरेण = तदाख्येन राक्षसेन सह, आयोधने = युद्धे, 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्' । इत्यमरः । यानि = प्रागनुष्ठितानि, त्रीणि=त्रिसंख्यकानि, कुतोमुखानि = पराङ्मुखानि, पदानि अपि = पादन्यासाः अपि, आसन् = अभवन् , खरस्याऽत्यन्ताऽऽसन्नत्वेन स्थितत्वात् , रामश्चापकर्षणार्थं पदत्रयं निवृत्य तं जघानेति प्रसिद्धिः, तच्च रामकर्तृकं पदत्रयं यावन्निवर्तनं पलायनं मन्यमानो लवः 'न निवर्तेत संग्रामात्क्षात्रं धर्ममनुस्मरन्' । इति स्मृत्वाऽऽचिक्षेपेति ज्ञेयम् । 'कुतोमुखानी' त्यत्र **'अपराङ्मुखानी'**ति पुस्तकान्तरपाठस्तत्र—अपरावृत्तानीत्यर्थः, अनिवृत्तपदं तथा तथा पश्चात्स्थापितानीति भावः । वा = अथवा, इन्द्रसूनुनिधने = इन्द्रसूनोः = वालिनः, निधने = वधे, यत् = पूर्वाऽनुष्ठितं, कौशलं = नैपुण्यम् , अन्तर्धानपूर्वकमिति भावः, सुग्रीवेण सह युद्धयन्तं वालिनं वृक्षखण्डे तिरोभूय रामो यज्जघानेति विशदाऽर्थः । तत्राऽपि = तस्मिन् कौशलेऽपि, जनः=सर्वो लोकः, अभिज्ञः=विज्ञाता, अस्तीति शेषः । सर्वजनप्रद्धिान्येतानि रामकार्याणि नाऽस्माभिर्वर्णनीयानीति भावः । अत्र वक्तुमिष्टस्य रामदोषरूपस्य वस्तुनः तिष्ठन्त्वित्यनेन निषेधाभासाद्वक्ष्यमाण **आक्षेपाऽलङ्कारः** । तदुक्तं साहित्यदर्पणे—'वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये । निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥' इति । **शार्दूलविक्रीडितं** वृत्तम् ॥ ३४ ॥

चन्द्रकेतुरिति । आः = कोपद्योतकमव्ययमिदम् , तातापवादिन् = रामविषयकदोषवादिन् , अत एव भिन्नमर्याद = भिन्ना = उल्लङ्घिता मर्यादा = सदाचारो येन, तत्सम्बुद्धौ, **'तातापवादभिन्नमर्याद'**ति पाठे—तातस्य = पितृचरणस्य, रामस्येत्यर्थः, अपवादेन = निन्दया, भिन्नमर्याद, शिष्टं स्पष्टम् । अति हि = अत्यर्थमेव, नाम = कोपद्योतकमव्ययमिदं 'नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने ।' इत्यमरः, प्रगल्भसे=धृष्टो भवसि, 'गल्भ धार्ष्ट्ये' इति धातोर्लट् ।

मारनेमें भी अप्रतिहत यशवाले वे लोकमें श्रेष्ठ ही हैं । खरके साथ युद्धमें तीन पग पीछे हटे थे, अथवा वालीके मारनेमें जो निपुणताकी थी उसमें भी लोग जानकार हैं ॥ ३४ ॥

चन्द्रकेतु—ओह ! पिताजीकी निन्दा और शिष्टाचारका उल्लङ्घन करनेवाले ! तुम बहुत ही ढीठ हो रहे हो !

लवः—अये ! मय्येव भ्रुकुटीमुखः संवृत्तः ।
सुमन्त्रः—स्फुरितमनयोः क्रोधेन । तथा हि—
क्रोधेनोद्धतधूतकुन्तलभरः सर्वाङ्गजो वेपथुः
किञ्चित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः ।
धत्ते ¹कान्तिमिदं च वक्त्रमनयोर्भङ्गेन भिन्नं भ्रुवो-

लव इति । भ्रुकुटीमुखः = कोपेन भ्रूभङ्गयुक्तवदनः, संवृत्तः = संजातः ।

सुमन्त्र इति । अनयोः = लवचन्द्रकेत्वोः, स्फुरितं = प्रादुर्भूतं, 'नपुंसके भावे क्त' इति क्तप्रत्ययः, क्रोधस्फुरितं द्योतयति—तथा हीति ।

क्रोधेनेति । क्रोधेन उद्धतधूतकुन्तलभरः सर्वाङ्गजो वेपथुः स्वयं कोकनदच्छदस्य किंचित् सदृशे नेत्रे रज्यतः । भ्रुवोः भङ्गेन भीमम् अनयोः इदं वक्त्रं च उद्भटलाञ्छनस्य चन्द्रस्य उद्भ्रान्तभृङ्गस्य कमलस्य च कान्तिं धत्त इत्यन्वयः । क्रोधेन = कोपेन, उद्धतधूतकुन्तलभरः = उद्धतं = सातिशयं यथा तथा, धूताः = चलिताः, कुन्तलभराः = केशभाराः यस्मिन् सः, 'चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः ।' इत्यमरः, सर्वाऽङ्गजः = समस्तशरीरोत्पन्नः, एतादृशो वेपथुः = कम्पः, अस्तीति शेषः, **'चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथु'**रिति पुस्तकान्तरपाठस्तत्र—आकूतजो वेपथुः चूडामण्डलबन्धनं तरलयतीत्यन्वयः । आकूतजः = रिपुदमनाऽभिप्रायोत्पन्नः, वेपथुः = कम्पः, चूडामण्डलबन्धनं, चूडामण्डलस्य = शिखासमूहस्य, बन्धनं = ग्रन्थिम् , तरलयति=चालयति इत्यर्थः । स्वयं = स्वभावादेव, कोकनदच्छदस्य = रक्तोत्पलपत्रस्य-, 'रक्तोत्पलं कोकनदं', 'दलं पर्णं छदः पुमान्' इत्युभयत्राऽप्यमरः । किंचित् = ईषत् , सदृशे = तुल्ये, एतादृशे नेत्रे = नयने, रज्यतः = रक्ते भवतः, कोपेनेति शेषः । भ्रुवोः = भ्रूद्वयस्य, भङ्गेन=कौटिल्येन, भीमं=भयङ्करम् , अनयोः=

लव—अरे ! ये मेरे ऊपर ही भ्रुकुटी चढ़ाने लगे हैं ।
सुमन्त्र—इन दोनोंके क्रोधकी वृद्धि हो गई है । क्योंकि—
क्रोधसे केशोंको अतिशय हिलानेवाला समस्त शरीरमें उत्पन्न कम्प प्रकट हो रहा है । स्वभावसे ही रक्तकमलके पत्रके कुछ सादृश्यवाले दोनों नेत्र लाल हो रहे हैं । भ्रूभङ्गसे

१. 'कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रम्' इति पाठान्तरम् ।

अनयोरिदं च वक्त्रं चन्द्रस्योद्भटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥३५॥
लवः—कुमार ! कुमार ! एह्येहि । विमर्दक्षमां भूमिमवतरावः ।

(इति निष्क्रान्ताः सर्वे ।)

इति महाकविभवभूतिविरचित उत्तररामचरिते कुमारविक्रमो नाम
पञ्चमोऽङ्कः ॥ ५ ॥

लवचन्द्रकेत्वोः, इदम् = एतत , वक्त्रं च = मुखं च, उद्भटलाञ्छनस्य = प्रकटकलङ्कस्य, एतादृशस्य चन्द्रस्य = चन्द्रमसः, एवं च उद्भ्रान्तभृङ्गस्य = उद्भ्रान्ताः = ऊर्ध्वं भ्रमन्तः, भृङ्गाः = भ्रमराः, यस्मिंस्तस्य, तथाभूतस्य कमलस्य च = पद्मस्य च, कान्तिं = शोभां, धत्ते = धारयति । अत्र 'कान्तिं धत्ते' इत्यत्र असम्भवद्वस्तुसम्बन्धरूपो निदर्शनाऽलङ्कारः, कम्परक्तनेत्रादिरूपैर्हेतुभिः क्रोधरूपसाध्यस्य ज्ञानादनुमानाऽलङ्कारश्च, तथा च द्वयोरङ्गाङ्गिभावेन सङ्करः । शार्दूलविक्रीडितं । वृत्तम् ॥ ३५ ॥

लव इति । एहि = आगच्छ, विमर्दक्षमां = युद्धयोग्याम् , अवतरावः=अवतीर्णौ भवावः ।

इति श्रीशेषराजशर्म्मप्रणीतायामुत्तररामचरितव्याख्यायां चन्द्रकलाऽऽख्यायां कुमारविक्रमनामकः पञ्चमोऽङ्कः ॥ ५ ॥

भयङ्कर इन दोनोंके मुख भी कलङ्कयुक्त चन्द्रकी और ऊपर घूमनेवाले भ्रमरोंसे युक्त कमलको भी कान्तिको धारण कर रहे हैं ॥ ३५ ॥

लव—कुमार ! कुमार ! आओ आओ, युद्धके योग्य भूमिमें हम दोनों उतर पड़ें ।

(इसके अनन्तर सब जाते हैं ।)

यह कुमारविक्रम नामक पाँचवाँ अङ्क समाप्त हुआ ॥ ५ ॥

---

१. 'स्योत्कट' इति पाठान्तरम् ।

षष्ठोऽङ्कः

(ततः प्रविशति विमानेनोज्ज्वलं विद्याधरमिथुनम् ।)

विद्याधरः—अहो नु खल्वनयोर्विकर्तनकुलकुमारयोरकाण्डकलहप्रचण्डयोरुद्द्योतितक्षत्रलक्ष्मीकयोरत्यद्भुतोद्भ्रान्तदेवासुराणि विक्रान्तविलसितानि । तथा हि प्रिये ! पश्य ।

झणज्झणितकङ्कणक्वणितकिङ्किणीकं धनु-

तत इति । युद्धस्य 'दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ।' इति दृश्यत्वनिषेधात विष्कम्भकेन तदाह—विद्याधरमिथुनमित्यादिना । विद्याधरो देवयोनिविशेषः, स च विद्याधरी, च विद्याधरौ, 'पुमान् स्त्रिया' इत्येकशेषः, तयोर्मिथुनम् = द्वन्द्वम् , विमानेन = व्योमयानेन ।

विद्याधर इति । अहो = आश्चर्यद्योतकमव्ययमिदम् । अकाण्डकलहप्रचण्डयोः = अकाण्डे = अनवसरे, यः कलहः = विरोधः, तेन प्रचण्डयोः = अतिशयकोपनयोः, उद्योतितक्षत्रलक्ष्मीकयोः = उद्योतिता = प्रकाशिता, क्षत्रलक्ष्मीः = क्षत्रियशोभा, ययोस्तयोः, एतादृशयोः । अनयोः = पुरःस्थितयोः, विकर्तनकुलकुमारयोः = सूर्यवंशबालकयोः, लवचन्द्रकेत्वोरिति भावः । अत्यद्भुतोद्भ्रान्तदेवासुराणि = अत्यद्भुतेन=अतिविस्मयेन, उद्भ्रान्ताः, = विमूढाः, देवासुराः = अमरदैत्याः, येषु तानि । विक्रान्तविलसितानि = वीरचरितानि, 'शूरो वीरश्च विक्रान्त' इत्यमरः, 'गत्यर्थाऽकर्मके'त्यादिना क्तप्रत्ययः । अनयोरुभयोरपि पराक्रमेण देवादयोऽपि कतरस्य जयः कतरस्य पराजयश्च भविष्यतीति निश्चेतुमशक्ताः सन्तो विस्मयपरवशा भवन्तीति भावः । पश्य पश्य = अवलोकय अवलोकय, विस्मये द्विरुक्तिः ।

झणदिति । झणज्झणितकङ्कणक्वणितकिङ्किणीकं ध्वनद्गुरुगुणाऽटनीकृतकरालकोलाहलं धनुः वितत्य शरान् अविरतं किरतोः शूरयोः पुनः विचित्रं भुवनभीमम् आयोधनम् अभिवर्तते इत्यन्वयः । झणज्झणितकङ्कणक्वणितकिङ्किणीकं = 'झणज्झण' इति अव्यक्ताऽनुकरणशब्दः, स संजातोऽस्य तत् , 'तदस्य सञ्जातं तारकादिभ्य इतच्' इति इतच्प्रत्ययः । झणज्झणितं = सञ्जातझणज्झणशब्दम् , यत् कङ्कणं = करभूषणम् , तस्येव क्वणितं = शब्दः, यासां ताः तादृश्यः किङ्किण्यः = क्षुद्रघण्टिकाः, यस्मिंस्तत् , 'किङ्किणी क्षुद्रघण्टिका' इत्यमरः ।

(अनन्तर विमानमें चढ़कर प्रकाशमान विद्याधरी और विद्याधर प्रवेश करते हैं ।)

विद्याधर—अहो ! अनवसरमें विरोध कर अतिशय क्रुद्ध, क्षत्रियशोभासे सम्पन्न सूर्यवंशके इन दोनों कुमारोंके, अतिशय आश्चर्यसे देवता और दैत्योंको भी मोहयुक्त करनेवाले वीरचरित्र प्रकाशित हो रहे हैं ! जैसे कि प्रिये ! देखो—

'झन झन' शब्द करनेवाले कङ्कणकी तरह शब्द करनेवाली किङ्किणियोंसे युक्त, भार

ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलम् ।
वितत्य किरतोः शरानविरतं पुनः शूरयो-
र्विचित्रमभिवर्तते भुवनभीममायोधनम् ॥ १ ॥
जृम्भितं च विचित्राय मङ्गलाय द्वयोरपि ।
स्तनयित्नोरिवामन्दुदुन्दुभेर्दुन्दुभायितम् ॥ २ ॥
तत्प्रवर्त्यतामनयोः प्रवीरयोरनवरतमविरलमिलितविकचकनककमल-

ध्वनद्गुरुगुणाऽटनीकृतकरालकोलाहलं = ध्वननं = शब्दं कुर्वन्, गुरुः = महान्, गुणः = मौर्वी, यया, तादृशी या अटनी = धनुष्कोटिः, 'कोटिरस्याऽटनी' इत्यमरः, तया कृतः = विहितः, करालः = भीषणः, कोलाहलः = कलकलः, यस्मिं-स्तत्, एतादृशं धनुः = कार्मुकं वितत्य = मण्डलीकृत्य, शरान् = बाणान्, अवि-रतं = निरन्तरं, किरतोः = प्रक्षिपतोः, शूरयोः = वीरयोः, लवचन्द्रकेत्वोरित्यर्थः। **'अविरतस्फुरच्चूडयोः'** इति पाठान्तरं तत्र—अविरतं = निरन्तरम्, यथा तथा स्फुरन्त्यः, = प्रचलन्त्यः, चूडाः = शिखाः, ययोस्तयोरित्यर्थः, पुनः = भूयः, विचित्रम् = अत्यद्भुतं, भुवनभीमं = भुवनेषु = लोकेषु, भीमम् = भयङ्करम्, आयो-धनं = युद्धम्, अभिवर्तते = सम्मुखे विद्यत इति भावः। **'अभिवर्द्धते'** इति पाठे संमुखं वृद्धिं प्राप्नोतीति भावः। अत्र **'उपमावृत्त्यनुप्रासयोः संसृष्टिः। पृथ्वी** वृत्तं, 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।' इति तल्लक्षणम् ॥ १ ॥

जृम्भितमिति । द्वयोरपि विचित्राय मङ्गलाय स्तनयित्नोरिव अमन्ददुन्दुभेः दुन्दुभायितं जृम्भितम् इत्यन्वयः । द्वयोरपि = उभयोरपि, लवचन्द्रकेत्वोरपीति भावः । विचित्राय = अत्यद्भुताय, मङ्गलाय = कल्याणाय, उत्साहवर्द्धनायेति भावः । स्तनयित्नोरिव = गर्जन्मेघस्येव, अमन्ददुन्दुभेः = महाभेर्याः, दुन्दुभायितं=दुन्दुभेस्या कारकः शब्दः, जृम्भितम्, **'विजृम्भितं च दिव्यस्य'** इति पुस्तकान्तरपा-ठे-'दिव्यस्य' इत्येतत् 'दुन्दुभेः' इत्यस्य विशेषणं, शेषं प्राग्वत् । **उपमालङ्कारः** ॥२॥

तदिति । तत् = तस्माद्धेतोः, प्रवीरयोः = महावीरयोः, अनयोः = लवचन्द्र-

मौर्वीको शब्दायमान करनेवाले और अग्र भागसे भयङ्कर कोलाहल करनेवाले धनुषको फैलाकर बाणोंको लगातार छोड़नेवाले इन दोनों वीर कुमारोंका फिर विचित्र (अनूठा) और लोकके लिए भयङ्कर संग्राम हो रहा है ॥ १ ॥

इन दोनों वीरोंके विचित्र कल्याणके लिए गर्जनेवाले मेघकी सदृश भारी भेरीका 'दुमदुम' शब्द उत्पन्न हो रहा है ॥ २ ॥

इस कारणसे इन दोनों महावीरोंके ऊपर घने, मिले हुए और खिले हुए सुवर्ण-कमलोंसे

कमनीयसंहतिरमरतरुतरुणमणिमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः ।

विद्याधरी—ता किं ति पुरो आआसं दुद्दंततरलतडिच्छडाकडारं अवरं विअ क्खत्ति संवुत्तम् ? (तत्किमिति पुर आकाशं दुर्दर्शतरलतडिच्छटाकडारमपरमिव झटिति संवृत्तम्)

विद्याधरः—तत्किं नु खल्वद्य ?

त्वष्टृयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः ।

केत्वोः, अविरलमिलितविकचकनककमलकमनीयसंहतिः = अविरलैः = घनैः, मिलितैः = संमिलितैः, **'ललित'** इति पाठे-ललितैः = सुन्दरैः, विकचैः = विकसितैः, कनककमलैः = सुवर्णपद्मैः, कमनीया = मनोहरा, संहतिः = समूहः, **'संततिः'** पदपाठे सन्ततिः = पङ्क्तिः यस्य सः । अमरतरुतरुणमणिमुकुलनिकरमकरन्दसुन्दरः = अमरतरूणां = पारिजातादीनाम् , ये तरुणमणिमुकुलाः = नूतनरत्नसदृशाः कुड्मलाः, तेषां निकरस्य = समूहस्य, ये मकरन्दाः = पुष्परसाः, तैः सुन्दरः=मनोरमः, 'कुड्मलो मुकुलोऽस्त्रियाम्','मकरन्दः पुष्परस' इत्युभयत्राऽप्यमरः । एतादृशः पुष्पनिपातः=प्रसूनवृष्टिः, अनवरतं=निरन्तरम् , प्रवर्त्यताम्=आरभ्यताम् ।

विद्याधरीति । किमिव = केन हेतुना, पुरः = अग्रतः, दुर्धर्षतरलतडिच्छटाकडारम्=दुर्दर्शा = दुःखेन दर्शनीया, तरला, = चञ्चला, या तडिच्छटा = विद्युद्दीप्तिः, तया कडारम् = कपिलम् , आकाशं = व्योम, झटिति = सत्वरम् , अन्यत् इव = अपरम् इव, संवृत्तं = जातमित्यर्थः ।

त्वष्ट्रिति । ललाटस्थनीललोहितचक्षुषः त्वष्टृयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः पुटभेद इत्यन्वयः । ललाटस्थनीललोहितचक्षुषः = ललाटस्थं = भालस्थितम् , नीललोहितस्य = शिवस्य, यत् चक्षुः = नेत्रम् , अग्निरूपं तृतीयं नयनमिति भावः, तस्य । त्वष्टृयन्त्रभ्रमिभ्रान्तमार्तण्डज्योतिरुज्ज्वलः = त्वष्टुः = विश्वकर्मणः, यन्त्रं = शाणयन्त्रम् , तस्य भ्रमिः = भ्रमणक्रिया, तया भ्रान्तः = घूर्णितः यो मार्तण्डः = सूर्यः, तस्य ज्योतिः = तेजः, इव उज्ज्वलः = दीप्यमानः ।

सुन्दर समूहवाली तथा पारिजात आदि वृक्षोंके नूतनरत्नोंके सदृश मुकुलोंके मकरन्दों—(पुष्परसों) से सुन्दर पुष्पवृष्टि निरन्तर छोड़ो ।

विद्याधरी—तब क्यों सामने दुःखसे दर्शनीय और चञ्चल बिजलीकी पङ्क्तिसे पिङ्गल वर्णवाला यह आकाश झटपट दूसरे पदार्थके सदृश हो गया है ।

विद्याधर—तब क्या आज—

ललाटस्थित महादेवके नेत्रका विश्वकर्माके शाणयन्त्र (सान) के भ्रमणसे घूमनेवाले सूर्यके

पुटभेदो ललाटस्थनीललोहितचक्षुषः ॥ ३ ॥

(विचिन्त्य) आं ज्ञातम् । जातक्षोभेण चन्द्रकेतुना प्रयुक्तमप्रतिरूपमाग्नेयमस्त्रम् , यस्यायमग्निवच्छरसम्पातः । संप्रति हि ।

अवदग्धबर्बरितकेतुचामरैरपयातमेव हि विमानमण्डलैः ।
दहति ध्वजांशुकपटावलीमिमां नवकिंशुकद्युतिसविभ्रमः शिखी ॥४॥

पुटभेदः = पुटयोः = पक्ष्मणोः भेदः = उन्मीलनम् , संवृत्तः किमिति शेषः । महादेवस्य वैश्वानररूपं तृतीयं नेत्रमुन्मीलितं किमिति भावः । पुरा त्वष्टुर्भास्करस्य अतिप्रौढतेजोऽसहमानया संज्ञया तत्तेजःप्रशमनाऽर्थं पिता विश्वकर्मा प्रार्थितः, स च भगवन्तं भास्करं शाणयन्त्रमारोप्य मुहुर्मुहुः परिभ्रामणेन तेजःशातनतः सह्यमानतेजसमकार्षीदिति पौराणिकी कथाऽनुसन्धेया । अत्र लुप्तोपमासंदेहालङ्कारौ ॥ ३ ॥

विचिन्त्येति । विचिन्त्य = विचार्य । जातक्षोभेण=जातः = उत्पन्नः = क्षोभः चाञ्चल्यम् , यस्य तेन । अप्रतिरूपम् = सादृश्यरहितम् , असाधारणमिति भावः । आग्नेयम् = अग्निदैवतमस्त्रं, प्रयुक्तं=प्रेरितम् , यस्य = आग्नेयास्त्रस्य, शरसम्पातः = बाणधारा, **'अग्निच्छटासम्पात'** इति पाठे वह्निज्वालापतनमित्यर्थः ।

अवदग्धेति । अवदग्धबर्बरितकेतुचामरैः विमानमण्डलैः अपयातम् एव हि । नवकिंशुकद्युतिसविभ्रमः शिखी इमां ध्वजांशुकपटावलीं दहति इत्यन्वयः । अवदग्धबर्बरितकेतुचामरैः = अवदग्धानि = किञ्चित्प्लुष्टानि बर्बरितानि = दाहनबर्बरध्वनियुक्तानि, **'कर्बुरितानि'** इति पाठे चित्रवर्णानि, एतादृशानि केतुचामराणि = ध्वजाः प्रकीर्णकानि च, येषां तैः 'चामरं तु प्रकीर्णकम्' इत्यमरः, एतादृशैः विमानमण्डलैः = व्योमयानसमूहैः, अपयातम् एव = पलायितमेव, दाहभयादिति शेषः । हि = निश्चयेन, नवकिंशुकद्युतिसविभ्रमः=नवकिंशुकद्युतेः = नूतनपलाशकुसुमकान्तेः, सविभ्रमः = विलाससदृशः, नवपलाशपुष्पकान्तिसदृश इति । भावः, एतादृशः शिखी = अग्निः, इमां = पुरःस्थितां, ध्वजांऽशुकपटावलीं =

प्रकाशके तुल्य उन्मीलन हुआ है ? ॥ ३ ॥

(विचार कर) हाँ ! जान लिया । क्षोभसे युक्त होकर चन्द्रकेतुने अनुपम आग्नेय अस्त्रका प्रयोग किया है । अग्निके तेजके सदृश जिसकी यह बाणधारा है । इस समय—

कुछ जले हुए तथा 'बर्बर' शब्दवाले ध्वजाओं और चामरोंसे युक्त विमानोंके समूह भाग गये हैं, नये पलाशपुष्पकी कान्तिके तुल्य अग्नि ध्वजोंके सूक्ष्म वस्त्रोंकी पङ्क्तिको जला रहा है ।

आश्चर्यम्! प्रवृत्त एवायमुच्चण्डवज्रखण्डावस्फोटपटुरटत्स्फुलिङ्गगुरुरुत्तालतुमुललेलिहानोज्ज्वलज्वालासंभारभैरवो भगवानुषर्बुधः। प्रचण्डश्चास्य सर्वतः संपातः। तत्प्रियामंशुकेनाच्छाद्य सुदूरमपसरामि (तथा करोति।)

ध्वजानां = महाकेतूनाम्, अंशुकानि = सूक्ष्मवस्त्राणि, एव पटाः = शोभनवस्त्राणि, तेषाम्, आवलीं = पङ्क्तिम्, 'उत्तरीये वस्त्रमात्रे सूक्ष्मवस्त्रेऽपि चांशुकम्।' इति रत्नमाला। दहति = भस्मीकरोति, उपमाऽलङ्कारः। पुस्तकान्तरेषु तु उत्तरार्द्धे—'**दधति ध्वजाऽङ्कुशपटाऽञ्चलेष्विमाः। क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः।**' इति पाठस्तत्र—इमाः शिखाः ध्वजाऽङ्कुशपटाञ्चलेषु क्षणकुङ्कुमच्छुरणविभ्रमं दधतीत्यन्वयः। इमाः = सन्निकृष्टस्थाः, शिखाः = वह्निज्वालाः, ध्वजाऽङ्कुशः पटाञ्चलेषु = ध्वजानां = महाकेतूनाम्, ये अङ्कुशाः=तदाकारदण्डाः, तेषां ये पटाः= शोभनवस्त्राणि, तेषाम् अञ्चलेषु = प्रान्तेषु, क्षणकुङ्कुमच्छुरणविभ्रमं = क्षणं = कञ्चित्कालं यावत्, यत् कुङ्कुमच्छुरणं=केसरसम्पर्कः, तस्य विभ्रमं=शोभाम्, दधति = धारयन्ति। तत्र असम्भवद्वस्तुसम्बन्धरूपो **निदर्शनाऽलङ्कारः**। **मञ्जुभाषिणी** वृत्तम्, 'सजसा जगौ भवति मञ्जुभाषिणी।' इति तल्लक्षणम्॥ ४॥

आश्चर्यमिति। उच्चण्डवज्रखण्डावस्फोटपटुरटत्स्फुलिङ्गगुरुः = उच्चण्डः = अतिभयङ्करः, यः वज्रखण्डः=अशनिशकलम्, तस्य अवस्फोटः = स्फोटनम्, स इव पटु = प्रबलं, यथा तथा, रटन् = शब्दं कुर्वन्, स्फुलिङ्गगुरुः = कणबहुलः। उत्तालतुमुललेलिहानोज्ज्वलज्वालासंभारभैरवः = उत्तालं = अत्युन्नतं यथा तथा तुमुलः = सङ्कुलः, लेलिहानः = भृशं कवलनपरः, उज्ज्वलः = प्रदीप्तः, यः ज्वालासम्भारः = अर्चिःसमूहः, तेन भैरवः=भयङ्करः। भगवान्=सामर्थ्यसम्पन्नः, उषर्बुधः=उषसि = सन्ध्यायाम्, बुध्यत इत्युषर्बुधः, अग्निरित्यर्थः, आहिताऽग्नयो हि अग्निमुषसि प्रादुष्कुर्वन्ति, 'शोचिष्केश उषर्बुधः' इत्यमरः। प्रवृत्त एव = संलग्न एव। अस्य = अग्नेः, संपातः=सम्पतनं, '**सन्ताप**' इति पाठे संदाह इत्यर्थः। प्रचण्डः = अतितीक्ष्णः। अंशुकेन = वस्त्रेण, '**अङ्गेने**'ति पाठे हस्तोरःस्थलाद्यवयवेनेत्यर्थः।

आश्चर्य है! अतिभयङ्कर वज्रखण्डके टूटनेके समान प्रबलतापूर्वक शब्द करते हुए और चिनगारियोंसे अत्युन्नत और तुमुल तथा बारंबार ग्रास करनेवाले प्रदीप्त ज्वालासमूहसे भयङ्कर ये भगवान् अग्निदेव प्रकट हुए हैं। इनका सब ओर भयङ्कर संपात (गमन) हो रहा है। इस कारण प्रियाको कपड़ेसे ढाँककर दूर चला जाता हूँ (वैसा ही करता है)।

विद्याधरी—दिट्ठिया एदेण विमलमुत्तासेअसीअलसिणिद्धमसिणमंसलेण णाहदेहप्पंसेण आणन्दसंदलिदघुण्णमाणवेअणाए अद्धोदिदो एव्व अन्दरिदो मे संदावो । (दिष्ट्या एतेन विमलमुक्ताशैलशीतलस्निग्धमसृणमांसलेन नाथदेहस्पर्शेनानन्दसंदलितघूर्णमानवेदनाया अर्धोदित एवान्तरितो मे सन्तापः ।)

विद्याधरः—अयि ! किमत्र मया कृतम् ? अथवा ।

न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ ५ ॥

विद्याधरी—कहं अविरलविलोलघुण्णमाणविज्जुल्लदाविलासमंसलेहिं मत्तमऊरकण्ठसामलेहिं ओत्थरीअदि णभोङ्गणं जलहरेहिं ? (कथमविरल-

---

विद्याधरीति । दिष्ट्या = भाग्येन, विमलमुक्ताशैलशीतलस्निग्धमसृणमांसलेन = विमलः = निर्मलः, यः मुक्ताशैलः=मौक्तिकपर्वतः, **'मौक्तिकसर'** इति पाठे हार इत्यर्थः, स इव शीतलः = शीतः,स्निग्धः = स्नेहयुक्तः, मसृणः = कोमलः, तथा मांसलश्च=पुष्टश्च, तेन । नाथदेहस्पर्शेन=नाथदेहस्य=पतिशरीरस्य, स्पर्शेन=आमर्शनेन, आनन्दसंदलितघूर्णमानवेदनायाः=आनन्देन = स्पर्शजन्यसुखेन, संदलिता = विनष्टा, घूर्णमाना=प्रसरन्ती, वेदना=दुःखम् , यस्यास्तस्याः, एतादृश्या मे=विद्याधर्याः, अर्धोदित एव=किंचिदुत्पन्न एव, संतापः = दाहः, अन्तरितः = तिरोहितः ।

विद्याधर इति । अयि = कोमलाऽऽमन्त्रणद्योतकमिदमव्ययम् । किं कृतं = किमनुष्ठितं, न किमपीति भावः । अथवा = यद्वा ।

न किञ्चिदपीति । श्लोकोऽयं द्वितीयाऽङ्के श्रीरामपठितो व्याख्यातपूर्वश्च तत्रैव (पृ० ११० तमे) द्रष्टव्यः ॥ ५ ॥

विद्याधरीति । अविरलविलोलघूर्णमानविद्युल्लताविलासमांसलैः = अविरलं=

विद्याधरी—कुछ ही उत्पन्न होकर मेरा सन्ताप भाग्यसे निर्मल मोतीके पहाड़के सदृश ठण्ढा, चिकना, कोमल और पुष्ट पतिदेवके इस शरीरस्पर्शसे आनन्दके कारण फैलती हुई वेदनाके दूर होनेसे विनष्ट हो गया है ।

विद्याधर—अरी ! इसमें मैंने क्या किया है ? अथवा—

जो मनुष्य जिसका प्यारा है, वह कुछ न करता हुआ भी सामीप्यमात्रसे उत्पन्न सुखोंसे दुःखोंका नाश करता है; इस कारणसे वह उसका अनिर्वचनीय पदार्थ है ॥ ५ ॥

विद्याधरी—किसी तरह निरन्तर चञ्चल और घूमती हुई बिजलियोंके चमकनेसे पुष्ट

विलोलघूर्णमानविद्युल्लताविलासमांसलैर्मत्तमयूरकण्ठश्यामलैरवस्तीर्यते नभोऽङ्गणं जलधरैः !)

विद्याधरः—कुमारलवप्रयुक्तवारुणास्त्रप्रभावः खल्वेषः । कथमविरलप्रवृत्तवारिधारासंपातैः प्रशान्तमेव पावकास्त्रम् ।

विद्याधरी—पिअं मे, पिअं मे । (प्रियं मे, प्रियं मे ।)

विद्याधरः—हन्त भोः ! सर्वमतिमात्रं दोषाय । यत्प्रलयवातोत्क्षोभगम्भीरगुलुगुलायमानमेघमेदुरितान्धकारनीरन्ध्रनद्धमिव एकवारविश्वप्रसन-

निरन्तरम् , विलोलाः = चञ्चलाः, घूर्णमानाः = भ्रमन्त्यः, या विद्युल्लताः = तडिद्वल्ल्यः, तासां यो विलासः = स्फुरणम् , तेन मांसलैः = पुष्टैः, 'मण्डितैः' इति पाठे अलङ्कृतैः । मत्तमयूरकण्ठश्यामलैः = मत्ताः = मदयुक्ताः, ये मयूराः = बर्हिणाः, तेषां कण्ठा इव श्यामलाः=नीलाः, तैः, एतादृशैः जलधरैः=मेघैः, नभोऽङ्गणम्=आकाशाऽजिरम् , 'अङ्गणं चत्वराऽजिरे' इत्यमरः, अवस्तीर्यते=आच्छाद्यते ।

विद्याधर इति । कुमारलवप्रयुक्तवरुणाऽस्त्रप्रभावः = कुमारलवेन=तन्नाम्ना कुमारेण, प्रयुक्तस्य = प्रेरितस्य, आग्नेयार्थप्रशमनाऽर्थमिति भावः । वारुणाऽस्त्रस्य= वरुणदैवतशस्त्रस्य, प्रभावः = सामर्थ्यम् । अविरलप्रवृत्तवारिधारासंपातैः=अविरलं= निरन्तरम् , प्रवृत्ताः=प्रसृताः, या वारिधाराः=जलधाराः, तासां संपातैः=सम्पतनैः पावकाऽस्त्रम् = आग्नेयाऽस्त्रं, चन्द्रकेतुप्रयुक्तमिति शेषः, प्रशान्तं = निर्वापितम् ।

विद्याधरीति । प्रियं मे प्रियं मे = हर्षद्योतिकेयं द्विरुक्तिः ।

विद्याधर इति । अतिमात्रं=मात्राम् = प्रमाणम् , अतिक्रान्तं, प्रमाणाऽतिक्रान्तमित्यर्थः, 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः, दोषाय=दूषणाय, कल्पत इति शेषः । यत्=यस्माद्धेतोः, प्रलयवातोत्क्षोभगम्भीरगुलुगुलायमानमेघमेदुरिताऽन्धकारनीरन्ध्रनद्धमिव = प्रलये = कल्पान्ते, 'प्रबले'ति पाठे प्रबलः =

और मत्त मयूरोंके सदृश श्याम वर्णवाले मेघ आकाशको आच्छादित कर रहे हैं ?

विद्याधर—यह कुमार लवसे छोड़े गये वारुणास्त्रका प्रभाव है । किस तरह निरन्तर फैली हुई जलधाराओंके पड़नेसे आग्नेय अस्त्र शान्त ही हो गया है ।

विद्याधरी—मुझे पसन्द है, मुझे पसन्द है ।

विद्याधर—आह ! अरे ! सब पदार्थ अत्यधिक होनेसे दोषके लिए होता है । जो कि प्रलयकालके वायुसे अतिशय चञ्चल और अधिक 'गुलुगुल' शब्द करनेवाले मेघोंसे बने अन्धकारसे

विकटविकरालकालमुखकन्दरविवर्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वारं नारायणोदरनिविष्टमिव भूतं विपद्यते । साधु चन्द्रकेतो ! साधु ! स्थाने वायव्यमस्त्रमीरितम् । यतः ।

बलवान् , यो वातः = वायुः, तेन उत्क्षोभाः = अतिशयक्षोभयुक्ताः, गम्भीराः = अनल्पाः, गुलगुलायमानाः = गुलगुलितीदृशध्वनियुक्ताः डाजन्तात्क्यच् , तदन्तात् शानच् । एतादृशा ये मेघाः = बलाहकाः, तैर्मेदुरितम् = सान्द्रितम् , यत् अन्धकारं = तिमिरम् , तेन नीरन्ध्रम् = अविरलम् , नद्धम् इव=बद्धम् इव **'नीरन्ध्रनिबद्धम्'** इति पाठे नीरन्ध्रं= निरन्तरं यथा तथा, निबद्धम् = निरुद्धम् इत्यर्थः । एकवारविश्वग्रसनविकटविकरालकालमुखकन्दरविवर्तमानम् इव = एकवारम् = एकक्षणं, यथा तथा, विश्वस्य = जगतः, ग्रसनं = कवलनम् , तस्मै, विकटं = निम्नोन्नतम् , **'विकचे'**ति पाठे- विकचं = स्फुटं, व्यात्तमित्यर्थः, विकरालं = विशेषेण भीषणम् , यत् कालमुखम् = मृत्युवक्त्रम् , अत्र क्वचित् **'कालकण्ठकण्ठ'** इति पाठस्तत्र-कालकण्ठः = नीलकण्ठः, महादेव इति भावः । तस्य यः कण्ठः = गल इत्यर्थः, तथा च कालमुखम् एव वा = कालकण्ठकण्ठ एव, यत् कन्दरं = दरी, तत्र विवर्तमानम् इव = चेष्टमानम् इव । युगान्तयोगनिद्रानिरुद्धसर्वद्वारं = युगान्ते = कल्पान्ते या योगनिद्रा = ध्यानात्मकस्वापः, तया निरुद्धानि = संवृतानि, सर्वाणि = संपूर्णानि, द्वाराणि = मुखादिनिर्गममार्गाः, यस्य तत् । नारायणोदरनिविष्टम् इव = नारायणस्य = भगवतः श्रीविष्णोः, यत् उदरं = जठरम् , तस्मिन् निविष्टम् इव = स्थितम् इव । भूतं = प्राणिसमूहः, 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति जातावेकवचनम् । विपद्यते = विपदं प्राप्नोति, **'प्रवेपते'** इति पाठे प्रकम्पत इत्यर्थः । साधु=समीचीनम् , अनुष्ठितमिति शेषः । वायव्यं=वायुर्देवता अस्येति वायुदैवतमित्यर्थः, 'वाय्वृतुपित्रुषसो यत्' इति यत्प्रत्ययः । ईरितं = प्रेरितं, यत् , तत् स्थाने = युक्तम् । यतः = यस्मात् ।

अविरल रूपसे व्याप्तकी तरह, एक क्षणमें ही संसारके ग्रासके लिए ऊँचा और नीचा भयङ्कर तथा गुफाके सदृश कालके मुखमें चेष्टा करते हुएकी तरह, प्रलयकालमें योगनिद्रासे आवृत मुख आदि निर्गममार्गोंसे युक्त एवम् नारायणके पेटमें विद्यमानकी तरह होकर प्राणिसमूह विपत्ति पा रहा है । वाह ! चन्द्रकेतो ! वाह ! आपने जो वायव्य अस्त्र छोड़ा, वह ठीक किया । क्योंकि—

विद्याकल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्तानां क्वापि प्रविलयः कृतः ॥ ६ ॥

विद्याधरी—णाध ! को दाणिं एसो ससंभमोक्खित्तकरब्भमदुत्तरीअ-अलो दूरदो एव्व महुरसिणिद्धवअणपडिसिद्धजुद्धव्वावारो एदाणं अदरे बिमाणवरं ओदारावेदि ? (नाथ ! क इदानीमेष ससंभ्रमोत्क्षिप्तकरभ्रमदुत्तरीयाञ्चलो दूरत एव मधुरस्निग्धवचनप्रतिषिद्धयुद्धव्यापार एतयोरन्तरे विमानवरमवतारयति ?)

विद्याकल्पेनेति । विद्याकल्पेन मरुता भूयसाम् अपि मेघानां विवर्तानां ब्रह्मणि इव क्वापि प्रविलयः कृत इत्यन्वयः । विद्याकल्पेन = तत्त्वमस्यादिवाक्यविहितेन तत्त्वज्ञानसदृशेन, मरुता = वायुना, भूयसामपि = बहूनामपि, मेघानां= जलदानां, विवर्तानां = ब्रह्मणि कल्पितानां नामरूपाऽऽत्मकदृश्यपदार्थानां, ब्रह्मणि इव = निर्विशेषसन्मात्रे कूटस्थचैतन्य इव, क्वापि = कुत्रापि स्थले, प्रविलयः = निवृत्तिः, **'विप्रलय'** इति पाठान्तरेऽप्ययमेवाऽर्थः, कृतः=विहितः । यथा ब्रह्मनिष्ठ-गुरूपदेशवशात्प्राप्तेन तत्त्वमस्यादिमहावाक्योत्पन्नेन तत्त्वज्ञानेन नामरूपात्मकानां निखिलानामपि प्रपञ्चानां ब्रह्मणि लयो भवति, तथैव चन्द्रकेतुप्रयुक्तेन वायव्यास्त्रेण लवप्रयुक्तस्य वारुणास्त्रस्य कुत्रापि प्रविलयः सञ्जात इति भावः । अत्र पूर्वार्द्धे उत्तरार्द्धे च स्थितयोर्द्वयोरुपमयोः सङ्करः ॥ ६ ॥

विद्याधरीति । ससंभ्रमोत्क्षिप्तकरभ्रमदुत्तरीयाञ्चलः = ससंभ्रमम् = सत्वरं यथा तथा, उत्क्षिप्तः = ऊर्ध्वं प्रेरितः, यः करः = पाणिः, तेन भ्रमन् = घूर्णन् , उत्तरीयाञ्चलः = प्रावारप्रान्तः येन सः, **'पट्टकाञ्चल'** इति पाठे राजवस्त्रप्रान्त इत्यर्थः, उत्तरीयाञ्चलभ्रामणं च युद्धनिवारणार्थं बोध्यम् । मधुरस्निग्धवचनप्रतिषिद्धयुद्ध-व्यापारः = मधुराणि = प्रियाणि, स्निग्धानि = स्नेहपूर्णानि, यानि वचनानि = वाक्यानि, तैः प्रतिषिद्धः = निषिद्धः, युद्धव्यापारः = समरक्रिया, येन सः । एतयोः= लवचन्द्रकेत्वोः अन्तरे = मध्ये, विमानवरं = व्योमयानप्रधानं, पुष्पकमिति भावः । अवतारयति = अवरोहयति ।

जिस तरह तत्त्वज्ञान ब्रह्मकल्पित नामरूपात्मक पदार्थोंका ब्रह्ममें लय कर देता है, उसी तरह वायुने भी बहुसंख्यक मेघोंका कहींपर लय कर दिया है ॥ ६ ॥

विद्याधरी—नाथ ! अभी यह कौन दूरसे ही शीघ्रतासे ऊँचे किये हुए हाथसे उत्तरीयको हिलाता हुआ मीठे और स्नेहपूर्ण वचनोंसे युद्धक्रियाका निषेध कर इन दोनोंके बीचमें श्रेष्ठ विमान (पुष्पक) को उतार रहा है ।

विद्याधरः—(दृष्ट्वा ।) एष शम्बूकवधात्प्रतिनिवृत्तो रघुपतिः ।
शान्तं महापुरुषसंगदितं निशम्य तद्गौरवात्समुपसंहृतसंप्रहारः ।
शान्तो लवः, प्रणत एव च चन्द्रकेतुः, कल्याणमस्तु सुतसंगमनेन राज्ञः॥ ॥
तदितस्तावदेहि । (इति निष्क्रान्तौ ।)

विष्कम्भकः ।

विद्याधरः । शम्बूकवधात् = शम्बूकवधं कृत्वा, ल्यब्लोपे 'कर्मण्यधिकरणे च' इति पञ्चमी, रघुपतिः = रामः ।

शान्तमिति । शान्तं महापुरुषसंगदितं निशम्य तद्गौरवात् समुपसंहृतसंप्रहारो लवः शान्तः, चन्द्रकेतुश्च प्रणत एव, सुतसंगमनेन राज्ञः कल्याणम् अस्तु इत्यन्वयः । शान्तं = कठोरतारहितं, महापुरुषसंगदितं = महापुरुषेण = रामेण, संगदितम्=समुच्चारितम् , वचनमिति शेषः । निशम्य=श्रुत्वा, तद्गौरवात्=तस्य= रामस्य, गौरवात् = गुरुत्वाद्धेतोः, रामविषयकपूज्यत्वबुद्धेरिति भावः, समुपसंहृत-संप्रहारः = समुपसंहृतः = संत्यक्तः, संप्रहारः = युद्धम् , येन सः, एतादृशो लवः = चन्द्रकेतुप्रतिद्वन्द्वी, शान्तः = शान्तिं प्राप्तः, एतेन लवस्य विनयो व्यज्यते । चन्द्रकेतुश्च = लक्ष्मणपुत्रश्च, प्रणत एव = रामं प्राणंसीदेव । सुतसंगमनेन = सुताभ्यां = लवचन्द्रकेतुभ्यां कुशलवाभ्यां वा, संगमनं = समागमः, तेन, राज्ञः = नृपस्य, रामचन्द्रस्येत्यर्थः । कल्याणं = मङ्गलम् , अस्तु = भवतात् , रामो लवम् 'अयं मत्पुत्र' इति परिचिनोत्विति भावः, विद्याधरेण ज्ञातत्वात्सुतेत्युक्तिः । अत्र लवचन्द्रकेत्वोरौग्र्यरूपस्य भावस्य प्रशमो रामविषयकरतेरङ्गमिति समाहितमलङ्कारः । वसन्ततिलका वृत्तम् ॥ ७ ॥

विष्कम्भक इति । मध्यमपात्राभ्यां विद्याधरदम्पतिभ्यां प्रयोजितत्वाच्छुद्ध-विष्कम्भकः । विष्कम्भकलक्षणं यथा साहित्यदर्पणे—'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥' इति । शुद्ध-

---

विद्याधर—(देखकर) शम्बूकको मारकर लौटे हुए ये रामचन्द्रजी हैं ।

शान्तिपूर्ण महापुरुष (रामचन्द्र) का वाक्य सुनकर उनके गौरवसे युद्धको छोड़कर लव शान्त हो गये हैं और चन्द्रकेतुने भी रामचन्द्रजीको प्रणाम किया है । दोनों पुत्रोंके समागमसे महाराज (रामचन्द्र) का कल्याण हो ॥ ७ ॥

इस कारण इधर आओ (दोनों जाते हैं) ।

विष्कम्भक समाप्त हुआ ।

(ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च ।)

रामः—(पुष्पकादवतरन् ।)

दिनकरकुलचन्द्र ! चन्द्रकेतो ! सरभसमेहि दृढं परिष्वजस्व ।
तुहिनशकलशीतलैस्तवाङ्गैः शममुपयातु ममापि चित्तदाहः ॥८॥

(उत्थाप्य सस्नेहास्रं परिष्वज्य ।) अप्यनामयं नूतनदिव्यास्त्रायोधनस्य तव ?

विष्कम्भकलक्षणमपि तत्रैव = 'मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः । शुद्धः स्यात्' इति ।

दिनकरेति । दिनकरकुलचन्द्र (हे) चन्द्रकेतो ! सरभसम् एहि, दृढं परिष्वजस्व । तुहिनशकलशीतलैः, तव अङ्गैः मम चित्तदाहः अपि शमम् उपयातु इत्यन्वयः । दिनकरकुलचन्द्र = दिनकरकुलस्य = सूर्यवंशस्य, चन्द्र = चन्द्रतुल्याह्लादक, हे चन्द्रकेतो ! सरभसं = वेगपूर्वकम् , एहि = आगच्छ, दृढं = गाढं, परिष्वजस्व = आलिङ्ग, मामिति शेषः । आलिङ्गनप्रयोजनमुपपादयति—**तुहिनेति** । तुहिनशकलशीतलैः = तुहिनस्य = हिमस्य, शकलैरिव = खण्डैरिव, शीतलैः = शीतैः, तव = चन्द्रकेतोः, अङ्गैः = शरीरावयवैः, मम = अतिशयसन्तापयुक्तस्य रामस्य, चित्तदाहोऽपि=सीताविरहजन्यो मनस्तापोऽपि, शरीरदाहमात्रस्य का कथेति भावः । शमं = शान्तिम् , उपयातु = प्राप्नोतु । अत्रोपमाऽर्थापत्तिलाटाऽनुप्रासानामलङ्काराणां मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **पुष्पिताग्रा** वृत्तम् ॥ ८ ॥

उत्थाप्येति । परिष्वज्य=आलिङ्ग्य । नूतनदिव्यास्त्राऽऽयोधनस्य = नूतनं = नवीनम् , दिव्यास्त्रैः = अलौकिकाऽऽयुधैः, आयोधनं = संग्रामः, यस्य स इति बहुव्रीहिः, एतादृशस्य तव = चन्द्रकेतोः, अनामयम् अपि = आरोग्यमस्ति किमित्यर्थः, 'ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् ।' इति स्मृते रामकर्तृकश्चन्द्रकेतुं प्रति कुशलप्रश्नः सङ्गच्छते ।

(तब रामचन्द्रजी, लव और नमस्कार करते हुए चन्द्रकेतु प्रवेश करते हैं ।)

राम—(पुष्पकसे उतरते हुए)

सूर्यवंशके चन्द्ररूप ! हे चन्द्रकेतो ! जल्दी आओ और दृढ आलिङ्गन करो । बरफके टुकड़ेके समान ठण्डे तुम्हारे अङ्गोंसे मेरे मनका ताप भी शान्तिको प्राप्त करे ॥ ८ ॥

(उठाकर स्नेहसे आँसू गिराते हुए आलिङ्गन कर) दिव्य अस्त्रोंसे नूतन संग्राम करनेवाले तुम्हारा अनामय (आरोग्य) है न ?

चन्द्रकेतुः—अभिवादये ! कुशलमत्यद्भुतप्रियवयस्यलाभाभ्युदयेन । तद्विज्ञापयामि मामिव विशेषेण स्निग्धेन चक्षुषा पश्यत्वमुं वीरमनराल-साहसं तातः ।

रामः—(लवं निरूप्य ।) दिष्ट्या अतिगम्भीरमधुरकल्याणाकृतिरयं वयस्यो वत्सस्य ।

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोशस्य गुप्त्यै ।

चन्द्रकेतुरिति । अत्यद्भुतप्रियवयस्यलाभाऽभ्युदयेन = अत्यद्भुतस्य = अत्याश्चर्यकरस्य, प्रियवयस्यस्य = हृद्यमित्रस्य, यो लाभः=प्राप्तिः, स एव अभ्युदयः= उन्नतिः, तेन । विज्ञापयामि = निवेदयामि, स्निग्धेन = स्नेहयुक्तेन, अनरालसाहसम् = अनरालम् = अकुटिलम् , साहसं = दुष्करं कर्म, यस्य तम् , 'अरालं वृजिनं जिह्मम्' इत्यमरः, साहसं तु दमे दुष्करकर्मणि । 'अविमृश्यकृतौ धाष्टर्ये' इति हेमकोशः । अमुं = पुरःस्थं, वीरं = लवमित्यर्थः ।

राम इति । निरूप्य=दृष्ट्वा । अतिगम्भीरमधुरकल्याणाकृतिः=अतिगम्भीरा= अक्षोभणीया, मधुरा = सौन्दर्योपेता, कल्याणी = सुलक्षणा, आकृतिः = आकारो यस्य सः ।

त्रातुमिति । लोकान् त्रातुं परिणतः कायवान् अस्त्रवेद इव, ब्रह्मकोशस्य गुप्त्यै तनुं श्रितः क्षात्रो धर्म इव, सामर्थ्यानां समुदय इव, गुणानां सञ्चयो वा, जगत्पुण्यनिर्माणराशिः आविर्भूय स्थित इव इत्यन्वयः । लोकान् = भुवनानि, त्रातुं = रक्षितुं, परिणतः = परिणामं गतः, नररूपं गत इत्यर्थः । अस्त्रवेद इव = धनुर्वेद इव, कायवान् = मूर्तिमान् सन् , ब्रह्मकोशस्य = वेदसमूहस्य, 'वेदस्तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः ।' इत्यमरः, गुप्त्यै = रक्षणाय, तनुं = शरीरं, श्रितः = आश्रितः, क्षात्रः = क्षत्रसम्बन्धी, धर्म इव = स्वभाव इव, शौर्यादिरूप इव

चन्द्रकेतु—अतिशय आश्चर्यजनक कर्म करनेवाले प्रियकी प्राप्तिस्वरूप उन्नतिके कारण कुशल है । इसलिए निवेदन करता हूँ कि पिताजी ! अकुटिल दुष्कर कर्म करनेवाले इस वीरको-जैसे मुझे देखते हैं, उसी तरह विशेष स्नेहपूर्ण दृष्टिसे देखें ।

राम—(लवको देखकर) भाग्यसे वत्सका यह मित्र अतिशय गम्भीर, सुन्दर और शुभ लक्षणोंसे युक्त आकारवाला है ।

यह लोकरक्षाके लिए शरीरधारीके रूपमें परिणत धनुर्वेदके सदृश, वेदसमूहकी रक्षा

सामर्थ्यानामिव समुदयः, सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥९॥

लवः—(स्वगतम् ।) अहो ! पुण्यानुभावदर्शनोऽयं महापुरुषः ।

आश्वास इव भक्तीनामेकमायतनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्तिसुन्दरः ॥ १० ॥

आश्चर्यम् !

इति भावः, सामर्थ्यानां = प्रारब्धकार्यनिर्वाहशक्तीनाम् , समुदाय इव = समूह इव, गुणानां = धैर्यादीनां, सञ्चयो वा = समूह इव, जगत्पुण्यनिर्माणराशिः = जगतां = लोकानाम् , यानि पुण्यनिर्माणानि = धर्मानुष्ठानानि, तेषां राशिः = पुञ्जः, आविर्भूय = प्रत्यक्षीभूय, स्थित इव = विद्यमान इव, अयं वत्सस्य वयस्य इति पूर्ववाक्यांशेनान्वयः । अयं कोऽपि लोकोत्तरः पुरुष इति भावः । अत्र पञ्चानामपि **गुणोत्प्रेक्षाणां** मिथोऽनपेक्षया **संसृष्टिः । मन्दाक्रान्ता** वृत्तम् ॥ ९ ॥

लव इति । अहो = आश्चर्यद्योतकोऽयं निपातः, पुण्यानुभावदर्शनः = पुण्ये = पवित्रे, अनुभावदर्शने = प्रभावविलोकने, यस्य सः ।

आश्वास इति । भक्तीनाम् आश्वास इव, एकं महत भक्तीनाम् आयतनं च, प्रकृष्टस्य धर्मस्य मूर्तिसुन्दरः प्रसाद इव इत्यन्वयः । भक्तीनां = श्रद्धानाम् , आश्वास इव = सुखजनकस्थानमिव, एकम्=अद्वितीयं, महत्=विपुलम् , भक्तीनां = श्रद्धानाम् , आयतनं च = आधारश्च, **'आश्वासः स्नेहभक्तीनाम्'** इति पाठे स्नेहस्य=प्रेम्णः, शिष्टं सुगमम् । प्रकृष्टस्य = लोकोत्तरस्य, धर्मस्य = पुण्यस्य, मूर्तिसुन्दरः=मूर्त्या = शरीरेण, सुन्दरः = रुचिरः, **'सञ्चर'** इति पाठे—सञ्चरणशील इत्यर्थः । प्रसाद-इव=प्रसन्नता इव । महापुरुषेऽस्मिन् धर्मो मूर्तिमान् सन् सञ्चरतीति भावः । **अत्रोत्प्रेक्षाऽलङ्कारः** ॥ १० ॥

करनेके लिए देहधारी क्षत्रियधर्मके समान, पराक्रमोंके समुदायके तुल्य, धैर्य आदि गुणोंके सञ्चयके सदृश, और लोकोंके धर्माऽनुष्ठानोंका समूह प्रकट होकर स्थित है ॥ ९ ॥

लव—(मन ही मन) अहो ! ये महापुरुष पवित्र सामर्थ्य और दर्शनसे युक्त हैं ।

ये श्रद्धाओंके सुखजनक स्थानके सदृश, श्रद्धाओंके अद्वितीय और महान् आधार तथा लोकोत्तर धर्मकी मूर्तिमती प्रसन्नताके सदृश हैं ॥ १० ॥

आश्चर्य है !

विरोधो विश्रान्तः, प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति, विनयः प्रह्वयति माम् ।
झटित्यस्मिन्दृष्टे किमिति परवानस्मि, यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥ ११ ॥

रामः—तत्किमयमेकपद एव मे दुःखविश्रामं ददात्युपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम् ? अथवा 'स्नेहश्च निमित्तसव्यपेक्ष' इति विप्रतिषिद्धमेतत् ।

विरोध इति । विरोधो विश्रान्तः, निर्वृतिघनो रसः प्रसरति, तत् औद्धत्यं क्वापि व्रजति, विनयो मां प्रह्वयति, अस्मिन् दृष्टे किमिति झटिति परवान् अस्मि, यदि वा हि तीर्थानाम् इव महतां कोऽपि महार्घः अतिशय इत्यन्वयः । विरोधः = वैरं, 'वैरं विरोधो विद्वेषः' इत्यमरः । विश्रान्तः=विरतः । निर्वृतिघनः=निर्वृत्या = आनन्देन, घनः = सान्द्रः, एतादृशो रसः = अनुरागः, प्रसरति = विसर्पति, अयं शान्त्याख्यस्य भावस्योदयः । तत् = प्राग्भवम् , औद्धत्यं = दर्पः, क्वापि = कुत्रापि, व्रजति = गच्छति, एतद्दर्शनेनैव दर्पो दूरीभूतः, इयं भावशान्तिः = विनयः = नम्रता, मां = लवं, प्रह्वयति=नमयति । अस्मिन्=पुरःस्थिते महापुरुषे, दृष्टे अवलोकित एव, किमिति = केन हेतुना, झटिति=सत्वरं, परवान्=पराधीनप्रायः, अस्मि=भवामि, यदि वा = अथवा, हि=यतः, तीर्थानाम् इव=पुण्यक्षेत्राणाम् इव, महतां = महापुरुषाणां, कोऽपि = लोकोत्तरः, महार्घः = महामूल्यः, अतिशयः = उत्कर्षः, भवतीति शेषः । अत्रोपमाऽर्थान्तरन्यासयोः सङ्करः । शिखरिणी वृत्तम् ॥ ११ ॥

राम इति । एकपद एव = एकस्मिन्क्षण एव, अव्ययपदमेतत् । दुःखविश्रामं = दुःखस्य = सीताविरहोत्पन्नायाः पीडायाः, विश्रामं = विश्रान्तिम् । 'विश्राम' इत्यत्र श्रम एव श्रामः, स्वार्थे अण् , ततो विशिष्टः श्रामो विश्राम इति गतिसमासः, अन्यथा घञि 'नोदात्तोपदेशस्य'त्यादिना निषेधेन वृद्धेर्दुर्लभत्वाद-पाणिनीयत्वाऽऽशङ्का सञ्जायेतेति । कुतोऽपि = अनिर्वाच्यात् , निमित्तात् = हेतोः, अन्तरात्मानम् = अन्तःकरणम् , उपस्नेहयति = स्नेहयुक्तं करोति । निमित्त-

वैर शान्त हो गया, अतिशय सुखसे गाढ अनुराग फैल रहा है, वह दर्प कहाँ चला गया है और नम्रता मुझे झुका रही है, इनको देखने पर न जाने क्यों झटपट पराधीन हो गया हूँ । अथवा पवित्र स्थानोंकी तरह महापुरुषोंका कोई बहुमूल्य उत्कर्ष होता है ॥ ११ ॥

राम—यह बालक सहसा ही दुःखको विश्राम दे रहा है, किसी कारणसे अन्तःकरणको स्नेहयुक्त कर रहा है; अथवा 'स्नेह कारणकी अपेक्षा करता है' यह विरुद्ध बात है ।

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ १२ ॥

लवः—चन्द्रकेतो ! क एते ?

सव्यपेक्षः = व्यपेक्षया सह वर्तत इति सव्यपेक्षः निमित्तेन = कारणेन, सव्यपेक्षः = व्यपेक्षायुक्तः, इत्येतत् = इतीदं, विप्रतिषिद्धं = विशेषेण विरुद्धम् , स्वाभाविकोऽसौ प्रणयो न कमपि हेतुमपेक्षत इति भावः ।

व्यतिषजतीति । आन्तरः कोऽपि हेतुः पदार्थान् व्यतिषजति, प्रीतयः बहिरुपाधीन् न संश्रयन्ते खलु । हि पतङ्गस्य उदये पुण्डरीकं विकसति । हिमरश्मौ उद्गते चन्द्रकान्तो द्रवति इत्यन्वयः । आन्तरः = अभ्यन्तरस्थः, कोऽपि = निर्वक्तुमशक्यः, हेतुः = कारणं, पदार्थान = वस्तूनि, व्यतिषजति = परस्परसंलग्नान् करोति, 'षञ्ज सङ्गे' इति धातोरन्तर्भावितण्यर्थे लट् , 'दंशसञ्जस्वञ्जां शपि' इति नलोपः, 'उपसर्गात्सुनोती'त्यादिना षत्वम् । प्रीतयः = स्नेहाः, बहिरुपाधीन् = बाह्यधर्मान् , पुत्रमित्रकलत्रत्वादिहेतूनिति भावः । न संश्रयन्ते = स्वोत्पादकत्वेन नाऽपेक्षन्त इति भावः । खलु = निश्चयेन । हि = यस्मात्कारणात् , पतङ्गस्य = सूर्यस्य, 'पतङ्गौ पक्षिसूर्यौ च' इत्यमरः, उदये = उद्गमे, पुण्डरीकं = श्वेतकमलं, विकसति = उन्मीलति । हिमरश्मौ = चन्द्रे, उद्गते = उदिते सति, चन्द्रकान्तः = चन्द्रकान्ताऽऽख्यो मणिविशेषः, द्रवति = आर्द्रीभवति । सूर्योदये पद्मस्य विकासश्चन्द्रोदये चन्द्रकान्तमणेर्द्रवीभावश्च यथा हेतुनिरपेक्षस्तथैव एतस्य बालस्यावलोकनेन सञ्जातोऽयं मदीयस्नेहो न कमपि हेतुमपेक्षते, अपि तु स्वाभाविको मत्स्नेह इति भावः । अत्र द्वाभ्यां विशेषाभ्यां सामान्येनार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । **मालिनी वृत्तम्** ॥ १२ ॥

लव इति । क एत इत्यत्र आदरार्थकं बहुवचनम् ।

भीतर रहा हुआ कोई कारण पदार्थोंको परस्पर मिलाता है, प्रेम बाहरके कारणोंका आश्रय नहीं करता । क्योंकि-सूर्यके उदय होनेपर श्वेत कमल खिलता है और चन्द्रके उदित होनेपर चन्द्रकान्त मणि पिघलता है ॥ १२ ॥

लव—चन्द्रकेतु ! ये कौन हैं ?

चन्द्रकेतुः—प्रियवयस्य ! ननु तातपादाः ।

लवः—ममापि धर्मतस्तथैव, यतः प्रियवयस्येति भवतोक्तम् । किंतु चत्वारः किल भवन्त्येवंव्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषाः । तद्विशेषं ब्रूहि ।

चन्द्रकेतुः—ज्येष्ठतात इत्यवेहि ।

लवः—(सोल्लासम् ।) कथं रघुनाथ एव ? दिष्ट्या सुप्रभातमद्य, यदयं देवो दृष्टः । (सविनयं निर्वर्ण्य ।) तात ! प्राचेतसान्तेवासी लवोऽभिवादयते ।

रामः—आयुष्मन् ! एह्येहि । (इति सस्नेहमालिङ्गय ।) अयि वत्स ! कृतमत्यन्तविनयेन । अङ्गेन मामपरिश्लथं परिरम्भस्व ।

चन्द्रकेतुरिति । तातपादाः = पितृचरणाः ।

लव इति । धर्मतः=वयस्यधर्मतः, तथैव=तातपादा एव । एवंव्यपदेशभागिनः= तातपादेतिपदभाजः । तत्रभवन्तः = पूजनीयाः, रामायणकथापुरुषाः=रामायणस्य= तदाख्यग्रन्थस्य, या कथा, तस्याः पुरुषाः = प्रधानपात्राणि । तत् = तस्माद्धेतोः, विशेषं ब्रूहि = विशेषनाम्ना सूचय, चतुर्षु राघवेषु कोयऽमिति प्रतिपादयेति भावः ।

चन्द्रकेतुरिति । अवेहि = जानीहि ।

लव इति । सोल्लासं = सहर्षम् । रघुनाथ एव = राम एव । सुप्रभातं = शोभनं विभातम् । देवः = महाराजः । प्राचेतसान्तेवासी = वाल्मीकिशिष्यः, अभिवादयते = प्रणमति, भवन्तमिति शेषः ।

राम इति । एहि एहि = आगच्छ आगच्छ, अनुकम्पायां द्विरुक्तिः । कृतम् = अलम् , अत्यन्तविनयस्य नास्त्यावश्यकतेति भावः । अपरिश्लथम् =

चन्द्रकेतु—प्रिय मित्र ! ये पूज्य पिताजी हैं ।

लव—तब ये धर्मसे मेरे भी पूज्य पिताजी ही हैं, क्योंकि आपने मुझे 'प्रिय मित्र' कहा है । परन्तु आपके 'पिता' शब्द से व्यवहारके योग्य, पूजनीय और रामायण कथाके प्रधान पात्र चार हैं, इस कारणसे विशेष नामसे बतलाइये ।

चन्द्रकेतु—इन्हें आप ज्येष्ठ पिताजी जानिए ।

लव—(हर्षके साथ) क्या रघुनाथ जी ही हैं ? भाग्यसे आज सुप्रभात है, जो कि महाराजका दर्शन मिल गया । (नम्रताके साथ देखकर) पिताजी ! महर्षि वाल्मीकिजीका छात्र लव अभिवादन करता है ।

राम—चिरञ्जीव ! आओ आओ । (स्नेहके साथ आलिङ्गन कर) अयि वत्स ! अतिशय नम्रता दिखानेकी आवश्यकता नहीं है । मुझे अपने अङ्गसे दृढताके साथ आलिङ्गन करो ।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः ।
नन्दयति चन्द्रचन्दननिष्यन्दजडस्तव स्पर्शः ॥ १३ ॥

लवः—(स्वगतम् ।) ईदृशो मां प्रत्यमीषामकारणस्नेहः । मया पुनरेभ्य एवाभिद्रोग्धुमज्ञेनायुधपरिग्रहः कृतः । (प्रकाशम् ।) मृष्यन्तामिदानीं लवस्य बालिशतां तातपादाः ।

अशिथिलं, दृढमिति भावः । परिरम्भस्व = आलिङ्ग ।

परिणतेति । परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः चन्द्रचन्दननिष्यन्दजडः तव स्पर्शः नन्दयति इत्यन्वयः । परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः = परिणतं = विकसितम् , कठोरं = सम्पूर्णम् , यत् पुष्करं=पद्मम् , तस्य गर्भच्छद इव = अभ्यन्तरस्थपत्रम् इव, पीनः = स्थूलः, मसृणः = स्निग्धः, सुकुमारः = कोमलः । चन्द्रचन्दननिष्यन्दजडः = इन्दुश्रीखण्डद्रवशीतलः, तव = भवतः, स्पर्शः = आमर्शनं, नन्दयति = आह्लादयति, मामिति शेषः । अत्र **द्वयोरुपमयोर्मिथोऽनपेक्षया स्थितेः संसृष्टिः । आर्या** छन्दः ॥ १३ ॥

लव इति । अमीषाम् = एतेषाम् , रामचन्द्रस्येत्यर्थः । अकारणस्नेहः=निर्हेतुकः प्रेमा । अज्ञेन = अनभिज्ञेन, स्वपरविवेकरहितेनेति भावः । एभ्य एव=रामाय एवेति भावः, 'तादर्थ्ये चतुर्थी वाच्या' इति चतुर्थी, न तु 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति चतुर्थी, तस्य सूत्रस्य 'क्रुधद्रुहोरुपसृष्टयोः कर्म'ति सूत्रेण बाध्यत्वात् । अभिद्रोग्धुम् = अपकर्तुम् , आयुधपरिग्रहः = शस्त्रधारणं, कृतः = अनुष्ठितः, **'आयुधपरिग्रहं यावदध्यारूढो दुर्योगः'** इति पाठे—आयुधपरिग्रहं यावत् = शस्त्रधारणपर्यन्तम् , दुर्योगः = दुरुपायः, 'योगः संनहनोपायध्यानसंगतियुक्तिषु ।' इत्यमरः, अध्यारूढः=प्रवृत्त इत्यर्थः, मखध्वंसायेति भावः । बालिशता = मूर्खताम् , 'अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।' इत्यमरः, मृष्यन्ताम् = सहन्ताम् , 'मृष तितिक्षायाम्' इति दैवादिकाद्धातोः प्रार्थनायां लोट् ।

विकसित और पूर्ण कमलके भीतरके पत्रकी तरह पुष्ट, स्निग्ध और कोमल तथा चन्द्र (अथवा कर्पूर) और चन्दनके द्रवके सदृश शीतल तुम्हारा स्पर्श मुझे आनन्दित कर रहा है ॥१३॥

लव—(मन ही मन) इनका मेरे ऊपर ऐसा अकारण प्रेम है। बेसमझ होकर मैंने इन्हींका अपकार करनेके लिए शस्त्र ग्रहण किया। (प्रकाश भावसे) पिताजी ! अब आप लवकी मूर्खताको क्षमा कीजिये।

रामः—किमपराद्धं वत्सेन ?

चन्द्रकेतुः—अश्वानुयात्रिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन ।

रामः—नन्वयमलङ्कारः क्षत्रियस्य ।

न तेजस्तेजस्वी प्रसृतमपरेषां विषहते ।
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।

राम इति । वत्सेन = वात्सल्यपात्रेण, त्वयेति भावः । किम् अपराद्धं=कोऽपराधोऽनुष्ठितः ? यदर्थं क्षमां प्रार्थयस इति भावः ।

चन्द्रकेतुरिति । अश्वानुयात्रिकेभ्यः = अनुयात्रायां नियुक्ता आनुयात्रिकाः, 'तत्र नियुक्त' इति ठक्, अश्वस्य = यज्ञियहयस्य, आनुयात्रिकेभ्यः = अनुसरणकारिभ्यः, अश्वरक्षार्थमश्वानुसारिभ्य इति भावः, 'आख्यातोपयोगे' इति पञ्चमी । तातप्रतापाविष्करणम्=तातस्य, पितुः, भवत इति भावः । प्रतापस्य=सामर्थ्यस्य, आविष्करणम् = प्रकाशनम्, 'योऽयमश्व' इत्याद्याकारकमिति भावः । उपश्रुत्य = आकर्ण्य, अनेन = लवेन, वीरायितं = वीरवदाचरितं, संग्रामः प्रारब्ध इति भावः ।

राम इति । अयं = वीरभावः ।

न तेज इति । तेजस्वी प्रसृतम् अपरेषां तेजो न विषहते, तस्य स प्रकृतिनियतत्वात् अकृतकः स्वो भावः । देवो दिनकरो मयूखैः अश्रान्तं तपति यदि आग्नेयो ग्रावा निकृत इव किं तेजांसि वमति ? इत्यन्वयः । तेजस्वी = महाप्रतापो जनः, प्रसृतं = विस्तृतम्, अपरेषाम्=अन्येषां, तेजः=प्रतापं, न विषहते=न मृष्यति, 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' इति षत्वम् । तस्य = तेजस्विनः, सः=परतेजोऽसहनरूपो धर्मः, प्रकृतिनियतत्वात् = स्वभावव्याप्तत्वात्, अकृतकः = अकृत्रिमः, अनागन्तुक इति भावः । स्वः=आत्मीयः, भावः=धर्मः, अस्तीति शेषः ।

राम—वत्सने क्या अपराध किया ?

चन्द्रकेतु—अश्वका अनुसरण करनेवाले लोगोंसे पिताजीके (आपके) प्रतापकी अधिकता सुनकर इन्होंने वीरके सदृश आचरण (संग्राम) किया ।

राम—अरे ! यह तो क्षत्रियका अलङ्कार है ।

प्रतापी पुरुष फैले हुए दूसरोंका प्रताप नहीं सहता है । उसका वह (असहनरूप धर्म) स्वभावसे व्याप्त होनेके कारण अकृत्रिम (स्वाभाविक) अपना धर्म है । प्रकाशशीलसूर्य

मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ? ॥१४॥

चन्द्रकेतुः—अमर्षोऽप्यस्यैव शोभते महावीरस्य। पश्यन्तु हि तातपादाः! प्रियवयस्यनियुक्तेन जृम्भकास्त्रेण विक्रम्य स्तम्भितानि सर्वसैन्यानि।

रामः—(सविस्मयखेदं निर्वर्ण्य[1]। स्वगतम्।) अहो! वत्सस्य ईदृशः प्रभावः ? (प्रकाशम्) वत्स! संह्रियतामस्त्रम्। त्वमपि चन्द्रकेतो! निर्व्यापारतया विलक्षाणि सान्त्वय बलानि।

देवः = द्योतनशीलः, दिनकरः = सूर्यः, मयूखैः = किरणैः, अश्रान्तं = विश्रामरहितं, निरन्तरमिति भावः, तपति यदि = तापं करोति चेत्। आग्नेयः = अग्निसम्बन्धी, ग्रावा=प्रस्तरः, सूर्यकान्तमणिरिति भावः। निकृत इव=तिरस्कृत इव, किं=कस्माद्धेतोः, तेजांसि=अग्नीन्, वमति = उद्गिरति, उत्पादयतीति भावः। यथा सूर्यकरसन्तप्तः सूर्यकान्तमणिरग्नीनुत्पादयति, तथैव वीरवरोऽयं लवोऽप्यस्मत्प्रतापसंतप्तः सन् स्वकीयं सामर्थ्यं प्रकाशितवान् उभयत्रापि स्वभावातिरिक्तो नान्यो हेतुरिति भावः, अतः परप्रतापामर्षणं क्षत्रियस्य भूषणमिति पूर्ववाक्यार्थेन सङ्गतिः। अत्र विशेषेण सामान्यार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, निकृत इवेत्यत्र क्रियोत्प्रेक्षा च, तथा च द्वयोः सङ्करः। शिखरिणी वृत्तम् ॥ १४ ॥

चन्द्रकेतुरिति। अमर्षोऽपि = अक्षमापि, न केवलं तेजः किन्तु अक्षमापीति भावः। प्रियवयस्यनियुक्तेन = प्रियवयस्येन = प्रियमित्रेण, लवेनेति भावः, नियुक्तेन = प्रेरितेन। विक्रम्य = पराक्रमं कृत्वा, स्तम्भितानि=निष्क्रियाणि कृतानि।

राम इति। अस्त्रं = जृम्भकास्त्रं, संह्रियताम् = आकृष्यताम्, निवार्यतामिति भावः। निर्व्यापारतया=क्रियाशून्यत्वेन,विलक्षाणि=विस्मयान्वितानीति भावः,'विलक्षो विस्मयान्विते' इत्यमरः बलानि=सैन्यानि, सान्त्वय=मधुरवचनैः समाश्वासयेति भावः।

किरणोंसे लगातार तपते हैं तो सूर्यकान्तमणि तिरस्कृतकी तरह होकर क्यों आग उगलता है ? ॥

चन्द्रकेतु—असहनशीलता भी इसी महावीरको शोभित होती है। देखिये पिताजी ! प्रिय मित्र (लव) से छोड़े गये जृम्भक अस्त्रने पराक्रम करके सब सेनाओंको स्तब्ध कर दिया है।

राम—(आश्चर्य और खेदके साथ देखकर मन ही मन) अहो ! वत्सका ऐसा प्रभाव है ? (प्रकाश भावसे) वत्स ! अस्त्रका निवारण करो। चन्द्रकेतो ! तुम भी क्रियाशून्य होनेसे आश्चर्यित सेनाओंको आश्वासन दो।

---

[1] क्वचित् 'विलोक्य' इत्येवं पाठान्तरम्।

(लवः प्रणिधानं नाटयति ।)

चन्द्रकेतुः—यथा निर्दिष्टम् (इति निष्क्रान्तः ।)

लवः—तात ! प्रशान्तमस्त्रम् !

रामः-सरहस्यप्रयोगसंहारजृम्भकास्त्राणि दिष्ट्या वत्सस्यापि संपद्यन्ते ।
ब्रह्मादयो ब्रह्महिताय तप्त्वा परः सहस्रं शरदस्तपांसि ।
एतान्यदर्शन्गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥१५॥
अथैतामस्त्रमन्त्रोपनिषदं भगवान्कृशाश्वः परःसहस्राधिकसंवत्सरपरि-

---

लव इति । प्रणिधानं = ध्यानम् , अस्त्रोपसंहारार्थमिति शेषः ।

चन्द्रकेतुरिति । निर्दिष्टम् = आज्ञप्तं, तथैव करोमीति भावः ।

लव इति । प्रशान्तं = संहृतम् ।

राम इति । सरहस्यप्रयोगसंहारजृम्भकास्त्राणि = सरहस्यौ=अङ्गन्यासाद्यनुष्ठानसहितौ, प्रयोगसंहारौ = नियोजनाकर्षणे, येषां, तादृशानि जृम्भकास्त्राणि । संपद्यन्ते = सम्पन्नानि भवन्ति, भाग्येन तवाऽप्येतादृशान्यस्त्राणीति भावः । **'सरहस्यप्रयोगसंहरणान्यस्त्राण्याम्नायवन्ति'** इति पुस्तकान्तरपाठस्तत्र—आम्नायवन्ति = सम्प्रदायसिद्धानि, गुरूपदेशेनैवैतादृशान्यस्त्राणि लभ्यन्त इति भावः ।

ब्रह्मादय इति । प्रथमाऽङ्के चित्रदर्शनाऽवसरे (२७ तमे पृष्ठे) रामेणाभिहितोऽयं श्लोको व्याख्यातपूर्व इति तत एव द्रष्टव्यः ॥ १५ ॥

अथेति । अथ = अत्रेदं वाक्यारम्भार्थकमव्ययम् । अस्त्रमन्त्रोपनिषदम् = अस्त्रमन्त्रमयीं ब्रह्मविद्याम् , **'एतन्मन्त्रपारायणोपनिषदम्'** इति पाठे—एतेषां = जृम्भकास्त्राणाम् , मन्त्राणां = जप्यमानानां वाक्यविशेषाणाम् , पारायणं = पूर्वाभ्यासेन पारगमनम् , तद्रूपाम् उपनिषदम् = गुह्यविद्याम् इत्यर्थः । परःसहस्राधिकसंवत्सरपरिचर्यानिरताय = सहस्रात् परे परःसहस्राः =

(लव ध्यानका अभिनय करते हैं)

चन्द्रकेतु—जैसी आज्ञा है (ऐसा कहकर जाते हैं)

लव—पिताजी ! अस्त्र शान्त हो गया ।

राम—भाग्यसे वत्सको भी अङ्गन्यासादि अनुष्ठानसे युक्त प्रयोग-संहारवाले जृम्भक अस्त्र सम्पन्न हुए हैं ।

चित्रदर्शनावसरमें प्रथम (पृष्ठ २७ में) इस श्लोकका अर्थ देखिए ॥ १५ ॥

इस अस्त्रमन्त्रमयी ब्रह्मविद्याको भगवान् कृशाश्वने सहस्रोंसे अधिक वर्षोंतक सेवामें

चर्योनिरतायान्तेवासिने कौशिकाय प्रोवाच । स भगवान् मह्यमिति गुरु-पूर्वानुक्रमः । कुमारस्य कुतः संप्रदायः ? इति पृच्छामि ।

लवः—स्वतःप्रकाशान्यावयोरस्त्राणि ।

रामः—(विचिन्त्य ।) किं न संभाव्यते ? प्रकृष्टपुण्योपादानकः कोऽपि महिमा स्यात् । द्विवचनं तु कथम् ?

लवः—भ्रातरावावां यमौ ।

सहस्रादधिकाः, राजदन्तादिः, 'पारस्करप्रभृतीनि च संज्ञायाम्' इत्यत्र पाठात्सुट्, परःसहस्रेभ्यः अधिकाः = अतिरिक्ताः, ये संवत्सराः = हायनानि, तत्कालं व्याप्य या परिचर्या = शुश्रूषा, 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया, 'अत्यन्तसंयोगे च' इति समासः, तस्यां निरताय = तत्पराय । अन्तेवासिने = गुरोः अन्ते (समीपे) वसतीति तच्छीलस्तस्मै = छात्राय, 'शयवासवासिष्वकालात्' इत्यलुक् । कौशिकाय = विश्वामित्राय । गुरुपूर्वानुक्रमः = गुरूणाम् = आचार्याणाम्, पूर्वः = प्राचीनः, अनुक्रमः = परम्परा, सम्प्रदाय इत्यर्थः । कुतः = कस्मात् ।

लव इति । स्वतःप्रकाशानि = स्वतः = स्वयमेवः गुरूपदेशं विनैवेति भावः । प्रकाशः = प्रादुर्भावः, येषां तानि, अस्त्राणि = जृम्भकाऽस्त्राणि ।

राम इति । किं न सम्भाव्यते = सर्वमपि सम्भाव्यत एवेति भावः । प्रकृष्टपुण्योपादानकः = प्रकृष्टम् = उत्कृष्टम्, पुण्यम् = धर्मः, उपादानं = कारणं यस्य सः । पुण्योत्तरं **'परिपाक'** शब्दाधिकः क्वाचित्कः पाठस्तत्र परिपाकः = परिणाम इत्यर्थः । द्विवचनन्तु = 'आवयोः' इति षष्ठीद्विवचनं तु ।

लव इति । यमौ = यमजावित्यर्थः, 'यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च' । इति विश्वः ।

तत्पर शिष्य विश्वामित्रजीको बतलाया । उन भगवान् विश्वामित्रने मुझको बतलाया, इस तरह आचार्योंका प्राचीन क्रम है । कुमारको कहांसे इसका उपदेश मिला ? यह पूछता हूं ।

लव—हम दोनोंको इन अस्त्रोंका स्वतः (आपसे आप) प्रादुर्भाव हुआ ।

राम—(विचार कर) क्या नहीं हो सकता ? उत्कृष्ट धर्महेतुक कोई महिमा होगी । द्विवचन क्यों ?

लव—हम दोनों जुड़वे (यमज = एकसाथ पैदा हुए) भाई हैं ।

रामः—स तर्हि द्वितीयः क ?

(नेपथ्ये)

दण्डायन ![1]

आयुष्मतः किल लवस्य नरेन्द्रसैन्यै-
रायोधनं ननु किमात्थ ? सखे ! तथेति ।
अद्यास्तमेतु भुवनेषु[2] च राजशब्दः
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥ १६ ॥

राम इति । तर्हि = एवं चेत् , युवयोर्यमजत्वे सतीति भावः ।

दण्डेति । दण्डायननामा कश्चिद्वाल्मीकिशिष्यस्तस्य चतुर्थाङ्कविष्कम्भके सौधातकिनामधेयेनापरेण सतीर्थ्येन संवादः सञ्जातः ।

आयुष्मत इति । सखे ! आयुष्मतो लवस्य नरेन्द्रसैन्यैः आयोधनं ननु ? किल तथा इति आत्थ किम् ? अद्य भुवनेषु राजशब्दः अस्तम् एतु । अद्य क्षत्रस्य शस्त्रशिखिनः शमं यान्तु इत्यन्वयः । सखे = हे मित्र, आयुष्मतः = दीर्घायुषः, लवस्यानुजतयैतादृशोक्तिः, लवस्य=तन्नामकस्य मदनुजस्य, नरेन्द्रसैन्यैः = राजसैनिकैः, सहेति शेषः, 'सहयुक्तेऽप्रधाने' इति सूत्रेण विनाऽपि तद्योगं तृतीया । आयोधनं ननु = युद्धं किम्, अत्र ननुशब्दः प्रश्नार्थकः, 'प्रश्नावधारणाऽनुज्ञाऽनुनयामन्त्रणे ननु' इत्यमरः । किल = निश्चयेन, तथा इति = युद्धं संजातम् इति, आत्थ किं = कथयसि किम् ? अद्य = अस्मिन् दिने, भुवनेषु = लोकेषु, राजशब्दः='राजे'त्याकारकः शब्दः, अस्तं = नाशम् , एतु=प्राप्नोतु, अद्य= अस्मिन्दिने, क्षत्रियस्य = राजन्यस्य, शस्त्रशिखिनः = शस्त्राणि = आयुधानि एव शिखिनः = अग्नयः, शमं = शान्ति, निर्वाणमिति भावः, यान्तु = प्राप्नुवन्तु । महाराजेत्युपाधिं विनाश्य क्षत्रस्य शस्त्राग्नितापापहरणमपि अस्माकं कर्तव्यमिति भावः । अत्र **रूपकाऽलंकारः** । **वसन्ततिलका वृत्तम्** ॥ १६ ॥

राम—तब वह दूसरा भाई कहाँ है ?

(नेपथ्यमें)

दण्डायन !

मित्र ! चिरञ्जीव लवका राजाकी सेनाके साथ युद्ध हो रहा है क्या ? 'हो रहा है' ऐसा कहते हो क्या ? आज लोकोंमें 'राजा' शब्द नाशको प्राप्त हो और आज क्षत्रियकी शस्त्ररूप आग बुझ जाय ॥ १६ ॥

१. 'भाण्डायन भाण्डायन' इति पाठान्तरम् । २. 'च्चपिराजशब्दः' इति पाठान्तरम् ।

रामः—

अथ कोऽयमिन्द्रमणिमेचकच्छविर्ध्वनिनैव बद्धपुलकं करोति माम्।
नवनीलनीरधरधीरगर्जितक्षणबद्धकुड्मलकदम्बडम्बरम् ॥ १७ ॥

लवः—अयमसौ मम ज्यायानार्यः कुशो नाम भरताश्रमात्प्रतिनिवृत्तः।

रामः—(सकौतुकम् ।) तर्हि वत्स ! इत एवैतमाह्वयायुष्मन्तम् ।

लवः—यदाज्ञापयति । (इति निष्क्रान्तः ।)

(ततः प्रविशति कुशः ।)

अथेति । अथ इन्द्रमणिमेचकच्छविः कः अयं ध्वनिना एव बद्धपुलकं मां नवनीलनीरधरधीरगर्जितक्षणबद्धकुड्मलकदम्बडम्बरं करोति इत्यन्वयः । अथ = वाक्यारम्भार्थकमिदमव्ययम् , इन्द्रमणिमेचकच्छविः = इन्द्रमणिरिव = इन्द्रनीलमणिरिव, मेचका = नीलवर्णा, छविः = कान्तिः, यस्य सः । कः अयं = कोऽसौ पुरः स्थितो बालकः, ध्वनिना एव = कण्ठरवेणैव बद्धपुलकं = बद्धाः (उत्पन्नाः) पुलकाः (रोमाञ्चाः) यस्य तं, तादृशम् , मां=रामं, नवनीलनीरधरधीरगर्जितक्षणबद्धकुड्मलकदम्बडम्बरं = नवः=नूतनः, नीलः = कृष्णवर्णः, यो नीरधरः = मेघः, तस्य धीरं = गम्भीरम् , यत् गर्जितं = स्तनितम् , तस्य क्षणे=काले, बद्धाः=उद्भिन्नाः,कुड्मलाः=मुकुलाः, यस्य एतादृशस्य कदम्बस्य=नीपतरोः, डम्बरं= सदृशम् , करोति = विदधाति । अस्य बालकस्य शब्दमात्रेणैव रोमाञ्चितो भवामीति भावः । अत्र द्वयोरुपमयोर्मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **मञ्जुभाषिणी** वृत्तम् ॥ १७ ॥

लव इति । असौ = दूरादागतः, अयं = पुरः स्थितः, ज्यायान् = ज्येष्ठः, अग्रज इति भावः, आर्यः = पूज्यः ।

राम इति । इत एव = अत्रैव, स्थान इति शेषः । आह्वय = आकारय ।

राम—अभी इन्द्रनील मणिके सदृश श्याम कान्तिवाला यह कौन शब्दमात्रसे मुझको नये और श्याम वर्णवाले मेघके गम्भीर गर्जनके अवसरमें विकसित मुकुलवाले कदम्बके सदृश रोमाञ्चयुक्त कर रहा है ? ॥ १७ ॥

लव—ये मेरे बड़े भाई पूज्य कुशजी भरत ऋषिके आश्रमसे लौटे हैं ।

राम—(उत्कण्ठाके साथ) तब वत्स ! इस चिरञ्जीवको भी यहीं बुलाओ ।

लव—जो आज्ञा (ऐसा कहकर जाते हैं)

(अनन्तर कुश प्रवेश करते हैं)

कुशः—(सक्रोधं कृतधैर्यं धनुरास्फाल्य ।)

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो-
दृप्तानां दमनाय दीपितनिजक्षत्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥१८॥

कुश इति । सक्रोधं कृतधैर्यमिति पदद्वयमपि क्रियाविशेषणम् । आस्फाल्य = ताडयित्वा ।

दत्तेन्द्राभयेति । भगवतो वैवस्वतात् मनोः आ दत्तेन्द्राभयदक्षिणैः दृप्तानां दलनाय दीपितनिजक्षत्रप्रतापाग्निभिः आदित्यैः नृपतिभिः विग्रहो यदि, ततः दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं मम एतत् धनुर्धन्यम् इत्यन्वयः । भगवतः = ऐश्वर्यसमन्वितात् , वैवस्वतात् = विवस्वत्पुत्रात् , मनोः आ = मनुमारभ्य, 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी, वैवस्वतमनो राज्यकालादारभ्येति भावः । दत्तेन्द्राभयदक्षिणैः = दत्ता = वितीर्णा, इन्द्राय = देवराजाय, अभयदक्षिणा = अभयदानम् , यैस्तैः, एवं च दृप्तानां = दर्पयुक्तानां, दमनाय = निग्रहाय, **'दहनाये'ति** पाठे नाशायेत्यर्थः । दीपितनिजक्षत्रप्रतापाऽग्निभिः = दीपितः, प्रज्वलितः निजः = स्वीयः, क्षत्रप्रतापः = क्षत्रियप्रभावः, एव अग्निर्यैस्तैः, एतादृशैः आदित्यैः = सूर्यवंशोत्पन्नैः, नृपतिभिः = राजभिः, विग्रहो यदि = विरोधश्चेत् , ततः = तदा, दीप्तास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं = दीप्तानाम्=ज्वलितानाम्, अस्त्राणाम् = आयुधानाम् , स्फुरन्त्यः = प्रकाशमानाः उग्राः = तीक्ष्णाः, या दीधितयः = किरणाः, तासां शिखया = कोट्या, नीराजिता = कृतनीराजना, कृताऽऽरार्तिकेति भावः, ज्या = मौर्वी, यस्य तत् , एतादृशं मम = कुशस्य, एतत्=हस्तस्थं, धनुः = कार्मुकं, धन्यं = कृतार्थम् , भवेदिति शेषः । सूर्यवंश्यैः प्रबलभूपालैः संग्रामे प्राप्ते सति ममैतद्धनुः प्रशंसनीयं भवेदिति भावः । एतेन प्रतिवीरवैशिष्ट्यवर्णनेन कुशस्य पराक्रमोत्कर्षो व्यज्यते । अत्र 'दत्तेन्द्राभयदक्षिणैः' इत्यत्र 'दीपिते'त्यादौ च **द्वयो रूपकयोर्मिथोऽनपेक्षया स्थितेः संसृष्टिः । शार्दूलविक्रीडितं वृत्तम्** ॥ १८ ॥

कुश—(क्रोधके साथ धैर्यपूर्वक धनुषको ताडित कर)

भगवान् वैवस्वत मनुसे आरम्भ कर इन्द्रतकको अभय दक्षिणा देनेवाले, दर्पयुक्त पुरुषोंके दमनके लिए अपने क्षत्रिय-प्रतापरूप अग्निको प्रज्वलित करनेवाले सूर्यवंशोत्पन्न राजाओंसे विरोध हो जाय तो प्रज्वलित अस्त्रोंकी प्रकाशमान और भयङ्कर किरणोंकी शिखा (अग्रभाग) से आरती की गई मौर्वीसे युक्त मेरा धनुष धन्य होगा ॥ १८ ॥

(विकटं परिक्रामति ।)

रामः—कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिरेकः । तथाहि—

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद् गुरुतां दधानो वीरो रसः किमयमेत्युत दर्प एव ॥

लवः—(उपसृत्य ।) जयत्वार्यः ।

कुशः—नन्वायुष्मन् ! किमियं वार्ता युद्धं युद्धमिति ?

विकटमिति । विकटं = विषमं, परिक्रामति = परितः पादविक्षेपं करोति ।

राम इति । क्षत्रियपोतके = क्षत्रबालके, कोऽपि = अनिर्वचनीयः, पौरुषातिरेकः = पौरुषस्य = तेजसः, अतिरेकः = अतिशयः । तमेव वर्णयति—

दृष्टिरिति । दृष्टिः तृणीकृतजगत्त्रयसत्त्वसारा धीरोद्धता गतिः धरित्रीं नमयति इव । कौमारके अपि गिरिवत् गुरुतां दधानः अयं किं वीरो रसः ? उत दर्प एव एति ? इत्यन्वयः । दृष्टिः = नेत्रं, तृणीकृतजगत्त्रयसत्त्वसारा = तृणीकृतः = तृणवदवज्ञातः, जगत्त्रयस्य = लोकत्रितयस्य, सत्त्वसारः = बलोत्कर्षः, यया सा, अयं बालको लोकत्रयमपि तृणवन्मन्यत इत्यस्य दर्शनेन प्रतीयत इति भावः । धीरोद्धता = धीरा = गाम्भीर्ययुक्ता, उद्धता = दर्पयुक्ता गतिः = पादन्यासः, अस्येति शेषः, धरित्रीं = पृथ्वीं, नमयति इव = अवनतां करोति इव । तथा च कौमारकेऽपि = बाल्येऽपि, गिरिवत् = पर्वतवत् , गुरुतां = गौरवं, दधानः = धारयन् , अयं = बालकः, किं, वीरो रसः = वीराख्यो रसः, उत = अथवा, दर्प एव = अभिमान एव, एति = आगच्छति । अस्य बालस्य लोकोत्तरं पौरुषं व्यज्यत इति भावः । अत्र द्वितीयचरणे **उत्प्रेक्षा**, गिरिवदित्य**त्रोपमा** च, द्वयोर्मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **वसन्ततिलका वृत्तम्** ॥ १९ ॥

कुश इति । किमियं वार्ता युद्धं युद्धमिति ? अत्र तु न किमपि युद्धं पश्यामि

(विकटरूपसे घूमते हैं)

राम—इस क्षत्रिय बालकमें अनिर्वचनीय तेजका आधिक्य है जैसे—

इसका नेत्र तीनों लोकोंके बलके उत्कर्षको तृणकी तरह अवज्ञा करनेवाला है, एवम् गाम्भीर्य और दर्पसे युक्त इसकी गति पृथ्वीको अवनत-सी कर रही है । बाल्यावस्था- (बचपन) में भी पर्वतकी तरह गौरवको धारण करता हुआ यह क्या वीर रस अथवा अभिमान ही आ रहा है ? ॥ १९ ॥

लव—(समीप जाकर) आर्यकी जय हो ।

कुश—आयुष्मन् ! 'युद्ध युद्ध' यह क्या वृत्तान्त है ?

लवः—यत्किंचिदेतत् । आर्यस्तु दृप्तं भावमुत्सृज्य विनयेन वर्तताम् ।

कुशः—किमर्थम् ?

लवः—यदत्र देवो रघुनन्दनः स्थितः । स रामायणकथानायको ब्रह्मकोशस्य गोप्ता ।

कुशः—आशंसनीयपुण्यदर्शनः स महात्मा । किन्तु स कथमस्माभिरुपगन्तव्यः ? इति[1] संप्रधारयामि ।

लवः—यथैव गुरुस्तथोपसदनेन ।

इति भावः ।

लव इति । एतत् = युद्धम् , यत्किंचित् = अल्पमिति भावः । दृप्तं=दर्पयुक्तम्, उत्सृज्य = त्यक्त्वा, विनयेन = नम्रतया, वर्ततां = तिष्ठतु ।

लव इति । देवः = महाराजः, रघुनन्दनः = रामचन्द्रः । ब्रह्मकोशस्य = ब्रह्माण्डस्य, यद्वा ब्राह्मणस्य, जातावेकवचनम् , यद्वा वेदरूपधनस्य । गोप्ता = रक्षकः, उपलक्षणं चैतत् , गोब्राह्मणप्रतिपालक इति भावः । **'स च स्निह्यत्यावयोरुत्कण्ठते च युष्मत्सन्निकर्षस्ये**'ति पाठान्तरं तत्र—स्निह्यति = स्नेहं करोति । युष्मत्सन्निकर्षस्य = भवत्संनिधेः, 'उत्कण्ठत' इति पदेन योगे 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी, उत्कण्ठां करोतीत्यर्थः ।

कुश इति । आशंसनीयपुण्यदर्शनः = आशंसनीयम् = अभिलषणीयम् पुण्यं = पवित्रम् , दर्शनं = साक्षात्कारः, यस्य सः । कथं = केन प्रकारेण, उपगन्तव्यः = उपस्थातव्यः, सम्प्रधारयामि = निश्चिनोमि ।

लव इति । गुरुः = पूज्यजनः, पित्रादिरिति भावः । उपसदनेन = समीपगमनेन **'उपचारेणे**'ति पाठे व्यवहारेणेति भावः, प्राप्य इति शेषः ।

लव—यह कुछ है । आर्य अभिमानयुक्त भावको छोड़कर नम्रतासे व्यवहार करें ।

कुश—क्यों ?

लव—क्योंकि यहापर महाराज रामचन्द्र विद्यमान हैं । वे रामायणकी कथाके प्रधान पुरुष और वेदरूप धनके रक्षक हैं ।

कुश—वे महात्मा अभिलाषके योग्य पवित्र दर्शनवाले हैं । परन्तु किस प्रकार मुझे उनके पास जाना चाहिए ? मैं यह निश्चय करता हूँ ।

लव—गुरुकी तरह उनके पास जाना चाहिए ।

---

१. क्वचित् 'च' इत्यधिकः पाठः ।

कुशः—कथं हि नामैतत् ?

लवः—अत्युदात्तः सुजनश्चन्द्रकेतुरौर्मिलेयः प्रियवयस्येति सख्येन मामुपतिष्ठते । तेन संबन्धेन धर्मतस्तात एवायं राजर्षिः ।

कुशः—संप्रत्यवचनीयो राजन्येऽपि प्रश्रयः ।

(उभौ परिक्रामतः)

लवः—पश्यत्वेनमार्यो महापुरुषमाकारानुभावगाम्भीर्यसंभाव्यमान-

कुश इति । एतत् = रामस्य गुरुवदुपगमनीयत्वम् , कथं नाम = केन प्रकारेण, कथं हि नाम रामो गुरुवन्माननीयः ? इति भावः ।

लव इति । अत्युदात्तः=अतिशयोच्चस्वभावः, सुजनः=सज्जनः, औमिलेयः= ऊर्मिलापुत्रः, चन्द्रकेतुरिति यावत् , 'स्त्रीभ्यो ढक्' इति ढक् प्रत्ययः । प्रियवयस्य= हे प्रियमित्र, इति = इत्थं, सम्बोध्य, सख्येन = मैत्र्या, 'सख्युर्य' इति यः, उपतिष्ठते = सङ्गच्छते, 'उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' इति सङ्गतिकरण आत्मनेपदम् । सम्बन्धेन = मैत्रीरूपेण, राजर्षिः = रामचन्द्रः, तात एव = पिता एव, अतोऽस्मिन् पितरीव आदरः प्रदर्शनीय इति भावः ।

कुश इति । सम्प्रति = अधुना, रामस्य पितृत्वेऽभ्युपगते सतीति भावः । राजन्येऽपि = क्षत्रियेऽपि रामेऽपीति भावः । प्रश्रयः = प्रणयः, 'प्रश्रयप्रणयौ समौ' इत्यमरः, विनय इत्यर्थः । अवचनीयः = निर्दुष्टः, अद्य यावत् ऋते ब्राह्मणेभ्यो न कोऽपि क्षत्रिय आवाभ्यामभिवन्दितः, साम्प्रतं चन्द्रकेतुना सहास्माकं सख्यसम्बन्धात्तत्पितरि क्षत्रियश्रेष्ठे रामचन्द्रे विनयप्रदर्शनं नानुचितमिति भावः । **'करणीय'** इति पाठे कर्तव्य इत्यर्थः ।

लव इति । आकारानुभावगाम्भीर्यसंभाव्यमानविविधलोकोत्तरसुचरितातिशय-

---

कुश—यह कैसे ?

लव—अतिशय ऊँचे स्वभाववाले, सज्जन, ऊर्मिलापुत्र (चन्द्रकेतु) 'प्रिय मित्र !' ऐसा सम्बोधन कर मित्रभावसे मेरे साथ सङ्गति कर रहे हैं । इस सम्बन्धसे ये राजर्षि धर्मसे पिता ही हैं ।

कुश—इस समय क्षत्रियमें प्रणय भी निर्दोष है ।

(दोनों घूमते हैं ।)

लव—आकार, प्रभाव और गम्भीरतासे जिनके चरित्रोंका अनेक प्रकारके लोकोत्तर

विविधलोकोत्तरसुचरितातिशयम् ।

कुशः—(निर्वर्ण्य ।)

अहो प्रासादिकं[1] रूपमनुभावश्च पावनः[2] ।
स्थाने रामायणकविर्देवीं वाचमवीवृधत् ॥ २० ॥

(उपसृत्य) तात ! प्राचेतसान्तेवासी कुशोऽभिवादयते ।

रामः—एह्येह्यायुष्मन् !

शयम् = आकारेण = सौम्याकृत्या, अनुभावेन = प्रभावेण, गाम्भीर्येण च = अक्षोभ्यत्वेन च, संभाव्यमानः = अनुमीयमानः, विविधः = अनेकप्रकारः, लोकोत्तरः = भुवनातिशायी, सुचरितानाम् = सुकर्मणाम् , अतिशयः = उत्कर्षः, यस्य तम् , एतादृशमेनम् = अतिनिकटस्थं महापुरुषं = श्रीरामचन्द्रम् ।

अहो इति । अहो प्रासादिकं रूपम् , पावनः अनुभावश्च । रामायणकविः देवीं वाचम् अवीवृधत स्थाने इत्यन्वयः । अहो = आश्चर्यम् , प्रासादिकं = प्रसादसम्पन्नं, रूपम् = आकारः, दर्शनोत्तरमेव अयमस्त्यनुग्रहप्रवाह इति मतिपथे भासत इति भावः । पावनः = पवित्रः, अनुभावश्च = प्रभावश्च, अस्तीति शेषः । रामायणकविः = रामायणरचयिता, वाल्मीकिरिति भावः । देवीं वाचं = वाग्देवीम् , अवीवृधत् = वर्द्धितवान् , वृधधातोर्णिचि लुङि चङि द्वित्वम् , **'व्यवीवृतत्'** इति पाठे विवर्तयामास, रामायणकथारूपेण परिणतामकरोदिति भावः, व्युपसर्गकात् वृतुधातोर्णिचि लुङि द्वित्वम् , (इति) स्थाने = युक्तम् , रामसदृशं धीरोदात्तं नायकमुद्दिश्य रचितं वाल्मीकिमहाकाव्यं सार्थकमिति भावः । अत्र वाक्यार्थहेतुकं **काव्यलिङ्ग**मलङ्कारः ॥ २० ॥

उपसृत्येति । उपसृत्य = समीपं गत्वा, रामस्येति शेषः । प्राचेतसान्तेवासी = वाल्मीकिच्छात्रः ।

उत्कर्षका अनुमान किया जाता है, ऐसे इन महापुरुषका आर्य दर्शन करें ।

कुश—(देखकर)

अहो इनका प्रसादसम्पन्न रूप और पवित्र प्रभाव है । (इनके वर्णनके लिए) रामायणके कवि (वाल्मीकिजी) ने जो वाग्देवीको परिवर्धित किया है, वह उचित है ॥ २० ॥

(निकट जाकर) तात ! वाल्मीकि ऋषिका छात्र कुश अभिवादन करता है ।

राम—चिरञ्जीव ! आओ ।

१. 'प्रामोदिकम्' इति पाठान्तरम् । २. तादृशः इति पाठान्तरम् ।

अमृताध्मातजीमूतस्निग्धसंहननस्य ते ।
परिष्वङ्गाय[1] वात्सल्यादयमुत्कण्ठते जनः ॥ २१ ॥
(परिष्वज्य स्वगतम्) तत्किमित्ययं च दारकः
अङ्गादङ्गात्सृत[2] इव निजः स्नेहजो देहसारः
प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेकः ।

अमृतेति । अयं जनः वात्सल्यात् अमृताध्मातजीमूतस्निग्धसंहननस्य ते परिष्वङ्गाय उत्कण्ठत इत्यन्वयः । अयं = त्वत्पुरःस्थितः, जनः = नरः, अहमिति भावः, वात्सल्यात् = स्नेहाद्धेतोः, अमृताध्मातजीमूतस्निग्धसंहननस्य = अमृतेन = जलेन, आध्मातः = पूर्णः, यो जीमूतः = मेघः, स इव स्निग्धं = मसृणम्, संहननं = शरीरम्, यस्य तस्य, 'पयः कीलालममृतम्' इति 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।' इति चामरः, तादृशस्य ते = तव, परिष्वङ्गाय = आलिङ्गनं कर्तुम्, 'तुमर्थाच्च भाववचनात्' इति चतुर्थी । उत्कण्ठते = उन्मुखो भवति । अत्रोपमाऽलङ्कारः । अयं जन इत्युक्तेर्दयनीयत्वरूपवस्तुध्वनिश्च ॥ २१ ॥

परिष्वज्येति । किमिति = केन हेतुना, दारकः = बालकः ।

अङ्गादङ्गादिति । अङ्गात् अङ्गात् सृतः स्नेहजो निजो देहसार इव, एकः चेतनाधातुः बहिः प्रादुर्भूय स्थित इव, सान्द्रानन्दक्षुभितहृदयप्रस्रवेण अवसिक्तः सः गाढाश्लेषः (सन्) मम हिमच्योतम् आशंसति इव हि इत्यन्वयः । अयं दारक इति पदद्वयं पूर्वस्थगद्यादनुवर्तनीयम्, अङ्गादङ्गात् = सर्वेभ्योऽङ्गेभ्यः, सृतः = क्षरितः, स्नेहजः = प्रेमोत्पन्नः, निजः = स्वकीयः, देहसार इव = देहे = शरीरे, सारः = उत्तमांश इव, क्वचित् **'देहजः स्नेहसार'** इति पाठान्तरम्, एवं च एकः = मुख्यः, चेतनाधातुः = चैतन्यरूपपदार्थः, बहिः = बाह्यदेशे, प्रादुर्भूय = आविर्भूय, स्थित इव = विद्यमान इव, साक्षात्कारार्हः सन् स्थित

यह जन (रामचन्द्र) स्नेहके कारण अमृतसे पूर्ण मेघके सदृश कोमल शरीरवाले तुम्हारे आलिङ्गनके लिए उत्कण्ठित हो रहा है ॥ २१ ॥

(आलिङ्गन कर मन ही मन) तब किसलिए यह बालक—

सम्पूर्ण अङ्गोंसे क्षरित, प्रेमसे उत्पन्न—अपने शरीरके उत्तम अंशके सदृश, मुख्य चैतन्य रूप पदार्थ बाह्यदेशमें आविर्भूत होकर विद्यमानके तुल्य, गाढ आनन्दसे क्षुभित हृदयके द्रवसे

१. 'परिष्वङ्गस्य' इति पाठान्तरम् । २. 'सुत' इति पाठान्तरम् ।

सान्द्रानन्दक्षुभितहृदयप्रस्रवेणावसिक्तो
गाढाऽऽश्लेषः स हि मम हिमच्योतमाशंसतीव ॥ २२ ॥

लवः—ललाटन्तपस्तपति घर्मांशुः । तदत्र सालवृक्षच्छायायां मुहूर्त्त-मासनपरिग्रहं करोतु तातः ।

इवेति भावः, सान्द्रानन्दक्षुभितहृदयप्रस्रवेण = सान्द्रः = निबिडः, य आनन्दः = प्रमोदः, तेन क्षुभितं = प्राप्तक्षोभम् , यद्धृदयं, तस्य प्रस्रवेण = द्रवेण, अवसिक्तः = आर्द्रीकृतः, 'सृष्ट इव' इति पुस्तकान्तरपाठे = निर्मित इवेत्यर्थः, अस्तीति शेषः । सः = तादृशो दारकः, गाढाऽऽश्लेषः=गाढः = दृढः, आश्लेषः = आलिङ्गनम् , यस्य सः, दृढमालिङ्गितः सन्निति भावः । मम = रामस्य, हिमच्योतं = तुषाराऽऽसेचनम् , आशंसति इव = सूचयति इव, हि = निश्चयेन, अयं पुत्रवत्स्पर्शोत्तरं मदीयं सन्तापमपनयतीति भावः । अत्र चतुर्थचरणे 'गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चतीव' इति पुस्तकान्तरपाठस्तत्र—गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चति इवेत्यन्वयः । एवं च श्लेषे = आलिङ्गने, कृते सतीति शेषः । अमृतरसस्रोतसा = पीयूषरसप्रवाहेण, गात्रं = शरीरं, सिञ्चति इव = उक्षति इवेत्यर्थः । अत्र प्रथमद्वितीयचतुर्थचरणेषु तिसृणामुत्प्रेक्षाणां मिथोऽनपेक्षया स्थितेः संसृष्टिः । मन्दाक्रान्ता वृत्तम् ॥ २२ ॥

लव इति । घर्मांशुः = घर्माः = उष्णाः, अंशवः = किरणाः, यस्य सः, सूर्य इत्यर्थः, 'घर्मदीधिति'रिति पाठेऽप्ययमेवार्थः । ललाटन्तपः = ललाटं तपतीति, भालतापकः सन्निति भावः, 'असूर्यललाटयोर्दृशितपोः' इति खश्, 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमश्च, तपति = तापं करोति । तत् = तस्माद्धेतोः, सालवृक्षच्छायाया = सर्जतरुच्छायां, 'सालच्छाये' इति पाठेऽप्ययमेवार्थः, सालानां छायेति सालच्छायं तस्मिन् , पूर्वपदार्थबाहुल्यात् 'छायाबाहुल्ये' इति नपुंसकत्वम् । मुहूर्त्तं = घटिकाद्वयं यावत् , 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया, आसनपरिग्रहम् = उपवेशनम् ।

आर्द्र किया गया यह बालक दृढ़ आलिङ्गन करनेपर जैसे (सन्तप्त) मुझे बरफसे सेचन कर रहा है ॥ २२ ॥

लव—सूर्य ललाटको तप्त कर रहे हैं अर्थात् मध्याह्नका समय हो रहा है । इस कारण पिताजी इस सर्ज वृक्षकी छायामें कुछ समय तक आसन ग्रहण करें ।

रामः—यदभिरुचितं वत्सस्य ।

(सर्वे परिक्रम्य यथोचितमुपविशन्ति ।)

रामः—(स्वगतम् ।)

अहो ! प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।
साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥ २३ ॥
वपुरवियुतसिद्धा एव लक्ष्मीविलासाः
प्रतिकलकमनीयां कान्तिमुद्भेदयन्ति ।

राम इति । अभिरुचितम् = अभीष्टम्, 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येवे'ति नियमात् वत्सस्येत्यत्र षष्ठी, अतः 'रुच्यर्थानां प्रीयमाणः' इति प्रीयमाणस्य सम्प्रदानत्वाभावः ।

अहो इति । अहो ! प्रश्रययोगेऽपि कुशस्य लवस्य च गतिस्थित्यासनादयो भावः साम्राज्यशंसिन इत्यन्वयः । अहो = आश्चर्यं, प्रश्रययोगेऽपि = प्रश्रयस्य = विनयस्य, योगे=सम्बन्धे, सत्यपि, कुशस्य लवस्य च = उभयोरपि बालकयोः, गतिस्थित्यासनादयः = गतिः = गमनम् , स्थितिः = अवस्थानम् , आसनम् = उपवेशनम् , एतानि आदिर्येषां ते, 'आदि' कथनान्निरीक्षणादिपरिग्रहः । भावाः = क्रियाः, साम्राज्यशंसिनः = साम्राज्यं शंसन्तीति, सार्वभौमत्वसूचकाः, सन्तीति शेषः ॥२३॥

वपुरिति । यथा वा स्वे रश्मयः अमलिनं चन्द्रम् इव माकरन्दा बिन्दवो विकसितम् अरविन्दम् इव उद्भेदयन्ति, (तथैव) अवियुतसिद्धा एव लक्ष्मीविलासाः वपुः प्रतिकलकमनीयां कान्तिं च उद्भेदयन्ति इत्यन्वयः । यथा = येन प्रकारेण, वेति पदं पादपूरणार्थकम् । स्वे=स्वकीयाः, रश्मयः,=किरणाः, अमलिनं= मालिन्यरहितम् , निष्कलङ्कमिति भावः । चन्द्रम् इव = इन्दुमिव, 'चन्द्रम्' इत्यत्र **'रत्नम्'** इति पुस्तकान्तरपाठः, उद्भेदयन्तीत्यत्रान्वयः । इव = यथा, माकरन्दाः = पुष्परससम्बन्धिनः, 'मकरन्दः पुष्परस' इत्यमरः, बिन्दवः = कणाः,

राम—वत्सकी जैसी रुचि ।

(सब लोग घूमकर यथायोग्य बैठ जाते है ।)

राम—(मन ही मन)

अहो ! नम्रताका सम्बन्ध होनेपर भी कुश और लवके गमन, स्थिति और आसन आदि क्रियायें साम्राज्यकी सूचना करनेवाली हैं ॥ २३ ॥

जिस प्रकार अपनी किरणें निष्कलङ्क चन्द्रको प्रकाशित करती हैं, एवम् जैसे पुष्परसके

अमलिनमिव चन्द्रं रश्मयः स्वे यथा वा
विकसितमरविन्दं बिन्दवो माकरन्दाः ॥ २४ ॥
भूयिष्ठं च रघुकुलकौमारमनयोः पश्यामि ।
कठोरपारावतकण्ठमेचकं वपुर्वृषस्कन्धसु[१]बन्धुरांसयोः ।

विकसितं = प्रफुल्लम् , अरविन्दम् इव = कमलमिव, उद्भेदयन्ति = उत्पादयन्ति, (तथैव) अवियुतसिद्धा एव = अपृथक्सिद्धा एव **'अविहितसिद्धा'** इति पाठान्तरं, तस्य स्वभावसिद्धा इति भावः । लक्ष्मीविलासाः = लावण्यातिशयाः, वपुः = शरीरं, प्रतिकलकमनीयाम् = प्रतिकलम् = अनुक्षणम् , कमनीयां = रमणीयाम् , कान्तिं = द्युतिम् , च उद्भेदयन्ति = धातूपसर्गाणामनेकार्थत्वात् वपुः उद्भासयन्ति, कान्तिं चोत्पादयन्तीति भावः । पुस्तकान्तरेषु तु द्वितीयचरणे **'प्रतिजनकमनीयं कान्तिमत्केतयन्ति'** इति पाठस्तत्र अविहितसिद्धा एव लक्ष्मीविलासाः प्रतिजनकमनीयं कान्तिमत् वपुः केतयन्तीत्यन्वयः । अविहितसिद्धा एव = स्वभावसिद्धा एव, लक्ष्मीविलासाः = लावण्यातिशयाः, प्रतिजनकमनीयं = सर्वजनेच्छाविषयं, कान्तिमत् = प्रचुरशोभायुक्तं, वपुः = शरीरं, 'कित निवासे' इति धातोरकर्मकत्वात् 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' इति कर्मत्वम् । केतयन्ति = निवसन्तीत्यर्थः । अत्र द्वयो **रुपमयो**र्मिथोऽनपेक्षया स्थितेः **संसृष्टिरलङ्कारः** । **मालिनी** वृत्तम् ॥२४॥

भूयिष्ठमिति । अनयोः = कुशलवयोः, भूयिष्ठम्=बहुतरं, रघुकुलकौमारम् = रघुवंशोत्पन्नबालकत्वम् , **'भूयिष्ठां रघुकुलकुमारच्छायाम्'** इति पाठे-रघुकुलकुमारच्छायां = रघुवंशोत्पन्नबालककान्तिमित्यर्थः ।

कठोरेति । वृषस्कन्धसुबन्धुरांसयोः वपुः कठोरपारावतकण्ठमेचकं, वीक्षितं प्रसन्नसिंहस्तिमितं, ध्वनिश्च माङ्गल्यमृदङ्गमांसलः (अस्ति) इत्यन्वयः । वृषस्कन्धसुबन्धुरांसयोः=वृषस्कन्धौ=वृषभांसौ, इव सुबन्धुरौ=अतिशयसुन्दरौ अंसौ=स्कन्धौ,

---

बिन्दुसमूह विकसित कमलको उत्पन्न करते हैं, उसी तरह स्वभावसे ही सिद्ध सौन्दर्यके अतिशय शरीरको उद्भासित करते हैं और प्रतिक्षण रमणीय कान्तिको भी पैदा करते हैं ॥ २४ ॥

इन दोनोंमें रघुवंश में उत्पन्न कुमारका बहुत सादृश्य देख रहा हूँ ।

साँड़के कन्धोंके सदृश सुन्दर कन्धेवाले कुश और लवका शरीर, जवान कबूतरके गलेके

---

१. 'स्कन्धमबन्धु—' इति पाठान्तरम् ।

प्रसन्नसिंहस्तिमितं च वीक्षितं ध्वनिश्च माङ्गल्यमृदङ्गमांसलः ॥ २५ ॥

(निपुणं निरूपयन् ।) अये ! न केवलमस्मद्वंशसंवादिन्याकृतिः—

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।

ययोस्तयोः, कुशलवयोरिति भावः, 'वृषस्कन्धमबन्धुरांशकम्' इति पाठान्तरे तु वृषस्कन्धम् = वृषस्येव = वृषभस्येव, स्कन्धौ यस्मिंस्तत् । अबन्धुरा = अनुन्नतनीचाः; समा इत्यर्थः, अंशाः = अवयवाः, यस्मिंस्तदिति पदद्वयमपि वपुर्विशेषणं ज्ञेयम् , वपुः = शरीरं, कठोरपारावतकण्ठमेचकं = कठोरः = तरुणः, यः पारावतः = कपोतः, तस्य कण्ठः = गलः, इव मेचकं = नीलम् , वीक्षितम् = अवलोकनं, प्रसन्नसिंहस्तिमितं = प्रसन्नः = प्रशान्तः, यः सिंहः = केसरी, तद्दर्शनमिव स्तिमितं= चाञ्चल्यरहितम् ; तथा च ध्वनिश्च = कण्ठस्वरश्च, माङ्गल्यमृदङ्गमांसलः = माङ्गल्यः = मङ्गलसूचकः, यो मृदङ्गः = मुरजः, लक्षणया मुरजध्वनिः, स इव मांसलः = स्फीतः, गम्भीर इति भावः, अस्तीति शेषः । सर्वथानयोः कुमारयोश्चेष्टा रघुकुलकौमारं सूचयतीति भावः । अत्र चतसृणामुपमानां मिथोऽनपेक्षया स्थितेः संसृष्टिरलङ्कारः। वंशस्थं वृत्तं-'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणम्॥२५॥

निपुणमिति । निपुणं = सम्यक् , निरूपयन् = विचारयन् । आकृतिः = आकारः, अनयोरिति भावः । अस्मद्वंशसंवादिनी = अस्मद्वंशसंवादः (अस्मत्कुलसादृश्यम्) अस्ति यस्याः सा, अनयोराकृतिरेवास्मद्वंशसंवादिनी न, किं तर्हि ? इत्यर्थं श्लोकेन प्रतिपादयति—

अपीति । इह शिशुयुग्मे नैपुणोन्नेयम् तच्च तच्च जनकसुताया अनुरूपं स्फुटम् अस्ति । ननु अभिनवशतपत्त्रश्रीमत् तत् प्रियाया आस्यं पुनः मे अक्ष्णोः गोचरीभूतम् इव इत्यन्वयः । इह = अस्मिन् , शिशुयुग्मे = बालकयुगले, कुशलवयोरिति भावः, 'युग्मं तु युगलं युगम्' इत्यमरः । नैपुणोन्नेयम् = नैपुणेन = निपुणतया, उन्नेयम् = अनुमेयम् , तच्च तच्च = अवयवादिकं गुणजातं च, जनक-

सदृश नीला है, दर्शन प्रशान्त सिंहके सदृश चाञ्चल्यरहित है और शब्द मङ्गलसूचक पखावजकी आवाजके सदृश गम्भीर है ॥ २५ ॥

(अच्छी तरह देखते हुए) अरे ! आकारमात्र हमारे वंशके साथ सादृश्यवाला नहीं है । बल्कि—

इन दोनों बालकमें अच्छी तरह अनुमान करने योग्य अवयव आदि और गुणसमूह

ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥ २६ ॥
शुक्ला¹च्छदन्तच्छविसुन्दरीयं सैवोष्ठमुद्रा स च कर्णपाशः ।
नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव ॥ २७ ॥

सुतायाः = मैथिल्याः, सीताया इत्यर्थः, अनुरूपं = सदृशं, स्फुटं = व्यक्तम् , अस्ति= वर्तते, अनयोरवयवानां सीताया अवयवैः स्फुटं सादृश्यमस्ति । दयादाक्षिण्यादि-गुणानां चाक्षुषप्रत्यक्षाभावात् अनयोर्गुणानां सीताया गुणैः सह यत् सादृश्यं तद्वहितपुरुषै रनुमेयमस्तीति भावः । नन्विति वाक्यारम्भे, अभिनवशतपत्रश्रीमत्= अभिनवं = नूतनं, शतपत्त्रमिव = कमलमिव श्रीमत् = शोभायुक्तम् , 'सहस्रपत्रं कमलं शतपत्त्रं कुशेशयम्' इत्यमरः । तत्=पूर्वानुभूतं, प्रियायाः = सीतायाः, आस्यं मुखं, पुनः = भूयः, मे=मम, रामस्येति भावः, अक्ष्णोः=नेत्रयोः, गोचरीभूतम् इव= विषयीभूतम् इव, अस्तीति शेषः । द्वादशसु संवत्सरेषु अनवलोकितं प्रियामुखं कुश-लवयोर्मुखदर्शनात्सादृश्येन अवलोकितमिवेति भावः । **अत्रोपमोत्प्रेक्षयोरङ्गाङ्गि-**भावेन **सङ्करः, स्मरणालङ्कारश्च** व्यङ्ग्यः । **मालिनी** वृत्तम् ॥ २६ ॥

शुक्लाच्छेति । शुक्लाच्छदन्तच्छविसुन्दरी इयम् ओष्ठमुद्रा सा एव कर्ण-पाशश्च स एव । नेत्रे पुनः यद्यपि रक्तनीले, तथापि सौभाग्यगुणः स एव इत्यन्वयः । शुक्लाच्छदन्तच्छविसुन्दरी = शुक्लाः = शुभ्राः, अच्छाः = निर्मलाः, ये दन्ताः = दशनाः, तेषां छविः=कान्तिः, तया सुन्दरी=मनोरमा, क्वचित्तु शुक्लस्थाने **'मुक्ता'**-पदपाठस्तत्र-मुक्ताः = मौक्तिकानि, इव अच्छा इति विग्रहः कार्यः । इयम् = एषा, ओष्ठमुद्रा = अधरोत्तरोष्ठस्थितिः, सा एव=सीताया एव, कर्णपाशश्च = सुन्दरौ कर्णौ च, 'पाशः केशादिपूर्वः स्यात्तत्सङ्घे, कर्णपूर्वकः । सुकर्णे' इति मेदिनी, स एव = सीतासम्बन्ध्येव, नेत्रे पुनः = नयने तु, अनयोरिति शेषः, यद्यपि, रक्तनीले=अरुण-

सीताके सदृश स्पष्ट है। नये कमलके सदृश शोभायुक्त पूर्वदृष्ट प्रिया (सीता) का मुख फिर मेरे नेत्रोंमें प्रकट हो गया है क्या ? ऐसा लग रहा है ॥ २६ ॥

सफेद और निर्मल दाँतोंकी कान्तिसे सुन्दर यह ओष्ठमुद्रा वही (सीताकी ही) है, कर्णपाश भी वही (सीताका ही) है, यद्यपि नेत्र लाल और काले हैं, तथापि सौन्दर्य-गुण वही (सीताका ही) है ॥ २७ ॥

१. 'मुक्ता' इति पाठान्तरम् ।

(विचिन्त्य) तदेतत्प्राचेतसाध्युषितमरण्यं, यत्र किल देवी परित्यक्ता इयं चानयोराकृतिर्वयोऽनुभावश्च । यत्स्वतःप्रकाशान्यस्त्राणीति च । तत्रापि स्मरामि खलु तदपि चित्रदर्शनप्रासङ्गिकं शस्त्राभ्यनुज्ञानं प्रबुद्धं स्यात् । न ह्यसाम्प्रदायिकान्यस्त्राणि पूर्वेषामपि शुश्रुम । अयं विस्मयसंप्लवमानसुख-

कृष्णे, सीतायास्तु नीले एवेति भावः, तथापि = नेत्रयोर्भेदे सत्यपीति भावः, सौभाग्यगुणः = सौन्दर्यगुणः, स एव = एकरूप एव, स्वल्पांश एव भेदसद्भावात्सौन्दर्यादिगुणेषु अनयोर्बालकयोः सीतासादृश्यात्किमेतौ सीतातनुजाविति वितर्कः । अत्रैकस्य ओष्ठमुद्रादेरेकस्यासम्भवादसम्भवद्वस्तुसम्बन्धरूपा **निदर्शना** । इन्द्रवज्रोपेन्द्रवज्रयोः संमिश्रणादुपजातिर्वृत्तम् ॥ २७ ॥

तदेतदिति । प्राचेतसाध्युषितं = प्राचेतसेन = वाल्मीकिना, अध्युषितं = कृतनिवासम् , यत्र = यस्मिन्नरण्ये, देवी = सीता । अनयोः = कुशलवयोः, आकृतिः = आकारः, सीताया इव अवयवसंस्थानविशेष इति भावः । वयः = द्वादशवत्सरपरिमितमित्यर्थः, अनुभावश्च = प्रभावश्च, ईदृश इति शेषः । तमेव प्रतिपादयति—**यदिति** । अस्त्राणि = जृम्भकाणि, स्वतःप्रकाशानि = गुरूपदेशं विना ज्ञातानि, चित्रदर्शनप्रासङ्गिकं = चित्रदर्शने = आलेख्यविलोकने, प्रासङ्गिकं = प्रसङ्गानुप्रसक्तम् , चित्रदर्शनावसरोद्भूतमिति भावः । शस्त्राभ्यनुज्ञानं = 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ती'ति (पृ० २८) जृम्भकास्त्रप्राप्त्यनुमतिः, प्रबुद्धं स्यात् = प्रकटं भवेत् , इति स्मरामीति पूर्वेण सम्बन्धः । हि = यस्मात् , असाम्प्रदायिकानि = गुरूपदेशक्रमरहितानि, अस्त्राणि = जृम्भकाद्यस्त्राणि, पूर्वेषामपि = प्रचीनानामपि, मनुप्रभृतीनामपीति भावः । न शुश्रुम = न श्रुतवन्तः, वयमिति शेषः, उत्तमपुरुषे लिटोऽयं प्रयोगश्चिन्त्यः, यत्तु 'अत्यन्तापह्नवे लिड् वक्तव्य' इति लिट् इति केचित्तदपि चिन्त्यमत्यन्तापह्नवाभावात् । विस्मयसंप्लवमानसुखदुःखातिशयः = विस्मये = आश्चर्ये, संप्लवमानः = मज्जन् , सुख-

(विचार कर) यह वही वाल्मीकि ऋषिसे निवास किया गया वन है, जहांपर सीताका परित्याग किया गया था । इन दोनोंका यह आकार, यह अवस्था और यह प्रभाव है । जो कि इन दोनोंको जृम्भकास्त्र स्वतःप्रकाशित (गुरुके उपदेशके विना ही प्राप्त) हुए हैं । इस विषयमें मैं स्मरण करता हूँ कि चित्र देखनेके समयपर की गई अस्त्रप्राप्तिकी वह अनुमति प्रकट हो गई हो । पहलेके लोगोंमें भी गुरुके उपदेशके विना अस्त्र प्रकट नहीं हुए थे, ऐसा हमलोग सुनते थे । मेरे हृदयका यह विप्रलम्भ शृङ्गार सुख-दुःखके अतिशयको आश्चर्यमें डुबा देने-

दुःखातिशयो हृदयस्य मे विप्रलम्भः । यमाविति च भूयिष्ठमात्मसंवादः ।
जीवद्द्वयापत्यचिह्नो हि देव्या गर्भिणीभाव आसीत्[1] (सास्रम् ।)
परां कोटिं स्नेहे परिचयविकासादधिगते[2]
रहो विस्रब्धाया अपि सहजलज्जाजडदृशः ।

दुःखातिशयः = आनन्दकष्टप्रकर्षः, येन सः, एतादृशो मे = मम, हृदयस्य = चित्तस्य, विप्रलम्भः = विप्रलम्भशृङ्गारः । यमौ = यमजौ, आत्मसंवादः = आत्मनः = बुद्धेः, संवादः = संगतिः, भूयिष्ठं = प्रचुरतरं, यथा स्यात्तथेति क्रियाविशेषणम् , अस्तीति क्रियापदमध्याहार्यम् । कुशलवयोर्यमजत्वादेतौ सीतातनूजावित्यत्र मदीया बुद्धिः संगच्छते । कुत एतदिति प्रतिपादयति—**जीवेति ।** हि = यतः, देव्याः = सीतायाः, गर्भिणीभावः = गुर्विणीत्वं, जीवद्द्वयापत्यचिह्नः = जीवद्द्वयं = जीवद्वितयम् , यदपत्यं = संततिः, तस्य चिह्नं = लक्षणम् , यस्मिन् सः, एतादृश आसीत् = अभूत् ।

परामिति । स्नेहे परिचयविकासात् परां कोटिम् अधिगते रहो विस्रब्धाया अपि सहजलज्जाजडदृशः (सीतायाः) आदौ करतलपरामर्शकलया मया एव द्विधा गर्भग्रन्थिः ज्ञातः, तदनु कैः दिवसैः तया अपि ज्ञात इत्यन्वयः । स्नेहे = प्रेम्णि, परिचयविकासात् = परिचयस्य = संस्तवस्य, विकासात् = अतिशयात् , परां कोटिम् = अत्युत्कर्षम् , अधिगते = प्राप्ते सति, रहः = एकान्ते, पदमेतदव्ययं ज्ञेयम् । विस्रब्धाया अपि = विश्वस्ताया अपि, एतादृश एकान्तस्थाने न कोऽपि पश्येदिति जातविश्वासाया अपीति भावः । तथापि सहजलज्जाजडदृशः = सहजा = स्वाभाविकी, या लज्जा = व्रीडा, तया जडे = निश्चेष्टे, दर्शनासमर्थे इति

वाला हो गया है । ये दोनों जुड़वे भाई हैं, इससे भी बहुत कुछ बुद्धिका संवाद (मिलान) है । सीताका गर्भिणीभाव दो सन्तानोंका चिह्नवाला था । (आँखोंमें आँसू भरकर)—

परिचयके आधिक्यके कारण प्रेमके अतिशय उत्कर्षको प्राप्त होनेपर एकान्तमें विश्वासयुक्त होकर भी स्वाभाविक लज्जासे मूंदी हुई आँखोंवाली सीताके उदरमें कर-स्पर्शकी चातुरीसे

१. '''राकृतिर्वपुश्च । यदपि स्वतः'''णीति, तत्र विमृशामि अपि खलु तच्चित्र'''''' आतमुद्भूतं स्यात् । ''''''मपि अनुशुश्रुम । अयं च संप्लवमानमात्मानं सुखाति''''''यस्य मे विस्रम्भयते । भूयिष्ठञ्च मया द्विधा प्रतिपन्नो देव्या गर्भभार आसीत्' इति महान् पाठभेदो ग्रन्थान्तरेषु ।

१. 'पुरारूढे स्नेहे''''''सादुपचिते' इति पाठान्तरम् ।

मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥ २८ ॥

(रुदित्वा ।) तत्किमेतौ पृच्छामि केनचिदुपायेन ?

लवः—तात ! किमेतत् ?

बाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥ २९ ॥

यावत् , दृशौ = नेत्रे, यस्यास्तस्याः, लज्जानिमीलितलोचनायाः सीताया इति भावः, आदौ = प्रथमं, करतलपरामर्शकलया = करतलेन = पाणितलेन, यः परामर्शः = स्पर्शः, उदरस्येति शेषः, तस्य कलया = चातुर्येण । मया एव—रामेण एव, द्विधा = द्वाभ्यां प्रकाराभ्याम् , अपत्यद्वयप्रकारेणेत्यर्थः, अवस्थित इति शेषः । गर्भग्रन्थिः = भ्रूणबन्धः, ज्ञातः = विदितः, तदनु = तदनन्तरं, मज्ज्ञानानन्तरमिति भावः । कैः = कतिपयैः, दिवसैः = वासरैः, 'अपवर्गे तृतीया' इति तृतीया । तया अपि = सीतया अपि, ज्ञातः = विदितः । अतोऽपि इमौ मदीयौ तनयाविति तर्कयामीति भावः । अत्र 'मया, तये'त्यनयोः 'ज्ञात' इत्येकक्रियारूपधर्मेणाभिसम्बन्धात् **तुल्ययोगितालङ्कारः** । **शिखरिणी** वृत्तम् ॥ २८ ॥

रुदित्वेति । रुदित्वा=अश्रुविमोचनं कृत्वा, उपायेन=यत्नेन, छलेनेति भावः ।

बाष्पेति । जगन्मङ्गलं वः आननं बाष्पवर्षेण, अवश्यायावसिक्तस्य पुण्डरीकस्य चारुतां नीतम् इत्यन्वयः । जगन्मङ्गलं = लोककल्याणहेतुभूतम् , वः = युष्माकम् , आननं = वदनं, बाष्पवर्षेण = अश्रुवृष्ट्या, अवश्यायावसिक्तस्य = अवश्यायैः = तुषारैः, अवसिक्तस्य = कृतसेकस्य, 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' इत्यमरः । पुण्डरीकस्य = श्वेतकमलस्य, चारुतां = शोभां, नीतं = प्रापितम् , एतत् किमिति पूर्ववाक्येन सम्बन्धः । रोदनस्य को हेतुः ? इति भावः । अत्र मुखकर्तृके पुण्डरीकचारुतानयनेऽसम्भवति सादृश्यरूपार्थे वाच्यस्य पर्यवसानेन असम्भवद्वस्तुसम्बन्धरूपो **निदर्शनालङ्कारः** ॥ २९ ॥

पहले मैंने ही दो सन्तानोंवाली गर्भग्रन्थिको जान लिया, पीछे कई दिनोंके बाद उन्होंने (सीताने) भी जान लिया था ॥ २८ ॥

(रोकर) तब क्या किसी उपायसे इन दोनोंसे पूछूँ ?

लव—पिताजी ! यह क्या ?

जगत्का मङ्गलरूप आपका मुख, आंसूकी वृष्टिसे तुषारोंसे सींचे गये श्वेतकमलकी सुन्दरताको प्राप्त हुआ है ॥ २९ ॥

कुशः—अयि वत्स !

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः ?
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति ।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमेवं त्वं[1] पृच्छस्यनधिगतरामायण इव ॥ ३० ॥

विनेति । सीतादेव्या विना रघुपतेः किमिव दुःखं न हि ? हि प्रियानाशे कृत्स्नं जगत् अरण्यं भवति किल । स च स्नेहः तावान्, अयमपि वियोगो निरवधिः । त्वम् अनधिगतरामायण इव किम् एवं पृच्छसि ? इत्यन्वयः । सीतादेव्या विना = सीतादेवीं त्यक्त्वा, स्थितस्येति भावः । रघुपतेः = रामचन्द्रस्य, किमिव = किं वस्तु, दुःखं न = कष्टकारकं न, सीतावियुक्तस्य रामस्य सर्वमपि वस्तु दुःखायैवेति भावः । हि = निश्चयेन । हि = यतः, प्रियानाशे = प्रियायाः = दयितायाः, नाशे = अदर्शने, कृत्स्नं = सम्पूर्णं, 'विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्' इत्यमरः । जगत् = लोकः, अरण्यं = वनमयं, भवति = जायते, सर्वेषामपि जनानामिति शेषः । किल = निश्चयेन । स च = प्रागनुभूतः, स्नेहः = प्रेमा, तावान् = तत्परिमाणः, अपरिमित इति भावः । अयमपि = सम्प्रत्यनुभूयमानः, वियोगः = विरहः, निरवधिः = अवसानशून्यः, लोकापवादात् सीतायाः परित्यक्तत्वेनायं वियोगोऽवधेरियत्तया शून्योऽस्तीति भावः । त्वं = लवः, अनधिगतरामायण इव = अनधिगतम् = अविदितम्, रामायणं = तन्नामकं महाकाव्यम्, येन स इव, किं = किमर्थम्, एवं = 'किमेतत् बाष्पवर्षेणे' त्यादिरूपं, पृच्छसि = अनुयुङ्क्ते ? रामायणाऽऽख्यानकमधीतवतस्तवायं प्रश्नोऽयुक्त इति भावः । अत्र द्वितीयचरणस्थसामान्यार्थेन प्रथमचरणस्थविशेषार्थसमर्थनादर्थान्तरन्यासोऽलङ्कारः । 'जगदरण्यं भवती'त्यत्र 'परिणामश्च' तथा चानयोरङ्गाङ्गिभावेन सङ्करः । शिखरिणी वृत्तम् ॥ ३० ॥

कुश—अयि वत्स !

महारानी सीताके बिना रामचन्द्रको कौन-सा पदार्थ दुःखजनक नहीं है ? क्योंकि प्रियाका अभाव होनेपर संपूर्ण संसार जीर्ण (उजड़े हुए) वनके समान हो जाता है । वह प्रेम उस परिमाणका था और यह विरह अवधिशून्य है, तुम रामायण नहीं पढ़े हुएकी तरह क्यों ऐसा पूछ रहे हो ? ॥ ३० ॥

[1] 'किमित्येवम्' इति पाठान्तरम् ।

रामः—(स्वगतम् ।) अये, तटस्थ आलापः । कृतं प्रश्नेन । मुग्धहृदय ! कोऽयमाकस्मिकस्ते संप्लवाधिकारः ? एवं निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि । भवतु तावदन्तरयामि (प्रकाशम् ।) वत्सौ ! 'रामायणं रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः प्रशस्तिरादित्यवंशस्य' तत्कौतूहलेन यत्किंचिच्छ्रोतुमिच्छामि ।

कुशः—कृत्स्न एव सन्दर्भोऽस्माभिरावृत्तः, स्मृतिप्रत्युपस्थितौ तावदिमौ बालचरितस्यासाते द्वौ श्लोकौ ।

रामः—उदीरयतं वत्सौ !

राम इति । आलापः = भाषणं, तटस्थः = उदासीनः, सीतयाऽऽत्मसम्बन्धस्याद्योतक इति भावः । प्रश्नेन = अनुयोगेन, किं युवां सीतापुत्रावित्याकारेणेति भावः, कृतम् = अलम् । आकस्मिकः = अकस्माद्भवः, निष्कारण इति भावः । संप्लवाधिकारः = दूरगमनाधिकृतिः दुर्लभविषयमनोरथायासः किमर्थं इति यावत् । **'स्नेहपरिप्लवो विकार'** इति पाठे—प्रेमचञ्चला विकृतिरित्यर्थः । निर्भिन्नहृदयावेगः = निर्भिन्नः=आविर्भूतः, हृदयस्य=चित्तस्य, आवेगः=संभ्रमः, यस्य सः । अनुकम्पितः = अनुकम्पास्पदीकृतः । अन्तरयामि = प्रच्छादयामि । सरस्वतीनिष्यन्दः = सरस्वत्याः = वाण्याः, निष्यन्दः = द्रवः, आदित्यवंशस्य = सूर्यकुलस्य, प्रशस्तिः = चरित्रकीर्तनम् । कौतूहलेन = उत्कण्ठया ।

कुश इति । कृत्स्न एव = संपूर्ण एव, सन्दर्भः = ग्रन्थः, आवृत्तः = अभ्यस्तः, स्मृतिप्रत्युपस्थितौ=स्मृतौ = स्मरणे, प्रत्युपस्थितौ = विषयभूतौ ।

राम इति । उदीरयतम् = वदतम् , युवामिति शेषः ।

राम—(मन ही मन) अरे ! भाषण उदासीन है इसलिए प्रश्न निष्प्रयोजन है । मूर्ख हृदय ! तेरा यह क्या अकारण दूर जानेका अधिकार है ? इस तरह हृदयका संभ्रम प्रकट होनेसे बालकसे भी दयाका पात्र कियागया हूं । अस्तु । मनका आवेग छिपाता हूं । (प्रकाशभावसे) वत्स ! 'रामायण रामायण यह भगवान् वाल्मीकिकी वाणीका द्रव और सूर्यवंशका चरित्र कीर्तन है' ऐसा सुना जाता है, इस कारण कौतूहलसे कुछ सुननेकी इच्छा करता हूं ।

कुश—हम लोगोंने संपूर्ण ग्रन्थका ही अभ्यास किया है, इस समय बालचरित्रके ये दो श्लोक स्मरणमें उपस्थित हैं ।

राम—वत्स ! कहो ।

कुशः—

प्रिया तु सीता रामस्य दाराः पितृकृता इति ।
गुणै रूपगुणैश्चापि प्रीतिर्भूयोऽप्यवर्धत ॥ ३१ ॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् ।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम् ॥ ३२ ॥

प्रियेति । प्रिया सीता रामस्य पितृकृता दारा इति, गुणैः रूपगुणैश्चापि प्रीतिः भूयोऽपि अवर्धत इत्यन्वयः । प्रिया = वल्लभा, सीता = जनकनन्दिनी, रामस्य = रामचन्द्रस्य, पितृकृताः पित्रा जनकेन, कृताः=दत्ताः, मन्त्रोच्चारणपुरःसरं प्रतिपादिता इति भावः । दाराः = पत्नी, 'भार्या जायाऽथ पुंभूम्नि दाराः' इत्यमरः, इति = अनेन हेतुना, तथा गुणैः = शीलादिभिः, रूपगुणैश्च = सौन्दर्यरूपगुणैश्च, सीताया इति शेषः, अपि = पादपूरणार्थकमव्ययम्, प्रीतिः = प्रेमा, सीतायामिति शेषः, भूयोऽपि = पुनरपि, अवर्द्धत = ववृधे । पुस्तकान्तरेषु तु—

प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः ।
प्रियभावः स तु तया स्वगुणैरेव वर्द्धितः ॥ ३१ ॥

इति पाठान्तरं तत्र—सीता महात्मनो रामस्य प्रकृत्या एव प्रिया आसीत्, स तु प्रियभावः तया स्वगुणैः एव वर्द्धित इत्यन्वयः । सीता = जानकी, महात्मनः = महानुभावस्य, रामस्य = रामचन्द्रस्य, प्रकृत्या एव = स्वभावेनैव, प्रिया = अभीष्टा, 'अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ।' इत्यमरः । आसीत् = अभवत् । स तु = प्रागनुभूतस्तु, प्रियभावः = अभीष्टत्वं, तया = सीतया, स्वगुणैः एव=विनयाज्ञापालनदयादाक्षिण्यप्रभृतिभिरात्मगुणैः एव, वर्द्धितः=एधित इत्येवं व्याख्येयम् ॥३१॥

रामोऽपि सीताया अभीष्टोऽभूदिति प्रतिपादयति—

तथैवेति । रामः तथा एव सीतायाः प्राणेभ्यः अपि प्रियः अभवत्, तु हृदयम् एव परस्परं प्रीतियोगं जानाति इत्यन्वयः ।रामः = रामचन्द्रः, तथा एव= तेन प्रकारेणैव, सीता यथा रामस्य प्रिया तथैवेति भावः । सीतायाः = जानक्याः प्राणेभ्योऽपि = असुभ्योऽपि, प्रियः = अभीष्टतरः, अभवत्=आसीत् । तु = पुनः, हृदयम् एव = सीतारामयोश्चित्तम् एव, न त्वन्य इति भावः, एवकारेण सीता-

कुश—प्रिया सीता मन्त्रोच्चारणके साथ जनक महाराजसे प्रतिपादित रामकी पत्नी थी, इस कारणसे शील आदि सौन्दर्यरूप गुणोंसे भी सीतामें प्रीति और भी बढ़ी हुई थी । ३१ ।
राम उसी तरहसे सीताके प्राणोंसे भी अधिक प्रिय थे, परन्तु हृदय ही परस्परका प्रेम-सम्बन्ध जानता है ॥ ३२ ॥

रामः-कष्टमतिदारुणो हृदयमर्मोद्घातः। हा देवि ! एवं किलैतदासीत् ! अहो निरन्वयविपर्यासविप्रलम्भस्मृतिपर्यवसायिनस्तावकाः संसारवृत्तान्ताः।

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः ?
क्व वाऽन्योन्यप्रेम ? क्व च नु गहनाः कौतुकरसाः ?।

रामयोरपि हृदयव्यतिरेकेण स्वप्रीतिज्ञानाभावः प्रतिपाद्यते, परस्परं = मिथोभूतं, प्रीतियोगं = प्रेमसम्बन्धं, जानाति = वेत्तीत्यर्थः। अत्र **आर्थी परिसङ्ख्याऽलङ्कारः॥ ३२॥**

राम इति। हृदयमर्मोद्घातः हृदयमेव मर्म = सन्धिस्थानम्, तस्य उद्घातः= प्रहारः, अतिदारुणः = अतिशयकठोरः। एतत्=इदं वर्णनम्, एवं किल = एतादृशं किल, अस्माकं प्राचीनस्थितेरनुरूपमेतद्वर्णनमिति भावः। तावकाः = त्वदीयाः, संसारवृत्तान्ताः = संसारोदन्ताः, निरन्वयविपर्यासविप्रलम्भस्मृतिपर्यवसायिनः = निरन्वयः = निःसम्बन्धः, आकस्मिक इत्यर्थः, अहेतुक इति यावत्, यो विपर्यासः = अवस्थान्तरम्, तेन ये विप्रलम्भस्मृती = वियोगस्मरणे, तत्पर्यवसायिनः = तद्विषयतामात्रवन्तः।

क्वेति। निरतिशयविस्रम्भबहुलः तावान् आनन्दः क्व ? वा अन्योन्यप्रेम क्व ? गहनाः कौतुकरसाश्च क्व नु ? सुखे वा दुःखे वा हृदययोः तत् ऐक्यं क्व नु खलु ? तथापि पाप एष प्राणः स्फुरति न तु विरमति इत्यन्वयः। निरतिशयविस्रम्भबहुलः = निरतिशयः = निर्गतोऽतिशयो यस्मात्, अत्यधिक इति भावः, यो विस्रम्भः = विश्वासः, तेन बहुलः = अधिकः, तावान् = तत्प्रमाणः, अपरिमेय इति भावः। आनन्दः = हर्षः, क्व कुत्र, गत इति शेषः। वा अथवा, अन्योन्यप्रेम = परस्पराश्रितः प्रणयः, क्व = कुत्र गतः ?, '**क्व तेऽन्योन्यं यत्ना**' इति पाठे—ते = प्रागनुभूताः, अन्योन्यं = परस्परं, यत्नाः = प्रीतिसंपादनप्रयासाः, क्व= कुत्र गता इति भावः। गहनाः = अगाधाः, कौतुकरसाश्च = क्रीडानुरागाश्च, क्व

राम—कष्ट है। हृदयरूप सन्धिस्थानका प्रहार अतिशय कठोर है। हा देवि ! यह वैसा ही था। अहो ! अहेतुक दूसरी दशासे वियोग और स्मरणमें पर्यवसित होनेवाले तुम्हारे संसारके वृत्तान्त हैं।

अत्यधिक विश्वाससे अधिक अपरिमेय आनन्द कहाँ ! अथवा परस्परका वह प्रेम कहाँ !

सुखे वा दुःखे वा क नु खलु तदैक्यं हृदययो-
स्तथाप्येव प्राणः स्फुरति, न तु पापो विरमति ॥३३॥

भोः कष्टम् !

प्रियागुणसहस्राणां क्रमोन्मीलनतत्परः ।
य एव दुःसहः कालस्तमेव स्मारिता वयम् ॥ ३४ ॥
तदा किंचित्किंचित्कृतपदमहोभिः कतिपयै-

नु = कुत्र गता नु, खलु = निश्चयेन । सुखे वा = प्रमोदे वा, दुःखे वा = कष्टे वा, हृदययोः = चित्तयोः, मम सीतायाश्चेति शेषः, तत् = प्रागनुभूतम्, ऐक्यम् = एकत्वम्, अभिन्नत्वमिति भावः । क नु खलु = कुत्र गतं नु खलु ? तथापि=एतेषु सर्वेषु गतेष्वपीति भावः, पापः = कल्मषयुक्तः, दुःखस्य पापफलत्वात्पाप इति कथनं संगच्छते, एषः = अयं, प्राणः = हृदयवायुः, स्फुरति = संचलति, न तु विरमति = न तु नश्यति, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । एतादृशविप्रलम्भे वेदनामर्पणापेक्षया मरणमेव मे वरमिति भावः । **शिखरिणी** वृत्तम् ॥ ३३ ॥

प्रियेति । प्रियागुणसहस्राणां क्रमोन्मीलनतत्परो य एव कालो दुःसहः, वयं तम् एव स्मारिता इत्यन्वयः । प्रियागुणसहस्राणां = प्रियायाः=सीतायाः, गुणानां = सौन्दर्यसौजन्यादीनाम्, सहस्राणि = दशशत्यः, तेषाम्, क्रमोन्मीलनतत्परः = क्रमेण = अनुक्रमेण, उन्मीलनतत्परः = प्रकाशनासक्तः, **'एकोन्मीलनपेशलः'** इति पाठान्तरे—एकं = मुख्यम्, यत् उन्मीलनं, तत्र पेशलः = मधुर इत्यर्थः । य एव, कालः = समयः, दुःसहः = दुःखेन सोढुं शक्यः, विरहावस्थायां स्मर्तुमशक्य इति भावः । वयम् = अत्र 'अस्मदो द्वयोश्च' इति बहुवचनम् । तम् एव = पूर्वोक्तं दुःसहसमयमेव, स्मारिताः = तद्विषयकस्मरणवन्तः कृता इति भावः । अतो महाकष्टमिति तात्पर्यम् ॥ ३४ ॥

तदेति । यत्र वयःस्नेहाकूतव्यतिकरघनो मदनो हृदि, प्रगल्भव्यापारो वपुषि

अगाध क्रीडाका अनुराग कहाँ ? सुखमें अथवा दुःखमें दोनों हृदयोंकी वह एकता कहां ? तो भी पापपूर्ण यह प्राणवायु चल रहा है, नष्ट नहीं होता है ॥ ३३ ॥

हाय ! कष्ट है !

प्रियाके हजारों गुणोंके क्रमसे प्रकाशनमें तत्पर जो समय ही दुःसह (दुःखसे सहा जानेवाला) है, हमको उसीकी याद आ रही है ॥ ३४ ॥

जिस समय तारुण्य, प्रेम और विशिष्ट विषयमें अभिप्रायके सम्बन्धसे गाढ कामदेव

स्तदेतद्विस्तारि स्तनमुकुलमासीन्मृगदृशः ।
वयःस्नेहाकूतव्यतिकरघनो यत्र मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धश्च वपुषि ॥३५॥

लवः—अयं तु चित्रकूटवर्त्मनि मन्दाकिनीविहारे सीतादेवीमुद्दिश्य रघुपतेः श्लोकः—

च मुग्धः स्फुरति, तदा किञ्चित्किञ्चित्कृतपदं मृगदृशः तत् स्तनमुकुलं कतिपयैः अहोभिः ईषद्विस्तारि आसीत् इत्यन्वयः । तत्कालस्य दुःसहत्वं विवृणोति तदेति । यत्र = यस्मिन् काले, वयःस्नेहाकूतव्यतिकरघनः = वयसः = अवस्थायाः तारुण्यस्येति भावः, स्नेहस्य = अनुरागस्य, आकूतस्य = विशिष्टविषयाभिप्रायस्य, व्यतिकरः = सम्बन्धः, तेन घनः = सान्द्रः, एतादृशो मदनः = कामदेवः, हृदि = मनसि, प्रगल्भव्यापारः = प्रगल्भः = प्रौढः, व्यापारः = क्रिया, यस्य सः, तादृशः । तथा वपुषि च = शरीरे च, मुग्धः = नातिप्रौढः, लज्जयेति भावः, एतादृशः सन् स्फुरति = वर्तते, तदा = तस्मिन्नवसरे, किञ्चित्किञ्चित् = शनैः शनैः, कृतपदं = विहितस्थानं, मृगदृशः = हरिणनयनायाः, सीताया इत्यर्थः । तत् = प्रागनुभूतं, स्तनमुकुलं = कुचकुड्मलं, कतिपयैः= कैश्चित्, अहोभिः = दिवसैः, ईषद्विस्तारि = अल्पविस्तारशीलम् , आसीत्=अभवत्, यौवनारम्भे मन्मथो हृदये प्रौढत्वेनाविर्भवति, परं मुग्धत्वाच्छरीरे न तथाविधः प्रौढो भवतीति भावः । अत्र पूर्वार्द्धे आसीदिति भूतकालनिर्देशः, उत्तरार्द्धे च स्फुरतीति वर्तमानकालनिर्देशस्ततश्च विरहाकुलत्वाद्रामस्य चित्तभ्रान्तिर्लक्ष्यते । औचित्याच्छ्लोकोऽयं रामस्याऽऽत्मगतत्वेन पठित इति प्रतीयते । अत्र एकस्य मदनस्य हृद्वपुर्गामित्वात्पर्यायोऽलङ्कारः । शिखरिणी वृत्तम् ॥ ३५ ॥

लव इति । चित्रकूटवर्त्मनि = चित्रकूटपर्वतमार्गे, मन्दाकिनीविहारे = गङ्गातटक्रीडायाम् ।

हृदयमें प्रौढ क्रियावाला होकर और शरीरमें लज्जाके कारण प्रौढ न होकर रहता है, उस समय धीरे-धीरे स्थान लेनेवाला हरिणनयना सीताका वह कुड्मलसदृश पयोधर कुछ दिनोंके अनन्तर कुछ विस्तारवाला हो गया था ॥ ३५ ॥

लव—चित्रकूट पर्वतके मार्गमें गङ्गाजलकी क्रीडामें महारानी सीताको उद्देश्य करके रघुनाथका यह श्लोक है—

त्वदर्थमिव विन्यस्तः शिलापट्टोऽयमायतः ।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केसरः ॥ ३६ ॥

रामः—(सलज्जास्मितस्नेहकरुणम् ।) अति हि नाम मुग्धः शिशुजनः विशेषतस्त्वरण्यचरः । हा देवि ! स्मरसि वा तस्य तत्समयविस्रम्भाति-प्रसङ्गस्य ?

श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनी-

त्वदर्थमिति । अयम् आयतः शिलापट्टः त्वदर्थं विन्यस्त इव, यस्य अभितः अयं केसरः पुष्पैः प्रवृष्ट इव इत्यन्वयः । अयं = पुरःस्थितः, आयतः = दीर्घः, शिला-पट्टः = पाषाणपट्टः, त्वदर्थं = तवोपवेशनार्थमिति भावः, विन्यस्त इव = स्थापित इव, अस्तीति शेषः । यस्य = शिलापट्टस्य, अभितःपदप्रयोगेऽपि द्वितीयाऽभाव आर्षः, अभितः = सर्वतः, अयं = पुरःस्थितः, केसरः = बकुलवृक्षः, 'अथ केसरः बकुलः' इत्यमरः, पुष्पैः = कुसुमैः, प्रवृष्ट इव = प्रारब्धवृष्टिरिव, 'आदिकर्मणि क्तः कर्तरि चे'ति कर्तरि क्तः, अस्तीति शेषः, अतोऽत्र त्वमुपविशेति भावः । 'अयं श्लोको रामायणलेखकैः प्रभ्रंशित इति वदन्ति' इति । अत्र द्वयोरुत्प्रे-क्षयोः सङ्करः ॥ ३६ ॥

राम इति । सलज्जास्मितस्नेहकरुणं = लवेन रहस्यप्रकाशनात् लज्जा=व्रीडा, लवस्य सरलतादर्शनात्स्मितम्=ईषद्धास्यं वात्सल्याद्धेतोः स्नेहः = प्रेम, एतादृशी प्रिय तमा त्यक्तेति करुणः = शोकः, तैः सहितं यथा तथेति क्रियाविशेषणम् । शिशुजनः = बालजनः, लव इति भावः । अति हि नाम = अत्यर्थं हि, मुग्धः = मूढः, वक्तव्यावक्तव्य-ज्ञानहीनः, सरल इति भावः । अरण्यचरः = वनचारी । तत्समयविस्रम्भातिप्रसङ्गस्य= तत्समये = त्वदर्थमित्यादिश्लोककथनकाले, यो विस्रम्भः = आवामृतेऽत्र कोऽपि नास्तीति ज्ञानजन्यो विश्वासः, तेन योऽतिप्रसङ्गः = भोगातिमात्रता, तस्य 'स्मरसी'-तिपदेन योगे 'अधीगर्थदयेशां कर्मणी'ति कर्मणि षष्ठी ।

श्रमाम्बिति । श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनीमरुत्तर-

यह दीर्घ पाषाणपट्ट (चट्टान) मानो तुम्हारे लिए स्थापित किया गया है; जिसके चारों तरफ यह बकुल वृक्ष फूलोंसे वृष्टिका प्रारम्भ-सा कर रहा है ॥ ३६ ॥

राम—(लज्जा, मन्दहास, वात्सल्य और शोकके साथ) बालक अतिशय मूढ (वक्तव्य और अवक्तव्यके ज्ञानसे रहित) और विशेषतः वनचर है। हा देवि ! उस समयमें विश्वाससे जो विशिष्ट घटना हुई थी, उसकी याद करती हो ?

श्रमसे उत्पन्न स्वेदजलसे ठण्डा होते हुए तथा मन्द गतिसे चलते हुए गङ्गाजीके वायु से

मरुत्तरलितालकाकुलललाटचन्द्रद्युति ।
अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशमुग्धं मुखम् ॥ ३७ ॥
(स्तम्भित इव स्थित्वा, सकरुणम् ।) अहो नु खलु भोः ।
चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः

लितालकाकुलललाटचन्द्रद्युति अकुङ्कुमकलङ्कितोज्ज्वलकपोलं निराभरणसुन्दरश्रवणपाशमुग्धं मुखम् उत्प्रेक्ष्यत इत्यन्वयः । श्रमाम्बुशिशिरीभवत् = श्रमेण = परिश्रमेण, जनितं यत् अम्बु = जलं, स्वेदजलमिति भावः, तेन शिशिरीभवत् = शीतलीभवत् ; प्रसृतमन्दमन्दाकिनीमरुत्तरलितालकाकुलललाटचन्द्रद्युति = प्रसृतः = प्रचलितः, मन्दः = मन्थरः, यो मन्दाकिनीमरुत् = गङ्गावातः, तेन तरलिताः = चञ्चलीकृताः, ये अलकाः = चूर्णकुन्तलाः, तैः आकुला = आच्छादिता, ललाटचन्द्रद्युतिः = चन्द्रसदृशभालकान्तिः, यस्य तत् । अकुङ्कुमकलङ्कितोज्ज्वलकपोलम् = अकुङ्कुमकलङ्कितौ = केसरेण अचिह्नितौ, अपि, उज्ज्वलौ = प्रकाशमानौ, कपोलौ = गण्डौ, यस्मिंस्तत् , 'कलङ्कोऽङ्कापवादयोः' इत्यमरः । तथा च निराभरणसुन्दरश्रवणपाशमुग्धं = निराभरणौ = भूषणरहितौ, तथापि सुन्दरौ = मनोहरौ, यौ=श्रवणपाशौ=प्रशस्तौ कर्णौ, ताभ्यां मुग्धं=सुन्दरम्, 'मुग्धः सुन्दरमूढयोः' इति विश्वः । **'सौम्य'**पदपाठेऽप्ययमेवार्थः, एतादृशं त्वदीयं, मुखं = वदनम् , उत्प्रेक्ष्यते = पुरतो दृश्यत इव । अत्रेवादिद्योतकपदाभावात्**प्रतीयमानोत्प्रेक्षा**, 'ललाटचन्द्रे'त्यत्र **रूपकं**, कपोलस्य कुङ्कुमेन अकलङ्कितत्वेऽपि उज्ज्वलत्वस्य तथा च श्रवणपाशयोर्निराभरणत्वेऽपि सुन्दरत्वस्य प्रतिपादनाच्च **विभावने** च, एषामङ्गाङ्गिभावेन **सङ्करः** । **पृथ्वी वृत्तम्** ॥ ३७ ॥

स्तम्भित इति । स्तम्भितः = जातस्तम्भः ।

चिरमिति । प्रवासे च चिरं ध्यात्वा ध्यात्वा निर्माय पुरतो निहित इव प्रिय-

चञ्चल अलकोंसे जिसके चन्द्रतुल्य ललाटकी कान्ति आच्छादित हो रही है ऐसा, केशरका लेप न होनेपर भी उज्ज्वल कपोलवाला और भूषणके बिना भी सुन्दर कर्णपाशोंसे मनोहर तुम्हारा मुख मानो प्रत्यक्ष देख रहा हूँ ॥ ३७ ॥

(स्तम्भितकी तरह होकर, शोकके साथ) ओह !

प्रियजनके प्रवासमें बहुत समय तक वारंवार चिन्ता करके कल्पनासे रचना कर सामने

प्रवासे चाश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति च कलत्रे ह्युपरते
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥ ३८ ॥

(नेपथ्ये ।)

वसिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः

जन आश्वासं न करोति (इति) न, खलु । कलत्रे उपरते जगत् जीर्णारण्यं भवति हि । तदनु हृदयं कुकूलानां राशौ पच्यत् इव इत्यन्वयः । प्रवासे च = प्रियजनस्य देशान्तरगमने च, चिरं = बहुकालं, ध्यात्वा ध्यात्वा=मुहुर्मुहुश्चिन्तयित्वा, निर्माय = कल्पनया रचयित्वा, पुरतः = अग्रतः, निहित इव=स्थापित इव = प्रियजनः=अभीष्टजनः, आश्वासं = सान्त्वनां, न करोति = न विदधाति, इति न = एतत् न, अपि तु आश्वासं करोत्येव, खलु = निश्चयेन, सीतायां जीवन्त्यां तदभावेऽपि सङ्कल्पतस्तद्रूपनिर्माणेनापि सान्त्वनायुक्त आसमिति भावः । परं कलत्रे = पत्न्याम् , उपरते = मृते सति, **'विकल्पव्युपरमे'** इति पाठे—विकल्पस्य = अलीकप्रियजनकल्पकस्य संकल्पस्य, व्युपरमे = निवृत्तौ सत्याम्, जगत् = लोकः जीर्णारण्यं = वृक्षादिरहितपुरातनवनसदृशं, भवति हि = जायते ननु, 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।' इति स्मरणादिति भावः । गृहिण्याः प्रियजनस्य वा नाशे तादृशः सङ्कल्पोऽपि न स्फुरति, येन कंचित्कालं सान्त्वना लभ्येतेति तात्पर्यम् । तदनु=जगतो जीर्णारण्यत्वे परिणतेरनन्तरमिति भावः, हृदयं = चित्तं, कुकूलानां = तुषाग्नीनां 'कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।' इत्यमरः, राशौ = समूहे, पच्यत इव = दह्यत इव, कर्मकर्तृलकारः, आतिदेशिकयगादयः । पत्नीनाशे हृदयं पुटपाकवदत्यर्थं तप्यत इति भावः । **अत्रोत्प्रेक्षाद्वयं**, जगज्जीर्णारण्यमित्यत्र **व्यस्तरूपकं** चेत्येषां मिथोऽनपेक्षया स्थितेः **संसृष्टिः** । **शिखरिणी** वृत्तम् ॥ ३८ ॥

वसिष्ठ इति । अरुन्धत्या सह एव वसिष्ठो वाल्मीकिः दशरथमहिष्यः अथ

स्थापित किये गयेकी तरह होकर प्रिय जन सान्त्वना नहीं करता है यह बात नहीं है अर्थात् सान्त्वना करता ही है । परन्तु पत्नीके लोकान्तरित होनेपर लोक वृक्षादि रहित पुराने वनके सदृश हो जाता है, उसके अनन्तर हृदय तुषानलकी राशिमें जैसे स्वयम् दग्ध हो जाता है ॥

(नेपथ्यमें)

अरुन्धतीके साथ वसिष्ठ, वाल्मीकि, दशरथकी महारानियाँ और जनक—सब और

सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः ।
जराग्रस्तैर्गात्रैरथ खलु सुदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसो विश्लथजटाः ॥ ३९ ॥

रामः—कथं भगवत्यरुन्धती वसिष्ठोऽम्बाश्च जनकश्चात्रैव । कथं खलु ते द्रष्टव्याः ? (सकरुणं विलोक्य ।) तातजनकोऽप्यत्रैवायात इति वज्रेणेव

जनकः शिशुकलहम् आकर्ण्य सभयाः (अत एव) त्वरितमनसः विश्लथजटाः (सन्तः) अथ सुदूराश्रमतया जराग्रस्तैः गात्रैः चिरेण आगच्छन्ति खलु इत्यन्वयः अरुन्धत्या = वसिष्ठपत्न्या, सह एव=सार्धम् एव, वसिष्ठः=तन्नामा ऋषिः, वाल्मीकिः = आदिकविः, दशरथमहिष्यः = कौसल्यादयः, अथ = अनन्तरम् , जनकः = विदेहाधिपतिः, शिशुकलहं = शिश्वोः = लवचन्द्रकेत्वोः, कलहम् = युद्धम् , आकर्ण्य = श्रुत्वा, सभयाः = भीतियुक्ताः, त्वरितमनसः = शीघ्रतायुक्तचित्ताः, विश्लथजटाः = विश्लथाः = शिथिलाः, जटाः = सटाः, येषां ते, तादृशाः सन्तः । अथ=अनन्तरं, सुदूराश्रमतया = सुदूरः = युद्धस्थलादतिदूरः, य आश्रमः = तपःस्थानम् , तस्य भावः सुदूराश्रमता, तया, आश्रमस्य युद्धस्थलाद् दूरवर्तित्वेनेति भावः । 'विश्लथजटा' इत्यत्र **'श्रमजडा'** इति पुस्तकान्तरपाठस्तत्र—श्रमेण=दूरमार्गगमनश्रान्त्या, जडाः=असमर्थाः, सन्त इत्यर्थः । जराग्रस्तैः = जरया = वार्द्धक्येन, ग्रस्तैः = व्याप्तैः, गात्रैः = शरीरैः, उपलक्षिताः सन्तः, 'इत्थंभूतलक्षणे' इति तृतीया, 'गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।' इत्यमरः, चिरेण = बहुकालेन, आगच्छन्ति = आयान्ति, खलु = निश्चयेन । बालयोर्लवचन्द्रकेत्वोः कलहप्रतिषेधनार्थं वसिष्ठादय आयान्तीति भावः । अत्र जराग्रस्तगात्रस्य चिरेणागमनं प्रति हेतुत्वात्पदार्थहेतुकं **काव्यलिङ्गमलङ्कारः । शिखरिणी** वृत्तम् ॥ ३९ ॥

राम इति । कथं = केन प्रकारेण, निर्दोषाया गर्भिण्या धर्मपत्न्याः परित्यक्ताऽहं कथमरुन्धत्यादीनां मुखं पश्यामीति भावः । तातजनकोऽपि = पितृसमः पूजनीयो जनकोऽपि, भार्यापितृत्वात्स्वपितृत्वोपचारः, वज्रेण इव = कुलिशघातेन

चन्द्रकेतुका युद्ध सुनकर भययुक्त और शीघ्रतायुक्त चित्तवाले होकर गतिवशतः शिथिल जटावाले होते हुए तथा आश्रम दूर होनेके कारणसे बुढ़ापेसे ग्रस्त शरीरोंसे (दूरतक चलनेसे थक जानेके कारण) बहुत विलम्ब करके आ रहे हैं ॥ ३९ ॥

राम—किस तरह भगवती अरुधन्ती, भगवान् वसिष्ठ, मातायें और जनकजी भी आ गये ? मैं कैसे उन लोगोंका दर्शन करूँ ? पिता जनकजी भी यहीं पर आ गये हैं, मन्द भाग्य-

ताडितोऽस्मि मन्दभाग्यः ।

सम्बन्धस्पृहणीयताप्रमुदितैर्ज्येष्ठैर्वसिष्ठादिभि-
रिष्टापत्यविवाहमङ्गलविधौ तत्तातयोः सङ्गमम् ।
पश्यन्नीदृशमीदृशः पितृसखं वृत्ते महावैशसे
दीर्ये किं न सहस्रधाऽहमथवा रामेण किं दुष्करम् ॥ ४० ॥

इव, ताडितोऽस्मि = प्रहृतोऽस्मि ।

सम्बन्धेति । सम्बन्धस्पृहणीयताप्रमुदितैः ज्येष्ठैः वसिष्ठादिभिः अपत्य-विवाहमङ्गलविधौ तत्तातयोः संगमं दृष्ट्वा महावैशसे वृत्ते ईदृशं पितृसखं पश्यन् ईदृशः अहं किं सहस्रधा न दीर्ये ? अथवा रामेण किं दुष्करम् ? इत्यन्वयः । सम्बन्धस्पृहणीयताप्रमुदितैः = सम्बन्धस्य = अपत्यानां विवाहसम्बन्धस्य, स्पृह-णीयतया = श्लाघ्यतया = प्रमुदितैः = अतिशयहर्षयुक्तैः, ज्येष्ठैः = श्रेष्ठैः, वसि-ष्ठादिभिः = वसिष्ठप्रभृतिभिः ऋषिभिः, आदिपदेन गौतमकौशिकादीनां परिग्रहः-तथा च तैरनुष्ठित इति शेषः । अपत्यविवाहमङ्गलविधौ = अपत्यानां = कन्यापुत्राणाम् , विवाहमङ्गलविधौ = पाणिग्रहणकल्याणकर्मणि, पुस्तकान्तरेषु तु 'ज्येष्ठै'रित्यत्र **'जुष्ट'** इति पाठस्तत्र—वसिष्ठादिभिर्जुष्टे = सेवित इत्यर्थः, एवं च 'विधौ' इत्यत्र **'महे'** इति पाठस्तत्र—उत्सव इत्यर्थः, 'मह उद्धव उत्सव' इत्यमरः । तत्तातयोः = तेषाम् = अपत्यानां, कन्यापुत्ररूपाणामित्यर्थः, यद्वा, तयोः = तथाविधयोः प्रसद्धयोः, तातयोः = पित्रोः, जनकदशरथयोरिति भावः, संगमं = संमेलनं, दृष्ट्वा = अवलोक्य, साम्प्रत तु = इदानीन्तु, महावैशसे वृत्ते = सीतात्यागरूपमहाहिंसायां जातायाम् , ईदृशम् = अतिशयदुःखितं, पितृसखं = तातमित्रं, दशरथसुहृदं जनकमिति भावः । ईदृशः = महावैशसनिमित्तभूतः, अहं = रामः, पश्यन् = अवलोकयन् किं = कथं, सहस्रधा = सहस्रप्रकारैः, न दीर्ये = न विदीर्णो भवामि ? कर्मकर्तृप्रयोगः । अथवा = पक्षान्तरे, विदीर्ण-त्वाभाव इति भावः, रामेण = मया, किं = किं कार्यं, दुष्करं = दुःखेन कर्त्तु

वाला मैं वज्रसे ताडितकी तरह हो गया हूं ।

सम्बन्धकी श्लाघ्यतासे अतिशय हर्षसम्पन्न श्रेष्ठ वसिष्ठ आदि ऋषियोंसे अनुष्ठित, सन्ता-नोंके विवाहोंकी माङ्गलिक विधिमें उनके पिता (जनक और दशरथ) का संमेलन देखकर—और इस समय महाहिंसाके होनेपर इस तरहका (हत्यारा) मैं क्यों हजारों प्रकारोंसे (टुकड़ोंमें) विदीर्ण नहीं होता हूँ, अथवा रामसे क्या दुष्कर है ? ॥ ४० ॥

(नेपथ्ये ।)

भो भोः ! कष्टम् ।

अनुभावमात्रसमवस्थितश्रियं सहसैव वीक्ष्य रघुनाथमीदृशम् ।
प्रथमप्रबुद्धजनकप्रबोधिता विधुराः प्रमोहमुपयान्ति मातरः ॥ ४१ ॥

रामः—

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।

शक्यं, यो नाम रामो निरपराधां गर्भवतीं धर्मपत्नीं सीतां श्वापदसङ्कुले विपिने परित्यक्तवान, तेन किं कार्यं दुष्करं, सर्वमपि क्रूरं कार्यं सुकरमतो जनकमुखावलोकनेनापि नाहं विदीर्णो भविष्यामीति भावः। अत्रार्थापत्ति-रलङ्कारः । **शार्दूलविक्रीडितं** वृत्तम् ॥ ४० ॥

अनुभावेति । अनुभावमात्रसमवस्थितश्रियम् ईदृशं रघुनाथं सहसा एव वीक्ष्य प्रथमप्रबुद्धजनकप्रबोधिता मातरः विधुराः प्रमोहमुपयान्ति इत्यन्वयः । अनुभावमात्रसमवस्थितश्रियम्=अनुभावमात्रेण = प्रभावमात्रेण, समवस्थिता = विद्यमाना, श्रीः = शोभा, यस्य तम् , ईदृशम् = एतादृशं, सहजप्रभावमात्रेण दर्शनीयं परं नितान्तकृशमिति भावः। रघुनाथं = रामचन्द्रं, सहसा एव = अतर्कितरूपेण एव, वीक्ष्य = दृष्ट्वा, प्रथमप्रबुद्धजनकप्रबोधिताः = प्रथमं = प्राक् , प्रबुद्धः = मूर्च्छोपगमात् प्राप्तसंज्ञः, **'प्रमूढ'** पदपाठे प्रमूढः = मूर्च्छितः, यो जनकः = विदेहाधिपतिः, तेन प्रबोधिताः = कृतप्रबोधाः, मातरः = जनन्यः, कौसल्यादय इति भावः, विधुराः = शून्येन्द्रियाः सत्यः, प्रमोहं = प्रकृष्टमूर्च्छाम् , उपयान्ति = प्राप्नुवन्ति । सीताविरहादतिशयकृशो रामः तेजोविशेषमात्रेण जनकादिभी रामोऽयमिति परिज्ञातः, ज्ञानोत्तरं च सर्वेऽपि मूर्च्छितास्ततश्च प्राक्प्रबुद्धेन जनकेन प्रबोधिता अपि राममातरः शोकावेगातिशयेन पुनः प्रकृष्टां मूर्च्छां प्राप्तवत्य इति भावः। **मञ्जुभाषिणी** वृत्तम् ॥ ४१ ॥

जनकानामिति । जनकानां रघूणां च यत् कृत्स्नं गोत्रमङ्गलं, तत्र अपि

(नेपथ्यमें)

ओह ! कष्ट है ।

प्रभावमात्रसे शोभासम्पन्न रामचन्द्रको अतर्कित भावसे ही देखकर पहले होशमें आये हुए जनकसे होशमें लाई गई कौसल्या आदि मातायें निश्चेष्ट होती हुई अतिशय मूर्च्छावस्थाको प्राप्त हो रही हैं ॥ ४१ ॥

राम—जनकवंश और रघुवंशमें उत्पन्न राजाओंकी जो सीता सम्पूर्ण रूपसे कुलके

तत्राप्यकरुणे पापे वृथा वः करुणा मयि ॥ ४२ ॥

यावत्संभावयामि । (इत्युत्तिष्ठति ।)

कुशलवौ—इत इतस्तातः ।

(सकरुणं परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति महाकविभवभूतिविरचित उत्तररामचरिते
कुमारप्रत्यभिज्ञानं नाम षष्ठोऽङ्कः ॥ ६ ॥

अकरुणे पापे मयि वः करुणा वृथा इत्यन्वयः । जनकानां = जनकवंश्यानां, रघूणां च = रघुवंश्यानां राज्ञां च, यत् = सीतारूपं वस्तु, कृत्स्नं = संपूर्णं, 'विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्' । इत्यमरः, गोत्रमङ्गलं = कुलकल्याणम् , आसीदिति शेषः । तत्र अपि = तस्मिन्नपि, जनकरघुवंश्यानां राज्ञां गोत्रमङ्गले सीतारूपे वस्तुन्यपीति भावः, अकरुणे = निर्दये, अकारणनिर्वासनेनेति भावः, (अतएव) पापे = पापयुक्ते, मयि = रामे, वः = युष्माकं, करुणा = दया, वृथा = व्यर्था, यातुके पापे दण्डविधानं समुचितं न तु दयाप्रदर्शनमिति भावः । अत्र पापं प्रति करुणाव्यर्थत्वाद् हेतोः पदार्थहेतुकं **काव्यलिङ्गमलङ्कारः** ॥ ४२ ॥

यावदिति । यावत् संभावयामि = अभ्युत्थानाभिवादनादिभिः सत्कारं करिष्यामि, अत्र 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट् । उत्तिष्ठति = उत्थानमभिनयति ।

कुशलवाविति । इतः = अत्र, आगच्छत्विति शेषः ।

इति **श्रीशेषराजशर्म**प्रणीतायामु**त्तररामचरित**व्याख्यायां **चन्द्रकला**भिधानायां **कुमारप्रत्यभिज्ञानं** नाम षष्ठोऽङ्कः ॥ ६ ॥

कल्याणस्वरूप थीं, उनपर भी निर्दय और पापयुक्त होनेवाले मुझ रामपर आप लोगोंकी दया व्यर्थ है ॥ ४२ ॥

अच्छा, मैं इन लोगोंका सत्कार करता हूँ । (ऐसा कहकर उठते हैं ।)

कुश और लव—पिताजी ! इधर आवें, इधर ।

(करुणाके साथ घूमकर सब चले जाते हैं ।)

यह '**कुमारप्रत्यभिज्ञान**'नामक छठां अङ्क समाप्त हुआ ॥ ६ ॥

सप्तमोऽङ्कः

(ततः प्रविशति लक्ष्मणः ।)

लक्ष्मणः—भोः, किं न खलु[1] भगवता वाल्मीकिना सब्रह्मक्षत्रपौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुरतिर्यङ्निकायः सचराचरो भूतग्रामः स्वप्रभावेण संनिधापितः। आदिष्टश्चाहमार्येण—'वत्स लक्ष्मण! भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः। गङ्गा[2]तीरमातोद्यस्थानमुपगम्य क्रियतां समाज-

---

लक्ष्मण इति। भोः = इयं हृदयं प्रति सम्बुद्धिः। भगवता = ऐश्वर्यादिसम्पन्नेन, सब्रह्मक्षत्रपौरजानपदाः = ब्रह्मभिः = ब्राह्मणैः, क्षत्रैः = क्षत्रियैः, पौरैः = नागरिकैः, जानपदैः = देशवासिजनैः, सहिताः, प्रजाः = जनान्, 'प्रजा स्यात् सन्ततौ जने' इत्यमरः। आहूय = आकार्य, कृत्स्न एव = समस्त एव, सदेवासुरतिर्यङ्निकायः = देवाः = इन्द्रादयोऽमराः, असुराः = बल्यादयो दैत्याः, तिर्यञ्चः = नागादयः, एतेषां निकायः = समूहः तेन सहितः, सचराचरः = चरैः = जङ्गमैः, अचरैः = स्थावरैश्च सहितः, भूतग्रामः = प्राणिसमूहः, स्वप्रभावेण = आत्मतपःशक्त्या, किं नु सन्निधापितः = कथं नु सन्निधिं प्रापितः? एतेन चराचराणां सकलप्राणिनामेकत्र स्थापनेन विस्मयो द्योत्यते। आर्येण = पूज्येन, रामचन्द्रेणेति भावः, आदिष्टः = आज्ञप्तः। अप्सरोभिः = उर्वशीप्रभृतिभिः, प्रयुज्यमानाम् = अभिनीयमानां, स्वकृतिम् = आत्मरचनां, नाटकरूपामिति शेषः। उपनिमन्त्रिताः = अभ्यर्थिताः, वयमिति शेषः। आतोद्यस्थानं = चतुर्विधवाद्यस्थानं, गङ्गातीरं = भागीरथीतटम्, उपगम्य=प्राप्य, समाजसन्निवेशः=

(अनन्तर लक्ष्मण प्रवेश करते हैं (

लक्ष्मण—अरे! भगवान् वाल्मीकिने हम लोगोंको तथा ब्राह्मण, क्षत्रिय, नागरिक और देशवासी जनोंके साथ प्रजाओंको बुलाकर संपूर्ण देवता, दैत्य और नाग आदिके साथ स्थावर-जङ्गमात्मक प्राणि-समूहको अपने प्रभावसे किस तरह इकट्ठा करलिया है। आर्य (रामचन्द्र) ने मुझे आज्ञा दी है कि–'वत्स लक्ष्मण! भगवान् वाल्मीकिने अप्सराओंसे अभिनय की जानेवाली अपनी रचना (नाटक)'को देखनेके लिए हम लोगोंको निमन्त्रित किया है। चार तरहके बाजाओंके स्थान गङ्गातटमें जाकर समाजका यथायोग्य स्थानविभाग कर लो'।

---

१. 'भोः, किंनु खलु इत्यस्य स्थाने 'भो भो' इत्येव क्वचित्पाठः।

२. 'तद्गङ्गा–' इति पाठान्तरम्।

संनिवेशः' इति । कृतश्च मर्त्यामर्त्यस्य भूतग्रामस्य समुचितस्थानसंनिवेशो मया । अयं तु—

राज्याश्रमनिवासोऽपि' प्राप्तकष्टमुनिव्रतः ।
वाल्मीकिगौरवादार्य इत एवाभिवर्तते ॥ १ ॥

(ततः प्रविशति रामः ।)

रामः—वत्स लक्ष्मण ! अपि स्थिता रङ्गप्राश्निकाः ?

लक्ष्मणः—अथ किम् ।

समाजस्य = सभायाः, संनिवेशः = यथोचितस्थानविभागः । मर्त्यामर्त्यस्य = मर्त्याश्च=मरणशीलाश्च, अमर्त्याश्च = मरणरहिताश्च, तेषां समाहारस्तस्य, भूतग्रामस्य=प्राणिसमुदायस्य, समुचितस्थानसंनिवेशः=समुचितस्थानस्य = अधिकारानुरूपस्थानस्य, संनिवेशः=प्रतिष्ठापनम् ।

राज्याश्रमेति । राज्याश्रमनिवासः अपि प्राप्तकष्टमुनिव्रतः आर्यः वाल्मीकिगौरवात् इत एव अभिवर्तत इत्यन्वयः । राज्याश्रमनिवासोऽपि = राज्यम्=भूमिपरिपालनात्मकं राजकर्म, एव आश्रमः = स्वच्छन्दाचारप्रतिबन्धको नियमविशेषः, तस्मिन् निवासः = स्थितिः यस्य सः, तादृशः सन्नपि, प्राप्तकष्टमुनिव्रतः=प्राप्तं= गृहीतम् , कष्टं = दुःखरूपम् , मुनिव्रतं = तपस्विव्रतं, ब्रह्मचर्यादिकमित्यर्थः, येन सः । आर्यः=पूज्यः, रामचन्द्र इत्यर्थः । वाल्मीकिगौरवात्=वाल्मीकेः=प्राचेतसस्य, गौरवात् = गुरुत्वबुद्धेर्हेतोः, इत एव = अस्मिन् स्थान एव, अभिवर्तते = आयाति । अत्र **विरोधाभासो**ऽलङ्कारः ॥ १ ॥

राम इति । रङ्गप्राश्निकाः = रङ्गस्य = नाट्यस्थानस्य, प्राश्निकाः = सामाजिकाः, '**प्रेक्षका**' इति पाठे-दर्शका इत्यर्थः । स्थिता अपि = कृतस्थितयः सन्ति किम् ? अपिः प्रश्नार्थकः ।

लक्ष्मण इति । अथ किम्=अङ्गीकारद्योतकमव्ययद्वयम् ।

मैं भी मनुष्य और देवरूप प्राणि-समूहका यथोचित स्थानविभाग कर चुका हूँ । ये—

राज्यरूप आश्रममें निवास करते हुए भी दुःखरूप मुनिव्रतको प्राप्त किये हुए आर्य (रामचन्द्रजी) वाल्मीकि ऋषिके गौरवसे इसी ओर आ रहे हैं ॥ १ ॥

(अनन्तर राम प्रवेश करते हैं ।)

राम—वत्स लक्ष्मण ! नाट्यस्थानके सामाजिक लोग उपस्थित हैं क्या ?

लक्ष्मण—जी हाँ ।

१. 'निवासे' इति पाठान्तरम् ।

रामः—इमौ पुनर्वत्सौ कुमारचन्द्रकेतुसमां प्रतिपत्तिं लम्भयितव्यौ।

लक्ष्मणः—प्रभुस्नेहप्रत्ययात्तथैव कृतम्। इदं चास्तीर्णं राजासनम्। तदुपविशत्वार्यः।

रामः—(उपविश्य।) प्रस्तूयतां भोः!

सूत्रधारः—(प्रविश्य) भगवान्भूतार्थवादी प्राचेतसः स्थावरजङ्गमं जगदाज्ञापयति—'यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं वचनामृतं करुणाद्भुतरसं च[1] किंचिदुपनिबद्धम्। तत्र काव्यगौरवादवधातव्यम्'इति।

राम इति। इमौ = सन्निधिस्थौ, वत्सौ = वात्सल्यास्पदे, कुशलवाविति भावः। कुमारचन्द्रकेतुसमां=कुमारचन्द्रकेतुना = चन्द्रकेतुनाम्ना कुमारेण, समां = तुल्याम्, 'तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्' इति तृतीया षष्ठी वा, ततः समासः, प्रतिपत्तिं = सम्मानं, लम्भयितव्यौ=प्रापयितव्यौ।

लक्ष्मण इति। प्रभुस्नेहप्रत्ययात् = प्रभोः = महाराजस्य, स्नेहेन = कुशलवयोः प्रदर्शितया प्रीत्या, यः प्रत्ययः=ज्ञानम्, तस्मात्। 'प्रत्ययोऽधीनशपथज्ञान-विश्वासहेतुषु।' इत्यमरः। तथैव=प्रभोरिच्छानुसरणमेव, कृतम् = अनुष्ठितम्। राजासनं = सिंहासनम्, आस्तीर्णं = स्थापितम्।

राम इति। प्रस्तूयताम् = अभिनय आरभ्यतामित्यर्थः।

सूत्रधार इति। भूतार्थवादी=भूतार्थं=सत्यम्, वदति = गदतीति तच्छीलः, 'सुप्यजातौ णिनिस्ताच्छील्य' इति णिनिः, प्राचेतसः = प्रचेतसः (वरुणस्य) अपत्यं पुमान् = वाल्मीकिः, आज्ञापयति = आदिशति। आर्षेण = ऋषिसम्बन्धिना, अलौकिकेनेति भावः, चक्षुषा = दृष्ट्या, समुद्वीक्ष्य=सम्यक्=अतिशयेन, उद्वीक्ष्य=दृष्ट्वा, पावनं=स्वदर्शनादन्येषां शुद्धिजननम्, करुणाद्भुतरसं = करुणाद्भुतौ रसौ,यस्मि स्तत्, एतादृशं किञ्चित् वचनामृतं = वचनम् = वचः, अमृतम् =

राम—वात्सल्यभाजन ये दो कुमार, कुमार चन्द्रकेतुके समान स्थानसे सम्मानित किये जायँ।

लक्ष्मण—महाराजके स्नेहके ज्ञानके कारण ऐसा ही किया गया है। यह सिंहासन स्थापित है। आर्य विराजमान हों।

राम—(बैठकर) आरम्भ करें।

सूत्रधार—(प्रवेशकर) सत्यवादी भगवान् वाल्मीकि चराचर जगत्को आज्ञा देते हैं—'हमने अलौकिक दृष्टिसे देखकर पवित्रकारक करुण और अद्भुत रसवाला अमृततुल्य वचनसे युक्त जो नाटक बनाया है, उसमें काव्यके गौरवसे आपलोगोंको ध्यान देना चाहिए।'

१. 'पावनकरुणाद्भुतरस'मिति पाठान्तरम्।

रामः—एतदुक्तं भवति । साक्षात्कृतधर्माणो महर्षयः । तेषामृतम्भराणि भगवतां परोरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्त इति न हि शङ्कनीयानि ।

(नेपथ्ये ।)

हा अज्जउत्त ! हा कुमार लक्खण ! एआइणिं असरणं आसण्णप्पसववेअणं अरण्णे हदासं सावदा अहिलसन्दि । हा ! दाणि मन्दभाइणी भाईरहीए अत्ताणं णिक्खिविस्सम् । (हा आर्यपुत्र ! कुमारलक्ष्मण ! एकाकिनीमशर-

पीयूषम् इव, 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति समासः, उपनिबद्धं= रचितम् । तत्र = वचनामृते, काव्यगौरवात्=काव्यस्य=रूपकस्वरूपस्य कविकर्मणः, गौरवात् = महनीयत्वात् , **'कार्यगौरवात्'** इति पाठेऽप्ययमेवार्थः, अवधातव्यम् = अवधानं कर्तव्यं, सावधानैर्भवितव्यमिति भावः ।

राम इति । एतत् = इदम् , उक्तं = कथितम् । साक्षात्कृतधर्माणः = साक्षात्कृतः = प्रत्यक्षीकृतः, धर्मः = अलौकिकश्रेयःसाधनरूपः, यैस्ते, "धर्मादनिच् केवलात्" इति समासान्तोऽनिच् । ऋतं = सत्यं, 'भराणि' इति पदेन योगेऽपि 'कर्तृकर्मणोः कृति' इत्यस्य अनित्यत्वान्न षष्ठीति वीरराघवः, भराणि = बिभ्रतीति भराणि, पचाद्यच् , धारकाणीत्यर्थः । पुस्तकान्तरेषु **'अमृतसाराणी'**ति पाठस्तस्य अमृतमिव = पीयूषमिव, सारः = स्थिरांशः, येषां तानीत्यर्थः । परोरजांसि= रजसः पराणि, रज इति तमसोऽप्युपलक्षणं, केवलसत्त्वमयानीति भावः, 'राजदन्तादिषु परम्' इति रजःपदस्य परनिपातः, पारस्करादित्वात्सुट् । प्रज्ञानानि = प्रकृष्टतत्त्वबोधाः, क्वचित् = कुत्रचित् , भूते भविष्यति वर्तमाने वा काल इत्यर्थः, न व्याहन्यन्ते = न कुण्ठितानि भवन्ति, इति = अस्माद्धेतोः, न हि शङ्कनीयानि= शङ्कायोग्यानि न भवन्तीति शेषः ।

हेति । एकाकिनीम् = एकाम् , 'एकादाकिनिच्चासहाये' इत्याकिनिच् , तदन्तात् 'ऋन्नेभ्यो ङीप्' इति ङीप् 'एकाकी त्वेक एकक' इत्यमरः । अशरणाम्=अविद्यमानम्=अवर्तमानं, शरणं=रक्षिता, यस्यास्तां, रक्षकरहितामित्यर्थः । आसन्नप्रसववेदनाम्=आसन्ना=समीपागता, प्रसववेदना=प्रसूतिकष्टं, यस्यास्ताम् ,

राम— यह कहा जाता है । महर्षियोंने धर्मका प्रत्यक्ष कर लिया है । ऐश्वर्यसम्पन्न उनके, सत्यके धारण करनेवाले और रजोगुणसे परवर्ति ज्ञान किसी कालमें भी व्याहत नहीं होते हैं; इस कारणसे वे शङ्काके योग्य नहीं हैं ।

(नेपथ्यमें ।)

हा आर्यपुत्र ! कुमार लक्ष्मण ! अकेली, रक्षकसे रहित, उपस्थित प्रसव-वेदनावाली और

णामासन्नप्रसववेदनामरण्ये हताशां श्वापदा अभिलषन्ति। हा! इदानीं मन्दभाग्या भागीरथ्यामात्मानं निक्षिपामि।)

लक्ष्मणः—कष्टं बतान्यदेव किमपि।

सूत्रधारः—विश्वम्भराऽऽत्मजा देवी राज्ञा त्यक्ता महावने।
प्राप्तप्रसवमात्मानं गङ्गादेव्यां विमुञ्चति॥ २॥

(इति निष्क्रान्तः।)

प्रस्तावना।

हताशां = निराशां, व्यर्थमनोरथामिति भावः। श्वापदाः = दुष्टपशवः, व्याघ्रादय इति भावः। अभिलषन्ति=भक्षयितुमिच्छन्ति। मन्दभाग्या=अल्पभाग्या, अहमिति शेषः। भागीरथ्यां = गङ्गायाम्, आत्मानं=शरीरम्, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।' इत्यमरः, निक्षिपामि=पातयामि।

लक्ष्मण इति। अन्यदेव = आशास्यविषयादपरमेव, किमपि = अकथनीयमिति भावः।

विश्वम्भरेति। विश्वम्भरात्मजा देवी राज्ञा महावने त्यक्ता प्राप्तप्रसवम् आत्मानं गङ्गादेव्यां विमुञ्चति इत्यन्वयः। विश्वम्भरात्मजा = विश्वं बिभर्तीति विश्वम्भरा=पृथ्वी, 'संज्ञायां भृतृवृजिधारिसहितपिदमः' इति खच्, ततः 'अरुर्द्विषदजन्तस्य मुम्' इति मुम्, 'भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा।' इत्यमरः, तस्याः=पृथिव्याः, आत्मजा=पुत्री, देवी=महाराज्ञी, सीतेति भावः। राज्ञा= नृपेण, रामचन्द्रेणेति भावः, महावने = निबिडारण्ये, त्यक्ता = परित्यक्ता, प्राप्तप्रसवं = प्राप्तः = लब्धः, प्रसवः=प्रसूतिकालः, यस्य तम्, एतादृशम्, आत्मानं= शरीरं, गङ्गादेव्यां = भागीरथीदेव्यां, गङ्गाजलप्रवाह इति भावः, विमुञ्चति = पातयति॥ २॥

प्रस्तावनेति। प्रस्तावना=इयमन्तर्नाटकस्य प्रस्तावना।

जङ्गलमें आशासे शून्य मुझको व्याघ्र आदि हिंस्र जन्तु खानेकी इच्छा कर रहे हैं। हाय! इस समय मन्द भाग्यवाली मैं अपने शरीरको गङ्गाजीमें डालती हूँ।

लक्ष्मण—कष्ट है! यह और ही कुछ है।

सूत्रधार—पृथ्वीकी पुत्री महारानी सीता महाराज रामसे महावनमें परित्यक्त होती-हुई प्रसववेदनाके उपस्थित होनेपर अपने शरीरको गङ्गाके प्रवाहमें डाल देती हैं॥ २॥

(ऐसा कहकर चला जाता है।)

प्रस्तावना।

रामः—(सावेगम्) देवि ! देवि ! लक्ष्मणमवेक्षस्व ।

लक्ष्मणः—आर्य ! नाटकमिदम् ।

रामः—हा देवि ! दण्डकारण्यवासप्रियसखि ! एष ते रामाद्विपाकः ।

लक्ष्मणः—आर्य ! आश्वस्य दृश्यताम् । प्रबन्धस्त्वार्षः ।

रामः—एष सज्जोऽस्मि वज्रमयः ।

(ततः प्रविशति उत्सङ्गितैकैकदारकाभ्यां पृथिवीगङ्गाभ्यामालम्बिता

राम इति । सावेगं = सभयम् । अवेक्षस्व = विलोकय, मयि सापराधेऽपि लक्ष्मणं विलोक्य त्वया गङ्गाप्रवाहे पतनं नैव करणीयमिति भावः । **'क्षणमपेक्षस्वे'** ति पाठे—क्षणं = कञ्चित्कालं यावत् , 'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ।' इत्यमरः, अपेक्षस्व = प्रतीक्षस्व, मामिति शेषः । अहमपि त्वदनुसारी भवामि, त्वद्रक्षणं वा करिष्यामीति भावः ।

लक्ष्मण इति । इदम् = उच्यमानगङ्गापतनं, नाटकं = नाटकप्रयोज्याभिनयस्वरूपम् , न वास्तवमिति भावः ।

राम इति । दण्डकारण्यवासप्रियसखि = दण्डकारण्ये=जनस्थाने, यो वासः= निवासः, तस्मिन् हे प्रियसखि = अभीष्टसहचरि, एतया सम्बुद्धया मदीयवनवासे त्वया साहचर्यं कृतं, परमेकाकिनीं निरपराधां त्वां वने त्यक्त्वा मया त्वत्साहचर्यं कर्तुं न पारितमिति ध्वन्यते । विपाकः = परिणामः, मत्कर्तृकेयं त्वदीया दुरवस्था संजातेति भावः ।

लक्ष्मण इति । आश्वस्य=आश्वासं कृत्वा, दुःखं लघूकृत्येति भावः । प्रबन्धस्तु= दृश्यकाव्यरूपा रचना तु, आर्षः = ऋषिसम्बन्धी, ऋषिप्रणीत इति भावः ।

राम इति । वज्रमयः = कुलिशमयः, अतिकठोर इति भावः । सज्जोऽस्मि= तत्परोऽस्मि, सीताविपत्तिनाटकं द्रष्टुमिति शेषः ।

तत इति । उत्सङ्गितैकैकदारकाभ्याम् = उत्सङ्गितः = अङ्केन गृहीतः, एकैकः=

राम—(भयके साथ) देवि ! देवि ! लक्ष्मणको देखो ।

लक्ष्मण—आर्य ! यह नाटक है ।

राम—हा देवि ! दण्डकारण्यनिवासमें प्रियसखि ! रामसे यह तुम्हारा परिणाम हुआ ।

लक्ष्मण—आर्य ! आश्वस्त होकर देखिए । यह ऋषिकी रचना है ।

राम—यह मैं वज्रमय होता हुआ तत्पर हूँ ।

(अनन्तर एक एक बालकको गोदमें लिये हुई पृथिवी और गङ्गाके द्वारा सम्हाली गई

प्रमुग्धा सीता)

रामः—वत्स ! असंविज्ञातपदनिबन्धने तमसीवाहमद्य प्रविशामि, धारय माम् ।

देव्यौ—

समाश्वसिहि कल्याणि ! दिष्ट्या वैदेहि ! वर्धसे ।
अन्तर्जले प्रसूतासि रघुवंशधरौ सुतौ ॥ ३ ॥

सीता—(आश्वस्य) दिट्ठिआ दारए पसूदह्मि । हा अज्जउत्त ! (दिष्ट्या दारकौ प्रसूतास्मि । हा आर्यपुत्र !)

लक्ष्मणः—(पादयोर्निपत्य ।) आर्य ! दिष्ट्या वर्धामहे । कल्याणप्ररोहो

एकः एकः, दारकः = बालकः, याभ्यां ताभ्याम्, आलम्बिता=धारिता, प्रमुग्धा= मूर्च्छातिशययुक्ता ।

राम इति । असंविज्ञातपदनिबन्धने=असंविज्ञातम् = अविदितम्, पदनिबन्धनं = स्थानसम्बन्धः, पादन्यासो वा, यस्मिंस्तादृशे, तमसि=अन्धकारे । धारय= अवलम्बस्व ।

समाश्वसिहीति । हे कल्याणि वैदेहि ! समाश्वसिहि ! दिष्ट्या वर्द्धसे, अन्तर्जले रघुवंशधरौ सुतौ प्रसूता असि इत्यन्वयः । हे कल्याणि = हे मङ्गलवति ! वैदेहि = सीते !, समाश्वसिहि = समाश्वस्ता भव, दिष्ट्या=भाग्येन, वर्द्धसे = एधसे, (यत्) अन्तर्जले = जले, विभक्त्यर्थेऽव्ययीभावः, 'तृतीयासप्तम्योर्बहुलम्' इत्यत्र बहुलग्रहणादमभावः । रघुवंशधरौ = रघुकुलधारकौ, सुतौ = पुत्रौ, प्रसूता = उत्पादितवती, असि = वर्तसे । अत्र वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ३ ॥

सीतेति । प्रसूता = उत्पादितवती, कर्तरि क्तः ।

लक्ष्मण इति । कल्याणप्ररोहः=कल्याणः = शुभकरः, प्ररोहः=अङ्कुरः, यस्य

मूर्च्छित सीता प्रवेश करती हैं ।)

राम—अविदित स्थान सम्बन्धवाले अन्धकारमें मैं आज प्रवेश-सा कर रहा हूँ । मुझे सहारा दो ।

दोनों देवियाँ (पृथिवी और गङ्गा)–हे कल्याणि सीते ! तुम समाश्वस्त होओ, भाग्यसे बढ़ रही हो । तुमने जलके भीतर रघुवंशको धारण करनेवाले दो कुमारोंको जन्म दिया है ॥३॥

सीता—(आश्वस्त होकर) मैंने भाग्यसे दो बालकोंको प्रसव किया है । हा आर्यपुत्र !

लक्ष्मण—(रामके पैरोंपर गिरकर) आर्य ! भाग्यसे हमलोग बढ़ रहे हैं (रघुवंश शुभ

रघुवंशः । (विलोक्य ।) हा ! कथं क्षुभितबाष्पोत्पीडनिर्भरः प्रमुग्ध एवार्यः । (वीजयति ।)

देव्यौ—वत्से ! समाश्वसिहि ।

सीता—(समाश्वस्य ।) भअवदीओ ! का तुझे ? मुञ्चह । (भगवत्यौ ! के युवाम् ? मुञ्चतम् ।)

पृथिवी—इयं ते श्वशुरकुलदेवता भागीरथी ।

सीता—णमो दे भअवदि ! (नमस्ते भगवति !)

भागीरथी—चारित्रोचितां कल्याणसंपदमधिगच्छ ।

लक्ष्मणः—अनुगृहीताः स्मः ।

सः । क्षुभितबाष्पोत्पीडनिर्भरः = क्षुभितः = चलितः, चासौ बाष्पोत्पीडः = अश्रुसमूहः, तेन निर्भरः = आकुलः, प्रमुग्ध एव = प्रमूढ एव, मूर्च्छित एवेति भावः । वीजयति = व्यजनेन वातं करोति । वीजधातुरयं चुरादिषु 'बहुलमेतन्निदर्शनम्' इत्युक्तेर्विडम्बयतीत्यादिवद्बोध्यः ।

सीतेति । मुञ्चतं = त्यजतं, 'मुच्लृ मोक्षणे' इति धातोर्लोटि मध्यमपुरुष-द्विवचनम् ।

पृथिवीति । श्वशुरकुलदेवता = श्वशुरकुलस्य = पत्युः पितृवंशस्य, देवता = योगक्षेमनिर्वाहिका देवी, भागीरथी = गङ्गा ।

भागीरथीति । चारित्रोचितां = चारित्रस्य = पातिव्रत्यसच्चरितस्य, उचिताम् = अनुरूपाम् , **'उपचिताम्'** इति पाठे—चारित्रेण उपचितां=वृद्धामित्यर्थः, कल्याणसम्पदं = श्रेयःसंपत्तिम् , अधिगच्छ = प्राप्नुहि ।

लक्ष्मण इति । अनुगृहीताः स्मः = कृतानुकम्पाः स्मः, रामः सीताऽहं च आशीर्विषयीकृताः स्मः इत्यर्थः ।

अङ्कुरवाला हुआ है । (देखकर) हाय ; क्यों बढ़े हुए अश्रुसमूहसे आकुल होकर आर्य मूर्च्छित ही हो गये हैं (पङ्खा झलते हैं ।)

दोनों देवियाँ (पृथिवी और गङ्गा)—वत्से ! समाश्वस्त होओ ।

सीता—(समाश्वस्त होकर) भगवति ! आप लोग कौन हैं ? मुझे छोड़िए ।

पृथिवी—ये तुम्हारे श्वशुरकुलकी देवता गङ्गाजी हैं ।

सीता—हे भगवति ! आपको नमस्कार है ।

भागीरथी—चरित्रके योग्य कल्याणसम्पत्तिको प्राप्त करो ।

लक्ष्मण—हम लोग अनुगृहीत हो गये हैं ।

भागीरथी—इयं ते जननी विश्वम्भरा।

सीता—हा अम्ब ! ईरिसी अहं तुए दिट्ठा ? (हा अम्ब ! ईदृश्यहं त्वया दृष्टा ।)

पृथिवी—एहि पुत्रि वत्से सीते !

(उभौ आलिङ्गय मूर्च्छतः ।)

लक्ष्मणः—(सहर्षम् ।) कथमार्या गङ्गापृथिवीभ्यामभ्युपपन्ना।

रामः—दिष्ट्या खल्वेतत् । करुणान्तरं तु वर्तते ।

भागीरथी—अत्रभवती विश्वम्भरा[1] व्यथत इति जितमपत्यस्नेहेन ।

भागीरथीति । जननी = माता, विश्वम्भरा = पृथिवी, विश्वम्भरेति साभिप्रायोक्तिः, पुत्र्यां त्वयि एवमलीकापवादिनोऽपि जनान् बिभर्तीति क्षमातिशयव्यञ्जनात् ।

सीतेति । ईदृशी = एतादृशी, मिथ्यापवादेन त्यक्ता आपत्प्राप्ता चेति भावः ।

लक्ष्मण इति । आर्या = पूज्या, सीतेति भावः । अभ्युपपन्ना = अनुगृहीता, 'अभ्युपपत्तिरनुग्रहः' इत्यमरः ।

राम इति । एतत् = इदं, मातृपुत्र्योरालिङ्गनोत्तरं मूर्च्छारूपमिति भावः । करुणान्तरं = मद्दुःखातिरिक्तं दुःखम् ।

भागीरथीति । अत्रभवती = पूज्या, विश्वम्भरा=विश्वधारिणी, क्षमाप्रधाना पृथिवीति तात्पर्यम् । व्यथते = दुःखिता भवति, इति = अस्माद्धेतोः, अपत्य-

---

भागीरथी—ये तुम्हारी माता पृथिवी है ।

सीता—हा माता ! आपने मुझे ऐसी अवस्थामें देखा ?

पृथिवी—पुत्रि वत्से सीते ! आओ ।

(दोनों आलिङ्गन कर मूर्च्छित होती हैं)

लक्ष्मण – (हर्षके साथ) किस तरह आर्याको गङ्गा और पृथिवीने अनुगृहीत किया ?

राम—भाग्यसे यह बात हुई । यह दूसरे शोककी बात हो रही है ।

भागीरथी—संसारको धारण करनेवाली पूजनीया पृथिवी भी दुःखित हो रही हैं,

---

१. 'पृथिवी —एहि पुत्रि !·········अत्र भवती विश्वम्भरा' इत्यस्य स्थाने 'पृथिवी'· एहि पुत्रि ! एहि वत्से ! (इति सीतामालिङ्ग्य मूर्च्छति ।) लक्ष्मणः—(सहर्षम्) दिष्ट्या पृथिवीगङ्गाभ्यामभ्युपपन्ना आर्या । रामः—(अवलोक्य) करुणतरं खल्वेतद्वर्तते । भागीरथी—विश्वम्भरा' इत्येष महान् पाठभेदो दृश्यते ।

सर्वसाधारणो ह्येष मनसो मूढग्रन्थिरान्तरश्चेतनावतामुपप्लवः संसारतन्तुः । सखि भूतधात्रि ! वत्से वैदेहि ! समाश्वसिहि ।

पृथिवी—(आश्वस्य ।) देवि ! सीतां प्रसूय कथमाश्वसिमि ?
सोढश्चिरं राक्षसमध्यवासस्त्यागो द्वितीयस्तु सुदुःसहोऽस्याः ।

स्नेहेन = सन्तत्यनुरागेण, जितम् = अभिभवः कृतः, बलवानपत्यस्नेहो धीरानप्यभिभवतीत्यर्थः । यद्वा = अथवा, मनसः = हृदयस्य, मूढग्रन्थिः = मोहात्मकं बन्धनं, चेतनावतां = प्राणिनाम् , आन्तरः = आभ्यन्तरः, उपप्लवः = चाञ्चल्यहेतुरिति भावः, संसारतन्तुः = विश्वसंधायकः, एषः = अपत्यस्नेहः, सर्वसाधारणः = सर्वेषु = सकलेषु, साधारणः = सामान्यः, अपत्यस्नेहो न केवलं पृथिव्यां किन्तु सर्वेषु समान इति भावः । हि = निश्चयेन, भूतधात्रि = हे विश्वम्भरे ! ।

पृथिवीति । प्रसूय = जनयित्वा, कथं = केन प्रकारेण, आश्वसिमि = क्षीणदुःखा भवामीति भावः ।

सोढ इति । अस्याः चिरं राक्षसमध्यवासः सोढः, द्वितीयः त्यागस्तु सुदुःसह इति **श्लोकपूर्वार्द्धस्यान्वयः** । अस्याः = सीतायाः, चिरं = बहुकालपर्यन्तं, राक्षसमध्यवासः = राक्षसानां=निशाचराणाम् , मध्ये = अन्तरे, वासः = निवासः, सोढः = मर्षितः । द्वितीयः = अपरः, मिथ्यापवादप्रयुक्त इति भावः । एतादृशः, त्यागस्तु = निर्वासनं तु, सुदुःसहः = सुतरां सहनानर्ह इति भावः । क्वचित् 'सोढः, त्यागः सुदुःसहः' इत्येतेषां स्थाने क्रमतः **'पक्वः, साङ्गः, सुदुःश्रवः'** इति पाठान्तराणि, तत्र—साङ्गः—अङ्गैः = रावणराक्षस्यादितर्जनजनिततापैः, सहितः = युक्तः, द्वितीयः त्यागस्तु सुदुःश्रवः = सुतरां श्रवणानर्हः, पातिव्रत्यदूषकलोकापवादरूपत्वादिति भावः ।

इस कारणसे सन्तानके स्नेहने जीत लिया ! अथवा यह (सन्तानस्नेह) सबमें सामान्यरूपसे रहनेवाला, मनका मोहबन्धनरूप, प्राणियोंका आभ्यन्तरिक चाञ्चल्यहेतु और संसारका तन्तुस्वरूप है । सखि भूतधात्रि (पृथिवि) ! वत्से सीते ! आश्वस्त होओ ।

पृथिवी—(आश्वस्त होकर) देवि ! सीताको प्रसव करके कैसे आश्वस्त होऊँ !

इनका बहुत कालतक राक्षसोंके बीचमें रहना सहन किया, पतिसे किया गया यह दूसरा त्याग तो अतिशय दुःसह हो रहा है ।

गङ्गा—

को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे ? ॥ ४ ॥

पृथिवी—भगवति भागीरथि ! युक्तमेतत्सर्वं वो रामभद्रस्य ?

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ।
नाहं, न जनको नाग्निर्न तु वृत्तिर्न संततिः ॥ ५ ॥

को नामेति । को नाम जन्तुः पाकाभिमुखस्य दैवस्य द्वाराणि पिधातुम् ईष्टे इति श्लोकोत्तरार्द्धान्वयः । को नाम जन्तुः = को नाम प्राणी, पाकाभिमुखस्य = कर्मफलप्रदानतत्परस्य, दैवस्य = भाग्यस्य, द्वाराणि = अनुभवमार्गान्, पिधातुम् = अपिधातुं, रोद्धुमिति भावः, 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।' इत्यपेरकारलोपः । ईष्टे = समर्थो भवति । नियतिवशादेव सीतयैतादृशं दुःखमनुभूतं, नियतिगतिमुल्लङ्घयितुं न कोऽपि समर्थोऽतः शोको वृथेति भावः । अत्रार्थापत्त्यर्थान्तरन्यासयोरङ्गाङ्गिभावेन सङ्करः । इन्द्रवज्रा वृत्तम् ॥ ४ ॥

पृथिवीति । सकलं = सर्वम् , एतत् = सीतां प्रत्यनिष्टाचरणं, वः = युष्माकं, स्नेहपात्रस्येति भावः । अनयोक्त्या भगवत्या भूतधात्र्या स्वसम्बन्धः परिहृत इति ध्वनितम् । युक्तं = सङ्गतम् ?

नेति । बाल्ये बालेन पीडितः पाणिः न प्रमाणीकृतः, अहं न, जनकः न, अग्निः न, तु वृत्तिः न, सन्ततिः न इत्यन्वयः । बाल्ये = शैशवे, बालेन = शिशुना, अविमृश्यकारित्वादज्ञेनेति वा, 'अज्ञो भवति वै बाल' इति स्मरणात् । पीडितः = गृहीतः, विवाहकर्मणीति शेषः । पाणिः = करः, न प्रमाणीकृतः = निर्णयहेतुर्न कृतः, शास्त्रीयविधिनोद्वाहिता सीता कथं त्याज्येति विचारो न कृत इति भावः । अहं = पृथिवी, न = न प्रमाणीकृतेत्येवं यथायोग्यं सर्वत्र लिङ्गविपरिणामो विधेयः । पृथिव्याः समुत्पन्नाऽयोनिजेयं सीतेति विचारोऽपि न कृत इति तात्पर्यम् । जनकः = राजर्षिर्वैदेहः, न = न प्रमाणीकृतः, अधिगताध्यात्मशास्त्रो राजर्षिर्जनकोऽपि

गङ्गा—कौन प्राणी फल देनेके लिए तत्पर भाग्यके द्वारोंको बन्द करनेके लिए समर्थ होता है ? ॥ १४ ॥

पृथिवी—भगवति भागीरथि ! यह सब करना आपके रामभद्रको उचित है ?

बालक (वा अनभिज्ञ) रामभद्रने बाल्यावस्थामें किये गये पाणिग्रहणकी भी अपेक्षा नहीं की, तथा न मेरी, न जनककी, न अग्निकी, न सीताके पातिव्रत्यकी और न सन्तानकी ही अपेक्षा की ॥ ५ ॥

सीता—हा अज्जउत्त ! सुमरेसि ? (हा आर्यपुत्र ! स्मरसि ?)
पृथिवी—आः ! कस्तवार्यपुत्रः ?
सीता—(सलज्जास्रम् ।) जह अम्बा भणादि । (यथाम्बा भणति ।)
रामः—अम्ब पृथिवि ! ईदृशोऽस्मि ।
गङ्गा-भगवति वसुन्धरे ! शरीरमसि संसारस्य । तत्किमसंविदानेव

रामेण सीतायाः परित्यागे नापेक्षित इत्याकूतम् । अग्निः = अनलः, विवाहे साक्षित्वेन स्थित आहोस्वित् लङ्कायां सीतापातिव्रत्यनिकषीभूतः, न = न प्रमाणीकृतः, रामकृतेन सीतानिर्वासनेनाग्नेरप्यप्रामाण्यं समर्थ्यत इति हृदयम् । तु=पुनः, वृत्तिर्न = सीतायाः पातिव्रत्यपूर्णमाचरणमपि न प्रमाणीकृतम् , 'नानुवृत्तिः' इति पाठान्तरे—छायावत्पत्युरनुगमनमित्यर्थः । सन्ततिः = वंशः, न = न प्रमाणीकृतः, सीतापरित्यागे मद्वंशनाशः स्यादित्यपि विचारो न कृतः । अहो अविमृश्यकारिता रामभद्रस्येति भावः । अत्र प्रमाणीकरणरूपयैकया क्रियया पाण्यादीनां कर्मत्वेन सम्बन्धात्तुल्ययोगितालङ्कारः ॥ ५ ॥

सीतेति । स्मरसि = किं स्मरणं करोषि, ममेति शेषः ।

पृथिवीति । आः = कोपद्योतकमव्ययमिदम् । कस्तवार्यपुत्रः = आर्यपुत्रपदेन रामस्त्वया नोच्चारणीय इति भावः ।

सीतेति । अम्बा = माता, भवतीति भावः । यथा भणति = यथा कथयति, तथैवेति शेषः ।

राम इति । ईदृशः = एतादृशः, सीतयार्यपुत्रपदेनोच्चारयितुमनर्ह इति भावः ।

गङ्गेति । संसारस्य=विश्वस्य, शरीरं=देहः, आधाररूपेति भावः । असि=वर्त्तसे । तत् = तस्मात् , कारणादिति शेषः । असंविदाना इव = अजानती इव, सम्पूर्वस्य 'विद ज्ञान' इति धातोः 'समो गम्यृच्छिभ्याम्' इत्यधिकारे 'विदिप्रच्छिस्वर-

---

सीता—हा आर्यपुत्र ! क्या आप मेरा स्मरण करते हैं ?
पृथिवी—ओह ! तुम्हारा कौन आर्यपुत्र है ?
सीता—(लज्जाके साथ और आँसू गिराकर) जैसा माँ कहती हैं !
राम—माँ पृथिवि ! मैं ऐसा ही हूं ।
गङ्गा—भगवति पृथिवि ! आप संसारकी शरीररूप हैं । इसलिए क्यों अनजानकी

जामात्रे कुप्यसि ?

घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु ? ।
इक्ष्वाकूणां कुलधनमिदं यत्समाराधनीयः
कृत्स्नो लोकस्तदिह विषमे किं स वत्सः करोतु ? ॥ ६ ॥

तीनामुपसंख्यानम्' इत्यात्मनेपदं, लटः शानच् । जामात्रे = दुहितुर्भर्त्रे, 'कुप्यसी'ति क्रियापदेन योगे, 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप' इति चतुर्थी, सीतापरित्यागे नापराधो रामस्येति भावः ।

तत्र रामस्य विवशत्वं प्रतिपादयति—

घोरमिति । लोके घोरम् अयशो विततं, या च लङ्काद्वीपे वह्नौ विशुद्धिः, ताम् इह जनः कथमिव श्रद्दधातु ? इदम् इक्ष्वाकूणां कुलधनं, यत् 'कृत्स्नो लोकः समाराधनीयः' तत् इह विषमे स वत्सः किं करोतु ? इत्यन्वयः । लोके=भुवने, घोरं = भयङ्करम् , अयशः = अकीर्तिः, विततं = विस्तृतं, या च, लङ्काद्वीपे = लङ्काख्ये द्वीपे, वह्नौ = अग्नौ, विशुद्धिः = परीक्षया शुद्धता, तां = विशुद्धिम्, इह= अयोध्यायां, जनः = लोकः, कथमिव = केन प्रकारेण, श्रद्दधातु = विश्वसितु । इदम् = एतत् , इक्ष्वाकूणाम् = इक्ष्वाकुवंशोत्पन्नानां राज्ञां, कुलधनं = वंशक्रमागतोऽर्थः, यत् , कृत्स्नः = समस्तः, लोकः = जनः, प्रजा इति भावः । समाराधनीयः = संसेवनीयः, शिक्षणरक्षणादिभिरनुरञ्जनीय इति भावः । तत् = तस्मात्कारणात् , इह = अस्मिन् , विषमे = धर्मसङ्कटे, पुस्तकान्तरेषु **तु 'तदतिगहनम्'** इति पाठस्तत्र-तत्=सर्वलोकसमाराधनम् , अतिगहनम् = अतिशयदुष्करं, सः = तादृशः, वत्सः = रामभद्रः, किं करोतु = किं विदधातु ? लोकापवादादादर्शच्युतेश्च वरं प्राणसमायाः सीतायाः परित्याग इति मत्वा निरुपायेन रामेणैतदाचरितमिति भावः । **मन्दाक्रान्ता वृत्तम्** ॥ ६ ॥

तरह होकर जामाता (दामाद) से कुपित होती हैं ?

लोकमें भयङ्कर अकीर्ति फैल गई, लङ्काद्वीप में सीताकी जो अग्निपरीक्षा हुई उसका यहांके लोग कैसे विश्वास करें ? इक्ष्वाकुवंशके राजाओंका यह वंशक्रमागत धन है - जो कि सम्पूर्ण प्रजाओंकी शिक्षा और रक्षासे सेवा करनी चाहिए; इस कारण इस धर्मसङ्कटमें वे वत्स (रामभद्र) क्या करें ? ॥ ६ ॥

लक्ष्मणः—अव्याहतान्तःप्रकाशा हि देवताः सत्त्वेषु ।

गङ्गा—तथाप्येष तेऽञ्जलिः ।

रामः—अम्ब ! अनुवृत्तस्त्वया भगीरथकुले प्रसादः ।

पृथिवी—नित्यं प्रसन्नास्मि तव । किं त्वसावापातदुःसहः स्नेहसंवेगः । न पुनर्न जानामि सीतास्नेहं रामभद्रस्य ।

लक्ष्मण इति । देवताः = देवाः, सत्त्वेषु = प्राणिषु, 'भूतेषु' इति पाठेऽप्ययमेवार्थः । अव्याहतान्तःप्रकाशाः = अव्याहतः = अप्रतिबन्धः, अन्तःप्रकाशः = अन्तःकरणवृत्तिज्ञानम् , यासां ताः । हि = निश्चयेन, देवताः सर्वेषामपि प्राणिनां मनोवृत्तिं जानन्ति, अतः पृथिवीदेवतापि रामस्यान्तःकरणवृत्तिं जानात्येवेति भावः ।

गङ्गेति । तथापि = रामस्य निर्दोषत्वेऽपि, एषः = अयम् , अञ्जलिः = प्रणामाञ्जलिः, ते = तुभ्यम् , 'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी ।' इति वचनात् , रामभद्रं प्रत्यनुग्रहार्थमेष प्रणामाञ्जलिः समर्प्यत इति भावः । **'गङ्गा-तथाप्येष तेऽञ्जलिः'** इत्यस्य स्थाने क्वचित् **'तदयमञ्जलिस्ते'** इति पाठान्तरं लक्ष्मणोक्तमेवास्ति । तदर्थस्तु स्पष्ट एव ।

राम इति । अम्ब = हे मातः !, *त्वया=भवत्या, भगीरथकुले = भगीरथवंशे*, प्रसादः = अनुग्रहः, अनुवृत्तः = सम्बद्धः ।

पृथिवीति । किन्तु = एवं प्रसन्नत्वेऽपि, स्नेहसंवेगः = स्नेहस्य=वात्सल्यस्य, संवेगः = त्वरा, आपातदुःसहः = आपाते = श्रवणोत्तरक्षणे, दुःसहः = सोढुमशक्यः, 'दर्शनक्षण आपातस्तथैवाकर्णनक्षणे ।' इति कोषः । यद्वा स्नेहसंवेगः = स्नेहेन = पुत्रीविषयवात्सल्येन, संवेगः = चाञ्चल्यं भयं वा, संवेग इत्यत्र 'ओविजी भयचलनयोः' इति धातोर्भावे घञ् , 'चजोः कु घिण्यतोः' इति कुत्वम् । सीतास्नेहं = सीतायां = जानक्याम् , स्नेहं = प्रेम, न जानामि न = अपि तु जानाम्येवेति भावः, 'द्वौ नञावेकं प्रकृतार्थं द्योतयत' इति नयादिति तात्पर्यम् ।

लक्ष्मण—प्राणियोंमें देवतालोग प्रतिबन्धरहित मनोज्ञानवाले होते हैं ।

गङ्गा—तो भी आपको यह प्रणामाञ्जलि है ।

राम—मातः ! आपने भगीरथवंशमें अनुग्रहका अनुवर्तन किया है ।

पृथिवी—मैं आपसे प्रसन्न हूँ, परन्तु यह स्नेहसे उत्पन्न चञ्चलता आपाततः दुःसह होती है । सीतापर रामचन्द्रका प्रेम मैं नहीं जानती हूँ, यह बात नहीं है ।

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः ।
लोकोत्तरेण सत्त्वेन प्रजापुण्यैश्च जीवति ॥ ७ ॥

रामः—सकरुणा हि गुरवो गर्भरूपेषु ।

सीता—(रुदती कृताञ्जलिः ।) णेदु मं अत्तणो अङ्गेसु विलअं अम्बा ।
(नयतु मामात्मनोऽङ्गेषु विलयमम्बा ।)

गङ्गा—किं ब्रवीषि ? अविलीना वत्से ! संवत्सरसहस्राणि[1] भूयाः ।

पृथिवी—वत्से ! अवेक्षणीयौ ते पुत्रौ[2] ।

दह्यमानेनेति । स दैवात् दह्यमानेन मनसा वत्सां विहाय लोकोत्तरेण सत्त्वेन प्रजापुण्यैश्च जीवति इत्यन्वयः । सः = रामभद्रः, दैवात् = भाग्याद्धेतोः, दह्यमानेन= सन्तप्यमानेन, मनसा = चित्तेन, वत्सां = सीतां, विहाय = त्यक्त्वा, लोकोत्तरेण = लोकश्रेष्ठेन, अलौकिकेनेति भावः । सत्त्वेन = धैर्येण, प्रजापुण्यैश्च = प्रजानां = जनानाम् , पुण्यैश्च = सुकृतैश्च, जीवति = प्राणधारणं करोति । दुःखितमनसा वत्सां परित्यज्य सात्त्विकलोकोत्तरस्वधैर्येण रामराज्यसुखभागधेयानां प्रजानां पुण्यातिशयेन च रामो जीवतीति भावः ॥ ७ ॥

राम इति । गुरवः = पूज्यजनाः, पृथिव्यादय इति भावः । गर्भरूपेषु = गर्भाणाम् = भ्रूणानाम् , इव, रूपं = स्वरूपं, येषां तेषु अपत्यतुल्येष्वित्यर्थः, अस्मास्विति शेषः । सकरुणाः = सदयाः ।

सीतेति । विलयम् = अदर्शनं, नयतु = प्रापयतु ।

गङ्गेति । संवत्सरसहस्राणि = सहस्रवत्सरपर्यन्तं, 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । अविलीना = जीविता, भूयाः = भवतात् , आशीर्लिङ् ।

पृथिवीति । ते = तव, त्वयेति भावः, 'अवेक्षणीयौ' इति पदेन योगे

वे (रामभद्र) भाग्यके कारण सन्तापयुक्त चित्तसे सीताका परित्याग करके अलौकिक धैर्यसे और प्रजाओंके पुण्योंसे भी जी रहे हैं ॥ ७ ॥

राम—पूज्यजन अपत्यरूप हमलोगोंके ऊपर दयालु हैं ।

सीता—(रोती हुई हाथ जोड़कर) माताजी मुझे अपने अङ्गोंमें विलीन कर लें ।

गङ्गा—क्या कहती हो ? वत्से ! हजार वर्षोंतक जीती रहो ।

पृथिवी—वत्से ! तुम्हें दोनों पुत्रोंकी देख-रेख करनी चाहिए ।

---

१. पुस्तकान्तरेषु 'किमन्यद् ब्रवीतु ?' इति रामोक्त्यनन्तरं 'शान्तम् । अविलीना वत्सर···' इति भागीरथ्युक्तिरूपं पाठान्तरं वर्तते । २. 'अपि रक्षणीयौ ते पुत्रकौ' इति पाठान्तरम् ।

सीता—किं एहिं अणाहेहिं ?[1] (किमेताभ्यामनाथाभ्याम् ?)

रामः—हृदय ! वज्रमसि[2] ।

गङ्गा—कथं वत्सौ सनाथावप्यनाथौ ?[3]

सीता—कीरिसं मे अभग्गाए सणाहत्तम्[4] ? (कीदृशं मे अभाग्यायाः सनाथत्वम् ?)

देव्यौ—

जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ? ।

'कृत्यानां कर्तरि वा' इति षष्ठी, अवेक्षणीयौ = स्तन्यार्थं निरीक्षणीयौ, रक्षणीयाविति भावः, पुत्रार्थमपि त्वया जीवितव्यमिति तात्पर्यम् ।

सीतेति । अनाथाभ्यां = रक्षकरहिताभ्याम् , एताभ्यां = स्तनन्धयाभ्यामिति भावः, किं = कथं, जीविष्यत इति शेषः ।

राम इति । वज्रं = कुलिशम् , सम्राजो मम धर्मपत्नी सीता देवी यत्स्वतनयावनाथौ कथयति, एतज्ज्ञात्वाऽपि त्वं न विदीर्यसे, अतस्त्वं मदीयं हृदयं वज्रमसीति भावः ।

गङ्गेति । सनाथौ = रक्षकसहितौ, तव पती रामभद्र एवानयो रक्षकोऽस्ति अतः कथमेनावनाथौ कथयसीति भावः ।

सीतेति । अभाग्यायाः = भाग्यरहितायाः, **'अभव्यायाः'** इति पाठे-कल्याणरहिताया इत्यर्थः, सनाथत्वं = रक्षकयुक्तत्वम् ।

जगदिति । त्वं जगन्मङ्गलम् आत्मानं कथम् अवमन्यसे ! यत्सङ्गात् आवयोरपि पवित्रत्वं प्रकृष्यत इत्यन्वयः । हे सीते ! त्वं = भवती, जगन्मङ्गलं =

सीता—रक्षकरहित ये दोनों कैसे जीते रहेंगे ?

राम—हृदय ! तू वज्र है ।

गङ्गा—वत्सोंके रक्षकके होते हुए भी तुम कैसे इन्हें अनाथ कह रही हो ?

सीता—मुझ भाग्यहीनाकी सनाथता कैसे ?

दोनों देवियां (गङ्गा और पृथिवी)—(हे सीते !) तुम जगतके कल्याणस्वरूप अपनेको

१. 'अणाधम्हि । (अनाथास्मि ।)' इति पाठान्तरम् ।

२. 'वज्रमयमसि' इति पाठान्तरम् ।

३. 'कथं त्वं सनाथाप्यनाथा ?' इति पाठान्तरम् ।

४. 'कीदिसं मम अभव्वाए सणाधत्तणं ? (कीदृशं ममाभव्यायाः सनाथत्वम् ?)' इति पाठान्तरम् ।

आवयोरपि यत्सङ्गात्पवित्रत्वं प्रकृष्यते ॥ ८ ॥

लक्ष्मणः—आर्य ! श्रूयताम् ।

रामः—लोकः शृणोतु ।

(नेपथ्ये कलकलः ।)

रामः—अद्भुततरं किमपि ।

सीता—किंत्ति आबद्धकलकलं पज्जलिअं अन्तरिक्खम् ? (किमित्याबद्धकलकलं प्रज्वलितमन्तरिक्षम् ?)

जगतां = लोकानाम् , मङ्गलम् = कल्याणकारणम् , आत्मानं = स्वं, कथं = केन कारणेन, अवमन्यसे = परिभवसि ?, तिरस्करोषीति भावः । यत्सङ्गात् = यस्याः = तव, सङ्गात् = सम्पर्कात् , आवयोरपि = गङ्गापृथिव्योरपि, पवित्रत्वं = शुद्धत्वं, प्रकृष्यते = प्रकर्षत्वं प्राप्नोति, कर्मकर्तरि लट् । त्वत्सम्पर्कादेवावयोः पवित्रत्वं पूर्वापेक्षया समधिकं भवतीति भावः ॥ ८ ॥

लक्ष्मण इति । श्रूयताम् = आकर्ण्यताम् , लोकापवादश्रवणादेव भवता सीता परित्यक्ता, तद्विषये गङ्गापृथिव्यौ किं कथयत इति भवता श्रूयतामिति भावः ।

राम इति । लोकः = जनः, जना इत्यर्थः, जात्याख्यायामेकवचनम् । लोक एव शृणोतु येन निष्कारणं सीता लाञ्छिता, अहं तु तां गङ्गापृथिवीसमां पवित्रां मन्य एव इति भावः ।

नेपथ्य इति । कलकलः = कोलाहलः भवतीति शेषः ।

राम इति । अद्भुततरम् = अत्याश्चर्यं, किमपि = वस्तु, दृश्यत इति शेषः ।

सीतेति । किमिति = केन हेतुना, अन्तरिक्षम् = आकाशम् , आबद्धकलकलम् = आबद्धः = उत्पन्नः, कलकलः = कोलाहलः, यस्मात्तत् , एवं प्रज्वलितं = प्रकाशितं च, अस्तीति शेषः ।

क्यों तिरस्कार कर रही हो ? जिस तुम्हारे सम्पर्कसे हम दोनों (गङ्गा और पृथिवी) की भी पवित्रता उत्कर्षको प्राप्त कर रही है ॥ ८ ॥

लक्ष्मण—आर्य सुनिये ।

राम—लोक सुने ।

(नेपथ्यमें कोलाहल होता है ।)

राम—अतिशय आश्चर्यकारक कुछ है ।

सीता—किसलिए आकाश कोलाहलयुक्त होकर चमक रहा है ?

देव्यौ—ज्ञातम् ।

कृशाश्वः कौशिको राम इति येषां गुरुक्रमः ।
प्रादुर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः ॥ ९ ॥

(नेपथ्ये ।)

देवि ! सीते ! नमस्तेऽस्तु गतिर्नः पुत्रकौ हि ते ।
आलेख्यदर्शनादेव ययोर्दाता रघूद्वहः ॥ १० ॥

देव्याविति । ज्ञातं = विदितम् , आकाशे आबद्धकलकलत्वस्य प्रज्वलितत्वस्य च कारणमिति शेषः ।

कृशाश्व इति । कृशाश्वः कौशिको राम इति येषां गुरुक्रमः, तानि एव शस्त्राणि जृम्भकैः सह प्रादुर्भवन्ति इत्यन्वयः । कृशाश्वः = तन्नामा कश्चिदृषिः, क्वचित् **'भृशाश्व'** इति पाठान्तरम् । कौशिकः = विश्वामित्रः, रामः = रामचन्द्रश्च, इति = एवं, येषां = शस्त्राणां, गुरुक्रमः = आचार्यपरम्परा, अस्तीति शेषः । तानि एव=तादृशानि एव, गुरुक्रमयुक्तान्येवेति भावः । शस्त्राणि=वारुणादीनि आयुधानि, जृम्भकैः सह = तन्नामकैः शस्त्रैः समं, प्रादुर्भवन्ति = प्रकटीभवन्ति । तेनैव हेतुनाऽऽकाशमाबद्धकलकलं प्रकाशितं च जातमिति भावः ॥ ९ ॥

देवीति । हे देवि सीते ! ते नमः अस्तु, हि ते पुत्रकौ नो गतिः आलेख्यदर्शनात् एव ययोः दाता रघूद्वह इत्यन्वयः । हे देवि = हे महाराज्ञि !, सीते, = हे वैदेहि ! ते = तुभ्यं, नमः = प्रणामः, अस्तु = भवतु । हि = यस्माद्धेतोः, ते = तव, पुत्रकौ = अनुकम्पितौ तनयौ, 'अनुकम्पायाम्' इति कन् प्रत्ययः । नः = अस्माकं, गतिः = आश्रयौ, त्वत्पुत्राश्रितत्वात्तुभ्यं नमस्कुर्म इति भावः । आलेख्यदर्शनात् एव = चित्रावलोकनकालात् एव, आलेख्यदर्शनं च प्रथमाङ्के संवृत्तमित्यवधेयम् । ययोः = त्वत्पुत्रयोः, त्वत्पुत्राभ्यामिति भावः, 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव' इति सम्प्रदानार्थे षष्ठी । दाता = दायकः,

---

दोनों देवियाँ (गङ्गा और पृथिवी)–जाना ।

कृशाश्व, विश्वामित्र और राम, ऐसा जिन शस्त्रोंका गुरुक्रम है, वे ही शस्त्र जृम्भक शस्त्रोंके साथ प्रकट हो रहे हैं ॥ ९ ॥

(नेपथ्यमें ।)

हे देवि ! हे सीते ! आपको नमस्कार हो, आपके दो पुत्र हमारे प्राप्तव्य हैं, चित्र देखनेके समयसे ही हमें जिनको सौंपनेवाले रामचन्द्रजी हुए थे ॥ १० ॥

सीता—दिट्ठिआ अत्थदेवदाओ एदाओ। अज्जउत्त! अज्जावि दे पसादा[1]पडिप्फुरन्दि। (दिष्ट्या अस्त्रदेवता एताः। आर्यपुत्र! अद्यापि ते प्रसादाः परिस्फुरन्ति।)

लक्ष्मणः—उक्तमासीदार्येण 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ती'ति।

देव्यौ—

नमो वः परमास्त्रेभ्यो धन्याः स्मो वः परिग्रहात्।
काले ध्यातैरुपस्थेयं वत्सयोर्भद्रमस्तु वः ॥ ११ ॥

अस्माकमिति, शेषः, रघूद्वहः = रामचन्द्रः, अभूदिति शेषः। आलेख्यदर्शने रामचन्द्रेण 'सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति' (पृ० २८) इति वचनेन वयं त्वत्पुत्राभ्यां प्रदत्तानीति भावः। पुस्तकान्तरेषु तु 'आलेख्यदर्शने देवो यदाह रघुनन्दनः' इति पाठान्तरम्। तत्राप्यर्थः सुगमः ॥ १० ॥

सीतेति। दिष्ट्या=भाग्येन, अस्त्रदेवताः=अस्त्राधिष्ठात्र्यो देवताः। अद्यापि=एवं लोकापवादहेतुकपरित्यागकालेऽपि, प्रसादाः = अनुग्रहाः, परिस्फुरन्ति=प्रकाशन्ते।

लक्ष्मण इति। एतानि = जृम्भकादीनि शस्त्राणि।

नम इति। परमास्त्रेभ्यो वो नमः, वः परिग्रहात् धन्याः स्मः। काले ध्यातैः वत्सयोः उपस्थेयं, वो भद्रम् अस्तु इत्यन्वयः। परमास्त्रेभ्यः = जृम्भकाद्यश्रेष्ठास्त्रेभ्यः, वः = युष्मभ्यं, नमः = नमस्कारः। वः = युष्माकं, परिग्रहात् = स्वीकारात्, धन्याः = कृतकृत्याः, स्मः = भवामः। काले = युद्धादिसमये, ध्यातैः = चिन्तितैः, युष्माभिरिति शेषः। वत्सयोः = सीतापुत्रयोः, उपस्थेयम् = समीपे स्थातव्यम्। वः = युष्मभ्यं, युष्माकं वा, 'चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' इति आशिषि चतुर्थी षष्ठी वा। भद्रं = कल्याणम्, अस्तु = भवतु। पुस्तकान्तरेषु अयं श्लोको रामेणैव पठितः ॥ ११ ॥

सीता—भाग्यसे ये अस्त्रदेवता हैं। आर्यपुत्र! अभी तक आपके अनुग्रह प्रकाशित हो रहे हैं।

लक्ष्मण—आर्यने कहा था—'सब तरहसे ये तुम्हारी प्रसूतिको प्राप्त होंगे।'

दोनों देवियाँ—(गङ्गा और पृथिवी)–श्रेष्ठ अस्त्र आपलोगोंको नमस्कार है, आपलोगोंके स्वीकारसे हमलोग धन्य हो गए हैं। युद्ध आदि अवसरपर ध्यान किये जानेपर आपलोगोंको हमारे दो वत्सों (कुश और लव) के पास आना चाहिए। आपलोगोंका कल्याण हो ॥११॥

[1]. 'एदाओ। अज्जउत्त! अज्जावि दे पसादा' इति मध्यगतः पाठः क्वचित्पुस्तके नास्ति।

रामः—क्षुभिताः कामपि दशां कुर्वन्ति मम संप्रति ।
विस्मयानन्दसंदर्भजर्जराः करुणोर्मयः ॥ १२ ॥

देव्यौ—मोदस्व वत्से ! मोदस्व। रामभद्रतुल्यौ ते पुत्रकाविदानीं[1] संवृत्तौ ।

सीता—भअवदीओ ! को एदाणं खत्तिओइदविहिं कारइस्सदि ?
(भगवत्यौ ! क एतयोः क्षत्रियोचितविधिं कारयिष्यति ?)

रामः—
एषा वसिष्ठशिष्याणां रघूणां वंशनन्दिनी ।

राम इति । सम्प्रति क्षुभितां विस्मयानन्दसंदर्भजर्जराः करुणोर्मयः मम काम् अपि दशां कुर्वन्ति इत्यन्वयः । सम्प्रति = अधुना, क्षुभिताः = क्षोभं प्राप्ताः, चञ्चला इति भावः । विस्मयानन्दसन्दर्भजर्जरा· = विस्मयानन्दयोः = आश्चर्यहर्षयोः, सन्दर्भेण = ग्रन्थनेन, जर्जराः = विशीर्णाः, तत्र विस्मयो गङ्गा-पतन-तत्रत्यप्रसव-जृम्भकास्त्रलाभादिमूलकः, आनन्दश्च पुत्रप्राप्तिगङ्गापृथिवीप्रसा-दादिमूलक इति वेद्यम् , एतादृशाः करुणोर्मयः = करुणस्य = सीतावियोगशोकस्य, ऊर्मयः = तरङ्गाः, अत्रोर्मिपदेन करुणस्य समुद्रत्वं व्यज्यते । मम = रामस्य, कामपि = अनिर्वचनीयां, दशाम् = अवस्थां, कुर्वन्ति = उत्पादयन्ति ॥ १२ ॥

देव्याविति । मोदस्व = मोदं प्राप्नुहि, इदानीं = साम्प्रतम् , रामभद्रतुल्यौ= रामभद्रसदृशौ, संवृत्तौ=संजातौ, जृम्भकास्त्रलाभेनेति भावः ।

सीतेति । क्षत्रियोचितविधिं = क्षत्रियजातियोग्यं कर्म, जातकर्मादिसंस्कार-मिति भावः ।

एषेति । वसिष्ठशिष्याणां रघूणां वंशनन्दिनी एषा सीता अपि सुतयोः संस्कर्तारं न विन्दति, कष्टम् , इत्यन्वयः । वसिष्ठशिष्याणां = वसिष्ठोपदेश्यानां, **'वसिष्ठगुप्तानाम्'** इति पाठान्तरे = वसिष्ठरक्षितानामित्यर्थः । रघूणां = रघु-कुलोत्पन्नानां राज्ञां, वंशनन्दिनी = वंशस्य = कुलस्य, नन्दिनी = आनन्दहेतुः,

राम—इस समय क्षोभयुक्त आश्चर्य और हर्षके संयोगसे विशीर्ण शोककी तरङ्गें मेरी अनिर्वचनीय अवस्थाको उत्पन्न कर रही हैं ॥ १२ ॥

दोनों देवियाँ—(गङ्गा और पृथिवी)—प्रसन्न हो जाओ वत्से ! प्रसन्न हो जाओ, दोनों पुत्र इस समय रामभद्रके तुल्य हुए हैं ।

सीता—भगवति ! कौन इन दोनोंकी क्षत्रियोचित विधि (संस्कार) करायेगा ?

राम—वसिष्ठ ऋषिके शिष्य रघुवंशोत्पन्न राजाओंके कुलकी आनन्द हेतु ये सीता भी

१. 'मन्यस्व वत्से ! रामभद्रतुल्यौ ते पुत्रकाविदानीम्' इति पाठान्तरम् ।

कष्टं सीतापि सुतयोः संस्कर्तारं न विन्दति ॥ १३ ॥

गङ्गा—भद्रे ! किं तवानया चिन्तया ? एतौ हि वत्सौ स्तन्यत्यागात्परेण भगवतो वाल्मीकेरर्पयिष्यामि ।

वसिष्ठ एव ह्याचार्यो रघुवंशस्य संप्रति ।
स एव चानयोर्ब्रह्मक्षत्रकृत्यं करिष्यति ॥ १४ ॥

पातिव्रत्योत्कर्षादिति भावः । 'वंशवर्द्धिनी' पाठे—कुलवर्द्धिनीत्यर्थः, प्रसवेनेति शेषः । एषा = इयं, सीता अपि=मैथिली अपि, 'एषाम्' इति षष्ठयन्तपाठे—तद्रघूणामित्यस्य विशेषणं बोध्यम् । सुतयोः=पुत्रयोः, संस्कर्तारम्=उपनयनादिसंस्कारकर्तारमाचार्यम्, 'संस्कर्ता भक्षा' इति ज्ञापकात् सुट् । न विन्दति = न लभते, (इति) कष्टं=दुःखम् । वसिष्ठे सत्यपि रघुकुलवधूरियं सीता स्वपुत्रयोः संस्कारकर्त्तारमाचार्यं न प्राप्नोति, किमतः परं कष्टमिति भावः ॥ १३ ॥

गङ्गेति । क्वचिद् **'देव्यौ पुत्रि !'** इति पाठः । स्तन्यत्यागात् परेण=दुग्धपानकालातिक्रमणानन्तरमिति भावः । वाल्मीकेः = वाल्मीकय इति भावः, 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येवे'ति चतुर्थ्यर्थे षष्ठी ॥ यद्वा समीप इति शेषः । **'स एतयोः क्षत्रकृत्यं करिष्यति'** इत्यधिकः पुस्तकान्तरपाठस्तत्राग्रिमः श्लोको न विद्यते । क्षत्रकृत्यं=क्षत्रियोचितजातकर्मादिसंस्कारमिति भावः ।

वसिष्ठ इति । सम्प्रति वसिष्ठ एव रघुवंशस्य आचार्यो हि, स एव च अनयोः ब्रह्मक्षत्रकृत्यं करिष्यति इत्यन्वयः । सम्प्रति=अधुना, वसिष्ठ एव=तन्नामा ऋषिरेव, रघुवंशस्य = रघुकुलस्य, आचार्यः=संस्कारकः, हि=निश्चयेन । स एव च = वसिष्ठ एव च, अनयोः = सीतासुतयोः, ब्रह्मक्षत्रकृत्यं=ब्राह्मणक्षत्रियकर्म, ब्राह्मणत्वोचितं वेदाध्यापनं, क्षत्रियत्वोचितं धनुर्वेदाध्यापनं चेति भावः । करिष्यति=विधास्यति, कालान्तर इति शेषः । **श्लोकोऽयं बहुषु पुस्तकेषु नावलोक्यते** ॥ १४ ॥

अपने संस्कार करनेवाले आचार्यको नहीं पा रही है ॥ १३ ॥

गङ्गा—कल्याणि ! तुम्हें इस चिन्ताका क्या प्रयोजन है ? दूध छोड़नेके बाद इन दोनों वत्सोंको मैं भगवान् वाल्मीकिको अर्पण करूँगी ।

इस समय वसिष्ठ ऋषि ही रघुवंशके आचार्य हैं, वे ही इन दोनोंका ब्राह्मणोचित और क्षत्रियोचित संस्कार करेंगे ॥ १४ ॥

यथा वसिष्ठाङ्गिरसावृषिः प्राचेतसस्तथा ।
रघूणां जनकानां च वंशयोरुभयोर्गुरुः ॥ १५ ॥

रामः—सुविचिन्तितं भगवत्या ।

लक्ष्मणः—आर्य ! सत्यं विज्ञापयामि । तैस्तैरुपायैरिमौ वत्सौ कुशलवावुत्प्रेक्षे ।

एतौ हि जन्मसिद्धास्त्रौ प्राप्तप्राचेतसावुभौ ।
आर्यतुल्याकृती वीरौ वयसा द्वादशाब्दकौ ॥ १६ ॥

तर्हि साम्प्रतमनयोः को जातकर्मादिसंस्कारं कुर्यादित्यत्राह—

यथेति । रघूणां जनकानां च उभयोः वंशयोः यथा वसिष्ठाङ्गिरसौ (गुरू), तथा प्राचेतसः ऋषिः गुरुः इत्यन्वयः । रघूणां = रघुवंशोत्पन्नानां, जनकानां च = जनकवंशोत्पन्नानां, राज्ञां च, उभयोः=द्वयोः, वंशयोः=कुलयोः, यथा = येन प्रकारेण, वसिष्ठाङ्गिरसौ = ब्रह्मपुत्रशतानन्दौ, गुरू स्त इति शेषः । तथा=तेन प्रकारेण, प्राचेतसः = वाल्मीकिः, ऋषिः = मुनिः, गुरुः = आचार्यः, अस्तीति शेषः । महर्षिवाल्मीकिरेव अनयोर्जातकर्मादिसंस्कारं विधास्यतीति भावः ॥ १५ ॥

राम इति । भगवत्या = गङ्गया, सुविचिन्तितं = समीचीनो विचारः कृतः ।

लक्ष्मण इति । तैस्तैरुपायैः=बहुभिर्हेतुभिः । उत्प्रेक्षे=सीतापुत्रौ संभावयामि । तत्र हेतुमाह—

एताविति । हि एतौ उभौ वीरौ, जन्मसिद्धास्त्रौ, प्राप्तप्राचेतसौ, आर्यतुल्याकृती, वयसा द्वादशाब्दकौ (स्तः) इत्यन्वयः । हि=यतः, एतौ=समीपतरवर्तिनौ, उभौ = द्वौ, कुशलवाविति भावः, वीरौ = शूरौ, जन्मसिद्धाऽस्त्रौ = जन्मसिद्धानि = उत्पत्तिकालप्राप्तानि, अस्त्राणि=जृम्भकास्त्राणि, ययोस्तौ, प्राप्तप्राचेतसौ=प्राप्तः=आसादितः, प्राचेतसः = वाल्मीकिः, याभ्यां तौ, संस्कारार्थं वाल्मीकिप्राप्ताविति भावः ।

रघु और जनक इन दोनों वंशोंमें जिस तरह वशिष्ठ और शतानन्द गुरु हैं, उसी तरह वाल्मीकि ऋषि भी गुरु हैं ॥ १५ ॥

राम—भगवती गङ्गाजीने अच्छा विचार किया ।

लक्ष्मण—आर्य ! मैं सत्य निवेदन करता हूँ—बहुतेरे कारणोंसे 'ये वत्स कुश और लव ही सीताजीके पुत्र है' मैं ऐसी सम्भावना करता हूँ ।

क्योंकि ये दोनों वीर हैं, इनको जृम्भकास्त्र जन्मसिद्ध है, दोनोंने वाल्मीकि ऋषिसे संस्कार लाभ किया है, ये दोनों आपके सदृश आकारवाले हैं और दोनों ही वयसे बारह वर्षके हैं ॥

रामः—वत्साविव्येवाहं परिप्लवमानहृदयः प्रमुग्धोऽस्मि[1]।

पृथिवी—एहि वत्से ! पवित्रीकुरु रसातलम् ।

रामः—हा प्रिये ! लोकान्तरं गताऽसि ?

सीता—णेदु मं अत्तणो अङ्गेसु विलअं अम्बा । ण सहिस्सं ईरिसं जीअलोअस्स परिभवं अणुभविदुम् । (नयतु मामात्मनोऽङ्गे विलयमम्बा । न

आर्यतुल्याकृती = आर्यस्य = पूज्यस्य, भवत इति भावः, तुल्या=सदृशी, आकृतिः= आकारः, ययोस्तौ । वयसा=अवस्थया हेतुना, द्वादशाब्दकौ = द्वादशसंख्याकसंवत्सरयुतौ स्त इति भावः । **'जातौ प्राचेतसान्मुनेः । वीरौ सम्प्राप्तसंस्कारौ'** इति पाठे—एतौ हि प्राचेतसान्मुनेः संप्राप्तसंस्कारौ वयसा द्वादशाब्दकौ वीरौ जातौ इत्यन्वयोऽर्थस्तु सुगमः । एतौ कुशलवौ सीतापुत्राविव उत्पत्तिकालादेव प्राप्तजृम्भकावित्येको हेतुः, वाल्मीकितः प्राप्तसंस्काराविति द्वितीयो हेतुः, भवत्सदृशाकाराविति तृतीयो हेतुः, द्वादशवत्सरवयस्काविति चतुर्थो हेतुः, एवं च यमलौ चैताविति श्लोकानुक्तः पञ्चमो हेतुश्च । तथा चैतैर्हेतुभिरिमौ कुशलवौ सीतापुत्रत्वेन निश्चिनोमीति भावः ॥ १६ ॥

राम इति । इमावित्यध्याहार्यम् , इमौ = कुशलवौ, वत्सौ = पुत्रौ, संभाव्येति शेषः, इत्येव = अनेनैव हेतुना, परिप्लवमानहृदयः = परिप्लवमानं = चञ्चलम् , हृदयं = चित्तम् , यस्य सः, एतादृशः सन् , प्रमुग्धः = प्रमूढः ।

पृथिवीति । रसातलं = रसायाः = पृथिव्याः, तलम् = अधोभागम् , पातालमित्यर्थः, 'भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा', 'अधःस्वरूपयोरस्त्री तलम्' इति चामरः ।

राम इति । लोकान्तरम् = अन्यो लोको लोकान्तरं, तत् = भूलोकभिन्नं लोकं पातालमिति भावः, 'मयूरव्यंसकादयश्च' इति समासः ।

सीतेति । विलयं = तिरोहितत्वम् । परिभवं = तिरस्कारम् , 'अनादरः

राम—इन दोनों वत्सोंको पुत्र समझकर ही मैं चञ्चलचित्त और अतिशय मोहयुक्त हो रहा हूँ ।

पृथिवी—आओ बेटी ! पातालको पवित्र करो ।

राम—हा प्रिये ! दूसरे लोक (पाताल) को चली गई हो ?

सीता—माताजी मुझे अपने अङ्गोंमें विलीन कर लें । मैं मनुष्यलोकके ऐसे तिरस्कारका

१. 'वत्स ! इत्येवाहं ··· मुग्धोऽस्मि' इति पाठान्तरम् ।

सहिष्यामीदृशं जीवलोकस्य परिभवमनुभवितुम् ।)

लक्ष्मणः—किमुत्तरं स्यात् ?

पृथिवी—मन्नियोगतः स्तन्यत्यागं यावत्पुत्रयोरवेक्षस्व । परेण तु यथा रोचिष्यते तथा करिष्यामि ।

गङ्गा—एवं तावत् ।

(इति निष्क्रान्ते देव्यौ सीता च ।)

रामः—कथं प्रतिपन्न एव तावत् । हा चारित्रदेवते ! लोकान्तरे पर्यवसितासि ? (इति मूर्च्छति ।)

परिभवः परीभावस्तिरस्क्रिया' इत्यमरः । 'जीवलोकपरिवर्त्तम्' इति पाठे—जीवलोकस्य = प्राणिलोकस्य, परिवर्तम् = परिवर्तनम् इत्यर्थः । न सहिष्यामि न सोढुं शक्तास्मि, 'अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम्' इति नयेनात्र 'षह मर्षणे' इति धातोः परस्मैपदित्वं बोध्यम् ।

लक्ष्मण इति । उत्तरं = प्रतिवाक्यम् , सीतावाक्यस्य पृथिवी किमुत्तरं दास्यतीति भावः । पुस्तकान्तरेषु रामोक्तमेवैतद्वाक्यमस्ति ।

पृथिवीति । मन्नियोगतः = मदाज्ञायाः, स्तन्यत्यागं यावत्=दुग्धत्यागपर्यन्तं, 'ततोऽन्यत्रापि दृश्यते' इति द्वितीया, पुत्रयोः = तनययोः, 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव' इति षष्ठी, अवेक्षस्व = पश्य । परेण तु = परस्मिन् काले तु, स्तन्यत्यागानन्तरं त्विति भावः, एनबन्तमव्ययमेतत् । यथा रोचिष्यते = येन प्रकारेण रुचिर्भविष्यति ।

गङ्गेति । एवं तावत् = एवमेव, एतदेव कर्त्तव्यमिति भावः ।

राम इति । प्रतिपन्नः = अङ्गीकृतः, पुत्रयोः स्तन्यत्यागानन्तरं सीतया पातालगमनमङ्गीकृतमिति भावः । लोकान्तरे = पाताले, पर्यवसिता=विश्रामं गता ।

सहन नहीं कर सकती हूँ ।

लक्ष्मण—क्या उत्तर होगा ?

पृथिवी—मेरी आज्ञासे दूध छोड़नेके समय तक पुत्रोंकी देख-रेख करो । उसके अनन्तर जैसी रुचि होगी, वैसा करूँगी ।

गङ्गा—ऐसा ही करना चाहिए ।

(अनन्तर देवीद्वय और सीताजी चली जाती हैं ।)

राम—किसी तरह सीताने स्वीकार ही कर लिया । हा चारित्रदेवते ! दूसरे लोकमें विश्रामके लिए चली गयी हो ? (ऐसा कहकर मूर्च्छित हो जाते हैं ।)

लक्ष्मणः—भगवन् वाल्मीके परित्रायस्व, परित्रायस्व। एष ते काव्यार्थः ?

(नेपथ्ये)

अपनीयतामातोद्यम्। भो जङ्गमस्थावराः प्राणभृतो मर्त्यामर्त्याः। पश्यन्त्विदानीं वाल्मीकिनाभ्यनुज्ञातं पवित्रमाश्चर्यम्।

लक्ष्मणः—(विलोक्य।)

मन्थादिव क्षुभ्यति गाङ्गमम्भो व्याप्तं च देवर्षिभिरन्तरिक्षम्।
आश्चर्यमार्या सह देवताभ्यां गङ्गामहीभ्यां सलिलादुपैति॥ १७॥

लक्ष्मण इति। परित्रायस्व = रक्ष, आर्यरामिति शेषः। काव्यार्थः = काव्यस्य = दृश्यकाव्यस्य, नाटकस्येत्यर्थः, अर्थः = प्रयोजनमभिधेयं वा=रामस्य = विपत्तिमवलोकयेतः परं निर्वर्तितव्यमिति हृदयम्।

अपनीयेति। आतोद्यं = ततानद्धसुषिरघनात्मकं वीणादिकं चतुर्विधं वाद्यमिति भावः। अपनीयतां=निवर्त्यताम्। जङ्गमस्थावराः=चराचराः मर्त्यामर्त्याः=मरणामरणधर्मवन्तः। प्राणभृतः = प्राणिनः, सम्बोधनमेतत् 'अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः।' इति मनुवचनाद् वृक्षादीनामपि प्राणवत्त्वात्स्थावरोक्तिरविरुद्धा। अभ्यनुज्ञातं = समादिष्टम्, पवित्रं = प्रयत, निर्दोषमिति भावः, पश्यन्त्वित्यन्वयः।

मन्थादिवेति। गाङ्गम् अम्भो मन्थात् इव क्षुभ्यति, अन्तरिक्षं च देवर्षिभिः व्याप्तम्। आर्या देवताभ्यां गङ्गामहीभ्यां सह सलिलात् उपैति, आश्चर्यम् इत्यन्वयः। गाङ्गं = गङ्गाया इदमिति गाङ्गं, गङ्गायाः, 'तस्येदम्' इत्यण्, अम्भः = जलं, मन्थात् इव = मथनात् इव, क्षुभ्यति = क्षोभं प्राप्नोति। अन्तरिक्षं च = आकाशं च, देवर्षिभिः = देवैः = अमरैः, ऋषिभिः=मुनिभिः, व्याप्तम्=आकीर्णं, कौतुकातिशयादिति भावः। न केवलं पृथिवी जनैराकीर्णा प्रत्युताकाशमपि

लक्ष्मण—भगवन्! वाल्मीके! रक्षा कीजिए, रक्षा कीजिए। आपके काव्यका यह प्रयोजन है ?

(नेपथ्यमें।)

चारों तरफके बाजोंको बन्द करो। हे स्थावर और जङ्गम प्राणिवर्ग! देवता और मनुष्य-समुदाय! इस समय आपलोग वाल्मीकि ऋषिसे आदिष्ट पवित्र आश्चर्यको देखें।

लक्ष्मण—(देखकर) गङ्गाजीका जल, जैसे मथनसे क्षुभित हो रहा है, आकाश देवता और ऋषियोंसे व्याप्त है। आर्या (सीताजी), देवी—गङ्गा और पृथिवीके साथ गङ्गाजलसे उठ रही हैं। आश्चर्य है॥ १७॥

(नेपथ्ये ।)

अरुन्धति ! जगद्वन्द्ये ! गङ्गापृथ्व्यौ जुषस्व नौ ।
अर्पितेयं तवावाभ्यां सीता पुण्यव्रता वधूः ॥ १८ ॥

लक्ष्मणः—अहो ! आश्चर्यमाश्चर्यम् । आर्ये ![1] पश्य पश्य । कष्टमद्यापि नोच्छ्वसित्यार्यः ।

देवर्षिभिराकीर्णमिति भावः । आर्या = सीता, देवताभ्यां = देवीभ्यां, गङ्गामहीभ्यां = जाह्नवीपृथिवीभ्यां, सह = समं, सलिलात् = गङ्गाजलात्, उपैति = उत्तिष्ठति । आश्चर्यम् = एतदद्भुतमिति भावः । अत्रोत्प्रेक्षालङ्कारः इन्द्रवज्रा वृत्तम् ॥ १७ ॥

अरुन्धतीति । जगद्वन्द्ये हे अरुन्धति ! नौ गङ्गापृथ्व्यौ जुषस्व । आवाभ्याम् इयं पुण्यव्रता वधूः सीता तव अर्पिता इत्यन्वयः । जगद्वन्द्ये = लोकनमस्कार्ये !, अरुन्धति = हे वसिष्ठपत्नि !, नौ = आवां, गङ्गापृथ्व्यौ = जाह्नवीपृथिव्यौ, जुषस्व= प्रीयस्व, 'जुषी प्रीतिसेवनयोः' इति धातोर्लोट् । **'भजस्वेति'** पाठे—सेवस्वेत्यर्थः, अस्मत्प्रार्थनापूरणेनानुगृहाणेति भावः । आवाभ्यां = गङ्गापृथिवीभ्याम्, इयं = सन्निकृष्टस्था, पुण्यव्रता=पुण्यं (पवित्रम्) व्रतं = (नियमः) यस्याः सा, वधूः= स्नुषा, सीता = मैथिली, तव = भगवत्याः, समीप इति शेषः, अर्पिता = न्यस्ता, अद्यप्रभृति सीतायाः संरक्षणं त्वया कार्यमिति भावः । 'तवावाभ्याम्' इत्यत्र **'तवाभ्याश'** इति पुस्तकान्तरपाठस्तत्र—अभ्याशे = समीप इत्यर्थः, 'सदेशाभ्याशसविधसमर्यादसवेशवत्' । इत्यमरः ॥ १८ ॥

लक्ष्मण इति । आर्ये=पूज्ये !, अरुन्धतीं प्रति सम्बुद्धिरियम्, आर्यः=पूजनीयः, रामचन्द्र इति भावः, न उच्छ्वसिति = उच्छ्वासं न प्राप्नोति, एतावति कालेऽपि चेतनां न प्राप्नोतीति भावः, अत एव कष्टम् ।

(नेपथ्यमें ।)

लोकनमस्कार्ये हे अरुन्धति ! हम दोनों गङ्गा और पृथिवीको प्रसन्न कीजिए । हम दोनों पवित्र व्रतवाली वधू इस सीताको आपको सौंपती हैं ॥ १८ ॥

लक्ष्मण—अहो ! आश्चर्य है आश्चर्य है ! आर्ये (अरुन्धति) ! देखिये, देखिए । कष्ट है, अभी तक आर्य होशमें नहीं आये हैं ।

१. दिष्ट्या आश्चर्यमाश्चर्यम् । आर्ये !' इति पाठान्तरम् ।

(ततः प्रविशत्यरुन्धती सीता च ।)

अरुन्धती—

त्वरस्व वत्से ! वैदेहि ! मुञ्च शालीनशीलताम् ।
एहि जीवय मे वत्सं सौम्यस्पर्शेन पाणिना ॥ १९ ॥

सीता—(ससम्भ्रमं स्पृशति ।) समस्ससदु समस्ससदु अज्जउत्तो ! (समाश्वसितु समाश्वसित्वार्यपुत्रः !)

रामः—(समाश्वस्य सानन्दम् ।) भोः ! किमेतत् ? (दृष्ट्वा सहर्षाद्भुतम् ।) कथं देवी जानकी ? (सलज्जम् ।) अये ! कथमम्बाऽरुन्धती ? कथं सर्वे ऋष्यशृङ्गादयोऽस्मद्गुरवः ?

अरुन्धती—वत्स ! एषा भागीरथी रघुकुलदेवता देवी गङ्गा सुप्रसन्ना[1]।

त्वरस्वेति । वत्से ! हे वैदेहि ! त्वरस्व, शालीनशीलतां मुञ्च, एहि, सौम्यस्पर्शेन पाणिना मे वत्सं जीवय इत्यन्वयः । वत्से = पुत्रि !, हे वैदेहि = हे सीते ! त्वरस्व = त्वरां कुरु, 'ञित्वरा संभ्रमे' इति धातोर्लोट् । शालीनशीलताम्= अधृष्टस्वभावत्वं, 'शालीनकौपीने अधृष्टाकार्ययोः' इति निपातनात् शालीन-पदसिद्धिः, मुञ्च = त्यज, लज्जां त्यजेति भावः । तर्हि मया किं कर्तव्यमित्याह— एहि = आगच्छ, सौम्यस्पर्शेन = मृदुलस्पर्शेन, पाणिना = करेण, मे = मम, वत्सं = रामभद्रं, जीवय = प्रबोधय ॥ १९ ॥

राम इति । कथं = केन प्रकारेण । अस्मद्गुरवः=अस्मत्पूजनीया गुरुजनाः ।

अरुन्धतीति । भागीरथी = भगीरथानीता, रघुकुलदेवता = रघुकुलस्य (रघुवंशस्य) देवता (देवी), तत्पूर्वजोद्धारकरणादिति भावः, सुप्रसन्ना = शोभनप्रसादोपेता ।

(अनन्तर अरुन्धती और सीताजी प्रवेश करती हैं ।)

अरुन्धती - बेटी सीते ! जल्दी करो ! लज्जा-शीलताको छोड़ो । आओ, कोमल स्पर्शवाले हाथसे मेरे वत्स (रामभद्र) को जिलाओ ॥ १९ ॥

सीता - (जल्दीके साथ स्पर्श करती हैं ।) आश्वस्त हों, आर्यपुत्र ! आश्वस्त हों ।

राम—(होशमें आकर, आनन्दके साथ) अरे ! यह क्या है ? (देखकर, हर्ष और आश्चर्यके साथ · क्या देवी सीता (आ गई हैं) ? (लज्जाके साथ) अरे ! क्या माता अरुन्धती और संपूर्ण ऋष्यशृङ्ग आदि हमारे पूज्य गुरुजन (उपस्थित) हैं ?

अरुन्धती—वत्स ! ये रघुकुलकी देवी भगीरथसे लाई गई गङ्गाजी सुप्रसन्न हो गई हैं ।

१. 'एषा भगवती भगीरथगृहदेवता सुप्रसन्ना गङ्गा' इति पाठान्तरम् ।

(नेपथ्ये)

जगत्पते रामभद्र ! स्मर्यतामालेख्यदर्शने मां प्रत्यात्मवचनम् । 'सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भवे' (पृ० ३९) ति । तदनृणास्मि ।

अरुन्धती—इयं ते श्वश्रूर्भगवती वसुन्धरा ।

(नेपथ्ये ।)

उक्तमासीदायुष्मता वत्सायाः परित्यागे 'भगवति वसुन्धरे ! सुश्लाघ्यां दुहितरमवेक्षस्व जानकीम्'(पृ० ७८)इति । तदधुना कृतवचनाऽस्मि[1] ।

रामः—कृतापराधोऽपि भगवति ! त्वयानुकम्पयितव्यो रामःप्रणमति[2] ।

जगदिति । जगत्पते = लोकाधिपते !, आलेख्यदर्शने = चित्रदर्शने, आत्मवचनं = स्वोक्तिः, तदेव रामाभिहितमस्य नाटकस्य प्रथमाङ्कस्थितवचनं प्रतिपादयति—**सेति** । तत = तस्माद्धेतोः, त्वदीयां प्रार्थनामनुरुध्येति शेषः । अनृणा = ऋणरहिता, गङ्गादेव्या वचनमिदम् ।

उक्तमिति । आयुष्मता=जैवातृकेण, भवता रामभद्रेणेति भावः । वत्सायाः= सीतायाः, उक्तम् = अभिहितम् , आसीत् = अभवत् , किं तदित्याह प्रथमाङ्कस्थितं रामवचनम्-**भगवतीति** । तत् = तस्माद्भवद्वचनाद्धेतोः, कृतवचना = पालितभवदादेशेति भावः ।

राम इति । कृतापराधः = कृतः = अनुष्ठितः, अपराधः=सीतात्यागरूपमागः, येन सः, अनुकम्पयितव्यः = दयनीयः । प्रणमति = प्रकर्षेण नमति ।

(नेपथ्यमें ।)

जगत्पते रामभद्र ! चित्रदर्शनके अवसरपर मुझे जो कहा था, उसका स्मरण कीजिए—'हे माता ! ऐसी आप बहू सीतामें अरुन्धतीकी तरह कल्याणकी चिन्ता करनेवाली हों ।' इस कारणसे (वैसा ही कर) मैं ऋणरहित हो गई हूं ।

अरुन्धती—ये आपकी सास भगवती पृथिवी हैं ।

(नेपथ्यमें ।)

चिरञ्जीवने सीताके परित्यागके अवसरपर कहा था—'भगवति पृथिवि ! प्रशंसनीया पुत्री सीताकी देख-रेख करें ।' इस कारणसे इस समय मैने आपके वचनका पालन कर लिया है ।

राम—भगवति ! अपराध करनेपर भी आपका दयापात्र राम प्रणाम करता है ।

१. 'अस्मि प्रभोर्वत्सस्य' इत्यधिकः पुस्तकान्तरेषु पाठः ।

२. 'कथं कृतमहापराधो भगवतीभ्यामनुकम्पितः ? प्रणमामि वः' इति पाठान्तरम् ।

अरुन्धती— भो भोः पौरजानपदाः ! इयमधुना वसुन्धराजाह्नवीभ्या-मेवं प्रशस्यमाना मया चारुन्धत्या समर्पिता¹ पूर्वं भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा सब्रह्मकैश्च देवैः स्तुता सावित्रकुलवधूर्देवयजनसंभवा जानकी परिगृह्यताम् । कथमिह भवन्तो मन्यन्ते ?

लक्ष्मणः—आर्य ! एवमम्बयाऽरुन्धत्या² च निर्भर्त्सिताः पौरजान-पदाः कृत्स्नश्च भूतग्राम आर्या नमस्कुर्वन्ति । लोकपालाः सप्तर्षयश्च पुष्प-वृष्टिभिरुपतिष्ठन्ते ।

अरुन्धतीति । पौरजानपदाः = पौराः (पुरवासिनः) जानपदाः (देशवा-सिनः), वसुन्धराजाह्नवीभ्यां = पृथ्वीगङ्गाभ्याम् , एवम् = इत्थम्—'आवयोरपि यत्सङ्गात्पवित्रत्वं प्रकृष्यते ।' इत्यष्टमश्लोकोक्तप्रकारेणेति भावः । प्रशस्यमाना = अभिष्टुतेति भावः, पूर्वं = रावणवधानन्तरकाले, वैश्वानरेण = अग्निना, निर्णीत-पुण्यचारित्रा = निर्णीतं (निश्चितम्) पुण्यं (पवित्रम्) चारित्रं (सच्चरित्रं, पाति-व्रत्यमिति भावः) यस्याः सा; सब्रह्मकैः = ब्रह्मदेवयुक्तैः, स्तुता = प्रशंसिता, सावित्र-कुलवधूः = सूर्यवंशस्नुषा, देवयजनसंभवा = यज्ञस्थानोत्पन्ना, अयोनिजेति भावः । इयं = मत्समीपस्था, जानकी = मैथिली, परिगृह्यतां=राज्ञीत्वेन स्वीक्रियताम् । इह= अस्मिन्विषये, भवन्तः, कथं मन्यन्ते = किं वोऽभिमतमिति भावः । सीतायाः पाति-व्रत्यज्ञापकेष्वेतावत्सु हेतुषु सत्सु रामकर्तृकतत्परिग्रहविषये किं वोऽभिमतमिति भावः ।

लक्ष्मण इति । एवम् = इत्थम् , निर्भर्त्सिताः = उपालब्धा इति भावः । कृत्स्नः = समस्तः, भूतग्रामश्च = प्राणिसमूहश्च, भूतग्रामोऽयं गोबलीवर्दन्यायेन पौरजानपदातिरिक्तो ग्राह्यः । आर्यां = सीतां, लोकपालाः = इन्द्रादयः, सप्तर्ष-यश्च = कश्यपादयश्च, उपतिष्ठन्ते = पूजयन्ति, आर्यामिति शेषः, 'उपाद् देवपूजा-

अरुन्धती—हे नागरिक और देशवासिगण ! इस समय पृथिवी और गङ्गाजीसे इस तरह प्रशंसा की जानेवाली, मुझ अरुन्धतीसे समर्पणकी गई, पहले भी जिनके पवित्र चरित्रका भगवान् अग्निदेवसे निश्चय कर लिया गया है ऐसी और ब्रह्मदेवसे युक्त अन्य देवोंसे स्तुतिकी गई सूर्यवंशकी वधू (बहू) यज्ञस्थानमें उत्पन्न इन सीताजीको ग्रहण कर लें। इस विषयमें आप लोगोंका क्या मत है ?

लक्ष्मण—आर्य ! इस तरह माता अरुन्धतीके उलाहना देनेपर नागरिक और देश-वासिगण तथा संपूर्ण प्राणिसमुदाय आर्याको नमस्कार कर रहे हैं । लोकपाल और सप्तर्षि-गण भी पुष्पवृष्टिसे आर्याकी पूजा कर रहे हैं ।

१. ······पदाः । भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्यमाना ममारुन्धत्याः समर्पिता' इति पाठान्तरम् । २. 'एवमार्ययाऽरुन्धत्या' इति पाठान्तरम् ।

अरुन्धती—जगत्पते रामभद्र !

नियोजय यथाधर्मं प्रियां त्वं धर्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यां प्रकृतिमध्वरे ॥ २० ॥

सीता—(स्वगतम् ।) अवि जाणादि अज्जउत्तो सीदाए दुक्खं पडिमज्जिदुम् ? (अपि जानात्यार्यपुत्रः सीताया दुःखं परिमार्ष्टुम् ?)

रामः—यथा भगवत्यादिशति ।

लक्ष्मणः—कृतार्थोऽस्मि ।

सङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' इत्यात्मनेपदम् , एतेन सीताया देवतात्वं व्यज्यते ।

नियोजयेति । (हे जगत्पते !) त्वं हिरण्मय्याः प्रतिकृतेः पुण्यां प्रकृतिं प्रियां धर्मचारिणीम् , अध्वरे यथाधर्मं नियोजय इत्यन्वयः । (हे जगत्पते=हे लोकाधीश रामभद्र !) त्वं = भवान् , हिरण्मय्याः = सुवर्णनिर्मितायाः, 'तस्य विकार' इति मयट् , टित्वान्ङीप् , 'दाण्डिनायने' त्यादिसूत्रेण यलोपनिपातः । प्रतिकृतेः = प्रतिमायाः, पुण्यां = पवित्रां, प्रकृतिं = बिम्बभूतां, प्रियां = वल्लभां, धर्मचारिणीं = धर्मानुष्ठानशीलां, सहधर्मिणीं = पत्नीम् , सीतामिति भावः । अध्वरे = यज्ञे-प्रारब्धेऽश्वमेध इति भावः, यथाधर्मं = धर्ममनतिक्रम्येति विग्रहे यथार्थेऽव्ययीभावः । नियोजय=नियुक्तां कुरु, सीतया सहितः सन्नश्वमेधमनुतिष्ठेति भावः ॥ २० ॥

सीतेति । परिमार्ष्टुम् = निवारयितुम् । अपिः सम्भावनार्थकः, 'गर्हासमुच्चयप्रश्नशङ्कासंभावनास्वपि ।' इत्यमरः ।

राम इति । भगवती = अरुन्धती, आदिशति = आज्ञापयति, तथैवानुतिष्ठामीति भावः ।

लक्ष्मण इति । कृतार्थः = कृतकृत्यः, सीतारामयोः समागमरूपप्रयोजनेन सम्पन्न इति भावः ।

अरुन्धती—जगत्पते रामभद्र !

आप सुवर्णमयी प्रतिमाकी पवित्र बिम्बभूत प्रिया सहधर्मचारिणी सीताको यज्ञमें धर्मपूर्वक नियुक्त करें ॥ २० ॥

सीता—(मन ही मन) आर्यपुत्र सीताके दुःखका निवारण करना भी जानते हैं ?

राम—भगवती जैसी आज्ञा करती हैं ।

लक्ष्मण—मैं कृतकृत्य हो गया हूँ ।

सीता—पच्चुज्जीविदह्मि। (प्रत्युज्जीवितास्मि।)

लक्ष्मणः—आर्ये ! अयं लक्ष्मणः प्रणमति।

सीता—वच्छ ! ईरिसो तुमं चिरं जीअ। (वत्स ! ईदृशस्त्वं चिरं जीव)

अरुन्धती—भगवन् वाल्मीके ! उपनयेदानीं सीतागर्भसंभवौ रामभद्रस्य कुशलवौ। (इति निष्क्रान्ता।)

रामलक्ष्मणौ—दिष्ट्या तथैवैतत्।

सीता—कहिं ते[1] पुत्तआ ? (क तौ पुत्रकौ ?)

(ततः प्रविशति वाल्मीकिः कुशलवौ च।)

वाल्मीकिः—वत्सौ ! एष वां रघुपतिः पिता। एष लक्ष्मणः कनिष्ठतातः।

सीतेति। प्रत्युज्जीवितास्मि = पुनः प्राप्तजीवनास्मि, आर्यपुत्रस्वीकारेणेति भावः।

लक्ष्मण इति। प्रणमति = वन्दते, त्वामिति शेषः, क्वचित् **'निर्लज्जः'** इत्यधिकः पाठस्तस्य वने त्वन्निर्वासनादिति शेषः।

सीतेति। ईदृशः = एतादृशः, वियुक्तयोः प्रजावतीभ्रात्रोः सम्मेलनेन संजातहर्षः सन्निति भावः।

अरुन्धतीति। रामभद्रस्य उपनय = रामभद्रसमीपं प्रापयेति भावः। अत्रैवान्तर्नाटकाभिनयोऽवसित इत्यवधेयमतः परं वाल्मीक्यादीनां प्रवेशात्।

वाल्मीकिरिति। वां = युवयोः, 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया-

---

सीता—मैंने पुनर्जीवनको प्राप्त कर लिया है।

लक्ष्मण—आर्ये ! यह लक्ष्मण प्रणाम करता है।

सीता—वत्स ! आप ऐसे ही होकर बहुत काल तक जीते रहें।

अरुन्धती—भगवन् वाल्मीके ! इस समय सीताके गर्भसे उत्पन्न कुश और लवको रामभद्रके समीपमें ले आइये। (ऐसा कहकर जाती हैं।)

राम और लक्ष्मण—भाग्यसे यह बात वैसी ही हुई।

सीता—वे पुत्र कहाँ हैं ?

(अनन्तर वाल्मीकि ऋषि, कुश और लव प्रवेश करते हैं।)

वाल्मीकि—वत्सद्वय ! ये रामचन्द्रजी तुम्हारे पिता हैं। ये लक्ष्मणजी तुम्हारे कनिष्ठ पिता

---

१. '(सबाष्पाकुला)' इत्यधिकः पाठः कुत्रचित्पुस्तके।

एषा सीता जननी । एष राजर्षिर्जनको मातामहः ।

सीता—(सहर्षकरुणाद्भुतं विलोक्य ।) कहं तादो ? कहं जादा ?[1] (कथं तातः ? कथं जातौ ?)

वत्सौ—हा तात ! हा अम्ब ! हा मातामह !

रामलक्ष्मणौ—(सहर्षमालिङ्गय ।) ननु वत्सौ ! युवां प्राप्तौ स्थः ।

सीता—एहि जाद कुस ! एहि जाद लव ! चिरस्स मं परिस्सजह लोअन्दरादो आअदं[2] जणणिम् । (एहि जात कुश ! एहि जात लव ! चिरस्य मां परिष्वजेथां लोकान्तरादागतां जननीम् ।)

स्ययोर्वाचावौ' इति वामादेशः । मातामहः = मातुः पिता, 'पितृव्यमातुलमातामहपितामहाः' इति निपातनसूत्रे 'मातृपितृभ्यां पितरि डामहच्' इति वार्तिकतो डामहच् प्रत्ययः ।

सीतेति । सहर्षकरुणाद्भुतं = पतिपुत्राद्युपेतया मया जनको दृष्ट इति हर्षः = आनन्दः, प्रागनुभूतदुःखस्मरणेन करुणः = शोकः, दैवानुकूल्येनातर्कितापि घटना पुरत आविर्भवतीति अद्भुतम् = आश्चर्यम् , तैः सहितं यथा तथेति विलोकनक्रियायां विशेषणम् । जातौ = पुत्रौ, कुशलवाविति भावः ।

वत्साविति । हा = खेदद्योतकमव्ययमेतत् , एतावत्कालपर्यन्तं भवन्तः कथं नावाभ्यां परिज्ञाताः ? खेदविषयोऽयमिति भावः ।

रामलक्ष्मणाविति । ननु = सम्बोधनार्थकमव्ययमेतत् ।

सीतेति । लोकान्तरात् = पातालात् , जननीं=मातरम् । चिरस्य=बहुकालपर्यन्तम्, परिष्वजेथाम् = आलिङ्गयतम् ।

छोटे चाचा) हैं । ये सीताजी माता हैं और ये राजर्षि जनक तुम्हारे मातामह (नाना) हैं ।

सीता—(हर्ष, शोक और आश्चर्यके साथ देखकर) क्या पिताजी और दोनों पुत्र आगये हैं ?

दोनों बालक—(कुश और लव)—हा पिताजी ! हा माताजी ! हा मातामह(नानाजी) ! ।

राम और लक्ष्मण—(हर्षके साथ आलिङ्गन कर) पुत्रो ! प्राप्त हुए हो ।

सीता—पुत्र कुश ! आओ, पुत्र लव ! आओ; दूसरे लोक (पाताल) से आई हुई मुझ माताको बहुत काल तक आलिङ्गन करो ।

१. 'कहं जादा ? (कथं जातौ ?)' इति नास्ति क्वचित्पुस्तकेषु ।

२. 'जम्मंतरगदं (जन्मान्तरगताम्)'

कुशलवौ—(तथा कृत्वा ।) धन्यौ स्वः ।

सीता—भअवं ! एसा हं पणमामि । (भगवन् ! एषाऽहं प्रणमामि ।)

वाल्मीकिः—वत्से ! एवमेव चिरं भूयाः[1] ।

(नेपथ्ये[2] ।)

[3]उत्खातलवणो मधुरेश्वरः प्राप्तः ।

लक्ष्मणः—सानुषङ्गाणि कल्याणानि ।

कुशलवाविति । तथा कृत्वा = आलिङ्ग्येति भावः, धन्यौ = पुण्यवन्तौ, मातापित्रादिदर्शनादिति भावः, 'सुकृती पुण्यवान्धन्य' इत्यमरः ।

सीतेति । प्रणमामि = नमस्करोमि, भवन्तं वाल्मीकिमिति शेषः ।

वाल्मीकिरिति । एवमेव = ईदृश्येव, पतिपुत्रादियुक्तैवेति भावः, चिरं = बहुकालपर्यन्तम् , भूयाः = भवतात् , पतिपुत्रादिभिस्ते कदापि वियोगो मा भूदिति भावः ।

उत्खातेति । उत्खातलवणः = उत्खातः (उन्मूलितः) लवणः (लवणासुरः) येन सः, मधुरेश्वरः = मथुरायाः (तन्नाम्न्याः कस्याश्चित्पुर्याः) ईश्वरः = स्वामी, शत्रुघ्न इति भावः, क्वचित्तु 'मधुरेश्वर' इति पाठः । अस्यापि प्रथमारब्धप्रयोजनत्वान्निर्वहणे निवेशः ।

लक्ष्मण इति । सानुषङ्गाणि = अनुषङ्गेण = अनुबन्धेन, सहितानि=युक्तानि,

---

कुश और लव—(वैसा ही कर) हम दोनों धन्य हैं ।

सीता—भगवन् ! यह मैं प्रणाम करती हूँ ।

वाल्मीकि—बेटी ! बहुत काल तक ऐसी (पति-पुत्रवती) ही रहो ।

(नेपथ्यमें ।)

लवणासुरको मारनेवाले मथुराके अधीश्वर (शत्रुघ्न) आ गये हैं ।

लक्ष्मण—कल्याण दूसरे कल्याणसे अनुगत हुए हैं ।

---

१. एतदग्रे—'सीता । 'अम्महे, तादो, कुलगुरु, अज्जाजणो, सभत्तुआ अज्जा संतादेई सलक्खणा सुप्पसण्णा अज्जउत्तचलणा, समं कुसलवावि दिसंति, ता णिब्भरम्हि आणंदेण । (आश्चर्यम् , तातः, कुलगुरुः, आर्याजनः, समर्तृका आर्या शान्तादेवी, सलक्ष्मणाः सुप्रसन्ना आर्यपुत्रचरणाः, समं कुशलवावपि दृश्यन्ते; तन्निर्भरास्मि आनन्देन) इतिच्छाया' इत्यधिकः पाठो वर्तते पुस्तकान्तरेषु । २. 'कलकलः' इत्यधिकः पाठः पुस्तकान्तरेषु ।

३. 'वाल्मीकिः । (उत्थायावलोक्य च)' इत्यधिकेन पुस्तकान्तरपाठेन सहोक्तिरियं वाल्मीकेरिति बोध्यम् ।

रामः—सर्वमिदमनुभवन्नपि न प्रत्येमि । यद्वाप्रकृतिरियमभ्युदयानाम् ।
वाल्मीकिः—रामभद्र ! उच्यतां, किं ते भूयः प्रियमुपहरामि ?
रामः—अतः परमपि प्रियमस्ति ? किं त्विदं भरतवाक्यमस्तु
पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।

कल्याणानि=मङ्गलानि, कल्याणानि अन्यैः कल्याणैरनुगतानीति भावः । एतादृश-प्रमोदसमये शत्रुघ्नोऽपि लवणासुरं हत्वाऽस्मत्समीपे संप्राप्तोऽतः कल्याणं कल्याणान्तरेणानुगतमिति भावः ।

राम इति । सर्वं = सकलम् , इदं = सीतासमागमादिकम् , अनुभवन्नपि= साक्षात्कुर्वन्नपि, न प्रत्येमि = न विश्वसिमि, दुर्दैवपीडितस्य मे कथं नामैतादृशी सौभाग्यसम्पत्तिरिति मत्वेति भावः । यद्वा = अथवा, अभ्युदयानां = कल्याणानाम् , इयं प्रकृतिः = अयं स्वभावः । कल्याणानि अनुग्रहकाले पुरुषं साकल्येन वृण्वन्ति न त्वेकदेशेनेति भावः ।

वाल्मीकिरिति । भूयः=पुनः, ते=तव, प्रियम् = अभीष्टम् , उपहरामि=उपहारीकरोमि ।

राम इति । अतः परमपि = अस्मादधिकमपि, पत्नीपुत्रादिप्राप्त्यधिकमपीति भावः, प्रियम् = अभीष्टम् , अस्ति = वर्तते ?, काक्वा किमपि न वर्तत इति भावः । किन्तु = परन्तु, एवं सत्यपीति भावः, भरतवाक्यं = नाटकाचार्यभरतर्षिवाक्यम् , अस्तु = भवतु । किं तदित्याह—

पाप्मभ्य इति । जगतो माता इव गङ्गा इव च मङ्गल्या मनोहरा च सा इयं कथा पाप्मभ्यः पुनाति, श्रेयांसि वर्द्धयति च । बुधा अभिनयैः विन्यस्तरूपां शब्दब्रह्मविदः प्राज्ञस्य कवेः परिणताम् इमां ताम् एतां वाणीं परिभावयन्तु इत्यन्वयः । जगतः = लोकस्य, माता इव = जननी इव, गङ्गा इव च =

राम—इन सब विषयोंको अनुभव करता हुआ भी विश्वास नहीं करता हूँ । अथवा कल्याणोंका यह स्वभाव है ।

वाल्मीकि—रामभद्र ! कहिए, फिर आपके किस अभीष्ट पदार्थको उपहारके रूपमें समर्पण करूँ ?

राम—इससे भी अधिक कुछ अभीष्ट है क्या ? परन्तु भरत ऋषिका यह वाक्य हो—

तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम् ॥ २१ ॥

(निष्क्रान्ताः सर्वे ।)

इति महाकविभवभूतिविरचित उत्तररामचरिते 'सम्मेलनं' नाम सप्तमोऽङ्कः॥

भागीरथी इव च, सा=प्रसिद्धा, इयम = एषा, कथा = रामायणात्मकप्रबन्धकल्पना, पाप्मभ्यः = पापेभ्यः, 'अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम्' । इत्यमरः । पुनाति = पवित्रयति, लोकमिति शेषः । श्रेयांसि च = कल्याणानि च, वर्द्धयति च = पुष्णाति च, क्वचित्तु 'पुनातु', 'वर्द्धयतु' इति पाठौ स्तः । बुधाः=विद्वांसः, अभिनयैः=सात्त्विकादिभिरवस्थानुकारैः, 'भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥' इति साहित्यदर्पणीयं भेदगर्भमभिनयलक्षणम् , विन्यस्तरूपा = विन्यस्त (दर्शितम्) रूप (स्वरूपम्) यस्यास्ताम् , शब्दब्रह्मविदः = वेदतत्त्वार्थज्ञस्य, प्राज्ञस्य = विपश्चितः, कवेः = कवयितुः, भवभूतेरिति भावः, परिणतां = प्राप्तपरिणामा, रूपान्तरं प्राप्तामिति तात्पर्यम् । **'परिणतप्रज्ञस्य'** इत्याकारकः कविविशेषणात्मकः, पुस्तकान्तरपाठः, इमाम् = एताम् , ताम् एतां = सुप्रसिद्धां, वाणीं = वाचम् , उत्तररामचरितरूपामिति भावः, परिभावयन्तु = विचारयन्तु । महर्षिवाल्मीकेः पद्यात्मकरामायणवाचामेव नाटकरूपेण परिणाममापन्नामुत्तररामचरितरूपा सहृदयशिरोमणेर्भवभूतेर्वाणीं गुणदोषविवेचनेन विद्वांसः परिशीलयन्त्विति भावः । अत्र [illegible]पमाऽलङ्कारः । शार्दूलविक्रीडित वृत्तम् ॥ २१ ॥

इति श्रीशेषराजशर्मप्रणीतायामुत्तररामचरितव्याख्यायां 'चन्द्रकला'-ख्यायां संमेलनं नाम सप्तमोऽङ्कः ॥ ७ ॥

जगत्की माता और गङ्गाकी तरह मङ्गलके लिए हितकारिणी और मनोहर यह (रामायणस्वरूपिणी) कथा लोकको पापोंसे पवित्र करती है और कल्याणोंको बढ़ाती भी है । वही शब्दब्रह्मको जाननेवाले विद्वान् कवि(भवभूति) से दूसरे रूपमें लाई गई और जिसका स्वरूप अभिनयोंसे दिखाया गया है, ऐसी इस (उत्तररामचरितस्वरूप) वाणीका विद्वान् लोग विचार करें ॥ २१ ॥

(सब लोग जाते हैं ।)

यह 'सम्मेलन' नामक सप्तम अङ्क समाप्त हुआ ॥ ७ ॥

अथ टीकाकारस्य

ग्रन्थसमाप्तौ मङ्गलाचरणम्

यत्कार्यं विहितं करोमि सततं, पश्चात्करिष्यामि य-
द्रागेणागमजातवर्णितदिशा कर्तव्यबुद्ध्यापि वा ।
तत्सर्वं भवदीयपादकमलद्वन्द्वेऽर्प्यते श्रद्धया
स्वामिन् ! कृष्ण !! न चास्ति मेऽत्र कृतिता सापि त्वदुक्त्यैव हि ॥

❀ ॐ तत्सत् श्रीकृष्णार्पणमस्तु ❀

समाप्तोऽयं ग्रन्थः ।

उत्तररामचरित

नोट्स-टिप्पणी

प्रथम अङ्क

पं० श्री कान्तानाथ शास्त्री तैलङ्ग, एम० ए०

(प्राध्यापक, काशी हिन्दू विश्वविद्यालय, वाराणसी)

पृ० १-२. उत्तररामचरितम्=श्रीरामचन्द्रजी के जीवन के उत्तरार्ध की घटनाओं का वर्णन—यह इस नाटक का नाम है। वस्तुतः 'उत्तररामचरितम्' यह पद रामचन्द्रजी के जीवन के उत्तरार्ध का बोधक है। तथापि अभेदोपचार से यह पद ग्रन्थ का भी बोध कराता है। अथवा 'उत्तरं रामचरितं यस्मिन् तत्' ऐसा अर्थ करने से भी लक्षणया यह पद ग्रन्थ का बोधक होता है। कवि ने 'महावीरचरितम्' नामक नाटक में रामचन्द्रजी के पूर्वचरित का वर्णन किया है। अतः प्रकृत नाटक में उत्तरचरित का वर्णन करते हैं। संस्कृत में 'चरित' और 'चरित्र' दो शब्द हैं। प्रथम शब्द अंग्रेजी के ('Life') शब्द का समानार्थक माना जाता है। इस शब्द का 'जीवन' इस अर्थ में प्रयोग किया जाता है। यह जीवन के इतिवृत्त का बोध कराता है। दूसरा शब्द अंग्रेजी के 'Character' शब्द का समानार्थक माना जाता है। इसमें मनुष्य का स्वभाव, परिस्थिति विशेष में उसकी चित्तवृत्ति कैसी होती है और वह कैसा व्यवहार करता है, इत्यादि बातें आती हैं।

इदं कविभ्यः=शिष्टाचार के अनुसार कवि ने ग्रन्थ के आरंभ में 'इदं कविभ्यः' इत्यादि श्लोकद्वारा नान्दीपाठात्मक मंगल किया है। यह प्राचीन परिपाटी है कि किसी भी कार्य को करने के पूर्व विघ्नविघात के लिये मंगलपाठ करना चाहिये। कुछ लोगों का मत है कि ग्रन्थ के आरंभ में, मध्य में तथा अंत में तीन बार मंगल करना चाहिये। 'ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरेत्'। मंगल तीन प्रकार का होता है—आशीर्वादात्मक, नमस्कारात्मक तथा वस्तुनिर्देशात्मक। 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापिमङ्गलम्'। कविने इस नाटकमें नमस्कारात्मक मंगल किया है।

पूर्वेभ्यः कविभ्यः=व्यास, वाल्मीकि आदि प्राचीन कवियों को। 'प्रशास्महे' इस क्रिया का उद्देश्य होने से 'कविभ्यः' में चतुर्थी हुई। 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्'। 'कविनुद्दिश्य प्रशास्महे' कवियों को उद्देश्य कर प्रार्थना करते हैं—ऐसा बोध होता है। दा-धात्वर्थ को क्रियामात्र का उपलक्षण मान कर 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इससे भी चतुर्थी हो सकती है। इस पक्ष में 'कीदृशुद्दिश्य इदं प्रशास्महे' कवियों को उद्देश्य कर यह प्रार्थना करते हैं—ऐसा बोध होगा। कुछ लोग आगे आने वाले 'नमोवाकं' इस पद में वर्तमान 'नमः' शब्द के

योग में चतुर्थी मानते हैं। कुछ लोगों का कहना है कि 'कविभ्यः' यह पद केवल वाल्मीकि के लिये है। बहुवचन का प्रयोग आदर के लिये किया गया है। नमोवाकं=नमोवचनपूर्वक, अर्थात् नमस्कार करके। 'वच परिभाषणे' धातु से भाव में घञ् प्रत्यय करने से 'वाकः' ऐसा अकारान्त पुंल्लिङ्ग रूप बनता है। 'नमो वाको यस्मिन् कर्मणि तद्यथा नमोवाकम्'—यह क्रियाविशेषण है। वीरराघवने अपनी टीका में 'नमोवाकं' को 'प्रशास्महे' का कर्म माना है। ऐसा करने से 'कविभ्यः नमोवाकं प्रशास्महे' कवियोंको उद्देश्य कर 'नमः' इस उक्ति का निर्देश करते हैं—यह अर्थ होगा। वीरराघव ने जो पाठ लिया उसकी अपेक्षा इस संस्करण का पाठ सरल और सुबोध है। आत्मनः=परमात्मा की। अमृतां=नित्य, कभी नष्ट न होने वाली। कलाम्=अंशभूत। देवतां=देवरूपिणि। वाचं=वाणी को। विन्देम= प्राप्त करें। पुराणों में वाणी को परमात्मा का अंश माना है। 'काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च। शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः॥' वा० पु० १-२२,४८। 'इद्' यह सर्वनाम पूर्वोक्त 'आत्मनः अमृतां कलां वाचं देवतां विन्देम' इस आश्रित वाक्य का परामर्श करता है। प्रशास्महे=प्रार्थना करते हैं, इच्छा करते हैं। 'आङ्' उपसर्गपूर्वक 'शास्' धातु इच्छार्थक है। परन्तु कवि ने यहां 'प्र' उपसर्गपूर्वक 'शास्' का प्रयोग किया है। इसका कारण यह है कि 'आङ्' का जोड़ना प्रायक है, अनिवार्य नहीं। 'आङ्पूर्वत्वं प्रायिकं तेन 'नमोवाकं प्रशास्महे' इति सिद्धम्' (सि. कौ.)

भारतीय नाट्याचार्यों के अनुशासन के अनुसार प्रत्येक नाटक में नाटक आरंभ करने के पहले कुछ प्रारम्भिक कार्य करने पड़ते हैं। वे हैं–पूर्वरंग, सभापूजा, कवि और नाटक का परिचय देना और आमुख। आमुख को ही प्रस्तावना भी कहते हैं।

नान्दी–पूर्वरंग के प्रत्याहारादि बाइस अंग होते हैं। उन में से नान्दी एक है। यह नाटकों में किये जाने वाले मंगलाचरण का दूसरा नाम है। इसमें देवता, ब्राह्मण, राजा, गुरु आदि की स्तुति रहती है। नाटक में आने वाले विषय की सूचना भी रहती है। प्रकृत नाटक की नांदी में 'आत्मनः कलाम्' के द्वारा राम और सीता की सूचना दी गई है। नांदी आठ अथवा बारह पदों की होती है। 'पद' शब्द के अर्थ के विषय में विद्वानों का मतभेद है। कुछ लोग सुप्, तिङ्, विभक्त्यन्त शब्दोंको नांदी के लिये पद मानते हैं। अन्य लोग पद्य के चरण को पद मानते हैं। तीसरे मतके अनुसार पद्य के अवान्तर वाक्यों में से प्रत्येक वाक्य पद है। इस नाटक में सुबन्त-तिङन्त पदों को पद मानकर बारह पदों की नान्दी की गई है।

नान्दीपाठ के विषय में नाटकों में दो शैलियाँ दिखाई देती हैं। कुछ नाटकों में 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' लिखकर तब मंगल पद्य दिया रहता है। कुछ नाटकोंमें मंगल पद्य देकर तब 'नान्द्यन्ते'–'सूत्रधारः' लिखा रहता है। भास कविके नाटकों में पहली शैली का अनुसरण किया गया है। कालिदास आदि कवियों के

नाटकों में दूसरी शैली का अनुसरण किया गया है। प्रकृत नाटक में भी दूसरी ही शैली अपनाई गई है।

नान्दीपाठ कौन करे, इस विषय में नाटकों में कोई सूचना नहीं दी रहती। भरत मुनि के अनुसार नान्दीपाठ सूत्रधार को करना चाहिये। 'सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः'। संस्कृत नाटकों में नान्दी पद्य के बाद उपलब्ध 'नान्द्यन्ते'—'सूत्रधारः'—इस लेख का आशय यह है कि जिस सूत्रधार ने नान्दी पाठ किया, वही सूत्रधार नान्दी के बाद भाषण आरम्भ करता है। यदि इस लेख का यह अर्थ होता कि नान्दीपाठ करने वाले पात्र के चले जाने पर सूत्रधार प्रवेश करता है तो 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' यह लिखने की प्रथा होती। पूर्वरंग अथवा तदङ्गभूत नान्दी करके सूत्रधार चला जाय और उसके बाद स्थापक नाम का पात्र प्रवेश करके आगे कार्य करे यह प्रथा लुप्त हो गई-सी दिखाई देती है। उपलब्ध संस्कृत नाटकों में एक ही सूत्रधार सब कुछ करता हैं। साहित्यदर्पण में भी कहा है 'इदानीं पूर्वरङ्गस्य सम्यक् प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः,'। नान्दीपद्य के पूर्व सूत्रधार का नाम न लिखने का मूल कारण यह प्रतीत होता है कि ग्रन्थ के आरम्भ में मङ्गलसूचक शब्दों के अतिरिक्त कुछ लिख दिया गया तो अशुभ होगा।

पृ. ३. सूत्रधारः—रङ्गशाला के व्यवस्थापक को सूत्रधार कहते हैं। 'नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते।'

कालप्रियनाथस्य—कालप्रियनाथ महादेव का मन्दिर कहाँ था, इस विषय में विद्वानों का मतभेद है। कुछ लोगों का मत है कि उज्जयिनी में वर्तमान महाकालेश्वर ही कालप्रियनाथ हैं अन्य लोगों का कथन है कि पद्मपुर में, जहाँ भवभूति रहते थे, कालप्रियनाथ का मन्दिर था। भवभूति के तीनों नाटकों में कालप्रियनाथ का उल्लेख है। ऐसा प्रतीत होता है कि प्राचीन काल में देवताओं की यात्रा के अवसर पर अथवा अन्य उत्सवों में नाटक खेले जाते थे।

यात्रायाम् = उत्सव के अवसर पर। आर्यमिश्रान् = मान्य दर्शकों को। 'कुलं शीलं दया दानं धर्मः सत्यं कृतज्ञता। अद्रोह इति येष्वेतत्तानार्यान् संप्रचक्षते।' मिश्र—यह एक आदरसूचक शब्द है।

अत्रभवन्तः—उपस्थित पूज्य महानुभाव। 'भवत्' शब्द में 'अत्र' 'तत्र' जोड़ देने से विशेष आदर व्यक्त होता है। उपस्थित सज्जनों के लिये 'अत्र' जोड़ा जाता है। अनुपस्थित सज्जनों के लिये 'तत्र' जोड़ा जाता है।

काश्यपः—भवभूति काश्यप गोत्र में उत्पन्न हुए थे।

श्रीकण्ठपदलाञ्छनः—श्रीः कण्ठे यस्य स श्रीकण्ठः, श्रीकण्ठ इति पदं लाञ्छनं यस्य सः। 'लाञ्छन' शब्द का अर्थ है 'चिह्न' 'नाम'। 'श्रीकण्ठ' यह भवभूति का

नाम था। कुछ लोगों का मत है कि 'भवभूति' यह कवि का असली नाम था; 'श्रीकण्ठ' यह उपाधि थी। यह मत ठीक नहीं प्रतीत होता। 'भवभूतिर्नाम' यहाँ 'नाम' शब्द प्रसिद्धार्थक अव्यय है। यह इस बात को सूचित करता है कि 'श्रीकण्ठ' कवि का असली नाम था, परन्तु वे 'भवभूति' इस नाम से प्रसिद्ध थे. श्रीमान् डा० बेलवेलकर महोदय का भी यही मत है। प्राचीन टीकाकार वीरराघव भी इसी मत का समर्थन करते हैं।

पदवाक्यप्रमाणज्ञः—पदशास्त्र = व्याकरण, वाक्यशास्त्र = मीमांसा, प्रमाण-शास्त्र = न्याय, इन शास्त्रों का ज्ञाता।

पृ. ४. भवभूतिर्नाम—भवभूति इस नाम से प्रसिद्ध कवि का 'भवभूति' यह नाम कैसे पड़ा? इस विषय में दो किवदंतियां प्रसिद्ध हैं। पहली किंवदंती यह है कि भवभूति के बनाए हुए 'साम्बा पुनातु भवभूतिपवित्रमूर्तिः' इस पद्य को सुन कर राजा प्रसन्न हुआ और उसने उनको 'भवभूति' यह नाम दिया। दूसरी किंवदंती यह है कि कवि के बनाए हुए—'तपस्वी कां गतोऽवस्थामिति स्मेराननाविव। गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ' इस पद्य को सुन कर उस समय के विद्वान् प्रसन्न हुए और उन्होंने उनको 'भवभूति' यह उपाधि दी।

जतुकर्णीपुत्रः—भवभूति की माता का नाम जतुकर्णी था।

ब्रह्माणं=ब्राह्मण को। कवि ने 'ब्राह्मणं' के स्थान में बुद्धिपूर्वक 'ब्रह्माणं का प्रयोग किया है। वे यह दिखलाना चाहते है कि जिस प्रकार सरस्वती ब्रह्मा के वश में है उसी प्रकार वह उनके भी वश में है।

पृ. ५. आयोध्यकः = अयोध्यावासी। पौलस्त्यकुलधूमकेतोः—पौलस्त्यस्य कुल, तस्य धूमकेतुः, तस्य; जिस प्रकार अग्नि वंश (बांस) को नष्ट कर देता है, उसी प्रकार रामचन्द्रजी रावण के कुल का नाश करनेवाले हैं। पट्टाभिषेकसमयः=राज्याभिषेक का समय। 'राज्याभिषेक' के स्थान पर 'पट्टाभिषेक' का प्रयोग आन्ध्र देश में विशेष होता है। अतः यह प्रतीत होता है कि भवभूति आंध्रब्राह्मण थे। उन्होंने गोदावरी नदी के तटवर्ती देश का बड़ा सुन्दर वर्णन किया है। वे यह भी कहते हैं कि वे कृष्णयजुर्वेद की तैत्तिरीय शाखा के अनुयायी हैं। ये सब बातें यह सूचना देती हैं कि वे मध्य प्रान्त में स्थित चाँदा, भण्डारा आदि जिलों के कुछ दक्षिण किसी स्थान के रहने वाले थे। आज भी वहाँ गोदावरी के तट पर वेदशास्त्रनिष्णात अग्निहोत्री आन्ध्र ब्राह्मणों के अनेक कुटुम्ब रहते हैं। डा० भांडारकर महोदय भी प्रायः इसी प्रान्त को भवभूति का देश मानते हैं। अन्तर इतना ही है कि वे उन्हें महाराष्ट्र कहते हैं। हमें यह बात नहीं जँचती। उनकी भाषा तथा उनकी रुचि देख कर हमें यह प्रतीत होता है कि वे आन्ध्र थे। पूज्यपाद पं० बलदेव उपाध्यायजी तथा अन्य विद्वानों का मत है कि वे बरार के रहने वाले महाराष्ट्र ब्राह्मण थे।

पृ. ६. असंहतनान्दीकः—असंहता नान्दी यस्मिन् सः; यह 'अभिषेकसमयः' का विशेषण है। किसी-किसी पुस्तक में 'असंहतानन्दनान्दीकः' ऐसा भी पाठ है। आनन्दसूचिका आनन्दार्था वा नान्दी आनन्दनान्दी, असंहता आनन्दनान्दी यस्मिन् सः। जिस उत्सव में निरन्तर आनन्दसूचक बाजे बज रहे हैं। नान्दी बाजों की ध्वनि को भी कहते हैं। 'एकदा द्वादशमृदङ्गघोषो नान्दी' इति रङ्गराजः। विश्रान्तचारणानि-विश्रान्ताः चारणाः येषु तानि। जिन में मङ्गल गान करने वाले भाट अपने व्यापार से विरत हैं। चत्वरस्थानानि = राजप्रासाद के प्राङ्गण। कुछ लोगों के मत में यह पद शहर के चौराहों का सूचक है।

भाव—नट सूत्रधार को 'भाव' कहा है। इसका अर्थ है 'विद्वान्'। प्लवङ्गम अथवा प्लवङ्ग=वानर। 'कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः' अमरकोश। सभाजनोपस्थायिनः—सभाजनाय उपस्थायिनः। अभिनन्दन के लिये आए हुए लोग। नानादिगन्तपावनाः—जिन्होंने अपने भ्रमण से अनेक देश पवित्र किये हैं।

पृ. ७. यत्समाराधनाय—जिनके सत्कार के लिए। 'आ' यह स्मरणद्योतक निपात है। 'आ' अस्त्येतन्निमित्तम् = अच्छा! स्मरण आ गया। राजमहल के प्राङ्गण की शान्ति का यही कारण है।

पृ.८. अपत्यकृतिकां—कृता एव कृतिका, अपत्यं च सा कृतिका, तां तथाभूताम्। अथवा अपत्याय कृतिः ग्रहणं यस्याः सा, तां तथाभूताम्। अथवा अपत्यस्य कृतिः व्यापारो यस्याः तथाविधाम्। कृत्रिम पुत्री के रूप में। रोमपाद अथवा लोमपाद एक राजा का नाम था। भवभूति के अनुसार शान्ता राजा दशरथ की कन्या थी। उन्होंने उसे अपने मित्र राजा रोमपाद को कृत्रिम पुत्री के रूप में दे दिया था। अनन्तर रोमपाद ने उसका विवाह ऋष्यशृङ्ग के साथ कर दिया था। इस सम्बन्ध से ऋष्यशृङ्ग दशरथ के जामाता हुए। ईश्वरचन्द्र विद्यासागर ने इस कथा के समर्थन के लिये उत्तररामचरित के कलकत्ते के संस्करण में रामायण से कुछ पद्य उद्धृत किये हैं।

अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः।
स राजानं दशरथं प्रार्थयिष्यति भूमिपः ॥ १।१०।४ ॥
अनपत्योऽस्मि मे कन्यां सखे दातुं त्वमर्हसि।
शान्तां शान्तेन मनसा पुत्रार्थं वरवर्णिनीम् ॥ १।१०।५ ॥
श्रुत्वा दशरथो वाक्यं प्रकृत्या करुणात्मकः।
दास्यते तां तदा कन्यां शान्तमङ्गाधिपाय सः ॥ १।१०।६ ॥
प्रतिगृह्य च तां कन्यां स राजा विगतज्वरः।
स्वपुरं यास्यति प्रीतः कृतार्थेनान्तरात्मना ॥ १।१०।७ ॥
तां कन्यामृष्यशृङ्गाय प्रदास्यति च पार्थिवः।
ऋष्यशृङ्गोऽपि च प्रीतो कन्या भार्या भविष्यति ॥ १।१०।८ ॥

परन्तु ये श्लोक वाल्मीकि रामायण के बम्बई संस्करण में नहीं मिलते।

शान्ता क्षत्रिय की लड़की थी और ऋष्यशृङ्ग ब्राह्मण थे। तथापि प्राचीनकाल के नियमों के अनुसार उनका विवाह हो सकता था। मनु ने कहा है—

'शूद्रैव भार्या शूद्रस्य, सा च स्वा च विशः स्मृते।
ते च स्वा चैव राज्ञः स्युस्ताश्च स्वा चाग्रजन्मनः' ॥ ३। १३। ॥

विभाण्डक एक ऋषि का नाम था। ये ऋष्यशृङ्ग के पिता थे। द्वादशवार्षिकं-द्वादश वर्षाणि भावी इति द्वादशवार्षिकम्। बारह वर्षतक चलनेवाला। सत्रम्=यज्ञ

पृ. ९. तदनुरोधात् = तस्य अनुरोधात्। ऋष्यशृङ्ग की आग्रहपूर्वक प्रार्थना के कारण। कठोरगर्भामपि=पूर्ण गर्भ वाली भी। सीता गर्भिणी थी। ऐसे समय कौसल्या आदि को घर से जाना उचित नहीं था। परन्तु उधर ऋष्यशृङ्ग की प्रार्थना को टालना भी सम्भव नहीं था। अतः लाचार होकर पूर्ण गर्भ वाली भी सीता को छोड़ कर सब को यज्ञ में जाना पड़ा। कुछ लोग 'अनुरोधात्' का अर्थ 'अनुवर्तनात्' करते हैं। उन लोगों के अनुसार सम्पूर्ण वाक्य का अर्थ इस प्रकार है:—ऋष्यशृङ्ग ने गुरुजनों से प्रार्थना की कि सीता गर्भिणी है। उसका यहां आना ठीक नहीं। उनके इस कथन के अनुसार गुरुजन पूर्ण गर्भ वाली सीता को भी छोड़ कर गये। यह अर्थ ठीक नहीं है। यह अर्थ माना जाय तो मूल पाठ का 'अपि' व्यर्थ हो जाता है।

स्वजातिसमये—अपनी (नटों की) जाति के आचार के अनुसार। नटों का कार्य है राजा की स्तुति का गान करना। उपतिष्ठावः=चलो सेवा में उपस्थित हों, राजाको प्रसन्न करने के लिए चलें। 'उप' उपसर्गपूर्वक 'स्था' धातु का रूप आत्मनेपद में होना चाहिये। परन्तु 'वा लिप्सायां वक्तव्यम्' इस वार्तिक से विकल्प में परस्मैपद हुआ।

पृ. १०. मारिष—प्रधान नट को पुकारने के लिए सूत्रधार इस शब्द का प्रयोग करता है। अवचनीयता=बदनामी से छुटकारा। अपना कर्तव्य करते रहना चाहिये कुछ लोग बुरा कहेंगे इस डर से अपने कर्तव्य से च्युत न होना चाहिये। चाहे आप कितना भी अच्छा काम क्यों न करें दुर्जन तो उसमें दोष निकालेंगे ही।

पृ. १२. प्रस्तावना—नाटक का वह अंश प्रस्तावना कहलाता है जिसमें नटी, विदूषक अथवा पारिपार्श्वक नाम के नट सूत्रधार से बातें करते हैं और आगे-आगे वाले विषय की सूचना देते हैं। इसी का दूसरा नाम आमुख है। प्रस्तावना-उद्घात्यक, कथोद्घात, प्रयोगातिशय, प्रवर्तक और अवलगित-भेद से पाँच प्रकार की होती है। उनमें से यह प्रयोगातिशय नाम की प्रस्तावना है। जहाँ प्रकृत योग का अतिक्रम करके दूसरा विषय छेड़ दिया जाता है और उससे पात्र का प्रवेश होता है, वहाँ प्रयोगातिशय नाम की प्रस्तावना होती है। 'यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते। तेन पात्रप्रवेशश्चेत्, प्रयोगातिशयस्तदा' ॥ साहित्यदर्पण। यहाँ सूत्रधार

